दिग्दर्शिनी टीका—अहो विस्मये; अतएवाद्भुतः परमानिर्वचनीयः। तत्र हेतुमाह—यस्यानन्द रसाब्धेः कणः कणिका, तस्यार्द्धं तस्याल्पतरैकांशेनापि सह ब्रह्मानन्दः स्वस्वरूपानुभवसुखं तुलां साम्यं नार्हति न योग्यो भवति॥५१॥

भावानुवाद—अहो (विस्मयसे)! इसीलिए वहाँ पर भजनानन्दकी महिमा अनिर्वचनीय है। उसका कारण क्या है? उस परमानन्द रस समुद्रकी एक कणिकाका कण भी अर्थात् एक कणिकाके आधे अंश अथवा उससे भी कम अंशके साथ भी ब्रह्मानन्द और स्वस्वरूपानुभव सुखकी तुलना नहीं की जा सकती है॥५१॥

स वैकुण्ठस्तदीयाश्च तत्रत्यमखिलं च यत्।
तदेव कृष्णपादाब्जपरप्रेमानुकम्पितम्॥५२॥

श्लोकानुवाद—वह वैकुण्ठ, वैकुण्ठवासी भक्त, यहाँ तक कि वहाँके समस्त पदार्थ, सभी श्रीकृष्णके चरणकमलोंके प्रेमसे अनुगृहीत हैं॥५२॥

दिग्दर्शिनी टीका—अतएव स उक्तलक्षणो वैकुण्ठलोकः; तत् सर्वमेव न त्वन्यन्मादृशम्। कृष्णपादाब्जाभ्यां परमप्रेम्णा कृत्वा; यद्वा तयोः परम् प्रेम्णैव कर्त्तृणानुगृहीतं तदित्येकशेषत्वेन नपुंसकत्वम्॥५२॥

भावानुवाद—अतएव उस परमानन्दस्वरूप वैकुण्ठलोक, वैकुण्ठवासी और वहाँके सभी पदार्थोंकी महिमाके विषयमें और अधिक क्या कहूँ? अथवा वे सभी श्रीकृष्णके चरणकमलोंके प्रेमसे अनुगृहीत हैं॥५२॥

तादृक्कारुण्यपात्राणां श्रीमद्वैकुण्ठवासिनाम्।
मत्तोऽधिकतरस्तत्तन्महिमा किं नु वर्ण्यताम्॥५३॥

श्लोकानुवाद—श्रीकृष्णकी ऐसी कृपाके पात्र वैकुण्ठवासियोंकी मुझसे भी अधिक जो महिमा है, उसके विषयमें और क्या कहूँ?॥५३॥

दिग्दर्शिनी टीका—वैकुण्ठवासिनां श्रीमताञ्च प्रत्येकमनन्तकोटिं ब्रह्माण्डवैभवेषु नित्यसत्यमहासुखमयेषु सत्स्वपि विचित्र प्रेमभक्तिसम्पत्तिरेव ज्ञेया, तयैव सर्वविलक्षण-परमोत्कर्षभरसिद्धेः॥५३॥

भावानुवाद—वैकुण्ठमें वास करनेवाले सभी भक्त अनन्त कोटि ब्रह्माण्डोंके वैभवसे युक्त हैं तथा वह वैभव भी परमसुखमय, नित्य, सत्य और प्रेमभक्ति सम्पन्न है। अतएव उनकी सर्वविलक्षण महा उत्कर्षता स्वतःसिद्ध है॥५३॥

पाञ्चभौतिकदेहा ये मर्त्यलोकनिवासिनः।
भगवद्भक्तिरसिका नमस्या मादृशां सदा॥५४॥

श्लोकानुवाद—और अधिक क्या कहूँ? मर्त्यलोकमें रहनेवाले पाञ्चभौतिक देहधारी भगवद्भक्तिरसिक मनुष्य भी मेरे जैसे देवताओंके लिए सदा वन्दनीय हैं॥५४॥

दिग्दर्शिनी टीका—'मादृशां नमस्या' इति तेऽपि मत्तोऽधिकतरा इत्यर्थः। तथा च श्रीनारायणव्यूहस्तोत्रे—*'ये त्यक्तलोक धर्मार्था विष्णुभक्तिवशं गताः। भजन्ति परमात्मानं तेभ्यो नित्यं नमो नमः॥'* इति॥५४॥

भावानुवाद—'मेरे जैसे देवताओंके लिए सदा वन्दनीय हैं' इत्यादि वाक्य मर्त्यलोकमें रहनेवाले सभी भक्तोंके लिए है, क्योंकि वे भी श्रीकृष्णके चरणकमलोंके परम प्रेमके कृपापात्र हैं, इसलिए वे मुझसे भी अधिक श्रेष्ठ हैं। तथा श्रीनारायणव्यूहस्तोत्रमें भी उक्त है—"जिन्होंने सब प्रकारके लोकधर्मका सर्वथा परित्यागकर केवल श्रीविष्णुभक्तिका

ही सम्पूर्णरूपसे आश्रय ग्रहण किया है अर्थात् जो परमात्मारूपी भगवान्‌की सेवा कर रहे हैं, उनको हम पुनः-पुनः प्रणाम करते हैं" ॥५४॥

श्रीकृष्णचरणाम्भोजार्पितात्मानो हि ये किल।
तदेकप्रेमलाभाशा त्यक्तार्थजनजीवनाः ॥५५॥
ऐहिकामुष्मिकाशेष–साध्य–साधन–निस्पृहाः ।
जाति–वर्णाश्रमाचारधर्माधीनत्वपारगाः ॥५६॥
ऋणत्रयादनिर्मुक्ता वेदमार्गातिगा अपि।
हरिभक्तिबलावेगादकुतश्चिद्भयाः सदा॥५७॥
नान्यत्किमपि वाञ्छन्ति तद्भक्तिरसलम्पटाः।
स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः ॥५८॥

श्लोकानुवाद—जिन्होंने श्रीकृष्णचरणोंमें प्रेम-प्राप्तिकी अभिलाषासे उन्हींके श्रीचरणोंमें आत्मसमर्पण किया है, अर्थात् समस्त अर्थ, स्वजन तथा जीवनके प्रति ममता त्याग दी है और जो इहलोक तथा परलोकके सभी साध्यों और साधनोंकी कामनासे रहित होकर वर्णाश्रम-धर्मके पाशसे मुक्त हो गये हैं, अर्थात् तीन प्रकारके ऋणोंसे मुक्त होकर, वेदविहित मार्गका अतिक्रमण करके, हरिभक्तिके प्रभावसे सर्वदा निर्भय हो गये हैं, ऐसे भगवद्भक्तिरसिक भक्त स्वर्ग, मोक्ष और नरकको एक समान देखते हैं तथा किसी वस्तुकी भी वाञ्छा नहीं करते हैं॥५५-५८॥

दिग्दर्शिनी टीका—भक्तिरसिकतां दर्शयंस्तान् विशिनष्टि—श्रीकृष्ण इति चतुर्भिः। प्रभोश्चरणाम्भोजयोर्यदेकं प्रेम, तल्लाभे आशया वाञ्छामात्रेण त्यक्ता अर्था धनानि जनाः पुत्र-कलत्रादयः जीवनञ्च प्राणाद्यपेक्षणं यैस्ते। अतएव ऐहिकानी एतल्लोक-सम्बन्धीनि आमुष्मिकानि च परलोकसम्बन्धिनी यान्यशेषाणि साध्यानि विषयभोगादि-सुखानि तत् साधनानि न धनोपार्जन धर्माचरणादीनि तेषु निस्पृहाः कामहीनाः; अतएव जातौ मनुष्यत्वादौ, वर्णे विप्रत्वादौ, आश्रमे ब्रह्मचर्यादौ, आचारधर्मास्तेषु यदधीनत्वं नित्यनैमित्तिकत्वेनावश्यकर्त्तव्यत्वात्तत्तत्पारतन्त्र्यं तस्मात् पारगास्तदतिक्रान्ता इत्यर्थः। श्रीकृष्णचरणाम्भोजे कृतात्मनिवेदनत्वात् ऋणत्रयं जन्ममात्रेण देवर्षिपितृणां यानि त्रीणि ऋणानि जातानि तस्माद् यज्ञाध्ययनपुत्रोत्पादनाभावेनानिर्मुक्ता अपि एवं स्वधर्माद्यनुष्ठाना भावाद्वेदमार्गमतिक्रान्तापि न विद्यते कुतश्चिदपि *'ऋणैस्त्रिभिर्द्विजो*

जातो देवर्षि पितृणां प्रभो। यज्ञाध्ययन पुत्रैस्तान्यनिस्तीर्य त्यजन् पतेत्।' (श्रीमद्भा॰ १०/८४/३९) इति दशमस्कन्धोक्त मुनिगणवचनादि प्रामाण्येन विधिनिषेध–अतिक्रमाद्यमादिभ्योऽपि भयं येषां ते, तत्र हेतुः—हरिभक्तेर्बलं प्रभावस्तस्यावेगः सम्यग् जवः प्रागल्भ्यमित्यर्थः; तस्मादयं हेतुश्च पूर्वत्रापि सर्वत्र द्रष्टव्यः। एवं भक्तस्य कर्मष्वनधिकारात् पापाद्यभावेन सदा स्वत एवाकुतश्चिद्भयत्वं युक्तमेव। यथोक्ता श्रीभगवता एकादशस्कन्धे (श्रीमद्भा॰ ११/२०/९) *'तावत् कर्माणि कुर्वीत न निर्विद्येत यावता। मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते॥'* इति। श्रीगीतायाञ्च (श्रीगीता १८/६६)—*'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज। अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥'* इति। श्रीनारदेनापि प्रथमस्कन्धे (श्रीमद्भा॰ १/५/१७)—*'त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेर्भजन्नपक्वोऽथ पतेत्ततो यदि। तत्र क्व वाभद्रमभूदमुष्य किं को वार्थ आप्तोऽभजतां स्वधर्मतः॥'* इति। इत्थं भयराहित्यमुक्तवा सर्व नैरपेक्ष्यमाह—नेति। अन्यद्भगवत्–सारुप्यादिकमपि अतएव ब्रह्मलोकादि विषयभोगं निर्वाणसुखञ्च ते परमहेयत्वेन भक्तिरस विघातकत्वेन वा नरकयातनावत् पश्यन्तीत्याह—स्वर्गेति। तुल्यं समानमेव स्वस्यार्थं प्रयोजनं फलं वा द्रष्टुं शीलं येषामिति तथा ते। तथा च श्रीशिवस्यैव वाक्यं षष्ठस्कन्धे (श्रीमद्भा॰ ६/१७/२८)—*'नारायणपराः सर्वे न कुतश्चन बिभ्यति। स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः॥'* इति॥५५–५८॥

भावानुवाद—भक्तिरसिकोंकी रसिकता प्रदर्शन करनेके लिए 'श्रीकृष्ण' इत्यादि चार श्लोकोंका अन्वय हुआ है। जो श्रीकृष्णके चरणकमलोंकी प्रेमरूपी सम्पत्तिको प्राप्त करनेके लिए अभिलाषी है और उसके लिए जिन्होंने अपना सर्वस्व अर्थ अर्थात् धन, जन, पुत्र, पत्नी आदि तथा अपने जीवनके प्रति ममताका भी सर्वथा त्याग कर दिया है; अतएव ऐहिक और पारत्रिक समस्त प्रकारके साध्य और साधनोंकी कामनासे रहित हो गये हैं, (यहाँ पर ऐहिक कहनेसे इस जगतसे सम्बन्धित सभी भोग सुखोंको और पारत्रिक कहनेसे परलोकसे सम्बन्धित विषय भोगादि सुख और धन उपार्जन और धर्म आचरण आदिको समझना होगा) वे वर्णाश्रम–धर्मके पालनरूप धर्मकी अधीनतासे अतीत हो गये हैं। यहाँ पर 'वर्ण' कहनेसे ब्राह्मण–क्षत्रिय आदि चार वर्ण और 'आश्रम' कहनेसे गृहस्थ–वानप्रस्थ आदि चार आश्रम समझना चाहिए। अतएव उक्त चारों वर्णों और चारों आश्रमोंमें पालन किये जानेवाले धर्मकी जो अधीनता है अर्थात् नित्य–नैमित्तिक अवश्य पालनीय

कर्मोंकी अधीनतासे मुक्त होकर जिन्होंने श्रीकृष्णके चरणकमलोंमें आत्मसमर्पण किया है, वे तीनों प्रकारके ऋणसे मुक्त हो गये हैं।

आशंका हो सकती है कि मनुष्य अपने जन्मसे ही देव, ऋषि और पितृोंके ऋणसे आबद्ध होता है तथा वेदविहित यज्ञ आदिके अनुष्ठान, अध्ययन और पुत्र आदिको जन्म देकर ही वह उन ऋणोंसे मुक्त होता है। अतएव भक्त अपने स्वधर्मका अनुष्ठान न करनेसे उक्त तीन प्रकारके ऋणोंसे किस प्रकार मुक्त हो सकता है? सम्भवतः इसीलिए उक्त स्वधर्म आदिके अनुष्ठान और वेदमार्ग आदिका उल्लंघन कहीं भी नहीं देखा जाता है, क्योंकि शास्त्रोंमें उल्लेख है—"देवऋण, ऋषिऋण और पितृऋणसे आबद्ध होकर द्विज जन्म ग्रहण करना होता है, किन्तु यज्ञ, वेदाध्ययन और पुत्र उत्पत्ति द्वारा उस ऋणसे उऋण न होने पर पतित होना पड़ता है।" इत्यादि श्रीमद्भागवतके दशम-स्कन्धमें कहे गये मुनियोंके वचनोंसे भी प्रमाणित होता है कि विधि-निषेधका उल्लंघन करनेसे यम आदिसे भी भय रहता है। अतएव इस प्रकारके भयसे निवृत्तिका क्या उपाय है? इसके लिए कह रहे हैं—भक्तजन वेदविहित मार्गका उल्लंघन करने पर भी हरिभक्तिके प्रभावसे सदैव निर्भय रहते हैं। अर्थात् तीव्र हरिभक्तिके प्रभावसे वे सर्वदा निर्भय रहते हैं (इस विषयका पहले भी वर्णन किया गया है और बादमें भी विस्तृतरूपसे विवेचन प्रस्तुत होगा)। वास्तवमें ऐसे भक्तोंका कर्ममें अनधिकार होनेके कारण पाप आदिके अभावमें उनको स्वतः ही 'भय रहित' कहना युक्ति-संगत ही है। अर्थात् भक्ति स्वभावतः प्रबल शक्तिसम्पन्ना है, इसलिए उसका आश्रय ग्रहण करनेसे ज्ञान-कर्मादिमें अधिकार नहीं रहता। अतएव स्वधर्मका अनुष्ठान न करने पर भी उनका पतन नहीं होता। श्रीमद्भागवतमें भगवान् स्वयं कहते हैं—"जब तक विषयोंसे अनासक्ति न हो अथवा मेरी कथामें श्रद्धा उत्पन्न न हो जाय, तब तक नित्य नैमित्तिक कर्मोंका आचरण करना होता है। अर्थात् श्रद्धासे पहले ही कर्माधिकार है, किन्तु श्रद्धा उत्पन्न होने पर केवला भक्तिमें अधिकार होता है, कर्ममें नहीं।" श्रीगीतामें भी भगवान् कहते हैं—"सभी धर्मोंका त्याग करके केवलमात्र मेरा आश्रय ग्रहण करो, मैं तुम्हें समस्त पापोंसे

अर्थात् कर्म बन्धन आदिसे मुक्त कर दूँगा। उन धर्मोंके त्यागके लिए दुःख मत करना—भय मत करना।" प्रथम-स्कन्धमें श्रीनारद कहते हैं—"मनुष्य स्वधर्मका त्याग करके श्रीहरिके चरणकमलोंकी सेवा करते-करते यदि मृत्युग्रस्त होता है अथवा अन्य किसी कारणसे अर्थात् अपरिपक्व अवस्थामें पथभ्रष्ट होने पर स्वधर्म त्याग करनेसे भी उसका किसी प्रकारका अमंगल नहीं होता। दूसरी ओर श्रीहरिकी भक्ति न करके केवल स्वधर्म पालन द्वारा कौनसा व्यक्ति अपने उद्देश्यको प्राप्त करनेमें सफल हुआ है? अर्थात् कोई भी नहीं हुआ है।"

इस प्रकार भक्तके निर्भय होनेकी बात बतलाकर अब सर्वत्र उनके निरपेक्ष रहनेकी बात 'नान्यत्' इत्यादि श्लोकमें कह रहे हैं। अन्य विषय भोगोंकी बात और अधिक क्या कहूँ? भगवद्भक्त भगवान्के सारूप्य प्राप्त करनेकी इच्छा भी नहीं रखते। वे ब्रह्मलोक आदिके विषयभोग और निर्वाण आदि मुक्तिको भी भक्तिरसमें बाधास्वरूप जानकर अत्यन्त तुच्छ वस्तुके समान उसका परित्याग करते हैं और उसको नरकमें भोगी जानेवाली यन्त्रणाके समान दुःखदायी समझते हैं। अर्थात् स्वर्गसुख, मोक्षसुख और नरकयन्त्रणाको भक्तिसुखसे रहित जानकर भक्तगण उनमें तनिक भी रुचि नहीं लेते हैं तथा इन सबको एक ही समान समझते हैं। श्रीशिवने भी यही कहा है—"नारायण-परायण व्यक्ति कभी भी किसीसे भयभीत नहीं होते तथा स्वर्ग, मुक्ति और नरकको एक समान देखते हैं" ॥५५-५८॥

भगवानिव सत्यं मे त एव परमप्रियाः।
परमप्रार्थनीयश्च मम तैः सह संगमः ॥५९॥

श्लोकानुवाद—हे नारद! मैं सत्य कहता हूँ कि भगवान्के समान उनके भक्त भी मुझे परम प्रिय हैं। मैं उन भक्तोंके सङ्ग प्राप्तिकी प्रार्थना करता हूँ॥५९॥

दिग्दर्शिनी टीका—ते भगवद्भक्ता एव न तु नन्दीश्वरादयः। तदुक्तं श्रीशिवेनैव चतुर्थस्कन्धेऽपि (श्रीमद्भा॰ ४/२४/३०) दशप्रचेतसः प्रति—'*अथ भागवता यूयं प्रियाः स्थ भगवान् यथा। न मद्भागवतानाञ्च प्रेयानन्योऽस्ति कर्हिचित्॥*' इति॥५९॥

भावानुवाद—हे नारद! मैं सत्य कहता हूँ, वे सब भगवद्भक्त मुझे जिस प्रकार प्रिय हैं, मेरे ये अनुचर नन्दीश्वर आदि मुझे उस प्रकार प्रिय नहीं हैं। यह बात मैंने दस प्रचेताओंको भी कही है—"हे राजपुत्रों! तुम परमभागवत हो, इसलिए भगवान्‌की भाँति मेरे भी प्रिय हो। और फिर भगवद्भक्तोंके लिए भी मेरे अतिरिक्त और कोई प्रियतम नहीं है" ॥५९॥

नारदाहमिदं मन्ये तादृशानां यतः स्थिति।
भवेत् स एव वैकुण्ठो लोको नात्र विचारणा ॥६०॥

श्लोकानुवाद—हे नारद! मैं तो यह मानता हूँ कि जहाँ इस प्रकारके भक्त रहते हैं, वहीं वैकुण्ठ है। इस विषयमें किसी भी प्रकारसे सोचने या विचारनेकी जरूरत नहीं है ॥६०॥

दिग्दर्शिनी टीका—न च मर्त्यलोक निवासित्वेन तेषां वैकुण्ठवासिभ्यो न्यूनत्वमित्याह—नारदेति। यतो यत्र स्थाने; अत्रास्मिन् सिद्धान्ते विचारणा मर्त्यलोकत्वादि-भेदेन कोऽपि विमर्शो नास्ति वैकुण्ठवद् भक्तिसम्पत्तेः भगवदवस्थानाच्च; यथोक्तं भगवता—*'नाहं वसामि वैकुण्ठे न योगिहृदये रवौ। मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद॥'* इति ॥६०॥

भावानुवाद—मृत्युलोकमें निवास करनेवाले भगवद्भक्तोंकी महिमा क्या मायातीत वैकुण्ठलोकवासी भक्तोंसे कम हैं? इस प्रश्नकी आशंका करके ही कह रहे हैं—हे नारद! ऐसे भक्त जिस किसी भी स्थानमें वास करते हैं, वहीं वैकुण्ठलोक है। इस सिद्धान्तके अनुसार मृत्युलोकमें वास करनेवाले और वैकुण्ठलोकमें वास करनेवाले भक्तोंमें किसी भी प्रकारसे छोटे-बड़ेका विचार नहीं है। मैं तो यही मानता हूँ, क्योंकि मृत्युलोकमें निवास करनेवाले भक्त भी यदि वैकुण्ठमें वास करनेवाले भक्तोंके समान ही भक्तिको प्राप्त करते हैं, तब तो उनमें भक्ति होनेके कारण भगवान् भी वहाँ पर निवास करते हैं, अतः इस विषयमें किसी प्रकारके सोच विचारकी आवश्यकता नहीं है। इसी विचारको भगवान्‌ने भी कहा है—"मैं न तो वैकुण्ठमें निवास करता हूँ और न ही योगीके हृदयमें, मैं तो वहीं निवास करता हूँ, जहाँ पर मेरे भक्त मेरा नाम-गान करते हैं" ॥६०॥

कृष्णभक्तिसुधापानाद्देहदैहिकविस्मृतेः ।
तेषां भौतिक देहेऽपि सच्चिदानन्दरूपता ॥६१ ॥

श्लोकानुवाद—यदि मर्त्यलोकवासी मनुष्य श्रीकृष्ण-भक्तिरूपी अमृतका पान कर अपनी देह तथा देह-सम्बन्धीय विषय-भोगादिको भूल जाते हैं, तब उनके उस पाञ्चभौतिक देहमें भी सच्चिदानन्दरूपता सिद्ध होती है ॥६१ ॥

दिग्दर्शिनी टीका—नन्वेते पाञ्चभौतिक विनश्वरशरीरस्ते च सच्चिदानन्दविग्रहा-स्तत्राह—कृष्णेति। देहयोः स्थूल-सूक्ष्मशरीरयोरहंतास्पदयोः दैहिकानाञ्च तत्तत्सम्बन्धिनां ममत्वास्पदानां पुत्र कलत्रादीनां विषय भोगादीनाञ्च विस्मृतेरनुसन्धानाभावात् पाञ्चभौतिकदेहेऽपि तेषां मर्त्त्यलोकनिवासिभक्तानां सच्चिदानन्दविग्रहतैव स्यात्; अयमर्थः—तत्तद्धेतुक विघ्नबाधा-राहित्येन निरन्तर भक्तिसुधापान-सम्पत्त्या वैकुण्ठवासि-साम्यापत्तेः पाञ्चभौतिक शरीरिणामपि तेषां सच्चिदानन्दरूपतैव पर्यवस्यतीत। यद्वा मर्त्त्यशरीरमपि सच्चिदानन्दरूपेण परिणमेदित्यर्थः। यथोक्तं, श्रीमैत्रेयेण चतुर्थस्कन्धे (श्रीमद्भा॰ ४/१२/२९) श्रीध्रुवस्य परमपदारोहण-प्रसङ्गे—*'परीत्याभ्यर्च्य धिष्णाग्रं पार्षदावभिवन्द्य च। इयेष तदधिष्ठातुं विभ्रद्रूपं हिरण्मयं॥'* इति। व्याख्यातञ्चात्र श्रीधरस्वामिपादैः—'तदेव रूपं हिरण्मयं प्रकाश बहुलं विभ्रत् सन्' इति हिरण्मयत्वं च प्रकाशमयत्वं चिद्घनत्वादिभि ज्ञेयम्। लोके च रसविशेष पानेन शरीरस्य रम्यरूपान्तर प्राप्तिरिति ज्ञेयम् ॥६१ ॥

भावानुवाद—यदि कहो कि मर्त्यलोकवासी भक्तोंका पाञ्चभौतिक देह नश्वर है और वैकुण्ठवासी भक्तोंका विग्रह (देह) सच्चिदानन्द है, अतः वैकुण्ठवासी भक्त श्रेष्ठ हैं। इसी आशंकाके समाधानके लिए 'कृष्णभक्ति' इत्यादि श्लोक कह रहे हैं। मृत्युलोकवासी साधक यदि श्रीकृष्णभक्तिरूप सुधापान करनेसे अहंकारकी आधार स्थूल और सूक्ष्म देह और उससे सम्बन्धित ममताके आधार पुत्र-पत्नी आदि और विषय भोगोंको भूल जाता है, तब उन सभी साधकोंके पाञ्च-भौतिक शरीरमें भी सच्चिदानन्दरूपता सिद्ध होती है। तात्पर्य यह है कि देह और देह सम्बन्धी स्त्री-पुत्र आदि तथा विषय भोगादिके लिए विषयोंमें अभिनिवेश ही भक्तिका बाधक है। किन्तु मृत्युलोकवासी भक्तोंमें ऐसे विघ्न-बाधाके न होनेके कारण निरन्तर भक्तिरूप-अमृतका पान करनेसे उनकी देह वैकुण्ठवासी भक्तोंकी भाँति सच्चिदानन्दमय

रूपमें पर्यवसित होती है। अतएव वैकुण्ठवासी भक्त जिस प्रकार बिना किसी विघ्न-बाधाके निरन्तर भक्तिरूपी अमृतका पान करते हैं, उसी प्रकार मर्त्यलोकवासी साधक भी बाधा रहित होकर भक्तिका आचरण और भक्तिरूपी अमृतका पान करते हैं। अतएव मर्त्यलोकवासी भक्त और वैकुण्ठलोकवासी दोनों ही एक समान हैं। अथवा उनका मर्त्य-शरीर भी सच्चिदानन्दमय रूपमें परिणत हुआ है, ऐसा समझना चाहिए।

इस विषयमें ध्रुव महाराजके वैकुण्ठ गमनके प्रसंगमें मैत्रेय मुनि कह रहे हैं—"तदुपरान्त ध्रुवने विमानकी प्रदक्षिणा और वन्दना करके दोनों पार्षदोंका अभिवादन किया तथा तेजोमय रूपको धारण करके उस विमानमें चढ़ गए।" इस श्लोककी व्याख्यामें श्रील श्रीधरस्वामीपादने 'हिरण्मयं' शब्दका अर्थ प्रकाशमय अर्थात् प्रकाशकी अधिकतासे युक्त चिद्घन (रूप) किया है। लौकिक जगतमें भी देखा जाता है कि किसी विशेष रसपान द्वारा ही शरीरमें रम्यता अथवा रूपान्तर आ जाता है॥६१॥

परं भगवता साकं साक्षात्क्रीड़ा–परम्पराः।
सदा नु भवितुं तर्हि वैकुण्ठोऽपेक्ष्यते क्वचित्॥६२॥

श्लोकानुवाद—इस प्रकार मर्त्यलोकमें सब कुछ सिद्ध होने पर भी भक्तगण केवल भगवान्‌के साथ सदैव साक्षात् मिलने तथा उनके साथ विविध क्रीड़ा करनेके लिए कभी-कभी वैकुण्ठलोक प्राप्तिकी इच्छा करते हैं॥६२॥

दिग्दर्शिनी टीका—ननु तर्हि वैकुण्ठलोकस्तद्वासिनश्च किमिति पूर्वं तथा श्लाघिताः तत्राह—परमिति द्वाभ्याम्। सर्वमन्यदिहैव सिद्धं केवलं विचित्रविलासश्रेणीः लक्ष्मीकान्तेन समं निरन्तरं साक्षादनुभवितुमेव वैकुण्ठलोकोऽपेक्षते। तत्रैव तथा तत्तत् सहजसिद्धेर्नत्वन्यत्र क्वापि एवमेवाविरततत्तद्रस परम्पराकुण्ठता राहित्येन तस्य लोकस्य वैकुण्ठत्वं सिध्यतीति भावः। क्वचित् कदाचिदिति हृदये परिस्फुरता भगवतोऽन्तर्द्धानादौ सति तथा प्रेमविशेषाविर्भावेन भगवत् साक्षाद्-दर्शनादि लोभ-उत्कण्ठाभरे जाते च सतीति दिक्॥६२॥

भावानुवाद—यदि आपत्ति हो कि तब फिर आपने पहले वैकुण्ठलोक और वैकुण्ठमें वास करनेवाले सभी भक्तोंकी प्रशंसा क्यों की? इसी

प्रश्नके उत्तरमें कह रहे हैं कि यद्यपि इस मृत्युलोकमें ही सब कुछ सिद्ध होता है, तथापि केवल श्रीलक्ष्मीकान्तके साथ सदैव साक्षात् रूपमें क्रीड़ा–परम्परा अर्थात् विचित्र लीलाका साक्षात् अनुभव करनेके लिए मर्त्यलोकवासी भक्त कभी–कभी वैकुण्ठलोक वासकी इच्छा करते हैं, क्योंकि वैसी लीलाका अनुभव वैकुण्ठलोकमें सहज ही प्राप्त हो सकता है, किन्तु अन्य स्थानों पर नहीं। 'वैकुण्ठ' शब्दका संकेतिक अर्थ यह है कि वहाँ कुण्ठा या संकोच नहीं है, इसलिए वहाँ बिना किसी बाधाके निरन्तर विचित्र विलास स्वतः ही प्राप्त होता है। इस मर्त्यलोकमें भक्तोंके द्वारा भक्ति अनुशीलन कालमें कभी किसी समय उनके हृदयमें लीला करते हुए भगवान् स्फूर्ति प्राप्त करते हैं और फिर अन्तर्धान हो जाते हैं। किन्तु उस अन्तर्धानके समय भक्तके हृदयमें जिस प्रेमका आविर्भाव होता है, वह अत्यधिक (तीव्र) उत्कण्ठामय प्रेम भगवान्के साक्षात् दर्शनकी लालसाको और भी अत्यधिक तीव्र बना देता है, इसलिए वे वैकुण्ठ–प्राप्तिकी इच्छा करते हैं॥६२॥

अतो हि सर्वे तत्रत्या मयोक्ताः सर्वतोऽधिकाः।
दयाविशेष विषयाः कृष्णस्य परमप्रियाः॥६३॥

श्लोकानुवाद—इसलिए मैंने उन वैकुण्ठवासियोंकी सर्वाधिक महिमाका वर्णन किया है, क्योंकि वास्तवमें वे श्रीकृष्णके परम प्रिय तथा उनकी कृपाके विशेष पात्र हैं॥६३॥

दिग्दर्शिनी टीका—तत्रत्या वैकुण्ठवासिनः सर्वतः सर्वेभ्यो मुक्तेभ्योऽस्मत्तोऽप्राप्त–वैकुण्ठेभ्योऽपि भगवद्भक्तेभ्योऽधिकाः श्रेष्ठाः। तत्रोक्तमेव मुख्यं हेतुं दर्शयति—दयेति। यतः परमप्रियाः; यद्वा, त एव कृष्णस्य दयाविशेष–विषयाः। अतः परमप्रियाश्चेति निगमनम्॥६३॥

भावानुवाद—अतएव मैंने जिन वैकुण्ठवासी भक्तोंकी महिमाका गान किया है, वे हमारे समान मुक्त हैं तथा ऐसे भक्त जिन्होंने अभी तक वैकुण्ठको प्राप्त नहीं किया है, उनसे भी श्रेष्ठ हैं। इसका मुख्य कारण 'दयाविशेष' इत्यादि पदों द्वारा बता रहे हैं। वे श्रीकृष्णके परम प्रिय हैं अथवा वे श्रीकृष्णके विशेष कृपापात्र होनेसे मेरे भी परमप्रिय हैं॥६३॥

श्रीपार्वती उवाच—

तत्रापि श्रीविशेषेण प्रसिद्धा श्रीहरिप्रिया।
तादृग्वैकुण्ठ–वैकुण्ठवासिनामीश्वरी हि या॥६४॥

श्लोकानुवाद—श्रीपार्वतीने कहा—हे नारद! ऐसा प्रसिद्ध है कि उस वैकुण्ठलोकमें भी श्रीमहालक्ष्मी भगवान् श्रीहरिकी अत्यन्त प्रिया हैं, क्योंकि वे उस वैकुण्ठ तथा वैकुण्ठवासियोंकी ईश्वरी हैं॥६४॥

दिग्दर्शिनी टीका—एवं वैकुण्ठवर्णनान्तर्महालक्ष्मी-माहात्म्यविशेषशून्यं भर्त्तृ-गदितमाकर्ण्य तदसहमाना क्रुध्यन्तीव लक्ष्मीं प्रियसखीं पार्वत्याह—तत्रापीति। वैकुण्ठेऽपि श्रीमहालक्ष्मीः श्रीहरिप्रियेति। विशेषेण अधिक्येन कृष्णस्य परमप्रियेति पूर्वेणैवान्वयः। या श्रीः हरिप्रियेत्येव प्रसिद्धा हरिप्रियेति तत्संज्ञत्वात्; यद्वा, तत्रापि विशेषेण श्रीः श्रीहरिप्रियेति प्रसिद्धेति वाक्यसमाप्तिः। तत्रहेतुः—या तादृक् तथाभूतो यो वैकुण्ठः, तादृशाश्च ये वैकुण्ठवासिनस्तेषां सर्वेषामपीश्वरी परमपूजनीया। हि निश्चितं, युक्त युक्त्या प्रामाण्यात्॥६४॥

भावानुवाद—इस प्रकार वैकुण्ठके माहात्म्यका वर्णन करते हुए जब श्रीशिवने श्रीमहालक्ष्मीके माहात्म्यका वर्णन नहीं किया, तब श्रीमहालक्ष्मीकी प्रिय सखी श्रीपार्वतीने उसे सहन न कर पानेके कारण क्रोधावेशमें आकर कहा—हे नारद! उस वैकुण्ठलोकमें भी श्रीमहालक्ष्मी श्रीहरिकी अत्यन्त प्रिया रूपमें प्रसिद्ध है, तथा वे ही श्रीहरिप्रियाके रूपमें जानी जाती हैं, क्योंकि वे उस वैकुण्ठ और सभी वैकुण्ठवासियोंकी ईश्वरी हैं, परम पूजनीया हैं—यही युक्तिपूर्ण प्रमाण है॥६४॥

यस्याः कटाक्षपातेन लोकपालविभूतयः।
ज्ञानं विरक्तिर्भक्तिश्च सिध्यन्ति यदनुग्रहात्॥६५॥

श्लोकानुवाद—श्रीलक्ष्मीकी कृपादृष्टिसे ही लोकपालगण विभूतियाँ प्राप्त करते हैं तथा उनकी कृपासे ज्ञान, वैराग्य और भक्ति सिद्ध होती है॥६५॥

दिग्दर्शिनी टीका—ज्ञानं जीवेश्वरतत्त्व विषयकम्; विरक्तिर्भोग मोक्षादि वैतृष्ण्यम्; भक्तिर्भगवद्विषया यस्याः श्रियोऽनुग्रहात् सिध्यन्ति। यथोक्तं वैष्णवे—*'यतः सत्त्वं ततो लक्ष्मीः सत्त्वं भूत्यनुसारि च। निःश्रीकानां कुतः सत्त्वं विना तेन गुणाः कुतः॥'* इति। गुणा ज्ञान वैराग्यादयः; तथा तत्रैव इन्द्रकृत लक्ष्मीस्तुतौ—*'यज्ञविद्या*

महाविद्या गुह्यविद्या च शोभने। आत्मविद्या च देवि त्वं विमुक्ति फलदायिनी॥' इति। यद्वा, विभूति-विरक्ति-भगवद्भक्ति ज्ञान ब्रह्मज्ञान दातृत्वं क्रमेणोक्तम्। चतुर्विद्यारूपत्वाच्चतुवर्गदातृत्वं; तथा विमुक्तेः फलं भक्तिस्तद्दायिनी चेति॥६५॥

भावानुवाद—श्रीमहालक्ष्मीकी कृपासे जीव और ईश्वर-तत्त्व विषयक ज्ञान तथा भोग-मोक्ष आदिमें उदासीनता होनेसे वैराग्य सिद्ध होता है और भगवद्विषयनी भक्तिकी भी प्राप्ति होती है। इसीलिए वैष्णवलोग कहते हैं कि जहाँ पर सत्त्वगुण है, वहीं श्रीलक्ष्मी हैं, क्योंकि सत्त्वगुण श्रीलक्ष्मीका अनुसरण करता है। अतएव जहाँ श्री (लक्ष्मी) नहीं हैं, वहाँ सत्त्वगुण कैसे हो सकता है और फिर सत्त्वगुणके बिना सद्गुण भी कहाँ हो सकते हैं? यहाँ पर सद्गुणसे ज्ञान और वैराग्य आदिको समझना चाहिए, क्योंकि उक्त पुराणमें इन्द्र द्वारा किये गये श्रीलक्ष्मीके स्तवमें कहा गया है—"हे शोभने महालक्ष्मी! तुम ही यज्ञविद्या हो, तुम ही महाविद्या हो, तुम ही गुह्यविद्या हो, तुम ही आत्मविद्या हो। हे देवि! तुम ही मुक्ति देनेवाली हो।" अथवा वे महालक्ष्मी ही विभूति, विरक्ति, भगवद्भक्ति और ब्रह्मज्ञान प्रदान करनेकी शक्ति रखनेवालीके रूपमें क्रमशः वर्णित हुई हैं। अथवा उक्त चतुर्विद्यारूपा श्रीलक्ष्मी ही चतुर्वर्ग (धर्म, अर्थ, काम, मोक्ष) प्रदान करती हैं। इसके अलावा इन चतुर्वर्गोंसे अतीत जो भगवद्भक्ति है, उसको भी प्रदान करती हैं॥६५॥

या विहायादरेणापि भजमानान् भवादृशान्।
वव्रे तपोभिराराध्य निरपेक्षं च तं प्रियम्॥६६॥

श्लोकानुवाद—श्रीलक्ष्मीने आप (श्रीनारद) जैसे उनका भजन करनेवाले सभी व्यक्तियोंको परित्याग करके तपस्या द्वारा, निरपेक्ष भगवान्‌की आराधना करके उन्हें अपने प्रियतम रूपमें वरण किया है॥६६॥

दिग्दर्शिनी टीका—इदानीं तस्याः सर्वनैरपेक्ष्येण केवलं परमप्रेम्णा भगवद्भजनान्माहात्म्यविशेषमाह—येति। निरपेक्षं तदपेक्षारहितमपि आत्मारामत्वात् पूर्णकामत्वाच्च। तथापि वरणे हेतुः—प्रियमिति, तदेकप्रियत्वादित्यर्थः। एतादृशस्य कथं प्राप्तिः स्यात्तत्राह—तपोभिर्वा विचित्रसेवया भगवद्विषयक चित्तैकाग्रताभिराराध्य; बहुत्वं गौरवेण। तथा च दशमस्कन्धे (श्रीमद्भा॰ १०/१६/३६) नागपत्नीस्तुतौ—*'यद्वाञ्छया*

श्रीर्ललनाचरत्तपो विहाय कामान् सुचिरं धृतव्रता' इति। यद्यपि महालक्ष्मीरियं श्रीवैकुण्ठेश्वरस्य भगवतो नित्यवल्लभैव, न त्वन्यवदुपासनया तं प्राप्तास्ति; तथापि तदवताराणां श्रीभृगुतनयादीनां तपश्चर्यादि श्रवणात्ताभ्योऽस्या अभेदाभिप्रायेणैवमुक्तमिति दिक्॥६६॥

भावानुवाद—श्रीलक्ष्मीने किस प्रकार निरपेक्ष होकर केवल परम प्रीतिपूर्वक भगवान्‌का भजन किया था, उस भजनके माहात्म्यका वर्णन कर रहे हैं। श्रीलक्ष्मीदेवी परम प्रेमपूर्वक श्रीभगवान्‌की सेवा तो करती हैं, किन्तु भगवान् निरपेक्ष हैं अर्थात् आत्माराम और आप्तकाम हैं, इसलिए किसीकी अकांक्षा नहीं करते हैं। तथापि श्रीलक्ष्मीदेवीने उन्हीं निरपेक्ष भगवान्‌की आराधना करके उन्हें अपने प्रियतमके रूपमें वरण किया है। श्रीलक्ष्मी द्वारा भगवान्‌को ऐकान्तिक रूपमें प्रिय मानना ही उनको वरण करनेका कारण है। तथापि यदि प्रश्न हो कि ऐसे निरपेक्ष प्रभुको उन्होंने कैसे प्राप्त किया? इसीके उत्तरमें श्रीपार्वती कह रहीं हैं कि तपस्या करके अथवा विचित्र प्रकारकी सेवा करके। यहाँ पर तपस्याका अर्थ है भगवद् विषयमें चित्तको एकाग्र करके आराधना करना। यथा, दशम-स्कन्धमें नागपत्नियोंकी स्तुति है—"हे भगवन्! आपके श्रीचरणोंकी रजको प्राप्त करनेकी अभिलाषासे श्रीलक्ष्मीदेवीने आपकी प्रिया होने पर भी सभी प्रकारकी कामनाओंको परित्यागकर व्रतधारण करके अनेक समय तक तपस्या की थी।" यद्यपि श्रीमहालक्ष्मी श्रीवैकुण्ठके ईश्वर श्रीनारायणकी नित्यप्रेयसी हैं तथा अन्य आराधिकाओंकी भाँति आराधना करके वे श्रीनारायणकी प्रेयसी नहीं हुई है, तथापि श्रीलक्ष्मीकी अवतार भृगुकन्या आदिने श्रीनारायणके श्रीचरणोंकी सेवा प्राप्तिकी अभिलाषासे तपस्या की थी, इसलिए भृगुकन्याके साथ अभेदके अभिप्रायसे श्रीलक्ष्मीकी तपस्या आदिका प्रसंग कथित हुआ है॥६६॥

करोति वसतिं नित्यं या रम्ये तस्य वक्षसि।
पतिव्रतोत्तमाशेषावतारेष्वनुयात्यमुम् ॥६७॥

श्लोकानुवाद—वे श्रीमहालक्ष्मी श्रीभगवान्‌के सुन्दर वक्षःस्थलके ऊपर सदा निवास करती हैं। वे सभी पतिव्रताओंमें उत्तमा हैं, इसलिए

वे भगवान्‌के असंख्य अवतारोंके अनुरूप कान्तारूपमें उनका अनुगमन करती हैं॥६७॥

दिग्दर्शिनी टीका—नन्वेवमेतदवतारभूताया विभूत्यधिष्ठातृलक्ष्म्याश्चाञ्चल्य दोषस्य विद्यमानत्वादस्या अपि स कदाचित् घटेतैवेत्याशंक्य तन्निराकरणपूर्वक परममाहात्म्य-विशेषमाह—करोतीति। रम्य इति विस्तीर्णत्वादि-परमसौन्दर्योक्तया वाससुखमुद्दिष्टम्; अशेषेषु अवतारेष्वपि अमुं श्रीहरिमनुयाति तत्तदनुरूपमवतीर्य तत्तत्संगत्या गच्छति। यतः पतिव्रतासु उत्तमा श्रेष्ठा। तथा च श्रीविष्णुपुराणे—*'एवं यथा जगत्स्वामी देवदेवो जनार्द्दनः। अवतारं करोत्येषा तथा श्रीस्तत्सहायिनी॥ देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी। विष्णोर्द्देहानुरूपां वै करोत्येषात्मनस्तनूम्॥'* इति॥६७॥

भावानुवाद—यदि आपत्ति हो कि श्रीमहालक्ष्मीकी अशंस्वरूपा विभूतिकी अधिष्ठात्री लक्ष्मी जब चञ्चला हैं, तब क्या अंशी महालक्ष्मीमें भी उस प्रकारका चाञ्चल्य दोष कभी दिख सकता है? इस प्रकारकी आशंकाका निवारण करके उनके परम माहात्म्यके विषयमें 'करोतीति' श्लोक कह रहे हैं। श्रीमहालक्ष्मी श्रीनारायणके रमणीय वक्षःस्थल पर नित्य निवास करती हैं। यहाँ पर रमणीय शब्दसे श्रीभगवान्‌के सुविस्तृत तथा अन्य गुणोंसे मण्डित परम सौन्दर्ययुक्त सुन्दर वक्षःस्थलके ऊपर वास करनेके सुखको ही इंगित किया गया है। श्रीलक्ष्मी श्रीहरिके वक्षःस्थल पर स्थित होकर भी उनके असीम अवतारोंका भी अनुगमन करती हैं, अर्थात् श्रीहरि जब जो लीला करते हैं, तब वे भी अपने प्रभुकी इच्छाके अनुरूप लीलाके विस्तारके लिए उनका अनुगमन करती हैं, क्योंकि वे पतिव्रता स्त्रियोंमें उत्तमा हैं। इस विषयमें श्रीविष्णुपुराणमें भी कहा गया है—"देवदेव जगत स्वामी श्रीजनार्द्दन जिस-जिस प्रकारसे अवतार ग्रहण करते हैं, श्रीलक्ष्मी भी उन्हीं अवतारोंके अनुरूप उनकी सहायता करनेके लिए अवतरित होती हैं। देव रूपमें लीला करनेवाले श्रीविष्णुके साथ देवी रूपमें तथा मनुष्य रूपमें लीला करनेवाले भगवान्‌के साथ वे मानुषी रूपमें अवतरित होती हैं। इस प्रकार श्रीविष्णु जहाँ पर जिस रूपमें लीला करते हैं, उनकी प्रेयसी श्रीलक्ष्मी भी उनके अनुरूप श्रीविग्रह धारण करके उनकी लीलामें सहायता करती हैं"॥६७॥

श्रीपरीक्षिदुवाच—

ततः परमहर्षेण क्षोभितात्मालपन्मुनिः।
जय श्रीकमलाकान्त हे वैकुण्ठपते हरे॥६८॥
जय वैकुण्ठलोकेति तत्रत्या जयतेति च।
जय कृष्णप्रिये पद्मे वैकुण्ठाधीश्वरीत्वपि॥६९॥

श्लोकानुवाद—श्रीपरीक्षितने कहा—हे माता! श्रीशिवकी बातोंको सुनकर देवर्षि श्रीनारद परमानन्दित होकर क्षोभित चित्तसे उच्च स्वरमें कहने लगे—'श्रीकमलाकान्तकी जय हो! हे वैकुण्ठपते! हे हरे! आपकी जय हो! हे वैकुण्ठलोक! हे वैकुण्ठवासियों! हे कृष्णप्रिया पद्मे! हे वैकुण्ठाधीश्वरि! आप सभीकी जय हो, जय हो!'॥६८–६९॥

दिग्दर्शिनी टीका—अलपदुच्चैरवोचत्; किं? तदाह—जयेति सार्धेण। हे वैकुण्ठलोक! जयेति, हे तत्रत्या वैकुण्ठवर्त्तिनः! हे वैकुण्ठाधीश्वरि! श्रीवैकुण्ठवासिनां महालक्ष्म्याश्च माहात्म्यविशेषश्रवणात् परमानन्दभराविर्भाववैवश्येन पृथिव्यामवतीर्णस्य भगवतो द्वारकानिवासमपि विस्मृत्य श्रीवैकुण्ठलोकजिगमिषया तदाविष्टचित्तत्वेन तत्र द्रष्टव्यं तत्रत्येश्वरं लक्ष्मीकान्तं भगवन्तं तल्लोकं च तत्रत्यांश्च महालक्ष्मीमपि तुष्टावेति ज्ञेयम्। तत्र तादृश्या महालक्ष्म्याः स्वामित्वेनासौ भगवत् स्तुतिरर्धेन, ततस्तत्कृपाभरास्पदत्वेन वैकुण्ठस्य तद्वासिनाञ्च; ततः सर्वतः परमोत्कर्षनिष्ठा दृष्टा महालक्ष्म्या इति विवेचनीयम्॥६८–६९॥

भावानुवाद—श्रीनारद उच्च स्वरमें कहने लगे। क्या कहा? इसे 'जय' इत्यादि डेढ़ श्लोकमें कह रहे हैं—हे वैकुण्ठलोक! हे वैकुण्ठवासीगण! हे वैकुण्ठाधीश्वरि! आप सभी जय युक्त हों! इस प्रकार श्रीनारद वैकुण्ठवासियों तथा श्रीलक्ष्मीके माहात्म्यको श्रवण करके परमानन्दके उदित होनेसे आत्मविभोर होकर उस समयमें पृथ्वी पर अवतीर्ण हुए श्रीभगवान् और द्वारिकावासियोंको भूल गये। इसीलिए श्रीवैकुण्ठलोकको जानेकी इच्छासे अर्थात् वैकुण्ठमें आविष्ट हुए चित्तसे उन्होंने सोचा कि वैकुण्ठ ही मेरे लिए दर्शनीय है। मैं वैकुण्ठेश्वर श्रीलक्ष्मीकान्त, वहाँके भक्तों और श्रीमहालक्ष्मीकी स्तुति करूँगा। अतः श्रीनारद वैकुण्ठलोकमें श्रीमहालक्ष्मीके स्वामी श्रीभगवान्को 'हे कमलाकान्त' कहकर उनकी स्तुति कर रहे हैं, तदनन्तर श्रीवैकुण्ठलोक और वैकुण्ठेश्वर भगवान्के विशेष कृपापात्र वैकुण्ठवासी

भक्तोंका स्तव करके अन्तमें सर्वत्र श्रीलक्ष्मीकी सर्वोत्तम निष्ठाके दर्शन करके उनका स्तव कर रहे हैं—ऐसा सूचित होता है॥६८–६९॥

अथाभिनन्दनायास्या वैकुण्ठे गन्तुमुत्थितः।
अभिप्रेत्य हरेणोक्तः करे धृत्वा निवार्य सः॥७०॥

श्लोकानुवाद—श्रीनारद यह सब कहते–कहते श्रीलक्ष्मीका अभिनन्दन करनेके लिए वैकुण्ठ जानेको प्रस्तुत हुए, किन्तु उनके इस अभिप्रायको समझकर श्रीमहादेवने उनके दोनों हाथोंको पकड़कर रोक लिया और कहने लगे॥७०॥

दिग्दर्शिनी टीका—अथ लपनानन्तरं अस्या महालक्ष्म्या अभिनन्दनाय त्वमेव कृष्णस्य परम कृपानिष्ठापात्रं परमप्रियेत्यादि सुनृतैः प्रशंसनार्थमभिप्रेत्य वैकुण्ठादि–स्तुत्योर्ध्वदृष्ट्यादिना च लक्षणेन तस्य वैकुण्ठ गमनोन्मुखतां ज्ञात्वेत्यर्थः। निवार्य करग्रहणेनैव तत्र गमने निषिध्य स नारद उक्तः॥७०॥

भावानुवाद—इसके बाद श्रीनारद श्रीलक्ष्मीका अभिनन्दन करनेके लिए वैकुण्ठ जानेको प्रस्तुत हुए तथा उन श्रीमहालक्ष्मीका किस प्रकारसे अभिनन्दन करेंगे, वही मन–ही–मनमें कल्पना करने लगे। किस प्रकारसे? अर्थात् 'आप श्रीकृष्णकी परम कृपानिष्ठापात्री और परमप्रिया हैं', इत्यादि सुन्दर वाक्यों द्वारा प्रशंसा करनेकी सोचने लगे। किन्तु स्वयं श्रीमहादेव श्रीनारदके हृद्गत (आन्तिरिक) भावको जान गए। किस प्रकारसे? वैकुण्ठ आदिकी स्तुति और श्रीनारद द्वारा पुनः–पुनः ऊपर दृष्टिपात करनेके द्वारा, इसलिए उन्होंने श्रीनारदके दोनों हाथोंको पकड़कर उन्हें वैकुण्ठ गमनके लिए निषेध करते हुए कहा—॥७०॥

श्रीमहेश उवाच—

कृष्णप्रियजनालोकोत्सुकताविहतस्मृते ।
न किं स्मरसि यद्भूमौ द्वाराकायां वसत्यसौ॥७१॥

श्लोकानुवाद—श्रीमहादेवने कहा—हे नारद! श्रीकृष्णके प्रियजनोंके दर्शनके आवेशकी उत्कण्ठासे क्या तुम्हारी स्मृति विलुप्त हो गयी है? क्या तुम्हें स्मरण नहीं है कि भगवान् श्रीकृष्ण पृथ्वी पर श्रीद्वारकापुरीमें निवास कर रहे हैं?॥७१॥

दिग्दर्शिनी टीका—कृष्णप्रियजनस्यालोके अवलोकने उत्सुकता उत्कण्ठा तया विहता विनाशिता स्मृतिरनुसन्धानं यस्य तस्य सम्बोधनम्। एवमत्र तव कोऽपि न दोषस्तस्यैवेदृशः परममोहनत्वादिति भावः। असौ श्रीहरिः महालक्ष्मीर्वा भूमौ पृथिव्यां तत्रापि द्वारकायां पुर्यां वसतीति यत् तत् किं नानुस्मरसि, नानुसन्धत्से?॥७१॥

भावानुवाद—अहो नारद! श्रीकृष्णके प्रियजनोंके दर्शनकी उत्सुकतावशतः क्या तुम्हारी स्मृति विलुप्त हो गयी है? इस सम्बोधनका उद्देश्य यह है कि क्या तुम्हारी स्मृतिकी अनुसन्धान-शक्ति भी विनष्ट हो गयी है? सचमुच, इस विषयमें तुम्हारा कोई दोष नहीं है, क्योंकि श्रीकृष्णका ही ऐसा परम मोहन करनेवाला स्वभाव है। वे श्रीहरि और श्रीमहालक्ष्मी इस समय पृथ्वी पर श्रीद्वारकापुरीमें वास कर रहे हैं, क्या तुम इसे भूल गये हो?॥७१॥

रुक्मिणी सा महालक्ष्मीः कृष्णस्तु भगवान् स्वयम्।
तस्या अंशावतारा हि वामनादि समीपतः॥७२॥

श्लोकानुवाद—वैकुण्ठाधीश्वरी श्रीमहालक्ष्मी ही श्रीरुक्मिणी हैं। श्रीकृष्ण ही स्वयं भगवान् हैं तथा उनके अंशावतार श्रीवामन आदिके समीप जो श्रीलक्ष्मीदेवी विराजमान हैं, वे इन्हीं श्रीरुक्मिणीकी ही अंशावतार हैं॥७२॥

दिग्दर्शिनी टीका—ननु तत्र कुतो महालक्ष्मीः? किन्तु भीष्मसुता रुक्मिणीति चेत्; सत्यम्; सैवेयमित्याह—रुक्मिणीति। सा रुक्मिण्येव महालक्ष्मीः ननु महालक्ष्मीः कदाचिदपि भगवत्पार्श्वं न जहाति? तत्राह—कृष्णस्त्विति। ननु कथं तर्हि श्रीवामनसहस्त्रशीर्षकपिलादि निकटे लक्ष्मीर्दृश्यते? महालक्ष्म्या रुक्मिणीत्वेनावतीर्णत्वात्। तत्राह—तस्या इति एवं वैकुण्ठेश्वर्या महालक्ष्म्या महिमापि साधितः॥७२॥

भावानुवाद—यदि आपत्ति हो कि पृथ्वी पर श्रीद्वारकामें श्रीमहालक्ष्मी कहाँ हैं? वहाँ तो भीष्मककी पुत्री श्रीरुक्मिणीदेवी हैं। हाँ, यह बात सत्य है, तथापि वैकुण्ठके ऐश्वर्य आदि इस द्वारकामें जिस प्रकारसे विराजित हैं, उसका वर्णन कर रहा हूँ, श्रवण करो। भीष्मक पुत्री श्रीरुक्मिणीदेवीको ही वैकुण्ठाधीश्वरी महालक्ष्मी जानना। यदि कहो कि वे श्रीलक्ष्मी तो भगवान्‌के समीप स्थित हैं, वे कभी भी भगवान्‌का संग छोड़कर कहीं भी नहीं जातीं हैं, तो वे किस प्रकार

द्वारकामें विराजित होंगी? इसीलिए कह रहे हैं कि द्वारकानाथ श्रीकृष्ण ही वही भगवान् हैं। यदि कहो कि फिर श्रीवामन, सहस्रशीर्षा महापुरुष और कपिल आदि देवोंके समीप जो लक्ष्मियाँ दिखाई देती हैं, वे कौन हैं? इसके उत्तरमें कह रहे हैं कि श्रीकृष्णके अंशावतार श्रीवामन आदिके समीप जो लक्ष्मियाँ विराजित हैं, वे इन्हीं महालक्ष्मीकी ही अंश हैं और महालक्ष्मी स्वयं श्रीरुक्मिणीके रूपमें अवतीर्ण हुई हैं। इस प्रकार वैकुण्ठेश्वरी महालक्ष्मीकी महिमाका भी वर्णन हुआ है॥७२॥

सम्पूर्णा परिपूर्णस्य लक्ष्मीर्भगवतः सदा।
निषेवते पदाम्भोजे श्रीकृष्णस्यैव रुक्मिणी॥७३॥

श्लोकानुवाद—उसी द्वारकामें परिपूर्ण भगवान् श्रीकृष्णके चरणकमलोंकी सेवाके लिए सम्पूर्णा महालक्ष्मीस्वरूपा श्रीरुक्मिणीदेवी स्वयं सदा सर्वदा विराजमान हैं॥७३॥

दिग्दर्शिनी टीका—तर्हि कृष्णपार्श्वेऽपि तादृश्येव लक्ष्मीरस्तु? तत्राह—सम्पूर्णेति। एव शब्दो यथा सम्भवं सर्वत्र योजनीयाः। सम्पूर्णा लक्ष्मी रुक्मिण्येव परिपूर्णस्य भगवतः श्रीकृष्णस्यैव पादपद्मद्वन्द्वं सदैव नितरां सेवते॥७३॥

भावानुवाद—यदि कहो कि तब क्या द्वारकामें श्रीकृष्णके साथ भी श्रीमहालक्ष्मीका अंश अवतार विराजमान है? इसके उत्तरमें कह रहे हैं—'सम्पूर्णा' इत्यादि। नहीं, नहीं, उस द्वारकामें तो पूर्ण महालक्ष्मी श्रीरुक्मिणीदेवी ही हैं। अर्थात् वे महालक्ष्मीकी अंश नहीं, निश्चित रूपमें सम्पूर्ण महालक्ष्मी हैं तथा वे श्रीमहालक्ष्मी ही स्वयं रूपमें सदा परिपूर्ण भगवान् श्रीकृष्णके चरणकमलोंकी सेवा कर रही हैं॥७३॥

तस्मादुपविश ब्रह्मन् रहस्यं परमं शनैः।
कर्णे ते कथयाम्येकं परमश्रद्धया शृणु॥७४॥

श्लोकानुवाद—अतएव हे ब्रह्मन्! आप यहीं पर बैठिये! मैं धीरे-धीरे गुप्तरूपसे आपके कानमें एक रहस्यमय बात कहता हूँ, आप परम श्रद्धापूर्वक उसको श्रवण कीजिए॥७४॥

दिग्दर्शिनी टीका—तस्माद् वैकुण्ठतो भूमौ भगवतासह लक्ष्म्या अवतीर्णत्वात्। उपविश वैकुण्ठे जिगमिषां विहायात्रैव क्षणं निषीद। ननु तर्हि सत्वरं द्वारकायामेव गच्छामि किमत्रोपवेशेन? तत्राह—रहस्यमिति। शनैस्ते तव कर्णे कथयामीति परम–रहस्यत्वेन बहूनामग्रेऽप्रकाश्यत्वात्: महालक्ष्मी प्रियसखी–पार्वती–मात्सर्यभयाद्वा। एवं तवाभिप्रेतार्थो द्वारकागमनेन न सिध्येत्। महालक्ष्म्यापि तयात्मनः सकाशात् श्रीप्रह्लादस्यैव श्रेष्ठताया वक्ष्यमाणत्वात् इति भावः॥७४॥

भावानुवाद—उसी वैकुण्ठसे श्रीभगवान् श्रीलक्ष्मी सहित द्वारकामें अवतरित हुए हैं। अतएव हे ब्रह्मन्! वैकुण्ठ गमनकी अभिलाषाका परित्याग करके क्षणकालके लिए इस स्थान पर बैठो। तब यदि श्रीनारदकी यह उत्कण्ठा हो कि मैं तो शीघ्र ही उस द्वारकापुरीको गमन करूँगा, यहाँ बैठकर क्या करूँगा? इसके लिए ही 'रहस्य' इत्यादि पद कह रहे हैं। मैं धीरे–धीरे गुप्तरूपसे तुम्हारे कानमें एक रहस्यकी बात कह रहा हूँ। धीरे–धीरे कहनेका उद्देश्य यह है कि जो बात परम रहस्यमय हो, उसे अनेक व्यक्तियोंके समक्ष प्रकाश करना उचित नहीं है, विशेषतः यहाँ पर महालक्ष्मीकी प्रियसखी पार्वती हैं, उस परम रहस्यमय बातको श्रवणकर कहीं उनमें मात्सर्य उदित न हो जाय, इसलिए थोड़ा भय भी है। अतएव तुम्हारा अभिप्राय द्वारका जानेसे पूर्ण नहीं होगा। यहाँ पर परम रहस्यकी बात कहनेका तात्पर्य यह है कि अब श्रीमहादेव अपनेसे और यहाँ तक कि श्रीलक्ष्मीसे भी श्रीप्रह्लाद महाराजके श्रेष्ठ होनेका विचार प्रस्तुत करेंगे, उससे श्रीपार्वतीको मात्सर्य हो सकता है। इसी आशंकासे कहे जानेवाले प्रसङ्गको अब धीरे–धीरे गोपनीयरूपमें कहने लगे॥७४॥

त्वत्तातततो मद्‌गरुड़ादितश्च श्रियोऽपि कारुण्यविशेषपात्रम्।
प्रह्लाद एव प्रथितो जगत्या कृष्णस्य भक्तो नितरां प्रियश्च॥७५॥

श्लोकानुवाद—हे नारद! आपके पिता श्रीब्रह्मा, गरुड़ आदि पार्षद, श्रीमहालक्ष्मी तथा मुझसे भी अधिक प्रह्लाद श्रीकृष्णके अधिक कृपापात्र हैं। यह बात सम्पूर्ण जगतमें प्रसिद्ध है, अतएव श्रीप्रह्लाद ही श्रीकृष्णके श्रेष्ठ भक्त हैं॥७५॥

दिग्दर्शिनी टीका—अतः श्रीप्रह्लादमेवानुसरेत्याशयेनाह—त्वदिति। त्वत्तातततो ब्रह्मणः सकाशात्, मत् मत्तः। आदिशब्दाच्छेष-विष्वक्सेनादयो वैकुण्ठपार्षदाः। श्रियः महालक्ष्म्या अपि सकाशात्। कारुण्यविशेष पात्रत्वे हेतुः—नितरां भक्तोऽतएव नितरां प्रियश्चेति॥७५॥

भावानुवाद—अतएव तुम श्रीप्रह्लादका ही अनुसरण करो। इसी अभिप्रायसे 'तत्' इत्यादि श्लोक कह रहे हैं। मैं, तुम्हारे पिता श्रीब्रह्मा, गरुड़, शेष और विश्वक्सेन आदि वैकुण्ठके पार्षदगण, यहाँ तक कि श्रीलक्ष्मीसे भी अधिक श्रीकृष्णके कृपापात्रके रूपमें श्रीप्रह्लादकी ही जगतमें ख्याति है। अतएव वे ही श्रीकृष्णके एकान्तिक भक्त और अत्यधिक प्रिय हैं॥७५॥

भगवद्वचनानि त्वं किन्नु विस्मृतवानसि।
अधीतानि पुराणेषु श्लोकमेतं न किं स्मरेः॥७६॥

श्लोकानुवाद—क्या तुम भगवान्‌के श्रीमुखनिःसृत वचनोंको भूल गये हो? पुराण आदिके पढ़ने पर भी क्या तुम्हें यह प्रसिद्ध श्लोक स्मरण नहीं है?॥७६॥

दिग्दर्शिनी टीका—तत्रादौ सामान्यतो भक्तत्वेनैव माहात्म्यं वक्तुं तस्य जगत् प्रसिद्धतामेव दर्शयंस्तमपि तत् स्मारयति,—भगवदिति। तत्र किमेतं सुप्रसिद्धमपि श्लोकं न त्वं स्मरेः, अपि तु स्मरस्येवेत्यर्थः॥७६॥

भावानुवाद—पहले सामान्यरूपसे श्रीप्रह्लादके भक्त होनेके माहात्म्यका वर्णन करके अब उनके जगत-प्रसिद्ध विशेष माहात्म्यका स्मरण 'भगवद्वचनानि' इत्यादि श्लोक द्वारा करवा रहे हैं। हे नारद! क्या तुम पुराण आदिमें प्रसिद्ध भगवान्‌के श्रीमुखनिःसृत वचनोंको भूल गये हो? क्या तुमको वह प्रसिद्ध श्लोक स्मरण नहीं है? अर्थात् उसे स्मरण करो॥७६॥

नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना।
श्रियमात्यन्तिकीं वापि येषां गतिरहं परा॥७७॥

श्लोकानुवाद—मैं ही जिनकी परमगति हूँ, उन सब साधु-भक्तोंके अलावा मैं अपनी आत्मा तथा अपनी अत्यन्त प्रिय श्रीलक्ष्मीकी भी कामना नहीं करता हूँ॥७७॥

दिग्दर्शिनी टीका—तमेवाह—नाहमिति। आत्मानं श्रीमूर्त्तिमपि; नाशासे न स्पृहयामि नाभिनन्दामि वा। अयञ्च श्लोको नवमस्कन्धे (श्रीमद्भा॰ ९/४/६४) दुर्वाससं प्रति श्रीभगवतोक्तः। तथा तत्रैव (श्रीमद्भा॰ ९/४/६३, ६६)—'*अहं भक्त पराधीनो ह्यस्वतन्त्र इव द्विजः। साधुभिर्ग्रस्त हृदयो भक्तैर्भक्त जनप्रियः॥ मयि निर्बद्ध-हृदयाः साधवः समदर्शिनः। वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा॥*' इति। उद्धवं प्रत्यप्येकादशस्कन्धे (श्रीमद्भा॰ ११/१४/१५)—'*न तथा मे प्रियतम आत्मयोनिर्न शंकरः। न च संकर्षणो न श्रीर्नैवात्मा च यथा भवान्॥*' इति। अस्यार्थः—आत्मा श्रीमूर्तिरपि; भक्त इति वक्तव्ये स्वभक्त-माहात्म्य विशेषाख्यानाविर्भूत हर्षभरवैवश्येन भवानित्युक्तम्॥७७॥

भावानुवाद—श्रीभगवान्के वचन हैं—"मैं ही जिनकी परमगति हूँ, उन सब साधुभक्तोंके अलावा मैं अपनी आत्मा तथा अत्यन्त प्रिय श्रीलक्ष्मीकी भी कामना नहीं करता जो कि मेरी प्राणस्वरूप हैं।" यह श्लोक नवम-स्कन्धमें श्रीभगवान्ने दुर्वासाके प्रति कहा है। वहाँ पर और भी कहा गया है कि मैं अपने भक्तोंके अधीन हूँ, मैं अपने भक्तोंके निकट स्वतन्त्र नहीं हूँ, भक्तोंने मुझे अपने हृदयमें बाँध लिया है। सर्वत्र समदर्शी साधुओंने अपने-अपने हृदयको मुझसे जोड़ रखा है। जिस प्रकार साध्वी-स्त्री अपने पतिको वशीभूत रखती है, उसी प्रकार मेरे भक्त भी मुझे वशीभूत कर लेते हैं। एकादश-स्कन्धमें भगवान् श्रीउद्धवको भी कहते हैं—"तुम मेरे भक्त होनेसे मुझे जितने प्रिय हो, ब्रह्मा पुत्र होने पर, शंकर स्वरूपभूत होने पर, संकर्षण भाई होने पर, श्रीलक्ष्मी पत्नी होने पर भी उतने प्रिय नहीं हैं, और अधिक क्या कहूँ, मुझे अपना श्रीविग्रह भी उतना प्रिय नहीं है।" वे भक्त आपको कितने प्रिय हैं? इस प्रश्नके उत्तरमें भगवान्ने उक्त श्लोक कहा है। यदि कहो कि वे भक्त कैसे हैं? इसके उत्तरमें अत्यन्त आनन्दित होकर कह रहे हैं—'तुम जैसे'। इसके द्वारा अपने भक्तके विशेष माहात्म्यकी स्थापना करना ही उनका उद्देश्य है, ऐसा समझना चाहिए॥७७॥

मदादिदेवतायोनिर्निजभक्तविनोदकृत्।
श्रीमूर्तिरपि सा येभ्यो नापेक्ष्या को हि नौतु तान्॥७८॥

श्लोकानुवाद—जिनके लिए प्रभु अपनी श्रीमूर्त्तिका भी आदर नहीं करते हैं उन भक्तोंकी प्रशंसा करनेमें कौन समर्थ हो सकता है? किन्तु प्रभुकी वही मूर्त्ति हम सभी देवताओंकी उत्पत्तिका कारणस्वरूप है और गरुड़ आदि अपने भक्तोंको भी आनन्द प्रदान करनेवाली है॥७८॥

दिग्दर्शिनी टीका—फलितमाह—मदिति द्वाभ्याम्। अहं रुद्र आदिर्यासां ब्रह्मा-इन्द्रादिदेवतानां तासां योनिः कारणं ब्रह्मादिजगन्निदान महापुरुषरूपस्यापि तत एवाविर्भावात्। यद्वा, योनिराश्रयः सर्वसेव्यत्वात्। एवं रुद्र ब्रह्मादि सर्वदेवेभ्यो भगवच्छ्रीमूर्त्तेम्माहात्म्यं साधितम्। तथा निजभक्तानां श्रीशेषगरुड़ादीनां विनोदः परमानन्दक्रीड़ाविशेषः तं करोति तथा सा। सा सौन्दर्य-माधुर्यादि-महिम्ना परमानिर्वचनीया। येभ्यो भक्तेभ्यः सकाशात् न अपेक्षा योग्या आदरविशेष विषयो न भवति। तान् को नौतु स्तौतु? अपि तु न कोऽपि स्तोतुं शक्नुयादित्यर्थः॥७८॥

भावानुवाद—सारार्थ यह है कि रुद्र (मेरे), ब्रह्मा, इन्द्र आदि देवताओंकी भी उत्पत्तिके कारण-स्वरूप जो महापुरुष हैं, अर्थात् ब्रह्मादि देवता तथा जगतकी सृष्टि करनेवाले जो महापुरुष हैं, वे भी श्रीभगवान्के ही अंश हैं। यदि 'योनि' शब्दका अर्थ 'आश्रय' हो, तो भी रुद्र आदि सभी देवताओंके आश्रय और सेव्य स्वरूप जो भगवान्की श्रीमूर्त्ति हैं, अपनी वह मूर्त्ति भी प्रभुको उन भक्तोंकी तुलनामें अधिक आदरणीय नहीं है। यद्यपि इस प्रकार रुद्र और ब्रह्मा जैसे देवताओंसे भी भगवान्की श्रीमूर्त्तिका अधिक माहात्म्य सिद्ध हुआ है, तथापि शेष और गरुड़ आदि अपने भक्तोंको आनन्दित करनेवाली परमानन्दमय लीलाका आश्रय स्थल अर्थात् सौन्दर्य-माधुर्य आदि परम अनिर्वचनीय महिमा युक्त भगवान्की श्रीमूर्त्ति भी जिनकी तुलनामें आदरणीय नहीं है, उन भक्तोंकी स्तुति करनेमें कौन समर्थ हो सकता है? अर्थात् कोई भी नहीं॥७८॥

तत्राप्यशेषभक्तानामुपमानतयोदितः ।
साक्षाद्भगवतैवासौ प्रह्लादोऽतर्क्य भाग्यवान्॥७९॥

श्लोकानुवाद—उन सभी भक्तोंमें भी श्रीप्रह्लादका भाग्य तो तर्कके अगोचर है। स्वयं भगवान् ही कहते हैं कि श्रीप्रह्लाद मेरे समस्त भक्तोंमें आदर्श स्वरूप हैं॥७९॥

दिग्दर्शिनी टीका—एवं सामान्येन भक्ततयैव ब्रह्मादिभ्यः स्वस्मादपि सकाशान्माहात्म्य-मुक्तम्। इदानीं विशेषेण-श्रीशेषगरुड़ादिभ्योऽपि माहात्म्यविशेषमाह—तत्रापीति। तेष्वपि भक्तगणेषु मध्ये अतर्क्यं तर्कयितुमप्यशक्यं यद्भाग्यं सौभाग्यं भगवत्-कृपाविशेष-पात्रतालक्षणं तद्वान्। परममहासौभाग्यवत्त्वेन श्रेष्ठतर इत्यर्थः। तच्च भगवदुक्त्यैव प्रमाणयति—अशेषेति। साक्षादेव उदितः उक्तः। तथा च सप्तमस्कन्धे (श्रीमद्भा० ७/१०/२१)—*'भवन्ति पुरुषा लोके मद्भक्तास्तामनुव्रताः। भवान्मे खलु भक्तानां सर्वेषां प्रतिरूपधृक्॥'* इति। अस्यार्थः—त्वामनुगता ये केचित् पुरुषास्तेऽप्येवंलक्षणा भवन्ति, मद्भक्ता भवन्ति। अतो भवान् खलु मे भक्तानां सर्वेषामुपमास्पदं श्रेष्ठ इत्यर्थः। यद्वा, ये मद्भक्तस्ते त्वामेव अनुव्रता अनुसृता भवन्ति भविष्यन्ति अनुसरिष्यन्तीत्यर्थः। तत्र हेतुर्भाग्यवानिति॥७९॥

भावानुवाद—इस प्रकार श्रीशिवने सामान्य भक्ततत्त्वके विचारसे अपने और श्रीब्रह्मासे भी श्रीप्रह्लादके माहात्म्यको श्रेष्ठ बताया। अब वे 'तत्रापि' इत्यादि श्लोककी अवतारणा करके यह स्थापित करना चाहते हैं कि श्रीप्रह्लाद महाराजका माहात्म्य भगवान्के भक्त गरुड़ और शेषसे भी अधिक है। भगवान्के अनन्त भक्तोंमें भी श्रीप्रह्लादका भाग्य तर्कके द्वारा नहीं समझा जा सकता है। वह भाग्य किस प्रकारका है? वे भगवान्के विशेष कृपापात्र होनेके सौभाग्यके लक्षणसे युक्त हैं अर्थात् परम-सौभाग्यवानोंसे भी अधिक श्रेष्ठतर हैं। ऐसा भगवान्की उक्तिसे ही प्रमाणित हो रहा है—"प्रह्लाद मेरे भक्तोंके लिए उपमा स्वरूप है अर्थात् आदर्श स्वरूप है, जो प्रह्लादके अनुगत हैं, वे भी मेरे भक्त हैं।" भगवान्की इस उक्तिका तात्पर्य यह है, प्रह्लादके अनुगत जो भी व्यक्ति हैं, वे निश्चय ही मेरे (प्रभुके) भक्त हैं; अतएव मेरे जितने भी भक्त हैं, प्रह्लाद उनमें सर्वश्रेष्ठ हैं अथवा जो मेरे भक्त हैं, वे भी तुम्हारा (प्रह्लादका) ही अनुसरण करेंगे और भविष्यमें भी जो भक्त होंगे, वे भी तुम्हारा अनुसरण करेंगे, क्योंकि तुम भाग्यवान हो॥७९॥

तस्य सौभाग्यमस्माभिः सर्वैर्लक्ष्म्याप्यनुत्तमम्।
साक्षाद्धिरण्यकशिपोरनुभूतं विदारणे॥८०॥

श्लोकानुवाद—उन श्रीप्रह्लादके सौभाग्यको हिरण्यकशिपुके संहारके समय श्रीलक्ष्मी सहित हम सभी देवताओंने साक्षात्रूपमें अनुभव किया है॥८०॥

दिग्दर्शिनी टीका—ननु तथापि तस्य दैत्यजातित्वादिना अर्वाचीनत्वादिना च श्रीगरुड़ादिभ्यो महालक्ष्मीतश्च श्रैष्ठं कथं घटताम्? तत्राह—तस्येति। सर्वैरस्माभिरित्यनेन ब्रह्मादयो गरुड़ादयश्च गृहीताः। हिरण्यकशिपोः श्रीनृसिंहरूपेण विदारणसमये साक्षादनुभूतं साक्षादनुभूतत्वादत्र वचनयुक्त्याद्यपेक्षा नास्तीति भावः। तत्तद्विशेषश्च सप्तमस्कन्धे प्रह्लादोपाख्याने देवस्तुत्यध्यायतो विज्ञेयः॥८०॥

भावानुवाद—फिर भी यदि कहो कि श्रीप्रह्लाद तो दैत्यकुलमें आविर्भूत हुए हैं और अर्वाचीन (नवीन) हैं, अतः नित्यवैकुण्ठ पार्षद गरुड़ और श्रीलक्ष्मीसे उनका सौभाग्य कैसे अधिक हो सकता है? इसके लिए 'तस्य' इत्यादि श्लोक कह रहे हैं। श्रीप्रह्लादका सौभाग्य अति उत्तम है। हम सभीने साक्षात्‌रूपसे इसका अनुभव किया है। यहाँ पर 'हम सभीने' कहनेसे ब्रह्मादि देवता तथा गरुड़ आदि भगवान्‌के सभी पार्षद भक्तोंको समझना चाहिए। श्रीनृसिंहके रूपमें भगवान् द्वारा हिरण्यकशिपुके संहारके समय हमने प्रह्लादके सौभाग्यको साक्षात्‌रूपसे अनुभव किया है। इस विषयमें अन्य किसी युक्ति अथवा प्रमाणकी आवश्यकता नहीं है। इस सम्बन्धमें विशेष विवरण श्रीमद्भागवत सप्तम-स्कन्धके श्रीप्रह्लाद-उपख्यानमें देवस्तुति अध्यायमें द्रष्टव्य है॥८०॥

पुनः पुनर्वरान् दित्सुर्विष्णुर्मुक्तिं न याचितः।
भक्तिरेव वृता येन प्रह्लादं तं नमाम्यहम्॥८१॥

श्लोकानुवाद—उस समय भगवान् श्रीनृसिंहदेवने प्रह्लादको मुक्ति लेनेके लिए बार-बार कहा, परन्तु उस भक्तराजने मुक्ति न लेकर भक्तिके लिए ही प्रार्थना की थी। ऐसे श्रीप्रह्लादको मैं नमस्कार करता हूँ॥८१॥

दिग्दर्शिनी टीका—परम श्रेष्ठ्य लक्षणमेव दर्शयितुमादौ मुक्त्यपेक्षया परमभक्ति निष्ठा-माहात्म्यमाह—पुनरिति। एव च श्लोकः श्रीनारायण व्यूहस्तववर्त्ती। पुनः पुनरिति श्रीप्रह्लादस्य माहात्म्यविशेषाभिव्यञ्जनाय मुक्तिदाने विष्णोराग्रहं सूचयति। तथापि तां न याचितः। यद्वा, पुनः पुनर्भक्तिरेव वृतेति सम्बन्धः। दाढर्याकाङ्क्षया भावविशेषणं वा; यद्वा, पुनः पुनरिति। जन्मान्तरेष्वित्यर्थः। यथोक्तं श्रीपराशरेण, तस्यैव वाक्यम्—*'नाथ! योनि सहस्रेषु येषु येषु व्रजाम्यहम्। तेषु तेष्वच्युता*

भक्तिरच्युतास्तु सदा त्वयि॥' इति। अत्र च योनि सहस्रेष्वित्युक्त्या दूरे मुक्तिरुपेक्षितेति ज्ञाप्यते॥८१॥

भावानुवाद—अब श्रीप्रह्लादके परम श्रेष्ठ लक्षणोंका प्रदर्शन करनेके लिए सबसे पहले मुक्तिकी तुलनामें परम भक्तिकी निष्ठाके माहात्म्यका वर्णन कर रहे हैं। यह श्लोक श्रीनारायणव्यूह-स्तवके अन्तर्गत है। 'बार-बार' कहनेका तात्पर्य यह है कि भगवान् श्रीविष्णु द्वारा बार-बार वरदान देनेके लिए चेष्टा करने पर भी श्रीप्रह्लादने मुक्तिकी प्रार्थना न कर केवल भगवद्भक्तिके लिए ही प्रार्थना की थी। इस प्रकार श्रीप्रह्लादके माहात्म्यको अभिव्यक्त करनेके लिए ही श्रीविष्णुने बार-बार मुक्तिदान करनेका आग्रह प्रकाश किया था। तथापि श्रीप्रह्लाद द्वारा पुनः-पुनः मुक्तिका निरादर तथा भक्तिकी प्रार्थना करना उनकी भक्तिके प्रति सुदृढ़ निष्ठा और आकांक्षाको ही सूचित करता है। अथवा बार-बार कहनेसे यह भी समझा जा सकता है कि उन्होंने जन्म-जन्मान्तरके लिए भक्तिकी प्रार्थना की थी, क्योंकि श्रीपाराशरने भी श्रीप्रह्लादके उक्त वाक्योंका अनुवाद करके कहा है—"हे नाथ! मैं जन्म-जन्ममें किसी भी योनिमें ही जन्म ग्रहण क्यों न करूँ, परन्तु आपमें मेरी भक्ति अविचलित रूपमें रहे।" इस (उद्धृत) श्लोकके 'सहस्रयोनि भ्रमण' वाक्य द्वारा मुक्तिको दूरसे ही त्याग करना अर्थात् उसकी उपेक्षा ही सूचित होती है॥८१॥

मर्यादालङ्घकस्यापि गुर्वादेशकृतो मुने।
असम्पन्नस्ववाग्जालसत्यतान्तस्य यद्बलेः॥८२॥
द्वारे तादृगवस्थानं तुच्छदानफलं किमु।
रक्षणं दुष्टबाणस्य किं नु मत्स्तवकारितम्॥८३॥

श्लोकानुवाद—हे मुनि! जिन्होंने श्रीब्रह्मा द्वारा स्थापित मर्यादाका उल्लंघन किया था, गुरुके आदेशकी अवहेलना की थी तथा जो अपनी प्रतिज्ञाकी सत्यताकी रक्षा नहीं कर सके थे, उन्हीं महाराज बलिके द्वार पर श्रीभगवान् द्वारपालके रूपमें विराजते हैं। यह क्या उसके उस तुच्छ दानका फल है? अथवा दुष्ट बाणासुरकी रक्षा क्या मेरे स्तवपाठका फल है?॥८२-८३॥

दिग्दर्शिनी टीका—न च मन्तव्यं द्वारपालकत्वेन भगवतो बलौ प्रह्लादतोऽपि कृपाविशेष इति, तच्च तत् सम्बन्धादेवेत्याह—मर्यादेति सार्धद्वयेन। मर्यादा ब्रह्मणा विहितः सेतुः, देवानां स्वर्गाधिपत्यं दैत्यानाञ्च पातालाधिपत्यमित्यादि-लक्षणः, तदति-क्रमकर्त्तुरपि ऐन्द्रपद-यज्ञभाग सूर्यचन्द्राद्यधिकारग्रहणात्। अपिशब्दोऽग्रेऽप्यनुवर्त्तनीयः; गुरोः शुक्रस्य आदेशः—'वामनाय प्रतिश्रुतं सर्वं सत्यं न कुरु किञ्चिद्देहि।' इत्यादिलक्षणः तं न करोतीति तथा तस्यापि। एवं गुरुणा शप्तस्यापीति चात्र द्रष्टव्यम्। यथोक्तमष्टमस्कन्धे (श्रीमद्भा॰ ८/२०/१४) श्रीशुकेन—*'एवमश्रद्धितं शिष्यमनादेशकरं गुरुः। शशाप दैवप्रहितः सत्यसन्धं मनस्विनम्॥'* इत्यादि। असम्पन्नः स सम्यक् सिद्धः, स्ववाग्जालस्य स्वकीयवचन समूहस्य सत्यताया अन्तो निष्ठा यस्य तस्य स्वयमङ्गीकृत-भगवत्-पदत्रय परिमित-भूमिदानासम्पत्तेः। तथा च तत्रैव (श्रीमद्भा॰ ८/१८/३२) बलिवचनानि—*'यद्यद्वटो वाञ्छसि तत् प्रतीच्छ मे, त्वामर्थिनं विप्रसुतानुतर्कये।'* इत्यादीनि, तथा भगवत्कृतत्रिपाद-परिमित-भूमिप्रार्थणानन्तरम् (श्रीमद्भा॰ ८/१९/१८)—*'अहो ब्राह्मणदायाद वाचस्ते वृद्धसम्मताः। त्वं वालो वालिशमतिः स्वार्थं प्रत्यबुधो यथा॥'* इत्यादीनि च। तथा भगवत्प्रत्युत्तरानन्तरमपि (श्रीभा॰८/१९/२८)—*'इत्युक्तः स हसन् प्राह वाञ्छातः प्रतिगृह्यताम्।'* इत्यादीनि॥८२॥

तादृक्द्वारपालतयेत्यर्थः। यद्बलेर्द्वारेऽवस्थानं तत्तुच्छस्य सत्यस्य त्रैलोक्यस्य स्वशरीरस्य च यद्दानं समपर्णम्। *'पदं तृतीयं कुरु शीर्ष्णि मे निजम्।'* (श्रीमद्भा॰ ८/२२/२) इति तेनैव भगवन्तं प्रत्युक्तत्वात्। अस्य फलं किमु अपि तु नैव। किन्तु केवलं महाप्रेष्ठे प्रह्लादे या प्रीतिः प्रियता तदपेक्षयैव, तदिति परेण वाक्य समापनम्। तदिति तस्मिन् परमानिर्वचनीय-माहात्म्य इति प्रह्लाद विशेषणं वा। एवं मर्यादादि विशेषणत्रयेण बलेस्तत्तद्दोष निरुपणेन भगवतस्तद्द्वारपालकत्वासम्भव उक्तः। तथा तुच्छेति पदेन त्रैलोक्यादिदानफलं तदस्तीत्याशंका च निरस्ता। अयमभिप्रायः—मिथ्यावस्तुना सत्यवस्तुनः कस्यचित् कथञ्चिदपि प्राप्तिर्लोकेऽपि न दृश्यते; तत् कथं सच्चिदानन्दघनस्य भगवतः प्राप्तिस्तत्रापि द्वारपालकतया परमतुच्छ त्रैलोक्यदानादिना घटताम्? अतो भगवत् प्रीतिहेतु-प्रह्लादविषयक्-सच्चिदानन्दमय-प्रेमभक्त्यैव तथाप्राप्तिः सम्भवतीति। आस्तां वा कुत्रापि श्रूयमाणया प्रह्लादस्यैव वरेण प्राप्तया भगवद्भक्तया बलेस्तथा तत्प्राप्तिः। परमदुष्टश्रेष्ठं बाणं प्रति श्रीभगवतोऽनुग्रहभरे श्रीप्रह्लादविषयकं प्रीतिं विना नान्यत् किमपि कारणं दृश्यत इत्याह—रक्षणमिति। शरीररक्षणे न मृत्योः सकाशात् चतुर्भुजत्वापादनेन च बाहुगणच्छेदनप्राप्त-परमवैरूप्यात् श्रीशिवपार्षदता-प्रापणेन च संसारादपीति दिक्। बाणस्य दुष्टत्वञ्च—*'त्रिलोक्यां प्रतियोद्धारं न लेभे त्वदृते समम्।'* इति दशमस्कन्धोक्त (श्रीमद्भा॰ १०/६२/६) निजप्रभुशिव-विषयक गर्ववचनादिना, तथा कौलिक-परमेष्ट-

श्रीविष्णुभक्ति-परित्यागेन, तथा दैत्य स्वाभाविक विष्णुभक्त-देवब्राह्मण्यादि-द्वेषादिना, तथाऽनिरुद्धबन्धन-युद्धकरणादिना, च पुराणान्तरतोऽवगन्तव्यम्। मदीयस्तवेन मया बाणरक्षार्थं कृतं यच्छ्रीकृष्णस्तोत्रं तेन कारितं सम्पादितं किं नु? अपि तु नैव, किन्तु तदपि महाप्रेष्ठप्रह्लाद-प्रीत्यपेक्षयैव। परमदुस्तर वैष्णव विषयकापराधो वैष्णव-कृपयैव निस्तीर्यत इति न्यायाद् बलिबाणयोः, प्रह्लादपुत्रपौत्रतया तदीयस्नेहविषयता सम्भावनया तदपेक्षयैव सर्वानपराधान् क्षान्त्वा भगवान् परमानुग्रहं चकारेति तात्पर्यम्॥८३॥

भावानुवाद—यदि आपत्ति हो कि बलि महाराजके द्वारपालके रूपमें श्रीभगवान्‌का जो अवस्थान है, क्या वह श्रीप्रह्लादकी तुलनामें अधिक कृपाका परिचय नहीं है? इसके उत्तरमें कहते हैं कि ऐसा मन्तव्य कदापि नहीं करना। प्रह्लादके साथ सम्बन्ध होनेके कारण ही बलिके प्रति श्रीभगवान्‌की ऐसी कृपा है, यही 'मर्यादा' इत्यादि श्लोकोंमें कह रहे हैं। उस बलिने श्रीब्रह्मा द्वारा बनायी गयी मर्यादाका उल्लंघन करके स्वर्गके राज्यको प्राप्त किया था। अर्थात् श्रीब्रह्मा द्वारा निर्दिष्ट देवताओंका स्वर्ग पर आधिपत्य और दैत्योंका पाताल पर आधिपत्य इत्यादि लक्षण-व्यवस्थाका उल्लंघन कर बलिने इन्द्रके पद पर अपना अधिकार कर लिया था। उन्होंने देवताओंको यज्ञ भाग ग्रहण करनेसे वञ्चित किया था तथा सूर्य-चन्द्र आदि देवताओंको उनके अधिकारोंसे वञ्चित करके उनके पदों पर दैत्योंको नियुक्त किया था। उन बलिने अपने गुरु शुक्राचार्यके आदेशका उल्लंघन किया था। उनके गुरुका आदेश था—'तुमने इन श्रीवामनको तीन पग भूमि दूँगा कहकर जो प्रतिज्ञा की है, उसमें से कुछ अंश दो, सम्पूर्ण नहीं।' बलिने अपने गुरुके इस आदेशका पालन नहीं किया था, इसलिए उनके गुरुने उनको अभिशाप दिया था। इस विषयमें अष्टम-स्कन्धमें कहा गया है कि शिष्यके द्वारा इस प्रकार अश्रद्धापूर्वक शुक्राचार्यका आदेश पालन न करनेसे, भगवान् द्वारा प्रेरित होकर शुक्राचार्यने उस असुरश्रेष्ठ राजा बलिको अभिशाप दिया था। विशेषतः वह बलि अपने वचनकी सत्यताकी रक्षा नहीं कर पाया अर्थात् स्वयं प्रतिज्ञा करके भी श्रीभगवान्‌को तीन पगके समान भूमिदान करनेमें समर्थ नहीं हुआ। इस विषयमें बलि स्वयं कहते हैं—"हे वटुक (ब्रह्मचारी)! आपकी जो अभिलाषा हो वही माँगो, मैं वही प्रदान करूँगा। हे

विप्रबालक! मेरा ऐसा अनुमान है कि आप अर्थार्थी होकर ही आये हो।" इसके उपरान्त श्रीभगवान्‌ने तीन पगके समान भूमिकी प्रार्थना की, किन्तु बलिने कहा "अहो! विप्रनन्दन! आपके वचन तो वृद्ध–पुरुषों जैसे हैं, किन्तु व्यवहारमें आप बालक ही हैं, क्योंकि आपकी बुद्धि अनजान व्यक्तिकी भाँति है, विशेषतः स्वार्थके विषयमें आपको तनिक भी ज्ञान नहीं है।" श्रीभगवान्‌ने इसका उत्तर दिया था। तदनन्तर बलि महाराजने भगवान् श्रीवामनदेवकी बात सुनकर हँसते हुए कहा कि आप अपनी वाञ्छित भूमि ग्रहण करें।

दिग्दर्शिनी टीका—ननु तर्हि स त्वयपि पर्यवस्यत्येव भक्तत्वात्तत्राह—हनुमदिति। तस्य कृष्णस्य मया न कृतास्ति; परं केवलं स्मरणं ध्यानमेव क्रियते। वर्त्तमान-निर्द्देशेनाधुनैव तत्र प्रवृत्तोऽस्मि, न तु तत्रापि निष्ठां प्राप्तोऽस्मीति बोधयति। ननु सेवाशब्दाभिधेय-नवविधभक्तिमध्ये सर्वेन्द्रियमुख्यमनोऽर्पणम्। स्मरणमेव मुख्यं तत् कर्त्तृत्वाच्च त्वमेव भक्तमुख्योऽनुग्रहभरपात्रं तत्राह—विघ्नैर्लय-विक्षेपादिरूपैराकुले व्याप्ते। अतः सदा चित्तस्य विघ्नाकुलत्वात्तत्र सम्यक् स्मरणमेव न जायत इति भावः। यद्वा, स्मरणस्य चित्तधर्मत्वाच्चित्तस्य च विघ्नाकुल-स्वभावकत्वात् स्मरणं न मुख्यमिति भावः। एतच्चाग्रे श्रीगोलोक-माहात्म्ये सन्यायं व्यक्तं भावि॥२०॥

भावानुवाद—यदि कहो कि श्रीकृष्णकी कृपा उनके सेवकों पर ही होती है, अतः भक्त होनेके कारण भगवान्‌की सेवाके अर्थात् कृपाके लक्षण तो तुममें ही पर्यवसित हो रहे हैं। इसके लिए 'हनुमदादि' श्लोक कह रहे हैं। श्रीहनुमान जैसे भक्तोंने जिस प्रकार भगवान्‌की सेवा की है, मैंने वैसी कोई भी सेवा नहीं की है। मैं तो केवल उनका स्मरण मात्र करता हूँ। यहाँ पर 'स्मरण क्रियते' पदमें वर्त्तमान कालकी क्रियाका प्रयोग करनेका कारण यह है कि यद्यपि मैं अभी भी स्मरणमें प्रवृत्त हूँ, तथापि निष्ठाकी प्राप्ति नहीं हुई है।

यहाँ प्रश्न हो सकता है कि 'सेवा' शब्दसे अभिधेयरूप नवविधा भक्तिका बोध होता है और उस नवविधा भक्तिमें स्मरण ही मुख्य है। सभी इन्द्रियोंमें मन ही श्रेष्ठ है तथा उस मनको श्रीकृष्णके चरणकमलोंमें समर्पित करना स्मरण है, इसलिए स्मरण श्रेष्ठ है तथा इस स्मरणके श्रेष्ठ होनेके कारण तुम भी श्रीकृष्णके विशेष भक्त और विशेष कृपापात्र हो। इसके उत्तरमें कह रहे हैं कि मैं तो केवल लय-विक्षेपादि द्वारा अभिभूत (वशीभूत) होकर श्रीकृष्णका स्मरणमात्र करता हूँ। अतएव मेरे चित्तके सदैव विघ्नोंसे व्याकुल होनेसे मेरा स्मरण भी सम्पूर्णरूपमें सिद्ध नहीं होता है। अथवा स्मरण चित्तका धर्म है और उस चित्तके सदैव लय-विक्षेप आदि विघ्नोंसे आकुल होनेके कारण वैसा स्मरण भी मुख्य (श्रेष्ठ) नहीं है। इस विषयमें श्रीगोलोक-माहात्म्यमें न्यायसंगत युक्ति और विचारादि प्रदर्शित होगा॥२०॥

यन्मद्विषयकं तस्य लालनादि प्रशस्यते।
मन्यते मायिकं तत्तू कश्चिल्लीलायितं परः॥२१॥

श्लोकानुवाद—आपने मेरे विषयमें श्रीकृष्ण द्वारा किये गये लालन आदिकी जो प्रशंसा की है, उसको मायावादी लोग मायाका कार्य कहते हैं। कोई-कोई ही इसको भगवान्‌की लीलाका स्वभाव समझते हैं॥२१॥

दिग्दर्शिनी टीका—ननु तादृशलालनादिकं परमानुकम्पागमकमेव। तत्राह—यदिति तस्य कृष्णस्य तत् कृतमित्यर्थः। तत्तु लालनादि कश्चिदद्वैतमार्गनिष्ठो मायावादी वेदान्ती मायिकं मायाकृतं मन्यते परब्रह्मणो भगवतः स्वतस्तत्तदसम्भवात्। परः भक्ति-मार्गरतस्तु लीलायितं लीलायाचरितं तत् न तु मायिकम्, सच्चिदानन्दघनस्य परमेश्वरस्य सच्चिदानन्दशक्तया सच्चिदानन्द-विचित्रलीला-सम्भवात्। तथापि परमफलत्वेऽपर्यवसानान्नानुग्रहभरलक्षणमिति भावः॥२१॥

भावानुवाद—यदि कहो कि श्रीनृसिंहदेव द्वारा लालन आदि ही तुम्हारे प्रति उनकी परमकृपाका लक्षण है। इसके उत्तरमें कह रहे हैं कि आप मेरे प्रति स्नेहसे वशीभूत होकर श्रीकृष्णके द्वारा किये गये मेरे लालन इत्यादिके कारण जो मेरी प्रशंसा कर रहे हैं, उस लालन आदिको तो अद्वैतमार्गमें निष्ठा रखनेवाले मायावादी लोग मायाका कार्य कहते हैं, क्योंकि उनके मतानुसार परब्रह्म द्वारा स्वयं ऐसा कोई भी कार्य करना असम्भव है। परन्तु कोई-कोई अर्थात् भक्त ही उसको भगवान्‌की लीलाका कार्य अथवा भगवान्‌की लीला कहते हैं, मायाका कार्य नहीं। अर्थात् भगवान् अपने लीलायुक्त स्वभाव द्वारा भक्तोंके साथ इस प्रकारकी विभिन्न अद्भुत लीलाएँ करते हैं। यद्यपि सच्चिदानन्दघनस्वरूप परमेश्वरकी सच्चिदानन्दमयी शक्ति द्वारा वैसी सच्चिदानन्दमयी विचित्र लीलाएँ सम्भव होती हैं, तथापि ऐसी लालन आदि क्रियाओंको भगवत्कृपाका लक्षण नहीं कहा जा सकता है॥२१॥

स्वाभाविकं भवादृक् च मन्ये स्वप्नादिवत्त्वहम्।
सत्यं भवतु वाथापि न तत् कारुण्यलक्षणम्॥२२॥

श्लोकानुवाद—आपके जैसे महाजन उस लालन आदिको भगवान्‌का स्वाभाविक वात्सल्य मान रहे हैं, किन्तु मुझे वह स्वप्न जैसा लग रहा है तथा यह सत्य होने पर भी श्रीभगवान्‌की करुणाका लक्षण नहीं हो सकता है॥२२॥

दिग्दर्शिनी टीका—भवादृक् भगवन्माहात्म्य तत्त्वाभिज्ञजनस्तु स्वाभाविकं सहज वात्सल्यभरकोमलतर स्वभावेन कृतं मन्यते। तथाप्यग्नेर्जाड्यादि-नाशनवत् सर्वत्रापि साम्यादनुग्रहविशेषेणैव पर्यवस्यतीति भावः। तथाप्यनुग्रहो जात एवेति चेत्? तत्राह—अहन्तु स्वप्नादिवन्मन्ये; आदि शब्देन भ्रम मनोरथादि अत्यल्पक्षणवृत्तेस्तन्न जातमिवेति। मन्मतेऽप्यसत्यमेव पर्यवस्यतीति भावः। मायावादीमते मायिकत्वेन तत्त्वतोऽसत्यत्वं स्वमते चाचिरस्थायित्वेन स्वप्नादितुल्य तया स्वस्मिन्नाविर्भावेऽसत्यत्वमिति भेदः। ननु सर्वत्र सुप्रसिद्धं सुरमुनिगणादि दृष्टमेव तत् स्वयं बहुशोऽनुभूतं कथं स्वप्नायितं मन्यसे? कथं वा बाल्ये एव बोधोत्तमोत्पत्त्या सदीहितादिना प्रकटमपि भगवत् कृपाभर सम्पत्ति लक्षणं निह्नूयते? तत्राह—सत्यमिति। तत् लालनादिकं कारूण्यस्य लक्षणं न भवति॥२२॥

भावानुवाद—आप जैसे भगवान्‌के माहात्म्यको जाननेवाले महाजन, उक्त लालन आदि क्रियाओंको भगवान्‌का स्वाभाविक वात्सल्य और उनके कोमल स्वभाव द्वारा किया हुआ मान रहे हैं। जैसे अग्निके स्वभाववशतः शीत और जड़ता नष्ट होती है, उसी प्रकार सर्वत्र समदर्शी भगवान्‌के स्वाभाविक वात्सल्य और कोमल स्वभाव द्वारा किये गए कार्य भी अनुग्रहमें पर्यवसित होते हैं। (किन्तु क्या वह यथार्थ अनुग्रह है? नहीं।) यद्यपि आप उसे भगवान्‌का अनुग्रह कहते हैं, तथापि मैं उसको स्वप्नवत् अर्थात् स्वप्न, भ्रम या मनोरथ आदिके समान मानता हूँ, क्योंकि वह अति अल्प समयके लिए था। इसलिए मेरे विचारसे या तो वैसा हुआ ही नहीं, अथवा वह असत्यके रूपमें पर्यवसित हो रहा है। मायावादियोंके मतानुसार भगवान्‌का स्वाभाविक वात्सल्य मायिक होनेसे तत्त्वतः असत्य है और मेरे मतानुसार थोड़ी देर तक स्थायी होनेके कारण स्वप्न आदिके समान प्रतीत होने पर वह असत्य जैसा है, यही भेद है।

यदि आपत्ति हो कि सर्वत्र प्रसिद्ध तथा देवताओं और मुनियोंके द्वारा प्रत्यक्ष दृष्ट तथा तुम्हारे द्वारा अनेक प्रकारसे अनुभूत उस महान सत्यको तुम कैसे स्वप्नवत् मान रहे हो? और भी देखो, भगवान्‌के कृपापात्र हुए बिना बाल्यकालमें ही तुममें निर्मल भगवत् ज्ञानकी उत्पत्ति और सदाचार जैसे गुण कैसे प्रकट हो सकते हैं? क्या यह अप्राकृत गुणरूप सम्पत्तिके लक्षण, भगवान्‌की कृपाके चिह्न

नहीं हैं? इसके उत्तरमें श्रीप्रह्लाद महाराजने कहा कि यदि यह सत्य है तो हो, किन्तु उस लालन आदिको भगवान्‌की करुणाका यथार्थ लक्षण नहीं कहा जा सकता है॥२२॥

विचित्रसेवादानं हि हनूमत्प्रभृतिष्विव।
प्रभोः प्रसादो भक्तेषु मतः सद्‌भिर्न चेतरत्॥२३॥

श्लोकानुवाद—भक्ति परायण साधुगण सदैव कहते हैं कि श्रीहनुमान जैसे भक्तोंको जिस प्रकारकी विचित्र सेवाएँ प्राप्त हैं, वैसी सेवाओंकी प्राप्ति ही यथार्थमें भगवान्‌की कृपा है, लालन आदि नहीं॥२३॥

दिग्दर्शिनी टीका—तत्र हेतुमाह—विचित्रेति। हि यतः विचित्राया सेवाया दानमेव भक्तेषु प्रभोः प्रसादः सद्भिर्भक्तिपरैर्मतः न तु इतरत् लालनादिकम्। ननु कीदृशं तद्विचित्रसेवादानम्? यद्वा, तादृशः प्रसादः केष्वपि किं वर्त्तते इत्यपेक्षायां दृष्टान्तयति—हनूमदिति। प्रभृतिशब्देन पाण्डवयादवादयः सुग्रीवाङ्गादादयोः वा। यादृशो हनूमदादिष्वनुग्रहस्तादृशोऽयं न भवति। तत् कथं भगवत्कृपाभरपात्रतोक्त्या मन्माहात्म्यं स्तुयत इति भावः। अनेन कृष्णेनाविर्भूयेति श्लोकार्धार्थो निरस्तः॥२३॥

भावानुवाद—अब 'विचित्र' इत्यादि श्लोक द्वारा श्रीप्रह्लाद महाराज अपने प्रति भगवान्‌के वात्सल्य आदिको भगवान्‌की यथार्थ कृपा न माननेका कारण बता रहे हैं। भक्तिपरायण साधुगण सदैव कहते हैं कि अनेक प्रकारकी सेवाओंका सुयोग प्रदान करना ही भक्तोंके प्रति भगवान्‌की यथार्थ कृपा है। लालन आदि प्रभुकी कृपा नहीं है। यदि प्रश्न हो कि वैसी सेवाओंको प्रदान करनेका तात्पर्य क्या है? अथवा वैसी कृपा किस भक्त पर हुई है? इस प्रश्नकी आशंकासे ही श्रीहनुमान जैसे भक्तोंके दृष्टान्तको प्रदर्शित कर रहे हैं। यहाँ पर 'श्रीहनुमान जैसे भक्तोंके' कहनेसे पाण्डव और यादव आदिको अथवा सुग्रीव और अंगद आदिको समझना चाहिए। श्रीहनुमान जैसे भक्तोंको जैसी सेवा प्रदान की गयी है, वैसी सेवा मुझे प्रदान नहीं की गयी है। अतएव श्रीहनुमान आदिके प्रति भगवान्‌का जैसा अनुग्रह है, मेरे प्रति वैसा अनुग्रह नहीं है। अतएव आप किस प्रकार 'भगवान्‌की कृपाके श्रेष्ठ पात्र' इत्यादि वचनोंके द्वारा मेरे माहात्म्यको बतलाकर स्तुति कर रहे हैं? इसके द्वारा 'श्रीकृष्णने स्वयं आविर्भूत होकर

लालन आदि किया था', इस आधे श्लोक (संख्या ७)के अर्थ अर्थात् 'श्रीप्रह्लाद ही भगवान्‌के श्रेष्ठ कृपापात्र हैं' का खण्डन हुआ है॥२३॥

श्रीमन्नृसिंहलीला च मदनुग्रहतो न सा।
स्वभक्तदेवतारक्षां पार्षदद्वयमोचनम्॥२४॥
ब्रह्मतत्तनयादीनां कर्त्तुं वाक्सत्यतामपि।
निजभक्तिमहत्त्वञ्च सम्यग् दर्शयितुं परम्॥२५॥

श्लोकानुवाद—भगवान् श्रीनृसिंहदेवने जो लीला की है, वह मुझ पर अनुग्रह करनेके लिए नहीं की है। वह लीला उन्होंने अपने भक्त देवताओंकी रक्षा, दोनों पार्षदों (जय-विजय)के मोचन, ब्रह्मा और उनके पुत्रोंके वचनोंकी सत्यताकी रक्षा तथा सम्पूर्णरूपसे अपनी भक्तिके महत्वको प्रदर्शन करनेके लिये ही की है॥२४-२५॥

दिग्दर्शिनी टीका—ननु भक्तिविघ्नायमानस्य हिरण्यकशिपोस्तवकृत एव वधार्थं तादृशाद्भुतरूपाविर्भावनादिना त्वयि परमानुग्रहः पर्यवसित एव? तत्राह—श्रीमन्नृसिंहेति। सा परमाद्भुतरूपधारण-हिरण्यकशिपु विदारणादिरूपा श्रीमतो नृसिंहस्य लीला; स्वभक्तानां देवतानामिन्द्रादीनां रक्षां कर्त्तुम्; तथा पार्षदद्वयस्य वैकुण्ठद्वारपालयोर्जयविजययोः सनकादिशापतो विमोचनं कर्त्तुं तथा ब्रह्मणस्तत्तनयानाञ्च सनकादीनाम् आदि शब्देन निजभृत्यजयावतार हिरण्यकशिपु-नारदादीनाञ्च वाचः सत्यतामपि कर्त्तुम; तत्र च श्रीमन्नृसिंहरूपाविर्भावनादिना ब्रह्मणो हिरण्यकशिपुवधादिना च सनकादीनां वाक्सत्यता पादनमित्यादिकमुह्यम्। एतच्च सप्तमस्कन्धे (श्रीमद्भा॰ ७/८/१७)—*'सत्यं विधातुं निजभृत्य-भाषितम्'* इत्यस्मिन् श्लोके श्रीधरस्वामिपादैर्विस्तार्य व्याख्यातमस्तीति न विवृत्यात्र लिख्यते। एवं तत्तत्र किल मत्कृपयेत्युक्तम्। इदानीं ब्रह्मरुद्राद्यनादरेण तेषां साक्षात्कृतं मत्सन्माननादिकमपि न मत्कृपयेत्याह—निजेति। परं केवलं परमं वा; अन्यथा श्रीगरुड़ादि वैकुण्ठनित्यपार्षदवराणां महालक्ष्म्याश्चानादरानुपपत्तेः। तच्च प्राग्लिखितमेव। एवं ब्रह्मेशादीत्यादि सार्द्ध श्लोकार्थोत्तरमुह्यम्॥२४-२५॥

भावानुवाद—यदि कहो कि भक्ति-विरोधी हिरण्यकशिपुके वधके लिए ऐसे अद्भुत रूपमें भगवान्‌का आविर्भाव आदि भी तुम्हारे प्रति परम अनुग्रहके रूपमें दिखाई देता है। इसके लिए कह रहे हैं कि श्रीनृसिंहदेवने जो सब लीलाएँ की हैं, वह सब मुझ पर अनुग्रहवशतः नहीं की हैं। उनका ऐसा परम अद्भुत रूप-धारण और हिरण्यकशिपु-संहार

आदि लीला अपने भक्त इन्द्र आदि देवताओंकी रक्षाके लिये, वैकुण्ठके दोनों पार्षद अर्थात् वैकुण्ठके द्वारपाल जय और विजयको सनक आदिके शापसे मुक्त करानेके लिये तथा ब्रह्मा और उसके पुत्रों सनक आदि मुनियोंके वचनोंकी सत्यताका प्रतिपादन करनेके लिये था। 'आदि' शब्दसे अपने द्वारपाल जयके अवतार हिरण्यकशिपुके वचनों और श्रीनारदके वचनोंकी सत्यताका प्रतिपादन करना समझना चाहिए। किन्तु यहाँ पर श्रीनृसिंह रूपमें आविर्भावका विषय और श्रीब्रह्माके द्वारा हिरण्यकशिपुके वध सम्बन्धी वचनों और सनकादिके वचनोंकी सत्यताका प्रतिपादन इत्यादिका उल्लेख नहीं किया गया है, क्योंकि इस विषयमें सप्तम-स्कन्धमें कहा गया है—"अनन्तर भगवान् अपने भृत्य (दास)के वचन तथा समस्त प्राणियोंमें अपने व्याप्त होनेकी सत्यताके प्रदर्शनके लिये सभाके मध्यस्थित स्तम्भमें से अद्भुत श्रीनृसिंहरूपमें आविर्भूत हुए।" श्रील श्रीधरस्वामीपादने भी इस श्लोककी विस्तृत व्याख्या की है, इसलिए इसका विस्तृत विवेचन प्रस्तुत नहीं किया जा रहा है। परन्तु भगवान्‌की ऐसी लीला निश्चय ही मेरे प्रति कृपा करनेके लिए नहीं है।

श्रीब्रह्मा, श्रीरुद्र आदिकी उपेक्षा कर उन लोगोंके सामने मेरे प्रति सम्मानादि प्रदर्शन करनेकी जो बात आपने कही है, वह भी मेरे प्रति भगवत्कृपाका लक्षण नहीं है, बल्कि वह तो केवल भगवद्भक्तिके महत्वको प्रदर्शन करनेके लिए है। अर्थात् केवल मात्र अपनी भक्तिकी महिमाका प्रदर्शन करनेके लिए ही भगवान्‌ने वैकुण्ठके नित्य पार्षद श्रीगरुड़ आदि और श्रीमहालक्ष्मीके प्रति वैसे अनादरका सहारा लिया है। उनका यथार्थ अनादर कदापि सम्भव नहीं है, क्योंकि वे तो भगवान्‌के नित्य पार्षद हैं। इस विषयमें पहले भी कहा जा चुका है। इस प्रकार 'श्रीब्रह्मा जैसे भक्तोंका अनादर करके भी भगवान्‌ने तुम्हारा सम्मान किया था' इत्यादि (सप्तम) श्लोकके अर्थका भी उत्तर दिया गया है॥२४-२५॥

परमाकिञ्चनश्रेष्ठ यदैव भगवान् ददौ।
राज्यं मह्यं तदा ज्ञातं तत्कृपाणुश्च नो मयि॥२६॥

श्लोकानुवाद—हे परम अकिञ्चनश्रेष्ठ गुरुदेव! जबसे भगवान्‌ने मुझको राज्यदान किया है, तभीसे मैंने जान लिया है कि मेरे प्रति उनकी लेशमात्र भी कृपा नहीं है॥२६॥

दिग्दर्शिनी टीका—एवं कोऽप्यनुग्रहो मयि नास्त्येव प्रत्युत निग्रह एव महाँल्लक्ष्यते इत्याह—परमेति त्रिभिः। अकिञ्चनाः त्यक्ताखिलपरिग्रहाः परमहंसाः परमाकिञ्चनाः तेष्वपि श्रेष्ठाः परित्यक्तमुमुक्षात्मारामता मुक्तिसुखा भक्तास्तेष्वपि श्रेष्ठ हे नारद! एवं सम्बोधनेन राज्यादिपरिग्रह दोषं भवान् जानात्येवेति बोधितम्। तस्य भगवतः कृपया अणुश्च लेशोऽपि न मयि वर्त्तत इति तदानीमेव ज्ञातं मया॥२६॥

भावानुवाद—अतएव मेरे प्रति भगवान्‌की कृपा लेशमात्र भी नहीं है, अपितु महान निग्रह अर्थात् कृपाका अभाव लक्षित हो रहा है। यही 'परम' इत्यादि तीन श्लोकोंके माध्यमसे कह रहे हैं। अकिञ्चन अर्थात् समस्त ग्रहणीय वस्तुओंका त्याग करनेवाला। परमहंस—परम अकिञ्चनोंसे भी श्रेष्ठ। अतएव परम अकिञ्चन—भक्तश्रेष्ठ श्रीनारद! आपने मुमुक्षुता (मुक्तिकी इच्छा), आत्मारामता और मुक्ति सुख आदिका परित्याग कर दिया है। ऐसे सम्बोधनका तात्पर्य यह है कि राज्य आदि संग्रहके दोषको आप जानते हैं। अतएव जबसे भगवान्‌ने मुझे राज्यदान किया है, तबसे मैंने जान लिया है कि श्रीभगवान्‌की कृपा मेरे प्रति लेशमात्र भी नहीं है॥२६॥

"तं भ्रंशयामि सम्पद्भ्यो यस्य वाञ्छाम्यनुग्रहम्।"
इत्याद्याः साक्षिणस्तस्य व्याहारा महतामपि॥२७॥

श्लोकानुवाद—इस विषयमें स्वयं श्रीभगवान्‌ने कहा है—"मैं जिसके प्रति कृपा करनेकी इच्छा करता हूँ, उसको सम्पत्तिसे रहित कर देता हूँ।" अन्यान्य महाजनोंकी ऐसी उक्तियाँ भी इस विषयमें साक्षी हैं॥२७॥

दिग्दर्शिनी टीका—तदेव प्रमाणयति—तमिति। एतच्च दशमस्कन्धोक्तं शक्रं प्रति श्रीभगवद्वचनम्। अस्य भगवतो व्याहाराः उक्तयः साक्षिणः प्रमाणानि। आद्य-शब्देन तत्रैव (श्रीमद्भा॰ १०/८८/८) युधिष्ठिरं प्रति *'यस्याहमनु-गृह्णामि हरिष्ये तद्धनं शनैः।'* इत्यादि। महतां भगवद्भक्तानां श्रीदाम-रङ्कभक्तवृत्रादीनामपि

व्याहाराः साक्षिणः। तथा च श्रीदाम्नो वाक्यम् (श्रीमद्भा॰ १०/८१/३७)—*'भक्ताय चित्रा भगवान हि सम्पदो, राज्यं विभूतीर्न समर्थय त्यजः। अदीर्घबोधाय विचक्षणः स्वयं पश्यन् निपातं धनिनां मदोद्भवम्॥'* इति। वृत्रस्यापि षष्ठस्कन्धे (श्रीमद्भा. ६/११/२२)—*'पुंसां किलैकान्तधियां स्वकानां, याः सम्पदो दिवि भूमौ रसायाम्। न राति यद्द्वेष उद्वेग आधिर्मदः कलिर्व्यसनं सम्प्रयासः॥'* इति॥२७॥

भावानुवाद—राज्यदान श्रीभगवान्‌की कृपाका लक्षण नहीं है, इसे ही प्रमाणित कर रहे हैं। यथा, दशम-स्कन्धमें इन्द्रके प्रति श्रीभगवान्‌के वचन हैं—"मैं जिसके प्रति कृपा करनेकी इच्छा करता हूँ, उसको सम्पूर्णता सम्पत्तिहीन कर देता हूँ।" इत्यादि श्रीभगवान्‌की उक्ति ही इस विषयमें प्रमाण है। 'आदि' शब्दसे वहाँ उपस्थित श्रीयुधिष्ठिरके प्रति श्रीभगवान्‌के वचन हैं—"मैं जिसके प्रति कृपा करता हूँ, धीरे-धीरे उसका समस्त धन हरण कर लेता हूँ।" अन्यान्य महाजनोंकी ऐसी उक्तियाँ भी इस विषयमें साक्षी और प्रमाण हैं। उनमें श्रीदाम और वृत्रासुरादि भक्तोंकी उक्तियाँ ही विशेष प्रमाण हैं। श्रीदामकी उक्ति है—"स्वयं विवेकी श्रीभगवान् सम्पत्तिसे उत्पन्न गर्वके कारण धनी व्यक्तियोंका अधःपतन देखकर अविवेकी भक्तको विचित्र सम्पत्ति अथवा राज्यविभूति इत्यादि प्रदान नहीं करते हैं।" इसी प्रकार षष्ठ-स्कन्धमें वृत्रासुर भी कहते हैं—"जो एकान्त भावसे भगवान्‌के श्रीचरणकमलोंमें आत्मसमर्पण करते हैं, वे भगवान्‌के निजजन कहलाते हैं। भगवान् उनको स्वर्ग, मर्त्य और पातालमें जो सब सम्पत्ति है उसे नहीं देते, क्योंकि ऐसी सम्पत्तिसे द्वेष, उद्वेग, मनकी पीड़ा, मत्तता, विषाद और क्लेश आदिकी उत्पत्ति होती है"॥२७॥

पश्य मे राज्यसम्बन्धाद्बन्धुभृत्यादिसङ्गतः।
सर्वं तद्भजनं लीनं धिग्धिङ् मां यन्न रोदिमि॥२८॥

श्लोकानुवाद—और भी देखो, राज्य सम्पदके कारण बन्धु-बान्धवोंके संगसे ही मेरा समस्त भगवद्भजन तिरोहित हो गया है। मुझे धिक्कार है! मैं अभी भी अपनी उस भजन अवस्थाके लिए क्रन्दन नहीं कर रहा हूँ॥२८॥

दिग्दर्शिनी टीका—ननु अदीर्घ बोधायेतुक्त्या दीर्घबोधवतां भवादृशां तत्र दोषाय स्यात्। यथोक्तं श्रीभगवता मुचुकुन्दं प्रति (श्रीमद्भा॰ १०/५१/५९)—*'न धीरेकान्तभक्तानामा-शीर्भिर्भिद्यते क्वचित्।'* इति। उद्धवं प्रत्यपि (श्रीमद्भा॰ ११/१४/१८)—*'प्रायः प्रगल्भया भक्त्या विषयैर्नाभिभूयते।'* इति। सत्यम् किं तर्हि मयि भगवदनुग्रहाभावाद् व्यक्तमेव तद्दोषफलं पर्यवसितमिति सदैन्यमाह—पश्येति। तस्य भगवतः किम्वा तत्पूर्वकालीनं भजनम् लीनं लयं प्राप तिरोधत्तेत्यर्थः। सच्चिदानन्दरूपाया भगवद्भक्तेर्नित्यत्वेना-विनाशित्वाल्लीनमिति प्रयोगः। तच्च स चाविर्भवतीत्यत्र प्राग्व्याख्यातमेव॥२८॥

भावानुवाद—यदि कहो कि 'अदीर्घबोध' कहनेसे अविवेकी भक्तोंको ही राज्य आदिसे सम्बन्ध होनेके कारण भक्तिमें बाधा पहुँचती है, किन्तु आपके जैसे विवेकीके लिए वह दोषका कारण क्यों होगा? यह तो भगवान्ने स्वयं मुचुकुन्दको भी कहा है—"जो मेरे एकान्त भक्त हैं, उनकी बुद्धि कभी भी विषयभोगरूपी सुखोंमें आसक्त नहीं होती है।" श्रीउद्धवको भी भगवान् कह रहे हैं—"जिनके हृदयमें भाव उत्पन्न हो गया है, उन भक्तोंकी तो बात ही क्या, भक्ति मार्गमें प्रवेश करनेवाला भक्त भी विषयोंके द्वारा अभिभूत नहीं होता है।" श्रीप्रह्लादने कहा—"यह सत्य है, किन्तु मेरे प्रति भगवान्की कृपा लेशमात्र भी नहीं है, और यह सब राज्य सम्पत्ति आदि भी मेरे लिए दोषरूप फलमें ही पर्यवसित हो रही है।" इसलिए दीनतापूर्वक कह रहे हैं—"देखिये! राज्य-सम्बन्धके कारण बन्धु-बान्धवोंके संगवशतः मेरा समस्त भगवद्भजन अथवा पूर्वकालीन भजन भी तिरोहित हो गया है।" किन्तु यथार्थतः भगवद्भक्ति सच्चिदानन्दरूपा है, अतः नित्य है—विनाशशील नहीं है। इसलिए यहाँ पर 'लीन' (तिरोहित) शब्दका प्रयोग किया गया है। इससे पहले भी इस भक्तिके सम्बन्धमें आविर्भाव कहकर व्याख्या की गयी है॥२८॥

अन्यथा किं विशालायां प्रभुणा विश्रुतेन मे।
पुनर्जाति-स्वभावं तं प्राप्तस्येव रणो भवेत्॥२९॥

श्लोकानुवाद—अन्यथा क्या यह मेरे लिए उचित था कि मैं फिरसे अपने असुर स्वभावको प्राप्तकर बदरिकाश्रममें प्रसिद्ध अपने प्रभु श्रीनारायणके साथ युद्ध करता?॥२९॥

दिग्दर्शिनी टीका—तदेवान्यथानुपपत्तिन्यायेन द्रढ़यति—अन्यथेति। *'तुर्ये धर्मकला-सर्गे नरनारायणावृषी। भूत्वात्मोपशमोपेतमकरोद् दुश्चरत् तपः॥'* इति प्रथमस्कन्धे (श्रीमद्भा॰ १/३/९)। चतुर्थस्कन्धे च (श्रीमद्भा॰ ४/१/५८)—*'एवं सुरगणैस्तात भगवन्तावभिष्टुतौ। लब्धावलोकैर्ययतुरर्चितौ गन्धमादनम्॥'* इत्यादिवचन-प्रामाण्यात्तदीय-तत्रत्यतदुपाख्यानादि श्रवणाच्च विशालायां बदर्यां विश्रुतेन प्रसिद्धेनापि भगवता श्रीनारायणेन सह मम किमन्यथा तद्भजनलयं विना रणः संग्रामो भवेत्? सम्भावनायां सप्तमी। अपि तु तत् सम्भावनापि न स्यादित्यर्थः। जातिस्वभावम् असुरजातेर्भगवद्द्वेषरूपं स्वभावं तं निर्वक्तुम् अयोग्यम् अश्लीलत्वात्। यद्वा, निजपितृसदृशं प्राप्तस्य; इव उपेक्षायाम्॥२९॥

भावानुवाद—अब अपनी उक्तिकी दृढ़ताको स्थापित करनेके लिए श्रीप्रह्लाद 'अन्यथानुपपत्ति' न्यायके अनुसार युक्ति प्रदर्शित कर रहे हैं। अन्यथा, क्या मैं फिरसे प्रभुके साथ युद्ध करनेके लिए प्रवृत्त होता? श्रीमद्भागवतके प्रथम-स्कन्धमें उक्त है—"श्रीभगवान्‌ने चतुर्थ अवतारमें धर्म-पत्नीके गर्भसे श्रीनर-नारायण रूपमें आविर्भूत होकर आत्मसंयम रूप तपस्याके आचरणकी शिक्षा दी है।" तथा चतुर्थ-स्कन्धमें कथित है—"वही श्रीनर-नारायण इस प्रकार देवताओंके द्वारा स्तुति किये जाने पर उनको दर्शन देते हैं तथा उनके द्वारा की गई पूजाको ग्रहण करके गन्धमादन पर्वतको गमन करते हैं।" इत्यादि प्रामाणिक वचन और उस स्थान पर वर्णित उनके उपाख्यान आदिको श्रवण करके भी बदरिकाश्रममें प्रसिद्ध भगवान् श्रीनर-नारायणके साथ क्या मैं युद्धमें प्रवृत्त होता? अर्थात् भजन होने पर कभी भी युद्धकी सम्भावना नहीं रहती है; अतएव क्या मैंने फिरसे असुर स्वभावको प्राप्त नहीं किया है? अर्थात् मैंने असुर जाति सुलभ भगवद्द्वेष-भावरूप स्वभावको प्राप्त किया है। वैसी अश्लीलताके विषयमें कुछ प्रकाश करना भी उचित नहीं है। अथवा मैंने अपने पिता जैसे स्वभावको प्राप्त किया है, इसलिए मैं सम्पूर्णरूपसे उपेक्षा करने योग्य हूँ॥२९॥

आत्मतत्त्वोपदेशेषु दुष्पाण्डित्यमयासुरैः।
संगान्नाद्यापि मे शुष्कज्ञानांशोऽपगतोऽधमः॥३०॥

श्लोकानुवाद—आत्मतत्त्वके उपदेशके विषयमें असुर दुष्पण्डित हैं और उनके संगके प्रभावसे आज भी मेरा अधम शुष्कज्ञानका अंश नष्ट नहीं हुआ है॥३०॥

दिग्दर्शिनी टीका—पूर्वमपि मम दैत्यदुःस्वभावोऽशेषो नापगतोऽस्त्येवेत्याह—आत्मेति। आत्मनो जीवस्य तत्त्वं ब्रह्मत्वं तस्योपदेशेषु यद्दुष्पाण्डित्यं दुष्टचातुर्यं भक्तिं विनापि तज्ज्ञानमात्रेणैव परमकृतार्थता निरूपणात्। तन्मयैरसुरैः सह सङ्गाद्धेतोर्मे मत्तोऽद्यापि शुष्कः भक्तिरसहीनः शुष्कस्य वा ज्ञानस्यांशो गन्धो नापगतः। कीदृशः? अधमः परमदुष्टः भक्तिरस विघातकत्वात्॥३०॥

भावानुवाद—अभी तक मेरा अपार दैत्यस्वभाव भी दूर नहीं हुआ है। मैंने दैत्य-बालकोंको जो उपदेश दिया है, उसके द्वारा मैंने केवल जीवात्माके ब्रह्मत्वरूप तत्त्वके विषयमें दुष्पाण्डित्य रूप दुष्ट चतुराताको ही प्रकाशित किया है। अर्थात् मैंने भक्ति रहित केवल आत्मोपदेश विषयमें अपने पाण्डित्यको ही प्रकाशित किया है, क्योंकि असुरलोग भक्तिसे रहित, केवल आत्माके ब्रह्मत्व-निरूपणमें ही परम कृतार्थता समझते हैं। अतएव ऐसे असुरोंके संगसे आज तक भक्तिरस हीन मेरा शुष्क ज्ञानका अंश नष्ट नहीं हुआ है। वह शुष्क ज्ञान कैसा है? वह ज्ञान अधम, परमदुष्ट, भक्तिरस-विघातक है॥३०॥

कुतोऽतः शुद्धभक्तिर्मे यया स्यात् करुणा प्रभोः।
ध्यायन् बाणस्य दौरात्म्यं तच्चिह्नं निश्चिनोमि च॥३१॥

श्लोकानुवाद—अतएव मुझमें शुद्धभक्ति कहाँ है? तथा शुद्धभक्तिके अभावमें मुझ पर भगवान्‌की कृपा भी किस प्रकार होगी? अपने पर-पौत्र बाणासुरके दुष्टताकी चिन्ता करके भी मैं अपनेमें शुद्धाभक्तिका अभाव अनुभव करता हूँ॥३१॥

दिग्दर्शिनी टीका—अतोऽस्माद्धेतोः शुद्धा कर्मज्ञानांशसंभिन्ना भक्तिः कुतो मे स्यात् अपि तु न भवेदेव। शुद्धभक्तेर्लक्षणं श्रीवोपदेवाचार्यैर्मुक्ताफलग्रन्थै श्रीकपिलवचनेन लिखितमस्ति—'*अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे।*' इति। यथा शुद्धभक्त्या प्रभोः करुणा स्यात्, तल्लक्षणञ्च मया दृढ़ं ज्ञातमस्त्येवेत्याह—'ध्यायन्' इति। दौरात्म्यञ्च निजकुलेष्ट दैवतवर—श्रीविष्णुपरित्यागेनान्याश्रयणं श्रीमदनिरुद्धबन्धनादि वा तस्य शुद्धभक्तभावस्य चिह्नं लक्षणम्। ईदृशो हि दुष्टो यस्य वंशे जायते तस्य

काचिदपि शुद्धभक्तिर्भगवत्कृपा च तद्विषयका नास्तीति भावः। अनेन श्रीशिवोक्तं बाणरक्षणं भगवदनुग्रहलक्षणमिति निरस्तम्, तद्वधस्यैवेष्टत्वमननात्॥३१॥

भावानुवाद—अतएव मुझमें शुद्धभक्ति कैसे होगी? विशेषकर शुद्धभक्ति तो कर्म-ज्ञानादि द्वारा अनावृत होती है, इसलिए मुझमें वैसी शुद्धभक्ति कहाँ है? अर्थात् मुझमें शुद्धभक्ति नहीं है। शुद्धभक्तिके लक्षणोंको श्रीवोपदेवाचार्यने अपने मुक्ताफल नामक ग्रन्थमें श्रीकपिलदेवके वचनोंको उद्धृत करते हुए लिखा है—"पुरुषोत्तम भगवान्‌के विषयमें अनुष्ठित होनेवाली अहैतुकी तथा व्यवधान (बाधा) रहित भक्ति ही शुद्ध भक्ति कहलाती है।" वैसे लक्षणों वाली शुद्धभक्ति तो मुझमें नहीं है, यही मैं दृढ़तापूर्वक अनुभव कर रहा हूँ। अपने पर-पौत्र बाणासुरके दुष्टताकी चिन्ता करने पर भी अर्थात् बाणासुर द्वारा अपने कुलदेवता श्रीविष्णुके आश्रयको त्यागकर अन्य देवताका आश्रय ग्रहण करना तथा श्रीअनिरुद्धको बन्दी बना लेना, इस विषयमें चिन्ता करके मैं अपनेमें शुद्धभक्तिका अभाव अनुभव कर रहा हूँ। वास्तवमें जिसके वंशमें ऐसा दुष्ट जन्मग्रहण करे, क्या उसे कभी भी शुद्धभक्ति हो सकती है अथवा उन पर कभी भगवत्कृपा हो सकती है? कदापि नहीं। इसके द्वारा श्रीशिव द्वारा कहे गये वचन—'बाणासुरके प्राणोंकी रक्षा भगवान्‌की कृपाके लक्षण हैं' इत्यादिका भी खण्डन हुआ। यह भी सूचित होता है कि ऐसे दुष्टोंका वध ही वाञ्छनीय है, क्योंकि उसके प्राणोंकी रक्षा करना भगवत्कृपाका लक्षण नहीं है॥३१॥

बद्धा संरक्षितस्यात्र रोधनायास्तासौ बलेः।
द्वारीति श्रूयते क्वापि न जाने कुत्र सोऽधुना॥३२॥

श्लोकानुवाद—बलिके अपराधके कारण श्रीभगवान् उसके द्वारपालके रूपमें अवस्थान कर रहे हैं; यद्यपि यह बात सुनी तो जाती है, तथापि अब वे कहाँ हैं, इस विषयमें मैं कुछ नहीं जानता हूँ॥३२॥

दिग्दर्शिनी टीका—ननु तां ताञ्च विना बलेर्द्वारपालोऽसौ कथं वृत्तः? तत्राह—बद्धेति। अत्र सुतले; बले रोधनाय आवरणार्थं बलेर्द्वारि असौ प्रभुरस्तीति क्वापि कस्मिंश्चिन्मुनिजने श्रूयते। तथा च श्रीहरिवंशे बाणं प्रति कुष्माण्डवचनम्—*'बलिर्विष्णुबलाक्रान्तो बद्धस्तव पिता नृप। सलिलौघाद् विनिःसृत्य क्वचिद्राज्यमवाप्स्यति॥'*

इति। एतादृशमन्यदपि श्रीरामायणोत्तरकाण्डे रावणपातालजयप्रसङ्गतो ज्ञेयम् एवं बलेर्द्वारि तस्यावस्थितिर्न कारुण्येन, किन्तु निरोधनायैवेति पूर्वोद्दिष्टनिग्रहः साधितः। अनेन भोः! वैष्णवश्रेष्ठेति श्लोकोक्तं निरस्तम्ः ननु तथापि श्रीशिवब्रह्मादि दुर्लभदर्शनः श्रीवैकुण्ठेश्वरः सततमत्र द्वारे दृश्यत इति। महती कृपा लक्ष्यते एव। तत्राह—न जान इति। स प्रभुरधुना कुत्रास्तीत्यपि न जाने, कुतश्च तद्दर्शनमित्यर्थः। अधुनेत्यनेन कदाचिदेव तद्दर्शनं लभ्यते, नतु सदेति सूचितम्॥३२॥

भावानुवाद—यदि कहो कि तुम्हारी शुद्धभक्ति अथवा तुम्हारे प्रति भगवत्कृपाके बिना क्या भगवान् बलिके द्वार पर द्वारपालके रूपमें निवास करते? इस आशंकाके उत्तरमें 'बद्धेति' श्लोक कह रहे हैं। इस सुतलमें बलिके अपराधके कारण भगवान् उसके द्वार पर द्वारपालके रूपमें अवस्थान कर रहे हैं। यह वृत्तान्त किसी-किसी मुनि-समाजमें भी सुना जाता है। यथा, श्रीहरिवंशमें बाणके प्रति कुष्माण्डका वचन—"हे राजन्! यद्यपि आपके पिता बलि, श्रीविष्णुके बलसे आक्रान्त होकर बद्ध हुए हैं, यह सत्य है; तथापि जैसे रोका गया जलप्रवाह उछल कर बाँधको पार करके फिरसे आगेकी ओर प्रवाहित होने लगता है, उसी प्रकार आपके पिता भी बन्धनसे मुक्त होकर अपना अभिलषित राज्य प्राप्त करेंगे, इसमें सन्देह ही क्या है?" ऐसा प्रसंग और स्थानों पर भी देखा जाता है। जैसे श्रीरामायणके उत्तरकाण्डमें रावणके पाताल विजय-प्रसंगमें उल्लिखित है—"बलिके द्वार पर द्वारपालके रूपमें भगवान्का अवस्थान उनकी करुणाके कारण नहीं, बल्कि बलिको रोकनेके लिए है ताकि वह कहीं भाग न जाए"—ऐसा समझना चाहिए। इसके द्वारा पूर्वोदिष्ट अनुग्रहका अभाव ही स्थापित होता है। और 'भोः वैष्णवश्रेष्ठ' इत्यादि श्लोकोक्त श्रीप्रह्लादके प्रति प्रशंसावादका भी खण्डन हुआ। यदि कहो कि तथापि श्रीशिव-ब्रह्मा आदिको भी जिस वैकुण्ठेश्वरके दर्शन दुर्लभ हैं, उनका सतत दर्शन करना क्या महती कृपाका लक्षण नहीं है? उसीके लिए कह रहे हैं—अब प्रभु कहाँ पर अवस्थान कर रहे हैं, मैं यह जानता नहीं हूँ, अतः उनके दर्शन किस प्रकार करूँ? 'अधुना' इस वाक्यके द्वारा सूचित हो रहा है कि कभी-कभी भगवान्के दर्शन होते हैं, सदैव नहीं॥३२॥

कदाचित् कार्यगत्यैव दृश्यते रावणादिवत्।
दुर्वाससेक्षितोऽत्रैव विश्वासात्तस्य दर्शने॥३३॥

श्लोकानुवाद—कभी-कभी कोई अपने कर्मोंकी गति वशतः रावण आदिकी भाँति उनका दर्शन करता है। अपने विश्वासके कारण दुर्वासाने इसी स्थान पर प्रभुके दर्शन किये थे॥३३॥

दिग्दर्शिनी टीका—ननु बलिपुरीमिमां प्रविशन् रावणो गदाधरेण भगवता पादाङ्गुष्ठेनोच्चाटित इत्याद्युपाख्यानतोऽत्र सदैव द्वारे भगवतोऽवस्थानं गम्यते। तत्राह—कदाचित् कार्येति। कार्यस्य द्वारपालनलक्षणस्य कृतास्य गत्या प्राप्त्यैव केनापि कदाचिद्दृश्यते। स रावणादिभिरिव अन्यथा रावणेन बलिरुपविनीतः स्यादिति भावः। आदिशब्देन दुर्वासः प्रभृतयः। ननु बलिरोधनाय साक्षाद्भूतं भगवन्तमत्र रावणः पश्यतु नाम। दुर्वासाश्च भगवति कुशस्थलीरक्षक-कुशादिदैत्य-गणकृत-निजदुःख-निवेदनार्थमत्रैवागतस्तं ददर्शेति प्रह्लाद-संहितोक्त्या सदा तस्यात्रावस्थानं गम्यते। तत्राह—दुर्वाससेति सार्धेन। अत्र बलिद्वार एव तस्य भगवतो दर्शने विश्वासाद्धेतोरत्रैव दृष्टः सः, न तु तस्य द्वारपालतयात्रावस्थानात् सम्प्रति सुतले बलिद्वारे ब्रह्मण्यदेवो भगवान् वर्त्तते। तत्राचिरेण तस्य दर्शनं प्राप्स्यसीत्यादि नारदोपदेशेन विश्वस्तः सन् दुर्वासास्तत्र गत्वा सद्य एव तं प्रापेत्येवमुपाख्यानं द्वारकामाहात्म्य प्रतिपादक प्रह्लाद संहितातोऽन्वेषणीयम्॥३३॥

भावानुवाद—यदि कहो कि जिस समय रावणने पाताल-विजयके लिये सुतलमें बलिकी पुरीमें प्रवेश किया था, उस समय भगवान् श्रीगदाधरके पैरके अँगूठेकी ठोकरसे वह बहुत दूर जाकर गिरा था। इस उपाख्यान द्वारा यह ज्ञात होता है कि भगवान् सर्वदा बलिके द्वार पर द्वारपालके रूपमें अवस्थान करते हैं। इसलिए—'कदाचित्' इत्यादि पद कह रहे हैं, अर्थात् कार्यवशतः रावण आदिकी भाँति कोई-कोई कभी उनका दर्शन प्राप्त करते हैं, क्योंकि श्रीभगवान् बलिके द्वार पर द्वारपालके कार्यमें नियुक्त हैं। यदि भगवान् रावणको पैरके अँगूठेकी ठोकर द्वारा दूर न फेंक दिये होते, तो बलि रावणके द्वारा पीडित होते। यहाँ पर 'रावणादि' पदके आदि शब्दसे दुर्वासा आदिको भी ग्रहण करना होगा।

यद्यपि बलिके द्वारा रोक लिये जानेके कारण भगवान् द्वारापालके रूपमें सुतल लोकमें अवस्थान कर रहे हैं, तथा यदि उनका (श्रीभगवान्‌का) उद्देश्य भी यही हो (बलि सुतलमें ही वास करें),

तथापि यदि रावण बलिको पाताललोकसे कहीं निकाल दें, तो इससे भगवान्‌का उद्देश्य पूर्ण नहीं होगा। अतएव कार्यवशतः बलिकी रक्षा करनेके लिये द्वारपालके रूपमें अवस्थान कर रहे प्रभुका दर्शन प्राप्त हुआ। कुशस्थलीरक्षक कुशादि दैत्यों द्वारा पीडित होकर भगवान्‌को अपना दुःख निवेदन करनेके लिये आये दुर्वासाने इसी सुतललोकमें ही श्रीभगवान्‌के दर्शन प्राप्त किये थे। बलिके द्वार पर श्रीभगवान्‌की प्राप्तिके विषयमें श्रीप्रह्लादसंहितामें वर्णित उपाख्यान द्वारा उक्त प्रकारकी घटनाकी पुष्टि होती है। श्रीप्रह्लादसंहितामें कथित है, 'बलिके द्वार पर भगवान्‌के दर्शन प्राप्त होते हैं', ऐसे विश्वासके साथ दुर्वासा-ऋषिने वहीं पर भगवान्‌के दर्शन प्राप्त किये थे, किन्तु इस कारणसे नहीं कि भगवान् सुतलमें बलिके द्वारपालरूपमें सदा रहते हैं। आपने (श्रीनारदने) ही उनको कहा था—"आजकल भगवान् ब्रह्मण्यदेव सुतलमें बलिके द्वार पर रहते हैं, वहाँ जाने पर तुम उनके दर्शन पाओगे।" आपके इन्हीं वचनों पर विश्वास करके दुर्वासा-ऋषिने सुतलमें जाकर तत्क्षणात् भगवान्‌का दर्शन प्राप्त किया था। यह उपाख्यान द्वारका-महात्म्य-प्रतिपादक श्रीप्रह्लादसंहिता ग्रन्थमें द्रष्टव्य है॥३३॥

यस्य श्रीभगवत्प्राप्तावुत्कटेच्छा यतो भवेत्।
स तत्रैव लभेतामुं नतु वासोऽस्य लाभकृत्॥३४॥

श्लोकानुवाद—जिसकी जिस स्थान पर भगवत्प्राप्तिकी तीव्र इच्छा होती है, उसको उसी स्थानमें ही भगवान्‌की प्राप्ति होती है। भगवान् किसी विशेष स्थान पर वास करते हैं, अतएव उनको उस स्थान पर ही पाया जा सकेगा, ऐसा कोई नियम नहीं है॥३४॥

दिग्दर्शिनी टीका—ननु नियतावस्थितिं बिना विश्वासोऽपि कथं जायताम्? तत्राह—यस्येति। यतो यत्र स्थाने; श्रीभगवतः प्राप्तौ यस्य उत्कटेच्छा लालसाधिक्यं प्रेमौत्कण्ठ्यमिति यावत्, न तु इच्छामात्रम्। अमुं भगवन्तम्; न तु अस्य वासो वसतिर्वासस्थानं वा। केवलमस्य श्रीभगवतो लाभं प्राप्तिं करोतीति तथा सः। अन्यथा श्रीवासुदेवस्य सर्वत्रैव वासात् सर्वेषामेव सर्वत्रापि तत्प्राप्तिः स्यात्। अतो विश्वासोऽपि तत् प्राप्त्युत्कटेच्छयैव भवतीति भावः। यच्च श्रीवृन्दावनादौ तदीयप्रियतमाक्रीड़वरे विश्वासादिकं विनापि कदाचित् श्रीभगवद्दर्शनादिकं कस्यचित्

स्यात्, तच्च भगवत्परमप्रियतमत्वेन स्थानविशेषस्यैव कस्यचित् तादृङ्महाप्रभावात्। न तु सर्वस्यापि भगवदावासस्थानस्येति दिक्॥३४॥

भावानुवाद—यदि आशंका हो कि भगवान्‌की निश्चित अवस्थितिके बिना उनके वास स्थानके प्रति विश्वास भी कैसे होगा? इसीके समाधानके लिए 'यस्य' इत्यादि श्लोक कह रहे हैं। जिसकी जिस स्थान पर भगवान्‌को प्राप्त करनेकी तीव्र इच्छा जाग्रत होती है अर्थात् अत्यधिक लालसा या प्रेमोत्कण्ठा उदित होती है, वे उसी स्थान पर ही भगवान्‌को प्राप्त करते हैं। किन्तु केवल इच्छामात्र ही उनकी प्राप्तिके लिए पर्याप्त नहीं है; तथा भगवान् किसी विशेष स्थान पर रहते हैं, अतएव उसी स्थान पर ही उनका दर्शन प्राप्त किया जा सकता है—ऐसा भी कोई नियम नहीं है। इसका कारण है कि प्रेमोत्कण्ठाके बिना केवल भगवान्‌का वासस्थान भी उनकी प्राप्ति नहीं करा सकता। अन्यथा भगवान् श्रीवासुदेवके सर्वदा सर्वत्र वास करनेके कारण सभी उनको सर्वत्र प्राप्त कर लेते। अतएव विश्वास ही उनकी प्राप्तिकी तीव्र इच्छामें पर्यवसित होता है तथा ऐसी अत्यधिक लालसावशतः ही भगवान्‌की प्राप्ति होती है। यद्यपि श्रीवृन्दावन भगवान्‌की अत्यन्त प्रियतम-क्रीड़ास्थली है तथा वहाँ ऐसे विश्वास आदिके बिना भी कभी-कभी किसी-किसीको भगवान्‌के दर्शन होते हैं, तथापि भगवान्‌के प्रियतम स्थानके प्रभावसे ही वैसा होता है। अर्थात् श्रीधामके महाप्रभावसे वहाँ भगवान्‌के दर्शन होते हैं, किन्तु सर्वत्र भगवान्‌का वासस्थान है—इस कारणसे नहीं॥३४॥

प्राकट्येन सदात्रासौ द्वारे वर्तेत चेत् प्रभुः।
किं यायां नैमिषं दूरं द्रष्टुं तं पीतवाससम्॥३५॥

श्लोकानुवाद—भगवान् यदि प्रकटरूपसे इसी द्वार पर सदैव वास करते, तो क्या मैं पीताम्बरधारी भगवान्‌के दर्शनके लिए सुदूर नैमिषारण्यमें जाता?॥३५॥

दिग्दर्शिनी टीका—सदात्र साक्षादभगवदवस्थानं नास्तीति व्यक्तमेवेत्याह—प्राकट्येनेति। यायां गच्छेयं, सम्भावनायां सप्तमी। तत् प्रतिकृतिरूपम्॥३५॥

भावानुवाद—इसी स्थान पर सदैव साक्षात् भगवान्‌का निवास नहीं है, इसीको व्यक्त करते हुए 'प्राकट्येन' इत्यादि पद कह रहे हैं। 'तं' अर्थात् उन्हीं भगवान्‌की श्रीमूर्त्ति॥३५॥

भवताद्भवतः प्रसादतो भगवत्स्नेहविजृम्भितः किल।
मम तन्महिमा तथाप्यणुर्नवभक्तेषु कृपाभरेक्षया॥३६॥

श्लोकानुवाद—आपके अनुग्रहसे भगवान्‌की स्नेहपूर्ण कृपा मुझ पर हो! किन्तु श्रीहनुमान जैसे नये भक्तोंके प्रति भगवान्‌की कृपाका विचार करके देखने पर मेरे प्रति भगवान्‌की कृपा अत्यधिक कम प्रतीत होगी॥३६॥

दिग्दर्शिनी टीका—विनयादिनापि निजगुरुवचनाक्षेपोऽनुपयुक्त एवेति मत्वा तदुक्तमखिलमङ्गीकृत्यान्यथा परिहरति—भवतादिति। आशिषि तात न भवत्वित्यर्थः। भवतः प्रसादाद्धेतोर्यो भगवत्स्नेहः तेन विजृम्भितो जनितः। नवेषु आधुनिकेषु भक्तेषु हनुमदादिषु यः कृपाभरस्तस्येक्षया विचारेण मम स भवदुक्तो महिमा अणुः सूक्ष्मः अत्यल्पतर इत्यर्थः। यथा महासमुद्रे दृष्टे सति सरोवरमत्यल्पमेव दृश्यत इति न्यायात्॥३६॥

भावानुवाद—अपने श्रीगुरुदेवके वचनों पर आपत्ति करना उचित नहीं है। इस प्रकार विवेचना करके श्रीप्रह्लाद विनयपूर्वक श्रीनारदके द्वारा कहे गये वचनोंको अङ्गीकार करके भी दूसरे रूपमें 'भवता' इत्यादि कहकर उनका निराकरण (खण्डन) कर रहे हैं। आपके अनुग्रहके कारण भगवान्‌के मेरे प्रति उदित स्नेहसे मुझे वैसी (महिमारूप) कृपाकी प्राप्ति हो। परन्तु यदि श्रीहनुमान आदि आधुनिक भक्तोंके प्रति प्रभुकी कृपाका विचार करके देखें, तो मेरे प्रति भगवान्‌की कृपा अर्थात् आपके द्वारा कही गयी मेरी महिमा उसी प्रकारसे अत्यधिक कम लगेगी, जिस प्रकार महासागरकी तुलनामें सरोवर अत्यधिक क्षुद्र दिखाई देता है॥३६॥

निरुपाधिकृपार्द्रचित्त हे बहुदौर्भाग्यनिरूपणेन किम्।
तव शुग्जननेन पश्य तत्करुणां किम्पुरुषे हनूमति॥३७॥

श्लोकानुवाद—हे निरुपाधिक कृपासे द्रवीभूत चित्तवाले (श्रीनारद)! मेरे दुर्भाग्यकी बात अधिक वर्णन करनेसे क्या लाभ होगा? उसके द्वारा आपको दुःख ही होगा, अतएव किम्पुरुषवर्ष पर जाकर श्रीहनुमानके प्रति भगवान्‌की करुणाका दर्शन कीजिए॥३७॥

दिग्दर्शिनी टीका—ननु कथं मयि कृपाल्पतरेति विवृत्य स्पष्टं वर्ण्यतां, तत्राह—निरुपाधीति, निरुपाधिरहेतुका या कृपा तयार्द्रं कोमलं चित्तं यस्य। एवं मयुपदेशो निज परमदयालुत्वादेव न च मद्‌गुणापेक्षयेत्युक्तम्। बहुनो दौर्भाग्यस्य मदीयासौभाग्यस्य निरूपणेन वर्णनेन किम्? अपि तु न किमपि प्रयोजनम्। प्रत्युत दोष एवेत्याह—तव शुचां शोकानां जननेन उत्पादकेन, शिष्यवात्सल्यात् परदुःखासहिष्णुत्वाद्वा। ननु तर्हि को नामान्यो भगवत्कृपाभर विषयो यस्मादस्य मयारब्धस्यार्थस्य पर्याप्तिः स्यादित्यपेक्षायामाह—किम्पुरुषे वर्षे वर्त्तमानो यो हनुमान् तस्मिन् विषये तस्य भगवतः करुणां पश्य, स्वयमेव साक्षादनुभवेत्यर्थः॥३७॥

भावानुवाद—यदि प्रश्न हो कि तुम्हारे प्रति भगवान्‌की जो अल्प कृपा है, उसे ही कुछ स्पष्टरूपसे वर्णन करो। इसके उत्तरमें श्रीप्रह्लाद कह रहे हैं कि मेरे प्रति आपकी (श्रीनारदकी) निरुपाधिक करुणा है तथा उस कृपाके कारण अर्थात् आपका चित्त कोमल होनेके कारण, मुझमें कुछ भी गुण न होने पर भी आपने परम दयालुतावशतः मुझे उपदेश दान किया है। अतएव मेरे दुर्भाग्यकी बात अधिक वर्णन करनेसे क्या लाभ होगा? इसकी कोई आवश्यकता भी नहीं है तथा ऐसा करनेसे दोष ही होगा, क्योंकि मेरे उस दुर्भाग्यकी बात आपको भी दुःखी कर देगी, अर्थात् शिष्य-वात्सल्यवशतः आप उस परमदुःखको सहन नहीं कर पायेंगे। यदि प्रश्न हो कि भगवान्‌की कृपाका पात्र कौन है तथा उसका क्या नाम है? इसे तुम स्पष्टरूपसे बतलाओ, जिससे मैं श्रीभगवान्‌की कृपाके पात्रका दर्शन कर सकूँ। इसी प्रश्नकी आशकांसे कह रहे हैं कि किम्पुरुषवर्षमें श्रीहनुमान हैं, उनके प्रति भगवान्‌की कृपाका दर्शन कीजिए अर्थात् स्वयं साक्षात्‌रूपसे उसे अनुभव कीजिए॥३७॥

भगवन्नवधेहि मत् पितुर्हननार्थं नरसिंहरूपभृत्।
सहसाविरभून्महाप्रभुर्विहितार्थोऽन्तरधात्तदैव सः॥३८॥

श्लोकानुवाद—भगवन्! आप मनोयोगसे श्रवण कीजिए। मेरे पिताका वध करनेके लिए भगवान् श्रीनृसिंहदेव सहसा आविर्भूत हुए थे, अतएव कार्य समाप्त होते ही वे अदृश्य हो गये॥३८॥

दिग्दर्शिनी टीका—तामेव विवृत्य वर्णयितुमादौ स्वभाग्याल्पतामाह—भगवन्निति द्वाभ्याम्। विहितोऽर्थो दैत्यहननादि प्रयोजनं येन सः। तदैव तत्क्षण एव॥३८॥

भावानुवाद—श्रीहनुमानके प्रति भगवान्की करुणाको विस्तारपूर्वक कहनेसे पहले श्रीप्रह्लाद अपने अल्पभाग्यके विषयमें 'भगवान्' इत्यादि दो श्लोक कह रहे हैं। विहित्यर्थ अर्थात् दैत्योंका वध आदि कार्य पूर्णकर वे उसी क्षण अदृश्य हो गये॥३८॥

यथाकाममहं नाथं सम्यग्द्रष्टुञ्च नाशकम्।
महोदधितटेऽपश्यं तथैव स्वप्नवत् प्रभुम्॥३९॥

श्लोकानुवाद—मैं अपनी इच्छासे भगवान्को देखनेमें भी समर्थ नहीं हूँ। यद्यपि एक बार मैंने महासागरके तट पर उनका दर्शन किया था, किन्तु वह दर्शन भी स्वप्नकी भाँति प्रतीत हो रहा है॥३९॥

दिग्दर्शिनी टीका—अप्यर्थे चकारः। दष्टुमपि नाशकं, कुतो भक्तिं करिष्य इत्यर्थः। तथैवेति यथा श्रीनृसिंहाविर्भावस्थाने स्वल्पकालावस्थित्या भयगौरवादिना च सम्यग्द्रष्टुं नाशकम्। तथा प्रथमदर्शन-सम्भ्रमादिना महोदधितीरेऽपीत्यर्थः। एतद्विशेषस्तु हरिभक्तिसुधोदयाद विस्तरतो ज्ञेयः॥३९॥

भावानुवाद—यहाँ 'अपि'के अर्थमें 'च' कारका प्रयोग हुआ है। मैं प्रभुका दर्शन करनेमें भी समर्थ नहीं हूँ, फिर उनकी भक्ति कैसे कर सकता हूँ? 'तथैव' अर्थात् भगवान् श्रीनृसिंहदेवके प्रकट होनेका स्थान, प्रभु शीघ्र ही मेरे पिताका वधकर वहाँसे अदृश्य हो गये थे। अतएव वहाँ पर प्रभुके अल्प कालके वासके कारण मैं भय और गौरव आदि वशतः उनका भलीभाँति दर्शन करनेमें भी समर्थ नहीं हो पाया। महासागरके तट पर भी प्रथम दर्शनके समय उत्पन्न सम्भ्रम आदि वशतः मैंने भगवान्का स्वप्नकी भाँति ही दर्शन किया था। इस विषयमें अधिक विवरणके लिए हरिभक्तिसुधोदय ग्रन्थ द्रष्टव्य है॥३९॥

हनूमांस्तु महाभाग्यस्तत्सेवासुखमन्वभूत्।
सुबहूनि सहस्राणि वत्सराणामविघ्नकम्॥४०॥

श्लोकानुवाद—किन्तु इस विषयमें श्रीहनुमान महाभाग्यशाली हैं। उन्होंने हजारों वर्षों तक निर्विघ्नरूपसे भगवान्‌की सेवा-सुखका अनुभव किया है॥४०॥

दिग्दर्शिनी टीका—किं वक्तव्यं महाप्रभुं समपश्यदिति। तस्य सेवानन्दमपि चिरमनुभूतवानित्याह—हनूमानिति। सुबहूनीति रामायणे किञ्चिदधिकान्येका-दशसहस्राणि, श्रीभागवते च साधिकानि त्रयोदशेत्युक्तानि। तथा च नवमस्कन्धे (श्रीमद्भा॰ ९/११/१८) —*'अत उर्द्ध्वं ब्रह्मचर्यं धारयन्नजुहोत् प्रभुः त्रयोदशाब्दसाहस्रमाग्निहोत्रम-अखण्डितम्॥'* इति तथा तत्रैव (श्रीमद्भा॰ ९/११/३६)—*'बुभूजे च यथाकालं काममन्यानपीड़यन्। वर्षपूगान् बहून् नृणामभिध्याताङ्घ्रि पल्लवः॥'* इति तच्च अविघ्नकं केनचिदपि विघ्नेनासंस्पृष्टमित्यर्थः॥४०॥

भावानुवाद—श्रीहनुमानने भगवान्‌का सम्यक् (सम्पूर्ण) रूपसे दर्शन किया था, इस विषयमें और अधिक क्या कहूँ? उन्होंने हजारों वर्षों तक निर्विघ्नरूपसे भगवान्‌की सेवासे प्राप्त होनेवाले आनन्दका अनुभव किया है। इसीको ही 'हनुमांस्त' इत्यादि पदोंमें कह रहे हैं। 'सुबहूनि' कहनेसे रामायणके मतानुसार ग्यारह हजार वर्षसे थोड़ा अधिक समय। किन्तु श्रीमद्भागवतके मतानुसार श्रीहनुमानने तेरह हजार वर्ष तक उस सेवा-सुखका अनुभव किया है।

इस विषयमें नवम-स्कन्धमें कहा गया है, "श्रीहनुमानने अखण्ड ब्रह्मचर्य व्रतको धारणकर तेरह हजार वर्ष तक अग्निहोत्र द्वारा प्रभुका यजन (पूजन) किया है।" इसके उपरान्त कहा गया है—"भगवान् श्रीरामचन्द्रने अपनी प्रिया श्रीसीतादेवीके साथ लीला करते-करते अनेक वर्षों तक धर्मानुसार स्वेच्छापूर्वक धर्मराज्य पर शासन किया था। उस समय प्रत्येक मानव ही निरन्तर प्रभुके श्रीचरणकमलोंका ध्यान करते थे।" अतएव श्रीहनुमान द्वारा की गयी भगवान्‌की सेवामें किसी प्रकारकी विघ्नबाधा नहीं रही, इसलिए वे महाभाग्यशाली हैं॥४०॥

यो बलिष्टतमो बाल्ये देववृन्दप्रसादतः।
सम्प्राप्तसद्वरव्रातो जरामरणवर्जितः॥४१॥

श्लोकानुवाद—श्रीहनुमान अपने बाल्यकालमें अत्यन्त बलवान थे तथा देवताओंकी कृपासे उत्तम-उत्तम वर प्राप्त करके वे वृद्धावस्था और मृत्यु आदिसे मुक्त हुए थे॥४१॥

दिग्दर्शिनी टीका—महाभाग्यतामेव विस्तार्य दर्शयिष्यन् तत्र प्रथमं निर्विघ्नसततसेवा-सुखोपकरणत्वेन तस्य महाबलादिकमाह—य इति, सार्धेन चतुरक्षराधिक्येन बाल्येऽपि सद्वरव्रातमेव किञ्चिद्दर्शयति—जरेत्यादि-विशेषण-पञ्चकेन। अत्रेयमाख्यायिका रामायणादौ सुप्रसिद्धा—'जातमात्रो हनुमानुद्यन्तं सूर्यं वीक्ष्य पक्वतालमिव मत्वा ग्रसितुमुत्प्लुत्य ग्रहीतुमुपरि गच्छन्निन्द्रेणादित्यरक्षार्थं हनौ वज्रप्रहारेण पातितः मूर्च्छितः। ततः पुत्रशोकार्त्तेन वायुना सर्वत्रात्मनिरोधे कृते लोकानां प्राणपीड़ामालोक्य ब्रह्मादयः सर्वे देवाः समागत्य तं स्वस्थयित्वा महावरांस्तस्मै विविधान् ददुः' इति॥४१॥

भावानुवाद—अब श्रीहनुमानके महाभाग्यका विस्तारपूर्वक वर्णन करनेके लिए सर्वप्रथम उनके द्वारा प्राप्त निरन्तर निर्विघ्नरूपसे सेवासुख अनुभवके उपकरण-स्वरूप उनके महापराक्रमी होनेकी बातको 'यो' इत्यादि श्लोकमें बाल्य से लेकर सद्वरव्रातो पद तक किञ्चित् रूपमें बतला रहे हैं। श्रीहनुमान अपने बाल्यकालमें अत्यन्त बलवान थे तथा देवताओंकी कृपासे उत्तम-उत्तम वर प्राप्त करके वृद्धावस्था-मृत्यु आदि पर भी विजय प्राप्त कर चुके थे। 'जरा' इत्यादि (तथा श्लोक ४२ में कथित) पाँच विशेषणों द्वारा उनके वैशिष्ट्यको बतला रहे हैं। यह उपाख्यान श्रीरामायण आदि ग्रन्थोंमें सुप्रसिद्ध है। श्रीहनुमान जन्म लेते ही सूर्यदेवको पका हुआ तालका फल समझकर उन्हें ग्रास करनेके लिए ऊपर आकाशमें कूद गये थे। इन्द्रदेवने सूर्य देवताकी रक्षाके लिए श्रीहनुमान पर वज्रसे प्रहार किया जिससे वे भूमि पर गिरकर मूर्छित हो गये। अपने पुत्र हनुमानकी ऐसी अवस्था देखकर पवनदेवने पुत्रशोकमें कातर होकर वायुका प्रवह बन्द कर दिया। वायुके बन्द होने पर समस्त प्रणियोंकी प्राण-वायु बन्द होनेसे लोकमें सर्वत्र हा-हाकार मच गया। उस समय प्राण-पीड़ा उपस्थित होने पर श्रीब्रह्मादि समस्त देवताओंने मिलकर श्रीहनुमानको स्वस्थ किया तथा उनको 'जरा-मरण रहित होओ' इत्यादि उत्तम-उत्तम वर प्रदान किये॥४१॥

अशेषत्रासरहितो महाव्रतधरः कृती।
महावीरो रघुपतेरसाधारणसेवकः ॥४२॥

श्लोकानुवाद—श्रीहनुमानको किसी भी प्रकारका भय नहीं था, वे नैष्ठिक ब्रह्मचारी और समस्त शास्त्रोंके तत्त्वको जाननेवाले थे। विशेषतः वे महापराक्रमी होनेके कारण भगवान् श्रीरघुपतिके प्रधान सेवक थे॥४२॥

दिग्दर्शिनी टीका—महाव्रतधरः ब्रह्मचर्यनिष्ठः; कृती सर्वशास्त्रतत्त्वाभिज्ञो महाकविश्च महावीरो महायोधः। यद्वा, दानादिबहुप्रकार वीरतायां प्रवीण इत्यर्थः। तदुक्तं भरतेन—'*दानवीरं धर्मवीरं युद्धवीरं तथैव च। रसं वीरमपि प्राह ब्रह्मा त्रिविधमेव हि॥*' इति, अतएव असाधारणो निरुपमः सेवकः॥४२॥

भावानुवाद—श्रीहनुमान महान व्रत धारण करनेवाले नैष्ठिक ब्रह्मचारी, सभी शास्त्रोंके तत्त्वको जाननेवाले तथा महाकवि थे। महावीर कहनेसे महान योद्धा, अथवा दान आदि अनेक प्रकारकी वीरतामें प्रवीण थे। यथा, श्रीभरतके वचन हैं—"श्रीहनुमान जिस प्रकार दानवीर और धर्मवीर हैं, उसी प्रकार युद्धवीर भी हैं। उनके सम्बन्धमें इन तीन प्रकारके वीर रसकी बात श्रीब्रह्माने भी कही है।" अतएव वे भगवान् श्रीरामचन्द्रके असाधारण और अतुलनीय सेवक हैं॥४२॥

हेलाविलङ्घितागाध शतयोजनसागरः।
रक्षोराजपुरस्थार्तसीताश्वासनकोविदः ॥४३॥

श्लोकानुवाद—उन्होंने भगवान् श्रीरामचन्द्रकी सेवाके लिए अगाध और अथाह, सौ योजन वाले सागरको अनायास ही पार करके राक्षसराज रावणकी पुरीमें भयसे व्याकुल श्रीसीतादेवीको आश्वासन प्रदान किया था॥४३॥

दिग्दर्शिनी टीका—सेवकत्वमेव दर्शयति—हेलेत्यादिना सीताप्रमोदन इत्यन्तेन॥४३॥

भावानुवाद—अब 'हेलेति' श्लोक द्वारा श्रीहनुमानकी सेवाको दिखा रहे हैं। 'हेला' अर्थात् अनायास ही सागरको पारकर उन्होंने श्रीसीतादेवीको आश्वासन प्रदान आदि कार्य किये हैं॥४३॥

वैरिसन्तर्जको लङ्कादाहको दुर्गभञ्जकः।
सीतावार्त्ताहरः स्वामिगाढ़ालिङ्गनगोचरः॥४४॥

श्लोकानुवाद—श्रीहनुमानने लंकापुरीको जलाकार और महलोंको तोड़फोड़कर प्रभुके शत्रुओंको भयभीत कर दिया था। श्रीसीतादेवीके सम्वादको प्रदान करके वे अपने प्रभु श्रीरामचन्द्र द्वारा गाढ़ आलिङ्गनको प्राप्त हुए थे॥४४॥

दिग्दर्शिनी टीका—वैरिणो रावणादीन् राक्षसान् सन्तर्जयति तत् प्रेषिताक्षयकुमार-मन्त्रिपुत्रहननादिना भीषयत इति तथा सः। स्वामिनो रघुनाथस्य यदगाढ़ालिङ्गनं सीतासद्वार्त्ताप्राप्तिहर्षभरात् तस्य गोचरो विषयः। एतच्च सर्वमुत्तरोत्तरं सेवाविशेषसम्पत्तेः कारणं सूचयति॥४४॥

भावानुवाद—श्रीहनुमानने भगवान् श्रीरामचन्द्रके शत्रु राक्षसराज रावण आदिको अत्यधिक भयभीत कर दिया था। रावण द्वारा प्रेरित अक्षयकुमार नामक मन्त्री-पुत्रका विनाश किया था तथा राक्षसराजकी पुरीमें स्थित श्रीसीतादेवीका सम्वाद लाकर अपने प्रभु श्रीरामचन्द्रके गाढ़ आलिङ्गनके पात्र बने थे। इस प्रकार एकके बाद एक उनकी विशेष सेवा-सम्पत्तिके कारणको सूचित कर रहे हैं॥४४॥

स्वप्रभोर्वाहकश्रेष्ठः श्वेतच्छत्रितपुच्छकः।
सुखासनमहापृष्ठः सेतुबन्धक्रियाग्रणीः॥४५॥

श्लोकानुवाद—श्रीहनुमान अपने प्रभु श्रीरामचन्द्रके प्रधान वाहक थे, उन्होंने अपनी पूँछको श्वेतछत्र (छतरी)के रूपमें परिवर्तित किया था, उनका विशाल पृष्ठदेश (पीठ) भी प्रभुका सुखमय आसन था तथा समुद्र पर सेतुबन्धनके कार्यमें भी वे सर्वप्रधान थे॥४५॥

दिग्दर्शिनी टीका—स्वप्रभोस्तस्यैव किष्किन्धातः समुद्रतीरगमने सुविस्तीर्ण-सुन्दर-सुकुमार पृष्ठेन सुष्ठु वहनात्। वाहकेषु गरुड़ादिषु श्रेष्ठः। यद्यपि रावण युद्धसमयेऽपि वाहनतां गतोऽस्ति, तथापात्र रामायणोक्तक्रमेण सागरलङ्घनमारभ्य सीताप्रमोदनान्तमुपाख्यानमनुक्रम्य तदनुसारेण व्याख्यानात्तथार्थो लिखितः। श्रेष्ठत्वमेव किञ्चिदभिव्यञ्जयति—श्वेतेति पादद्वयेन-श्वेतच्छत्रं महाराजचिह्नं सितातपत्रं तद्वदाचरितं पुच्छं येन, बहुव्रीहौ कः। सुखासनं सुखमयमासनं भद्रपीठसिंहासनं वा महत् पृष्टं यस्य; समुद्रे सेतुबन्धक्रियायामग्रणीर्मुख्यः एकदैव महाशिलोच्चयसमुच्चयनयनात्॥४५॥

भावानुवाद—श्रीहनुमान अपने प्रभु श्रीरामचन्द्रके प्रधान वाहक थे, अर्थात् किष्किन्धासे समुद्रतीर तक जानेके समय अपनी सुविस्तृत सुन्दर सुकुमार पीठ पर प्रभुको वहन करनेके कारण इन्होंने प्रभुके गरुड़ आदि वाहकोंसे भी श्रेष्ठ-स्थान प्राप्त किया है। यद्यपि रावणके साथ युद्ध करनेके समय भी वे वाहन बने थे, तथापि रामायणमें कहे गये क्रमानुसार सागर-लंघनसे आरम्भ करके श्रीसीतादेवीको आश्वासन प्रदान करने तक उनकी सेवाओंके विषयमें नियमित क्रमानुसार लिखा गया है। इस प्रकार उनकी श्रेष्ठताके विषयमें अभिव्यक्ति मात्र हो रही है—श्रीहनुमानने अपनी पूँछको महाराज-चिह्न श्वेतछत्र (छतरी)के रूपमें रूपान्तरित किया था। उनका विशाल पृष्ठदेश भी प्रभुका सुखमय आसन बना था, अर्थात् उनकी सुन्दर पीठ प्रभुके लिए सिंहासनस्वरूप बनी था। समुद्र पर सेतुबन्धनके कार्यमें भी वे अग्रणी थे, अर्थात् सर्वप्रधान थे। एक बारमें ही अनेक बड़ी-बड़ी शिलाओंको लाकर इन्होंने सेतुबन्धन कार्यमें सहायता की थी॥४५॥

विभीषणार्थसम्पादी रक्षोबलविनाशकृत्।
विशल्यकरणीनामौषध्यानयनशक्तिमान् ॥४६॥

श्लोकानुवाद—श्रीहनुमानने विभीषणकी अभिलाषाको पूर्ण किया था तथा राक्षसी सेनाका विनाश किया था। विशल्यकरणी नामक औषधिको लानेमें केवल वही समर्थ थे॥४६॥

दिग्दर्शिनी टीका—विभीषणस्यार्थः श्रीरघुनाथचरणारविन्दसमाश्रयणं तत् सम्पादनशीलः। पूर्वं विभीषणस्य बहुलसद्वृत्तकथनात् सम्प्रति च समुद्रतीरे समागतस्य तस्य प्रभुणा सह सङ्गमनात्। एवं बाल्यकाण्डान्तर्वर्त्ति-किष्किन्धासुन्दरकाण्डोक्तं तस्य सेवकत्वं संक्षेपतो निर्द्दिश्याधुना तथैव युद्धकाण्डोक्तमाह—रक्ष इत्यादिना प्रमोदन इत्यन्तेन। अत्रापेक्षिताख्यायिका रामायणतोऽवगन्तव्या। सा सुप्रसिद्धैवेति ग्रन्थविस्तरभयाद्विवृत्य न लिख्यते। विशल्यकरणीनाममहौषधेरानयनयोः इन्द्रजितो रात्रिकृतमायायुद्धेन निखिलवानरबले विसंज्ञे भृते, तथा श्रीलक्ष्मणेन च रावणामोघशूलप्रहारतो ब्रह्मवाक्य सत्यतापेक्षया मोहलीलायामवलम्बितायां सत्यां सुषेणवैद्यवचनाद्रात्रिमध्य एव वारद्वयमानयने या शक्तिः गन्धर्वगणजयगन्धमादन-महाशैलोत्पाटनवहन शीघ्र गमनादिरूपा तद्युक्तः भुम्नि मतुः॥४६॥

भावानुवाद—जिस समय विभीषण अपने भाई रावण द्वारा तिरस्कृत होकर श्रीरामचन्द्रके चरणकमलोंमें आश्रय ग्रहण करनेके लिए उपस्थित हुए थे, उस समय श्रीहनुमानने उनकी अभिलाषा पूर्ण करायी थी। उन्होंने पहलेसे ही भगवान् श्रीरामचन्द्रको विभीषणके अनेक सद्गुणोंकी बात बतला दी थी। समुद्र तट पर उपस्थित होने पर श्रीहनुमानने भगवान्‌के साथ विभीषणका मिलन कराया था। इस प्रकार बाल्यकाण्डके अन्तर्गत किष्किन्धाकाण्ड और सुन्दरकाण्डमें वर्णित श्रीहनुमानकी महिमा संक्षेपमें प्रदर्शित कर, अब युद्धकाण्डमें उक्त उनकी सेवा-महिमाके विषयमें बतला रहे हैं, तथा इसे 'रक्ष' इत्यादि पदोंसे आरम्भ करके 'प्रमोदन' (श्लोक ४९) तक कहा गया है। इस स्थान पर कथित होनेवाला उपाख्यान रामायणमें वर्णित है। यद्यपि ये सभी उपाख्यान अत्यधिक प्रसिद्ध हैं, तथापि ग्रन्थ विस्तारके भयसे उक्त विषय विस्तारपूर्वक वर्णित नहीं हुए हैं।

इन्द्रजीत द्वारा रात्रिकालमें किये गये माया-युद्धमें सारी वानर-सेना मूर्च्छित हो गयी थी तथा श्रीब्रह्माके वरदानकी सत्यता प्रदर्शन करनेके लिए रावणके अमोघ शूलके प्रहारसे श्रीलक्ष्मणने भी मोहलीला की थी। उस समय सुषेण वैद्यके वचनानुसार रात्रिमें ही श्रीहनुमानने सभी गन्धर्वोंको पराजित करके गन्धमादन पर्वतको उखाड़ फेंका तथा उसे वहनकर शीघ्रतापूर्वक गन्तव्य स्थान पर पहुँचे थे। इन समस्त कार्योंमें महाशक्तिका प्रदर्शन करके श्रीहनुमानने भगवान्‌की सेवा की थी, अर्थात् उस विशल्यकरणी औषधिको वहाँ तक लाना तथा अन्य अनेक कार्य केवल उन्हींकी शक्तिसे ही सम्पन्न हुए थे॥४६॥

स्वसैन्यप्राणदः श्रीमत्सानुजप्रभुहर्षकः।
गतो वाहनतां भर्त्तुर्भक्त्या श्रीलक्ष्मणस्य च॥४७॥
जयसम्पादकस्तस्य महाबुद्धिपराक्रमः।
सत्कीर्त्तिवर्द्धनो रक्षोराजहन्तुर्निजप्रभोः॥४८॥

श्लोकानुवाद—इस प्रकार श्रीहनुमानने अपने पक्षकी सेनाको प्राणदान देकर अनुज श्रीलक्ष्मण सहित भगवान् श्रीरामचन्द्रको प्रसन्न

किया था। भगवद्भक्तिकी अधिकतावशतः वे श्रीलक्ष्मणके भी वाहन बने थे। उन्होंने उत्तम मन्त्रणा द्वारा विजय दिलाकर, महाबुद्धि तथा पराक्रमको प्रकाश करके, राक्षसराज–विनाशी अपने प्रभु श्रीरामचन्द्रकी सद्कीर्तिको वर्धित किया था॥४७–४८॥

दिग्दर्शिनी टीका—एवं श्रीमन्तं भक्तवात्सल्यादि स्वीकृतशस्त्रक्षताद्यपगमेन निजशोभातिशययुक्तं सानुजं लक्ष्मणसहितं प्रभुं हर्षयतीति तथा सः। अत्र च कथाक्रमो नापेक्षितः। वाक्यद्वयकृतस्याप्यस्य कर्मण ऐक्यरूप्यादेकत्रैव विवक्षया। भर्त्तुः श्रीरघुनाथस्य भक्तया श्रीलक्ष्मणस्य तद्भक्तस्यापि वाहनतां गतः इन्द्रजिद्वधे। तस्य लक्ष्मणस्य भर्त्तुरेव वा; महान्तौ बुद्धिपराक्रमौ यस्य; इन्द्रजितो रावणादेश्च वधे सन्मन्त्रप्रदानान्महाविक्रमदर्शनाच्च। एवं निजप्रभोः सत्कीर्त्तिं वर्धयतीति तथा सः, समुद्रलङ्घनादि रावण वध–हेतु प्रयोजनाचरणात्। एषा च युद्ध सम्बन्धि सेवावली–संक्षेपोक्तिः॥४७–४८॥

भावानुवाद—इस प्रकार श्रीहनुमानने अपनी सेनाको प्राणदान दिया था। प्रभु श्रीरामचन्द्र द्वारा भक्तवात्सल्यवशतः अपने अंगोंमें अस्त्र–प्रहार क्षत स्वीकार करने पर उन्होंने औषधि प्रयोग द्वारा प्रभुके क्षत–विक्षत अंगोंका उपचार कर अति शोभायमान अनुज श्रीलक्ष्मण सहित भगवान्‌को प्रसन्न किया था। इस स्थान पर कथाके क्रमकी रक्षा नहीं हो पायी है, क्योंकि यहाँ एक समान दो घटनाओंको एक साथ वर्णन किया गया है। इसी प्रकार अपने प्रभु श्रीरघुनाथके प्रति अत्यधिक भक्तिमान होनेके कारण श्रीहनुमान, इन्द्रजीतके वधके समय प्रभुके भक्त और प्रिय अनुज श्रीलक्ष्मणके भी वाहन बने थे। उन्होंने इन्द्रजीत तथा रावण आदिको वध करते समय उत्तम–उत्तम मन्त्रणा प्रदान की थी और अपने महापराक्रमका प्रकाश करके उन्होंने भगवान्‌की सत्कीर्तिको वर्धित किया था। इस प्रकार समुद्रलंघन और रावण–वध आदि युद्ध सम्बन्धीय उनकी सेवाओंका संक्षिप्त वर्णन किया गया है॥४७–४८॥

सीताप्रमोदनः स्वामिसत्प्रसादैकभाजनम्।
आज्ञयात्मेश्वरस्यात्र स्थितोऽपि विरहासहः॥४९॥

श्लोकानुवाद—श्रीसीतादेवीकी प्रसन्नताकी वृद्धि करके श्रीहनुमान अपने प्रभुकी सर्वश्रेष्ठ कृपाके एकमात्र पात्र हुए हैं। यद्यपि भगवान्‌की

आज्ञानुसार वे अब भी इस संसारमें रह रहे हैं, तथापि वे अपने प्रभुके विरहको सहन करनेमें असमर्थ हैं॥४९॥

दिग्दर्शिनी टीका—सीतां प्रमोदयति प्रकर्षेण हर्षयतीति तथा सः; रावणवधादि-कथनात्, श्रीरघुनाथनिकटे समानयनाच्च। एवं निजप्रभुवरतदीयप्रियजन सेवामुक्त्वाऽधुना तत्तत् सेवाफलरूपानुग्रह विशेषलाभमाह—स्वामीति, स्वामिनोऽयोध्याधिपतेरभिषेकानन्तरं यः सत्प्रसादौघः श्रीजानकी-कण्ठहार-दापन-निश्चलविशुद्ध प्रेमभक्तिसम्पादनादि-रूपस्तस्य भाजनम्। ननु कथं तर्हि निजप्रभुपार्श्वं विहायात्रासौ स्थितस्तत्राह—आज्ञयेति। आत्मेश्वरस्य निजप्रभोः। यद्वा, आत्मनां जीवानामीश्वरस्य निरुपाधिहितकारिणः। हनूमत्यत्र स्थिते सर्वेषां लोकानां भक्तिमार्गे प्रवृत्त्या सुखं परमहितं भवेदित्यभिप्रायेण प्रभुणा कृतया आज्ञायेत्यर्थः। अपि यद्यपि विरहं निजप्रभुविच्छेदं न सहते सोढुं न शक्नोतीति तथा सः। एवं महाप्रभुणा साक्षाच्छ्रीमुखेन कृताया आज्ञायाः सम्पादनेन तस्य परमसेवैव सम्पन्नेति भावः॥४९॥

भावानुवाद—श्रीहनुमानने श्रीसीतादेवीको प्रसन्न किया था, अर्थात् रावण वध आदिकी बात सुनाकर तथा उनको भगवान् श्रीरामचन्द्रके निकट लाकर उनको भलीभाँति प्रसन्न किया था। इस प्रकार श्रीहनुमान अपने प्रभु और उनके प्रियतमजनोंकी सेवा करके प्रभुकी सर्वश्रेष्ठ कृपाके एकमात्र अधिकारी हुए हैं। यहाँ पर वैसी सेवाओंके फलस्वरूप भगवान्की विशेष कृपा प्राप्तिकी बात कह रहे हैं। भगवान् श्रीरामचन्द्रके अयोध्यापतिके रूपमें अभिषेक होनेके उपरान्त श्रीरामचन्द्रकी आज्ञासे श्रीजानकीका कण्ठहार श्रीहनुमानके गलदेशमें शोभायमान हुआ था। वास्तविक रूपमें ऐसे कण्ठहारकी प्राप्ति निश्चल विशुद्ध-प्रेमभक्तिरूप सर्वश्रेष्ठ कृपा प्राप्तिका ही परिचायक है।

यदि प्रश्न हो कि तो फिर क्यों श्रीहनुमान अपने प्रभुका संग छोड़कर (प्रभुके नित्य साकेत-गमनके समय उनके साथ न जाकर) इस पृथ्वी पर ही रह रहे हैं? इसके उत्तरमें कहते हैं कि वे अपने प्रभुकी आज्ञानुसार ही ऐसा कर रहे हैं। यद्यपि उन्हें अपने प्राणप्रिय प्रभुका विरह अत्यन्त असहनीय है, तथापि उनकी आज्ञापालनरूप सेवाके लिए वे इस पृथ्वी पर वास कर रहे हैं। जीवोंके निरुपाधिक कल्याणकारी प्रभु श्रीरामचन्द्रका अभिप्राय यह है कि श्रीहनुमानके इस संसारमें रहनेसे सभीकी भक्तिमार्गमें प्रवृत्ति होगी, अतएव इससे सभीका

परम हित साधित होगा। प्रभुकी इसी आज्ञाके अनुसार श्रीहनुमान इस जगतमें वास कर रहे हैं। यद्यपि इस संसारमें रहते हुए वे अपने प्रभुके विरहको सहन करनेमें असमर्थ हैं, तथापि इस प्रकार भगवान्‌की साक्षात् आज्ञा पालनके लिए वे तीव्र विरहको सहन करके भी इस जगतका हित करते हैं॥४९॥

आत्मानं नित्यतत्कीर्त्ति श्रवणेनोपधारयन्।
तन्मूर्त्तिपार्श्वतस्तिष्ठन् राजतेऽद्यापि पूर्ववत्॥५०॥

श्लोकानुवाद—श्रीहनुमान अपनेको सदा-सर्वदा प्रभुकी कीर्तिको श्रवण करनेमें निरत रखकर आज भी पहलेकी भाँति प्रभुकी श्रीमूर्त्तिके निकट विराजमान रहते हैं॥५०॥

दिग्दर्शिनी टीका—तथापि तं विना चिरं कथं जीवेत्? तत्राह—आत्मानमिति। तथाभूतमप्यात्मानं देहिनं नित्यं तस्य आत्मेश्वरस्य तासां वा अनिर्वचनीयानां कीर्त्तिनां श्रवणेन सुस्वर किम्पुरुषाचार्यार्ष्टिषेणादिगीयमान तत्तद् गाथा कर्णनेन कृत्वा हेतुना वा। यद्वा, तस्य कीर्त्तिः कीर्त्तनं श्रवणञ्चार्ष्टिषेणादितः द्वन्द्वैक्यं, तेन उपकण्ठे समीपे धारयन् निरुध्य रक्षन्। यद्वा, निर्गच्छन्तमपि उपपत्तिभिर्देहान्तर्दधान इत्यर्थः। तस्येश्वरस्य या मूर्त्तिः किम्पुरुषवर्षस्थिता तस्याः पार्श्वे विचित्रसेवया सदा तिष्ठन्नेव। पूर्ववदिति, पूर्वं यथा श्रीरामचन्द्रचरणारविन्दसमीपे विचित्रसेवां कुर्वन् शोभमान आसीत्, तथाधुना तत्रापि साक्षादिव विचित्रपरिचर्या विधानेन शोभत इत्यर्थः। तथा च पञ्चमस्कन्धे किम्पुरुषे वर्षे भगवन्तमादि पुरुषं लक्ष्मणाग्रजं सीताभिरामं रामं तच्चरणसन्निकर्षाभिरतः परमभागवतो हनूमान सह किम्पुरुषैरुपास्ते। आर्ष्टिषेणेन सह गन्धर्वैरनुगीयमानां परमकल्याणीं भर्त्तृभगवत्कथां समुपश्रृणोति स्वयञ्च गायतीति॥५०॥

भावानुवाद—यदि आशंका हो कि प्रभुकी साक्षात् सेवा किये बिना श्रीहनुमान कैसे इतने दीर्घ समय तक जीवन धारण कर रहे हैं? इसीके समाधानमें 'आत्मानं' इत्यादि पद कह रहे हैं। श्रीहनुमान अपनेको सदैव प्राणप्रिय भगवान् श्रीरामचन्द्रके कीर्तिकलाप श्रवणमें ही निरत रखते हैं। अथवा किम्पुरुषवर्षके आचार्य आर्ष्टिसेन आदि द्वारा अपने प्रभुकी अनिर्वचनीय कीर्तिका सुस्वरसे गान होने पर, उसीके श्रवण द्वारा अपने प्रभुका संगसुख अनुभव करते हुए प्राण धारण करते हैं। अथवा श्रीरामकथा-वाचक आर्ष्टिसेन आदिके मुखसे प्रभुके

कीर्तिकलापका श्रवण करके उन्हींके (श्रीरामचन्द्रके) समीप अपने प्राणोंकी रक्षा करते हैं। अन्यथा देहमें प्राण रहने पर वह निश्चय ही देहसे निकल जाता। अथवा वे किम्पुरुषवर्षमें स्थित अपने प्रभु श्रीरामचन्द्रके श्रीविग्रहकी अनेक प्रकारसे सेवा करनेके लिए उनके समीपमें सदैव वास कर रहे हैं। अर्थात् पहले जिस प्रकार वे भगवान् श्रीरामचन्द्रके चरणकमलोंके समीपमें सर्वदा सुशोभित रहते थे, अभी भी उसी प्रकार साक्षात्की भाँति सेवा-परिचर्या द्वारा सुशोभित हो रहे हैं। इस विषयमें पञ्चम-स्कन्धमें कहा गया है कि किम्पुरुषवर्षमें परमभागवत श्रीहनुमान आदिपुरुष श्रीरामचन्द्र, श्रीसीतादेवी और अनुज श्रीभरत तथा श्रीलक्ष्मणकी उपासना कर रहे हैं। वहीं पर वे आर्ष्टिसेन आदि गन्धर्वों द्वारा गाये जानेवाले परम मंगलमयी भगवान् श्रीरामचन्द्रकी लीलाकथाका श्रवण कर रहे हैं तथा स्वयं भी गान कर रहे हैं॥५०॥

स्वामिन्! 'कपिपतिर्दास्ये' इत्यादिवचनैः खलु।
प्रसिद्धो महिमा तस्य दास्यमेव प्रभोः कृपा॥५१॥

श्लोकानुवाद—हे प्रभो! 'कपिपतिः दास्ये' इस प्रसिद्ध प्रमाण द्वारा निश्चितरूपसे श्रीहनुमानकी महिमा सुसिद्ध हुई है। अतएव दास्य ही प्रभुकी कृपा है॥५१॥

दिग्दर्शिनी टीका—उपसंहरति—स्वामिन्निति। हे श्रीनारद! तथाच प्रसिद्धोऽयं श्लोकः—*'शारङ्गि-श्रवणे परीक्षिदभवद् वैयासकिः कीर्त्तने, प्रह्लादः स्मरणे, तदङ्घ्रिभजने लक्ष्मीः पृथुः पूजने। अक्रुरस्त्वभिवन्दने कपिपतिर्दास्येऽथ सख्येऽर्ज्जुनः सर्वस्वात्मनिवेदने बलिरभूद्भक्तः कथं वर्ण्यते॥'* इति। शार्ङ्गीति वक्तव्ये छन्दोऽनुरोधेन शारङ्गीति। श्रीविष्णोरिति पाठस्त्वागन्तुकः। दास्यञ्चात्र परिचर्याप्रधानमेवाभिप्रेतम्, न तु श्रीधरस्वामिपाद व्याख्यानुसारेण कर्मार्पणमिति, एवं सेवापि ज्ञेया। ततश्च तस्यां कायिक्यामपि सर्वेन्द्रियसेवा पर्यवस्यति, बाह्यान्तरेन्द्रियाणां सर्वेषामेव कायाश्रयकत्वात्। इत्थमेव स्नानादिना देहशुद्धया तत्तच्छुद्धिरपि स्यात्। अतः स्मरणाद्दास्यं श्रेष्ठम्; तत्र च साक्षाच्छ्रीरघुनाथस्य तादृशी सेवा। स्मरणञ्च प्रायः परोक्षकृत्यमेव; अतः प्रह्लादः स्वस्माच्छ्रेष्ठत्वेन श्रीहनूमन्तमस्तौदिति युक्तमेव॥५१॥

भावानुवाद—अब अपने वक्तव्यका उपसंहार करते हुए श्रीप्रह्लाद कह रहे हैं—हे प्रभो श्रीनारद! इस श्लोकमें भी उनकी महिमा प्रसिद्ध

है; यथा, "श्रीभगवन्नाम, रूप, लीला आदिके श्रवणसे राजा परीक्षित, कीर्त्तनसे शुकदेव, स्मरणसे प्रह्लाद, भगवत् चरणोंकी सेवा द्वारा लक्ष्मीदेवी, अर्चनसे पृथु, वन्दनसे अक्रूर, दास्यसे हनुमान, सख्यसे अर्जुन तथा आत्मनिवेदनसे बलि श्रीकृष्णको प्राप्त कर परम कृतार्थ हुए हैं।" यहाँ पर दास्य कहनेसे परिचर्या प्रधान दास्य अभिप्रेत है, श्रीधरस्वामिपादकी व्याख्यानुसार कर्म–अर्पण रूप दास्य नहीं। वास्तविक रूपमें ऐसी सेवाकी प्राप्ति प्रभुकी कृपा है तथा यह सेवा भी कायिक, वाचिक और मानसिक होनेके कारण सभी इन्द्रियोंके द्वारा एक ही साथ सम्पूर्ण होती है, क्योंकि बाह्य और अन्तरेन्द्रिय सभीका आश्रय यह शरीर है। जिस प्रकार स्नान आदि द्वारा देहशुद्धि होने पर सारी इन्द्रियाँ अपने आप शुद्ध हो जाती हैं, उसी प्रकार देह द्वारा परिचर्या रूप दास्यसे मनके स्मरण आदि भक्ति अंग भी साधित हो जाते है, अतएव स्मरणकी तुलनामें दास्य श्रेष्ठ है। उसमें भी भगवान् श्रीरामचन्द्रकी साक्षात्‌रूपसे सेवा तो और भी अधिक प्रशंसनीय है। स्मरण अधिकांशतः अप्रत्यक्ष कार्य है, इसीलिए श्रीप्रह्लाद महाराज अपनी तुलनामें श्रीहनुमानको श्रेष्ठ जानकर उनका स्तव करते–करते कहने लगे॥५१॥

यदृच्छया लब्धमपि विष्णोर्दाशरथेस्तु यः।
नैच्छन्मोक्षं विना दास्यं तस्मै हनूमते नमः॥५२॥

श्लोकानुवाद—जिन श्रीहनुमानने दशरथनन्दन श्रीरामसे अनायास ही प्राप्त होनेवाले दास्य–रहित मोक्षकी कामना नहीं की थी, मैं उन्हीं श्रीहनुमानको बारम्बार नमस्कार करता हूँ॥५२॥

दिग्दर्शिनी टीका—आदि शब्दोपात्तम् एतन्महिमख्यापकं वचनान्तरञ्च पठन् स्वयमप्युप संहरति—यदृच्छयेति। स्वप्रयत्नं विनाप्यानुषङ्गिकत्वेन लब्धमपि मोक्षं नैच्छत्। इच्छामपि तस्मिन्न कृतवान्, कुतस्तरां स्वीकारमित्यर्थः, भक्तिरसविरोधित्वात्। विना दास्यमिति दास्यमेवैच्छत्, नान्यत् किमपीत्यर्थः। जन्म–मरणादिसंसारध्वंसोऽपि मम भक्तिमेव प्रवहतादिति भावः। यद्वा, नासौ जीवो यो मोक्षं विना अवान्तर फलत्वेन स्वयमेवोपस्थितमपि मोक्षं परित्यज्य केवलं विशुद्धदास्यमेव प्रार्थयामास, तस्मै हनूमते नमः इत्यर्थः। अयमपि श्लोकः श्रीनारायणव्यूहस्तवान्तर्वर्त्ती॥५२॥

भावानुवाद—पूर्व श्लोकोक्त 'आदि' शब्द द्वारा प्रतिपादित श्रीहनुमानकी महिमा ज्ञापक गुणोंको बतलाकर अब श्रीप्रह्लाद अपने वक्तव्यका उपसंहार 'यदृच्छया' इत्यादि वाक्यों द्वारा कर रहे हैं। उन श्रीहनुमानने दशरथपुत्र श्रीरामचन्द्रकी सेवाके आनुसंगिक (गौण) फलरूपमें बिना किसी प्रयासके प्राप्त मोक्षको स्वीकार करनेकी बात तो दूर रहे, उसकी इच्छा भी नहीं की। कारण, दास्य-रहित मोक्ष भक्तिरसका विरोधी है, इसलिए उन्होंने केवल शुद्ध दास्यकी ही इच्छा की, अन्य कोई भी इच्छा नहीं की। अर्थात् उन्होंने जन्म-मरण आदिसे छुटकारा पानेकी इच्छा भी नहीं की, 'मुझमें केवल भक्ति ही सदैव विद्यमान रहे', यही प्रार्थना की। अथवा संसार-बन्धनसे छुटकारारूप मोक्ष जो भक्तिका आनुसंगिक फल है, उसके स्वयं उपस्थित होने पर भी उसका परित्याग करके केवल विशुद्ध दास्यकी प्रार्थना करनेवाले श्रीहनुमानको मैं पुनः-पुनः प्रणाम करता हूँ। यह श्लोक श्रीनारायणव्यूह-स्तवके अन्तर्गत है॥५२॥

मदनुक्तं च माहात्म्यं तस्य वेत्ति परं भवान्।
गत्वा किम्पुरुषे वर्षे दृष्ट्वा तं मोदमाप्नुहि॥५३॥

श्लोकानुवाद—मैंने उन श्रीहनुमानकी जिन-जिन महिमाओंको नहीं कहा है, आप उन सबको भी जानते हैं। अतएव मैं इससे अधिक और क्या कहूँ? आप किम्पुरुषवर्षमें जाकर उन श्रीहनुमानके दर्शनसे आनन्द अनुभव कीजिए॥५३॥

दिग्दर्शिनी टीका—मयानुक्तमपि परमन्यत्तस्य हनूमतो माहात्म्यं श्रीरघुनाथपादपद्मैक भक्तिरसनिष्ठतादिकं भवान् वेत्त्येव, किं मया तद्वर्णनीयमित्यर्थः। अतस्तं हनूमन्तं दृष्टया आप्नुहीति पञ्चम्यनुमतौ॥५३॥

भावानुवाद—मैंने श्रीहनुमानके जिन माहात्म्योंको नहीं कहा है, आप उनको भी जानते हैं। अर्थात् भगवान् श्रीरामचन्द्रके चरणकमलोंमें उनकी भक्तिरस-निष्ठा आदिके माहात्म्यसे आप अवगत हैं। अतएव मैं इससे अधिक और क्या वर्णन कर सकता हूँ? अभी आप किम्पुरुषवर्षमें जाकर उन श्रीहनुमानके दर्शनकर आनन्द अनुभव कीजिए॥५३॥

श्रीपरीक्षिदुवाच—

अये मातरहो भद्रमहो भद्रमिति ब्रुवन्।
उत्पत्यासनतः खेन मुनिः किम्पुरुषं गतः॥५४॥

श्लोकानुवाद—श्रीपरीक्षित महाराजने कहा—हे माता! 'अहो कैसी कल्याणकी बात है! अहो कितना मंगल है!' यह कहते-कहते मुनिवरने अपने आसनसे उठकर आकाश मार्गसे किम्पुरुषवर्षके लिए गमन किया॥५४॥

दिग्दर्शिनी टीका—आसनादुत्पत्य उर्ध्वमापद्य अधोदेशादुपरितनदेशगमनात्। पश्चात् खेन आकाशमार्गेण॥५४॥

भावानुवाद—श्लोकानुवाद द्रष्टव्य है॥५४॥

तत्रापश्यद्धनूमन्तं रामचन्द्रपदाब्जयोः।
साक्षादिवार्चनरतं विचित्रैर्वन्यवस्तुभिः॥५५॥

श्लोकानुवाद—श्रीनारदने किम्पुरुषवर्षमें उपस्थित होकर देखा कि श्रीहनुमान वनमें प्राप्त होनेवाली अनेक प्रकारकी वस्तुओंके द्वारा मानो साक्षात् रूपमें ही श्रीरामचन्द्रके श्रीचरणकमलोंका अर्चन करनेमें व्यस्त हैं॥५५॥

दिग्दर्शिनी टीका—साक्षादिवेति, यथापूर्वं तयोः साक्षादर्च्चनं कृतमस्ति तथाधुनापि वन्यवस्तुभिरर्चने रतम्। यद्वा, मूर्त्तिर्ज्ञानं विहाय भगवानयं साक्षाद् वर्त्तत इति बुद्ध्येत्यर्थः॥५५॥

भावानुवाद—श्रीनारदने किम्पुरुषवर्षमें उपस्थित होकर देखा कि जैसे पहले श्रीहनुमान साक्षात् रूपमें भगवान् श्रीरामचन्द्रका अर्चन करते थे, अभी भी ठीक उसी प्रकार वनमें उत्पन्न बहुत प्रकारकी वस्तुओंके द्वारा उनके श्रीचरणकमलोंके अर्चन-पूजनमें अत्यधिक निमग्न हैं। अर्थात् श्रीरामचन्द्रके श्रीविग्रहके निकट रहने पर भी उसे श्रीविग्रह न मानकर पहलेकी भाँति ही साक्षात् भगवान् श्रीरामचन्द्रके ज्ञानसे उनके श्रीविग्रहकी अर्चना कर रहे हैं॥५५॥

गन्धर्वादिभिरानन्दाद्गीयमानं रसायनम्।
रामायणञ्च शृण्वन्तं कम्पाश्रुपुलकाचितम्॥५६॥

श्लोकानुवाद—श्रीनारदने और भी देखा कि गन्धर्व आदि गायक बड़े आनन्दसे श्रीरामायणका गान कर रहे हैं और श्रीहनुमान अपने कानों द्वारा उस परम रसायनका पान करते-करते कम्प, पुलक आदि द्वारा सुशोभित कलेवरसे आनन्दाश्रु प्रवाहित कर रहे हैं॥५६॥

दिग्दर्शिनी टीका—तमेव विशिनष्टि—गन्धर्वेति द्वाभ्याम्। रामायणं श्रीरामचन्द्र कथाकाव्यं, तत् शृण्वन्तं अतएव कम्पाश्रुपुलकैराचितं व्याप्तम्। तत् कीदृशं? गन्धर्वादिभिः किम्पुरुषवर्षवर्त्तिभिर्गीयमानम्। पुनः कीदृशं तत्? रसायनं—रसस्य सर्वलोकानामनुरागस्य शृङ्गारादिनवप्रकारस्य वा अयनमाश्रयम्। यद्वा, संसाररोगनिवर्त्तक-भक्तिपरिपोषक-परम-मधुरमहौषधरूपमित्यर्थः। आनन्दादिति यथापेक्ष्यं सर्वत्रापि योजनीयम्॥५६॥

भावानुवाद—श्रीहनुमान किस प्रकार श्रीरामचन्द्रजीका अर्चन कर रहे हैं, इसे 'गन्धर्वादि' दो श्लोकोंके द्वारा विशेषरूपसे वर्णन कर रहे हैं। श्रीरामायण भगवान् श्रीरामचन्द्रजीकी लीलाकथाका काव्य-ग्रन्थ है, उसको श्रवण करते-करते श्रीहनुमानका दिव्य कलेवर आनन्दसे परिपूर्ण होकर कम्प, अश्रु, पुलक आदिसे सुशोभित हो रहा है। वह कथा किसके द्वारा गायी जा रही है? किम्पुरुषवर्षके निवासी गन्धर्व आदि द्वारा रामायणकी लीलाकथाएँ गायी जा रही हैं। वह रामायणकी कथाएँ कैसी हैं? परम रसायन, रसका आश्रय अथवा शृङ्गार आदि नवविध रसोंका आश्रयस्वरूप हैं। अथवा संसाररूपी रोगको दूर करनेवाली तथा भक्ति परिपोषक परम महौषधि स्वरूप हैं॥५६॥

विचित्रैर्दिव्यदिव्यैश्च गद्यपद्यैः स्वनिर्मितैः।
स्तुतिमन्यैश्च कुर्वाणं दण्डवत्प्रणतीरपि॥५७॥

श्लोकानुवाद—कभी-कभी अपने द्वारा रचित और कभी-कभी वेद पुराणोंमें लिखित सुन्दर-सुन्दर गद्य-पद्यमय वाक्यों द्वारा श्रीहनुमान प्रभुकी स्तव-स्तुति करते-करते उन्हें साष्टांग दण्डवत् प्रणाम कर रहे हैं॥५७॥

दिग्दर्शिनी टीका—दिव्येभ्य उत्कृष्टेभ्योऽपि दिव्यैः, स्वयं हनूमतैव निर्मितैर्विरचितैः; अन्यैश्च वेदपुराणादिर्भिगद्यैः पद्यैश्च स्तुतिं कुर्वन्तम्, प्रणतीः अष्टाङ्गप्रणामानपि कुर्वन्तम्॥५७॥

भावानुवाद—श्लोकानुवाद द्रष्टव्य है॥५७॥

चुक्रोश नारदो मोदाज्जय श्रीरघुनाथ हे।
जय श्रीजानकीकान्त जय श्रीलक्ष्मणाग्रज!॥५८॥

श्लोकानुवाद—श्रीहनुमानके दर्शनोंसे श्रीनारद अत्यधिक उल्लसित होकर उच्च स्वरसे कहने लगे—'हे श्रीरघुनाथ! जय श्रीजानकी-कान्त! जय श्रीलक्ष्मणाग्रज!'॥५८॥

दिग्दर्शिनी टीका—नारदश्चाकाशयानेन गच्छन्नेव तं तथा दृष्टवा हर्षेण चुक्रोश उच्चैः शब्दमकरोत्। कथं? तदाह—जयेति॥५८॥

भावानुवाद—आकाश-यान द्वारा किम्पुरुषवर्षमें पहुँचकर तथा वहाँ श्रीहनुमानके दर्शनकर श्रीनारद अत्यन्त हर्ष सहित उच्च स्वरमें कहने लगे। क्या? इसे 'जयेति' पदोंमें कह रहे हैं॥५८॥

निजेष्टस्वामिनो नामकीर्त्तनश्रुतिहर्षितः।
उत्प्लुत्य हनूमान् दूरात् कण्ठे जग्राह नारदम्॥५९॥

श्लोकानुवाद—श्रीहनुमान दूरसे ही अपने इष्टदेव श्रीरामचन्द्रके नामकीर्त्तनको श्रवणकर बड़े उल्लाससे छलांग लगाकर आकाशमें उड़ गये और वहीं श्रीनारदके गलेको पकड़कर उनको आलिङ्गन पाशमें बाँध लिया॥५९॥

दिग्दर्शिनी टीका—नाम्नां कीर्त्तनस्य श्रुत्वा श्रवणेन हर्षितः, उप्लुत्य उर्द्ध्वप्लुतिगत्या गगन एवाभिगम्येत्यर्थः॥५९॥

भावानुवाद—श्लोकानुवाद द्रष्टव्य है॥५९॥

तिष्ठन् वियत्येव मुनिः प्रहर्षान्नृत्यन् पदाभ्यां कलयन् कराभ्याम्।
प्रेमाश्रुधाराञ्च कपीश्वरस्य प्राप्तो दशां किञ्चिदवोचदुच्चैः॥६०॥

श्लोकानुवाद—मुनिवरने आकाशमें ही परमानन्दित होकर दोनों चरणोंसे नृत्य करते-करते अपने हाथोंसे कपीश्वर श्रीहनुमानकी प्रेमाश्रु-धाराको मार्जित कर दिया तथा किसी एक अपूर्व दशाको प्राप्त कर उच्च स्वरसे कुछ कहने लगे॥६०॥

दिग्दर्शिनी टीका—पदाभ्यामेव नृत्यन् हनूमता कण्ठे ग्रहणादन्याङ्गविक्षेपाशक्तेः। तथा कपीश्वरस्य तस्यैव प्रेमाश्रुधारां कराभ्यां कलयन् मार्ज्जयन् गृह्णन्निति वा। एवं कामपि परमप्रेमप्रादुर्भावरूपां दशामावस्थां प्राप्तः सन्॥६०॥

भावानुवाद—मुनिवर आकाशमें ही दोनों चरणोंसे नृत्य करने लगे। दोनों चरणोंसे नृत्य करने लगे—ऐसा कहनेका तात्पर्य यह है कि श्रीहनुमानने देवर्षि नारदके गलदेशको अपने दोनों हाथोंसे बाँध रखा था, इसलिए वे अन्य अंगोंको हिलाने-डुलानेमें समर्थ नहीं थे। उसके उपरान्त देवर्षिने अपने दोनों हाथोंसे कपीश्वरकी प्रेमाश्रु-धाराको मार्जित कर दिया और परमप्रेमके प्रादुर्भावरूप किसी एक विशेष दशाको प्राप्त होकर कहने लगे॥६०॥

श्रीनारद उवाच—

श्रीमन्! भगवतः सत्यं त्वमेव परमप्रियः।
अहञ्च तत्प्रियोऽभूवमद्य यत्त्वां व्यलोकयम्॥६१॥

श्लोकानुवाद—श्रीनारदने कहा—हे श्रीमान्! हे परमभक्तिरूपी सम्पत्तिवान्! आप श्रीभगवान्के परमप्रिय हैं और अब मैं भी आपका दर्शन करके भगवान्का प्रिय हुआ हूँ॥६१॥

दिग्दर्शिनी टीका—श्रीमन्! हे परमभक्तिसम्पत्तियुक्तः! अप्यर्थे चकारः। अहमपि तस्य भगवतः प्रियोऽद्याभूवम्। यद्यस्मात्॥६१॥

भावानुवाद—श्लोकानुवाद द्रष्टव्य है॥६१॥

श्रीपरीक्षिदुवाच—

क्षणात् स्वस्थेन देवर्षिः प्रणम्य श्रीहनूमता।
रघुवीरप्रणामाय समानीतस्तदालयम्॥६२॥

श्लोकानुवाद—श्रीपरीक्षित महाराजने कहा—श्रीहनुमानने क्षणकालमें ही प्रेम-विह्वलताके शान्त होने पर स्वाभाविक अवस्थामें आकर श्रीनारदको प्रणाम किया तथा भगवान् श्रीरामचन्द्रको प्रणाम करानेके लिये उनको भगवान्के श्रीमन्दिरमें ले गये॥६२॥

दिग्दर्शिनी टीका—स्वस्थेन प्रेम विह्वलतोपशमाद् यथापूर्वं प्रकृतिस्थितेन सता। तस्य रघुवीरस्य आलयं प्रासादम्॥६२॥

भावानुवाद—श्लोकानुवाद द्रष्टव्य है॥६२॥

कृताभिवन्दनस्तत्र प्रयत्नादुपवेशितः।
सम्पत्तिं प्रेमजां चित्रां प्राप्तो वीणाश्रितोऽब्रवीत्॥६३॥

श्लोकानुवाद—श्रीनारदने मन्दिरमें पहुँचकर भगवान्‌के श्रीविग्रहको प्रणाम किया और फिर श्रीहनुमानने उनको यत्नपूर्वक आसन पर बैठाया। उसी समय श्रीनारदका कलेवर प्रेमसे उत्पन्न अश्रु-पुलकादि सात्त्विक विकारोंसे परिव्याप्त हो गया तथा वे वाद्यरहित वीणाको हाथोंमें धारण किये हुए कहने लगे॥६३॥

दिग्दर्शिनी टीका—कृतम् अभिवन्दनं श्रीरघुनाथमूर्त्तेरष्टाङ्गप्रणामो येन सः। तत्र आलये; सम्पत्तिं कम्पस्वेदपुलकाश्रुपात-गद्गदादिमयीम्; अतएव वीणां केवलमाश्रितः सन् न तु वादयन्। यद्वा, स्खलन शंकया तामवष्टभ्य वर्त्तमान इत्यर्थः॥६३॥

भावानुवाद—देवर्षि श्रीनारदने भगवान्‌के श्रीविग्रहको दण्डवत् प्रणाम किया और फिर श्रीहनुमानने उनको यत्नपूर्वक आसन पर बैठाया। किन्तु वे प्रेम द्वारा उत्पन्न कम्प-स्वेद-पुलक-अश्रु-गद्गदादि सात्त्विक विकारोंसे व्याप्त कलेवरसे वाद्यरहित वीणाको केवल हाथोंमें धारण किये हुए थे। अथवा गिरनेकी आशंकासे वीणाको केवल हाथोंमें धारण करके कहने लगे॥६३॥

श्रीनारद उवाच—

सत्यमेव भगवत्कृपाभरस्यास्पदं निरुपमं भवान् परम्।
यो हि नित्यमहहो महाप्रभोश्चित्रचित्रभजनामृतार्णवः॥६४॥

श्लोकानुवाद—श्रीनारदने कहा—सचमुच आप ही भगवान्‌के अनुपम कृपापात्र हैं। अहो! आप तो भगवान्‌की भक्तिरूपी अमृतके सागरस्वरूप हैं॥६४॥

दिग्दर्शिनी टीका—परं केवलं भवानेव भगवत्कृपाभरस्य निरुपममसदृशं आस्पदं भाजनमिति यत्तत् सत्यमेव। अहहो इत्यव्ययम् अत्याश्चर्ये। यो भवान् चित्रादाश्चर्यान्नानाप्रकारादपि वा चित्रं भजनमेवामृतं संसाररोगहारित्वेन परम माधुर्यादिना च तस्यार्णवः; हि निश्चये॥६४॥

भावानुवाद—यह सत्य है कि केवल आप ही श्रीभगवान्‌की अनुपम कृपाके पात्र हैं। अहो! (अति आश्चर्यके कारण 'अहहो' अव्यय प्रयोग हुआ है) आप भगवान्‌के अति आश्चर्यजनक विविध प्रकारके भजनामृतके नित्य सागरस्वरूप हैं। अर्थात् आपका भजन संसाररूपी रोगको दूर करनेवाला होने पर भी परममाधुर्य आदिका अगाध सागरस्वरूप है। निश्चयके अर्थमें यहाँ 'ही' अव्ययका प्रयोग हुआ है॥६४॥

दासः सखा वाहनमासनं ध्वजच्छत्रं वितानं व्यजनञ्च वन्दी।
मन्त्री भिषग्योधपतिः सहायश्रेष्ठो महाकीर्तिविवर्द्धनश्च॥६५॥

श्लोकानुवाद—आप भगवान्‌के दास, सखा, वाहन, आसन, ध्वज, वीजन, व्यजन, वन्दी, मन्त्री, वैद्य, सेनापति, श्रेष्ठ सहायक और उनकी महान कीर्तिको वर्द्धित करनेवाले हैं॥६५॥

दिग्दर्शिनी टीका—तदेव विवृणोति—दास इति द्वाभ्याम्। हेलाविलङ्घितेत्यादि प्रह्लादोक्तेरयं संक्षेपो ज्ञेयः। तत्र दासः, तत्तत् सेवाकारित्वात्। सखा विश्वासाद्यास्पदम्; अन्यथा महाप्रभुणा निजाङ्गुरीयक-समर्पणपूर्वक-सीतोद्देशार्थ-प्रस्थापनस्यायोगात्। ध्वजः सदा श्रीरधुनाथपार्श्वावस्थित्या महोच्च-कायत्वेन दूरादेव ध्वजवत् तद्विज्ञापकत्वात्, यद्वा, वहनसमये उन्नमितस्य पुच्छस्य दूरतो ध्वजवद् दृश्यमानत्वात्। एवं तेनैवातपनिवारणादिना छत्रं वितानं व्यजनञ्चेति। यद्यपि वीजयितापि स एव तथापि व्यजनत्वे सिद्धे वीजनमपि सिद्धमेवेत्यभेदाभिप्रायेण पृथक् तथा नोक्तम्। वन्दी विचित्रस्तुतिपठनात्। भिषक् विशल्यकरणीमहौषध्यादि द्वारा शल्यक्षतादि चिकित्सनात्। सहायेषु वानरादिषु श्रेष्ठः; सर्वविलक्षण महाबुद्धिविक्रमशालित्वात्॥६५॥

भावानुवाद—श्रीहनुमान द्वाराकी जानेवाली सेवाओंके सम्बन्धमें 'दासः' इत्यादि दो श्लोकोंमें बतलाया जा रहा है। यहाँ श्रीप्रह्लादोक्त—'हेलाविलङ्घित' इत्यादि वचनोंका संक्षिप्तरूपसे वर्णन किया जा रहा है, ऐसा जानना होगा। आप भगवान्‌की अनेक प्रकारकी सेवाओंके अधिकारी हैं, इसलिए आप दास हैं। विश्वासपात्र होनेके कारण सखा हैं, अन्यथा भगवान् अपनी अगूँठी देकर श्रीसीतादेवीको ढूढ़नेके लिए आपको नहीं भेजते। आप सर्वदा भगवान् श्रीरामचन्द्रके निकट रह कर अपने विशाल (उच्च) शरीरके कारण ध्वजाकी भाँति दूरसे ही

प्रभु श्रीरामचन्द्रकी उपस्थितिको सूचित करते हैं। अपनी पूँछको छत्र जैसा बनाकर आप प्रभुकी आँधी–तूफान तथा सूर्यकी प्रखर किरणोंसे रक्षा करते हैं, इसलिए आप चंद्रातप (चंदोवा) हैं अथवा अपनी पूँछसे पंखा झलते हैं, अतः व्यजन (पंखा) हैं। अथवा भगवान्‌को वहन करते समय अपनी ऊँची की हुई पूँछ द्वारा दूरसे ही ध्वजाकी भाँति दिखाई पड़नेके कारण ध्वजा हैं। यद्यपि व्यजनकार्यके होने पर वीजन भी हो जाता है, तथापि आपकी पूँछ ही ताप (गर्मी)को दूर करती है, अतः वीजनका पृथक्‌रूपसे उल्लेख नहीं किया गया। आप अनेक प्रकारकी स्तुतियोंके पाठक है, अतः वन्दी (पाल) हैं; विशल्यकरणी महौषधिको लाकर अस्त्रोंसे हुए घावोंकी चिकित्सा करनेके कारण वैद्य हैं; सर्व विलक्षण महान बुद्धिशाली और पराक्रमशाली होनेके कारण सेनापति हैं; प्रभुके वानर आदि सभी सहायकोंमें आप श्रेष्ठ सहायक भी हैं॥६५॥

समर्पितात्मा परमप्रसाद भृत्तदीयसत्कीर्तिकथैकजीवनः।
तदाश्रितानन्दविवर्द्धनः सदा महत्तमः श्रीगरुड़ादितोऽधिकः॥६६॥

श्लोकानुवाद—इस प्रकार आप सब प्रकारसे आत्मसमर्पण करके प्रभुकी अत्यधिक कृपाके पात्र बने हैं। आप भगवान्‌के आश्रित–भक्तोंका निरन्तर आनन्द वर्धन करते हैं, इसलिए आप गरुड़ आदि भक्तोंसे भी परम श्रेष्ठतम हैं॥६६॥

दिग्दर्शिनी टीका—एवं सर्वतोभावेन समर्पित आत्मा येन सः, निजाशेषकरणैः सेवनात्; यद्वा अनन्यप्रियत्वेन देहदैहिकार्थ–चेष्टाद्यनासक्तत्वात्। तदीया श्रीरघुनाथ–सम्बन्धिनी या सत्कीर्त्तिस्तस्याः कथैवैकं जीवनं यस्य तदभावे महाप्रभुविरहेण म्रियेतैवेति भावः। अतएव यत्र श्रीरामचन्द्रकथा भवेत्, तत्रैव श्रीहनूमानायातीति प्रसिद्धिः। तदाश्रितानां तदानीन्तनानामाधुनिकानाञ्च श्रीरघुनाथभक्तानामानन्दं विवर्धयतीति तथा सः। सदेति यथासम्भवं सर्वत्रापि सम्बन्धनीयम्। श्रीगरुड़ादिभ्योऽपि अधिको महत्तमः परमश्रेष्ठतर इत्यर्थः। यद्वा, एवं महत्तम इत्युपसंहारः। महत्सु भक्तवर्गेषु परमश्रेष्ठ इत्यर्थः। तत्र हेतुः—श्रीगरुड़ेति। *'दासः सखा वाहनमासनं ध्वजो, यस्ते वितानं व्यजन त्रयीमयः। उपस्थितं ते पुरतो गरुत्मता, त्वदङ्घ्रिसंमर्दकिणाङ्कशोभिना॥'* इति श्रीवैष्णववरालमन्दारोक्तात् श्रीगरुड़माहात्म्यादत्रोक्तानुसारेण श्रीहनूमतः सेवाधिक्यान्–माहात्म्य विशेषसिद्धेः॥६६॥

भावानुवाद—इस प्रकार आप प्रभु श्रीरामचन्द्रके चरणकमलोंमें सब प्रकारसे समर्पित आत्मा हैं अर्थात् आपकी आत्मा सब प्रकारसे समर्पित हुई है। आप अपनी समस्त इन्द्रियों द्वारा भगवान्‌की सेवा कर रहे हैं अथवा प्रभुके प्रति ऐकान्तिक प्रियताके कारण प्रभुके अलावा और कोई भी आपकी प्रीतिका विषय नहीं है, इसलिए देह-दैहिक चेष्टाओंके प्रति भी अनासक्त रहनेके कारण आप समर्पित आत्मा हैं। पुनः श्रीरामचन्द्रकी सत्कीर्ति कथा ही आपका जीवन है, उस कथाके बिना (प्रभुके विरहमें) आप मृतकी भाँति हो जाते हैं। इसीलिए सर्वत्र प्रसिद्धि है कि जहाँ भी भगवान् श्रीरामचन्द्रकी कथा होती है, वहाँ श्रीहनुमान भी गमन करते हैं। आप भगवान् श्रीरामचन्द्रके आश्रित भक्तोंके, यहाँ तक कि आधुनिक या प्राचीन सारे श्रीराम-भक्तोंका सदा आनन्दवर्द्धन करते हैं। (सदा-शब्दका मूल श्लोकके समस्त विशेषणोंके साथ यथासम्भव सम्बन्ध है।) अतएव आप महान भक्त गरुड़ आदिसे भी अधिक श्रेष्ठ हैं। वैष्णवश्रेष्ठ आलमन्दारु-कृत स्तोत्रमें भी कहा गया है—"ये श्रीहनुमान दास, सखा, आसन, ध्वज, छत्र, वितान, व्यजन आदि रूपमें वेदमय गरुड़ आदिसे भी अधिक भगवान्‌के समीप रहकर उनके पाद-सम्वाहन आदि सेवा-रससे शोभायमान हैं।" इत्यादि वचनोंके अनुसार गरुड़के माहात्म्यसे भी श्रीहनुमानकी सेवाकी अधिकतावशतः उनका माहात्म्य विशेषरूपसे सिद्ध है॥६६॥

अहो भवानेव विशुद्धभक्तिमान् परं न सेवासुखतोऽधिमन्य यः।
इमं प्रभुं वाचमुदारशेखरं जगाद तद्भक्तगणप्रमोदिनीम्॥६७॥

श्लोकानुवाद—अहो! आप ही विशुद्ध भक्तिमान हैं। आपने सेवासुखको अन्य साध्य-वस्तुओंकी तुलनामें सर्वश्रेष्ठ जानकर वदान्यशिरोमणि भगवान्‌को जो वचन कहे थे, आज भी वे वचन भगवान्‌के भक्तोंको अत्यधिक आनन्द प्रदान करते हैं॥६७॥

दिग्दर्शिनी टीका—इदानीं सर्वनैरपेक्ष्येण सदा भक्त्येक-प्रियतामाहात्म्यमाह—अहो इति विस्मये। सेवासुखात् परमन्यत् सर्वंनाधिमन्य अधिकं न मत्वा किन्तु तदेकमेवोत्कृष्टम्, अन्यत् सर्वमपकृष्टमिति ज्ञात्वेत्यर्थः। उदारशेखरं वदान्यशिरोमणिं

सर्वमेव दातुमुद्यतमपीत्यर्थः। तस्य प्रभोर्भक्तानां गणस्य प्रकृष्टहर्षकरीं दास्यैकापेक्षया तद्विरोधित्वेन मुक्तेर्दूरतः परिहारात्॥६७॥

भावानुवाद—अब श्रीहनुमानके निरपेक्षभावसे सदा भक्तिप्रिय होनेके माहात्म्यको कह रहे हैं। अहो! आप ही विशुद्ध भक्तिमान हैं। यहाँ 'अहो' शब्द विस्मयके अर्थमें है। आपने अन्य साध्योंसे सेवासुखको अधिक न मानकर केवल सेवासुखको ही सर्वोत्कृष्ट तथा अन्य सभी साध्योंको तुच्छ जानकर वदान्यशिरोमणि भगवान् श्रीरामचन्द्रसे अत्यन्त आनन्ददायक वचन कहा था। अर्थात् जब भगवान् श्रीरामचन्द्र आपको सर्वश्रेष्ठ वरदान देने लगे तब आपने उनसे सभी भक्तोंको अत्यधिक आनन्द प्रदान करनेवाले वचन ही कहे थे। दास्यभावसे सेवा करनेके लिए आपने उसकी विरोधी मुक्तिको दूरसे ही त्याग दिया था॥६७॥

भवबन्धच्छिदे तस्यै स्पृहयामि न मुक्तये।
भवान् प्रभुरहं दास इति यत्र विलुप्यते॥६८॥

श्लोकानुवाद—श्रीहनुमानने प्रभुसे कहा था—"हे प्रभो! मैं आपसे भवबन्धन छेदनकारी मुक्तिकी प्रार्थना नहीं करता हूँ, क्योंकि उससे आप प्रभु हैं और मैं आपका दास हूँ, यह सम्बन्ध विलुप्त हो जाता है"॥६८॥

दिग्दर्शिनी टीका—तमेवाह—भवेति। भवबन्धं जन्ममरणादि-संसारबन्धनं छिनत्तीति तथाभूतायै अपि न स्पृहयाम्यापि, कुतः स्वीकुर्यामित्यर्थः, मुक्तावद्वैतापत्तेर्भक्ति-सुखविघातात्। श्लोकश्चायं सुप्रसिद्ध एव॥६८॥

भावानुवाद—'भवेति' श्लोक द्वारा श्रीहनुमान द्वारा कहे गये वचनको कह रहे हैं—"जन्म-मरण आदि संसार-बन्धनका छेदन करनेवाली मुक्तिको स्वीकार करनेकी तो बात ही क्या, मैं उसकी इच्छा भी नहीं करता हूँ, क्योंकि मुक्तिमें सेव्य-सेवकका सम्बन्ध विलुप्त हो जाता है। अर्थात् मुक्तिमें आप प्रभु हैं और मैं दास हूँ, यह भाव विलुप्त होकर दास और प्रभु दोनों अद्वैत अर्थात् मिलकर एकीभूत हो जाते हैं।" अतः मुक्ति भक्तिसुखमें पूर्णता बाधक है। यह श्लोक भी अत्यधिक प्रसिद्ध है॥६८॥

श्रीपरीक्षिदुवाच—

ततो हनूमान् प्रभुपादपद्म-कृपाविशेषश्रवणेन्धनेन।
प्रदीपितादो विरहाग्नितप्तो रुदन् शुचार्त्तो मुनिनाह सान्त्वितः॥६९॥

श्लोकानुवाद—महाराज श्रीपरीक्षितने कहा—इसके उपरान्त श्रीहनुमान अपने प्रभु भगवान् श्रीरामचन्द्रके चरणकमलोंकी कृपाको श्रवण करके उनके विरहमें शोकातुर होकर क्रन्दन करने लगे। अर्थात् शुष्क तृण जिस प्रकार अग्निके संयोगसे प्रज्वलित हो उठता है, उसी प्रकार भगवान् श्रीरामचन्द्रकी अत्यन्त कृपाके श्रवणरूप ईंधनके संयोगसे उनका विरहानल प्रदीप्त हो उठा। फिर श्रीनारद द्वारा सान्त्वना दिये जाने पर उस शोकके प्रशमित होने पर वे कहने लगे॥६९॥

दिग्दर्शिनी टीका—प्रभुपादपद्मयोः कृपाविशेषस्तत्सेवालक्षणस्तस्य श्रवणमेव इन्धनं शुष्ककाष्ठं तेन प्रकर्षेण दीपितो ज्वलितो योऽमुयोः पादपद्मयोर्विरहाग्निस्तेन तप्तः पश्चान्मुनिना नारदेन सान्त्वितः मिष्टवाक्येनोपशान्तिं नीतःसन्नाह॥६९॥

भावानुवाद—भगवान्के श्रीचरणकमलोंकी विशेषकृपा ही श्रीहनुमानकी सेवा है। अतएव उस सेवाके लक्षणोंको श्रवण करना ही शुष्क-काष्ठ द्वारा प्रज्वलित उनका विरहानल है, अर्थात् भगवान्के चरणकमलोंकी सेवाकी विरहाग्निमें सन्तप्त श्रीहनुमान रोदन करने लगे। श्रीहनुमान पहले ही सर्वदा प्रभुके विरहानलमें दग्ध रहते थे, उसके ऊपर प्रभुकी सेवारूप कृपाकी बात सुनकर सूखी हुई लकड़ीमें अग्नि-संयोगकी भाँति उनका विरहानल और भी धधक उठा। वे अत्यधिक शोकार्त्त होकर रोदन करने लगे। तत्पश्चात् मुनिवरके मधुर वचनोंको श्रवण करके उनका शोक कुछ कम हुआ तथा वे पुनः कहने लगे॥६९॥

श्रीहनुमान उवाच—

मुनिवर्य! कथं श्रीमद्रामचन्द्रपदाम्बुजैः।
हीनं रोदयसे दीनं नैष्ठुर्यस्मारणेन माम्॥७०॥

श्लोकानुवाद—श्रीहनुमानने कहा—हे मुनिवर! मैं अति दीन-हीन हूँ। भगवान् श्रीरामचन्द्रके चरणकमलोंकी सेवासे रहित हूँ। आप मुझे फिरसे क्यों उनके विरहका स्मरण कराकर क्रन्दन करा रहे हैं?॥७०॥

दिग्दर्शिनी टीका—पदाम्बुजैरिति बहुत्वं गौरवेण। हीनं त्यक्तम्; नैष्ठुर्यमनार्द्रहृदयत्वम्; परित्यज्य गतत्वात् तस्य स्मारणेन कथं मां रोदयसे? रोदनहेतुं तत्स्मरणं मा कारयेत्यर्थः॥७०॥

भावानुवाद—'पदाम्बुजैः' अर्थात् प्रभु श्रीरामचन्द्रके दोनों चरणकमल, इस बहुवचनका प्रयोग गौरववशतः हुआ है। हीन अर्थात् मैं प्रभु द्वारा त्यक्त हूँ, 'नैष्ठुर्य' अर्थात् मुझे त्यागते समय प्रभुका हृदय द्रवीभूत नहीं हुआ। यदि कहो कि श्रीरामचन्द्र आपको परित्यागकर चले गये हैं, अतः आप उन्हें स्मरण कर क्यों रो रहे हैं? इसके लिए कहते हैं कि इस क्रन्दनका कारण मैं नहीं हूँ, आप ही मुझे उनका स्मरण करवा रहे हैं॥७०॥

यदि स्यां सेवकोऽमुष्य तदा त्यज्येय किं हठात्।
नीताः स्वदयिताः पार्श्वं सुग्रीवाद्याः सकोशलाः॥७१॥

श्लोकानुवाद—यदि मैं उनका यथार्थ सेवक होता तब क्या भगवान् मुझे हठात् त्याग देते? साकेत-धाममें जाते समय वे अपने प्रिय सुग्रीव आदि सभी अयोध्यावासियोंको भी अपने साथ ले गये हैं॥७१॥

दिग्दर्शिनी टीका—अमुष्य श्रीरामचन्द्रस्य सेवक एव यद्यहं स्यात् भवेयम्, सम्भावनायाम् सप्तमी। तद्वा तेन किं त्यज्येयाहं त्यक्तः स्याम्? हठादिति आग्रह-भरेण जिगमिषतोऽपि सङ्गेऽनयनात्। विचित्रयुक्तयुक्तात्रैव रक्षणाच्च। आत्मनः पार्श्वं ते न नीताः; यतः स्वस्य तस्य दयिताः। आद्यशब्देन अङ्गदादयः सकोशलाः अयोध्यावासि-सहिताः॥७१॥

भावानुवाद—यदि मैं भगवान् श्रीरामचन्द्रका यथार्थ सेवक होता तो क्या वे मुझे हठात् त्याग कर पाते? 'हठात्' कहनेका तात्पर्य यह है कि मैं उनके साथ साकेत-धाम जानेके लिए पुनः-पुनः आग्रहपूर्वक प्रार्थना करता रहा, तथापि वे अनेक युक्तिपूर्ण वचनोंके द्वारा मुझे समझा-बुझाकर यहीं छोड़ गये हैं। 'आदि' शब्दसे अंगद आदि तथा अयोध्यावासियोंको समझना चाहिए॥७१॥

सेवासौभाग्यहेतोश्च महाप्रभुकृतो महान्।
अनुग्रहो मयि स्निग्धैर्भवद्भिरनुमीयते॥७२॥

श्लोकानुवाद—मेरे प्रति स्नेहवशतः आप केवल मेरे सेवा-सौभाग्यको देखकर मुझ पर श्रीरामचन्द्रजीकी महान कृपाका अनुमान कर रहे हैं॥७२॥

दिग्दर्शिनी टीका—एवमेकेनैवान्ते परित्यागलक्षणेन महादौर्भाग्येण तत् कारुण्यभर-लक्षणं सौभाग्यं सर्वं परिहृत्यापि प्राक्साक्षाद्-वर्त्तमानस्य तस्य प्रभोः सेवा-सौभाग्यानुमितं नारदोक्तं परमानुग्रहं गौरवेणाङ्गीकृत्यान्यथा परिहरति—सेवेति त्रिभिः। सेवासौभाग्याद्धेतोर्महाप्रभुणा कृतो महाननुग्रहो यो मयि भवद्भिरनुमीयते, स मद्विषयक-अनुग्रहः अधुना तेनैव महाप्रभुणा पाण्डवेषु कृतस्यानुग्रहस्य अंशं भागमप्येकं किञ्चित्तुलया साम्येन गन्तुं प्राप्तुं नार्हति न योग्यो भवतीत्यन्वयः। स्निग्धैरिति मद्विषयकस्नेहा देवानुमीयते, न तु तत्त्वविचारेणेति भावः॥७२॥

भावानुवाद—इस प्रकार श्रीहनुमानने श्रीरामचन्द्रजी द्वारा अपने त्याग लक्ष्णरूपी महादुर्भाग्यकी बात कही है। पुनः भगवान्‌की करुणा प्राप्तिके सौभाग्यादि लक्षणोंके अलावा साक्षात् अनुभव किये गये सेवा-सौभाग्य और श्रीनारद द्वारा कथित अपने प्रति प्रभुके परमानुग्रहको गौरवके साथ अङ्गीकार करके भी, अन्य रूपसे 'सेवा' इत्यादि तीन श्लोकोंके द्वारा उस सेवा-सौभाग्यका भी खण्डन कर रहे हैं। आप सभी मेरा सेवा-सौभाग्य देखकर मेरे प्रति प्रभुके महान अनुग्रहका अनुमान कर तो रहे हैं, किन्तु प्रभु इस समय पाण्डवोंके प्रति जैसा अनुग्रह विस्तार कर रहे हैं, वैसे अनुग्रहके किञ्चित् अंशके साथ भी मेरे प्रति उनके अनुग्रहकी तुलना करना संभव नहीं है। परन्तु आप केवलमात्र स्नेहवशतः मेरे प्रति प्रभुकी कृपाका अनुमान कर रहे हैं, किन्तु तत्त्वका विचार करके नहीं॥७२॥

सोऽधुना मथुरापुर्यामवतीर्णेन तेन हि।
प्रादुष्कृतनिजैश्वर्यपराकाष्ठाविभूतिना ॥७३॥

श्लोकानुवाद—भगवान् इस समय मथुरापुरीमें अवतीर्ण हुए हैं तथा अपने ऐश्वर्यकी चरमसीमामें सब प्रकारकी विभूतियोंको प्रकाशित कर रहे हैं॥७३॥

दिग्दर्शिनी टीका—अधुनानुग्रहविशेषकरणे हेतुमाह—मथुरेति। प्रादुष्कृता प्रकटीकृताः निजैश्वर्यस्य परमकाष्ठा या विभूतयो येन तेन॥७३॥

भावानुवाद—अब पाण्डवोंके प्रति श्रीभगवान्‌की विशेष कृपाका कारण बता रहे हैं—भगवान् इस समय मथुरापुरीमें अवतीर्ण होकर अपने ऐश्वर्यकी पराकाष्ठारूप विभूतियोंको प्रकट कर पाण्डवोंके प्रति अपनी कृपाका विस्तार कर रहे हैं॥७३॥

कृतस्यानुग्रहस्यांशं पाण्डवेषु महात्मसु।
तुलयार्हति नो गन्तुं सुमेरुं मृदणुर्यथा॥७४॥

श्लोकानुवाद—महात्मा पाण्डवोंके प्रति भगवान् जिस प्रकारसे अनुग्रहका विस्तार कर रहे हैं, उनकी तुलनामें मेरे प्रति भगवान्‌की कृपा एक धूलिकणके समान है। एक धूलिकण जैसे सुमेरुपर्वतके समान नहीं हो सकता, उसी प्रकार मेरी तुलना पाण्डवोंसे नहीं की जा सकती है॥७४॥

दिग्दर्शिनी टीका—सुमेरुं सौवर्णमहापर्वतवरं मृदणुः मृत्तिकाकणो यथा तुलया गन्तुं नार्हति। अनेन च दृष्टान्तेन पाण्डवेषु परमोत्कृष्टगुरुतरानुग्रहो मयि च तद्विपरीत इति ध्वनितम्॥७४॥

भावानुवाद—सुमेरु (स्वर्णपर्वत)के साथ जिस प्रकार मिट्टीके एक कणकी तुलना नहीं हो सकती, उसी प्रकार पाण्डवोंके प्रति भगवान्‌की कृपाकी तुलना मेरे प्रति भगवान्‌के अनुग्रहसे नहीं की जा सकती। इस दृष्टान्तके द्वारा यही सूचित हो रहा है कि पाण्डवोंके प्रति भगवान्‌की परमोत्कृष्ट कृपा है तथा मेरे प्रति उनकी कृपा उसके विपरीत अर्थात् एक धूलिकणके समान ही है॥७४॥

स येषां बाल्यतस्तत्तद्विषाद्यापद्गणेरणात्।
धैर्यं धर्मं यशो ज्ञानं भक्तिं प्रेमाप्यदर्शयत्॥७५॥

श्लोकानुवाद—भगवान्‌ने विषदान आदि अनेक प्रकारकी विपत्तियोंको देकर बाल्यकालसे ही पाण्डवोंके धैर्य, धर्म, यश, ज्ञान, भक्ति और प्रेम आदिको दिखलाया है॥७५॥

दिग्दर्शिनी टीका—तदनुग्रहमेव विवृणोति—स इति द्वाभ्यां, स महाप्रभुः बाल्यतः बाल्यादारभ्य तत्तदनिर्वचनीयं बहुतरं वा यद्विषदानादिरूपस्य आपद्गणस्य

ईरणं प्रेरणं तस्मात्तद्द्वारेत्यर्थः। तेषां पाण्डवानां धैर्यादिकमदर्शयत् प्रकटीचकार लोकेषु विख्यापितवानित्यर्थः। तादृशीषु महापत्स्वपि धैर्यादिवृत्तेः। एवं तेषां माहात्म्यभर-प्रकटनार्थं भगवतैव तेषु तत्तदापदः प्रेरिताः कुतोऽन्यथा तादृशेषु महात्मसु तत्तत्सम्भावनेति भावः॥७५॥

भावानुवाद—अब पाण्डवोंके प्रति भगवान्के अनुग्रहका वर्णन किया जा रहा है। भगवान्ने विषदान आदि अनेक प्रकारकी अनिर्वचनीय विपत्तियोंको देकर बाल्यकालसे ही पाण्डवोंके धैर्य आदिको समाजमें विख्यात किया है। अर्थात् उस प्रकारकी महान विपत्तियोंके समयमें भी पाण्डवोंके धैर्यको दिखाया है। इस प्रकार पाण्डवोंके माहात्म्यको प्रकट करनेके लिए ही भगवान्ने ऐसी-ऐसी विपत्तियोंको दिया, अन्यथा ऐसे महात्माओंके समक्ष वैसी विपत्तियोंका आना असम्भव है॥७५॥

सारथ्यं पार्षदत्वञ्च सेवनं मन्त्रिदूतते।
वीरासनानुगमने चक्रे स्तुतिनतीरपि॥७६॥

श्लोकानुवाद—भगवान् पाण्डवोंके सारथी, पार्षद, सेवक, मन्त्री, दूत और प्रहरी बने तथा उन्होंने पाण्डवोंका अनुगमन, स्तव यहाँ तक कि उन्हें नमस्कार आदि भी किया है॥७६॥

दिग्दर्शिनी टीका—एवं परोक्षकृतमुक्त्वा साक्षात्कृतमनुग्रह विशेषमाह—सारथ्यमिति। पार्षदत्वं सभापतित्वं सख्येन सततपार्श्ववर्तित्वं वा। सेवनं चित्तानुवृत्तिं राजसूयादौ अभिषेचन-पादाब्जेनादिरूपं वा। मन्त्रितां दूतताञ्च; वीरासनं रात्रौ खड़्गहस्ततयावस्थानेन जागरणम्; अनुगमनञ्च पश्चाद्वर्तित्त्वं; कुत्रापि गच्छतामनुव्रजनं वा स्तुतीश्च नतीश्च प्रणामान् चक्रे सः। तथा च प्रथमस्कन्धे (श्रीमद्भा॰ १/१६/१७)—*'सारथ्य-पार्षद-सेवन-सख्य-दौत्य-वीरासनानुगमन-स्तवन्-प्रणामान्। स्निग्धेषु पाण्डुषु जगत्प्रणतिञ्च विष्णोर्भक्तिं करोति नृपतिश्चरणारविन्दे॥'* इति। अस्मिन् श्लोके च पूर्वस्मात् शृण्वन्निति पदमन्वेति। सारथ्यादीनि शृण्वन्निति सख्यजनित एव सारथ्यादौ सर्वत्र सख्यस्य वृत्तेः पृथगेतन्नोक्तमिति ज्ञेयं, किम्वा पार्षदत्वे तस्यान्तर्भावो द्रष्टव्यः॥७६॥

भावानुवाद—इस प्रकार पाण्डवोंके प्रति परोक्ष रूपमें किये गये अनुग्रहके विषयमें कहकर अब साक्षात् रूपमें किये गये अनुग्रहके

विषयमें बतला रहे हैं। श्रीकृष्ण पाण्डवोंके पार्षद, सभापति और सखा बनकर सदा-सर्वदा उनके साथ रहते हैं। सेवन कहनेसे चित्तानुवृत्ति अर्थात् उनके मनको समझकर सेवा करना, राजसूय यज्ञमें अभिषेक या पाद-प्रक्षालन आदिकी सेवाके लिये जलदान आदि सेवा। इस प्रकार श्रीकृष्णने मन्त्री, दूत बनना तथा वीरासन (रात्रि-कालमें तलवार धारणकर वीरासनसे जागरण), अनुगमन (पीछे-पीछे गमन), स्तव और प्रणाम आदि भी किये हैं। यथा, प्रथम-स्कन्धमें कहा गया है—"त्रिलोकवासी जिनके श्रीचरणकमलोंमें प्रणत होते हैं, वही भगवान् श्रीविष्णु अपने प्रिय पाण्डवोंके सारथी, दूत, सभा रक्षक, द्वारपालकी भाँति हाथमें तलवार धारणकर रातमें द्वार-रक्षक और आज्ञा-पालक बने हैं तथा वे उनका स्तव करते हैं और उन्हें नमस्कार करते हैं।" इस श्लोकमें 'सारथ्य' आदिको सख्यवृत्ति अथवा पार्षद होनेके अन्तर्भूत समझना चाहिए॥७६॥

किंवा सस्नेहकातर्यात्तेषां नाचरति प्रभुः।
सेवा सख्यं प्रियत्वं तदन्योऽन्यं भाति मिश्रितम्॥७७॥

श्लोकानुवाद—भगवान्‌ने स्नेहवशतः पाण्डवोंका कौनसा कार्य नहीं किया? अर्थात् वे उनके सभी कार्य ही करते हैं। भगवान् और पाण्डवोंकी परस्पर की गयी सेवा, सख्य और प्रियता सभी एक ही समयमें प्रकाशित होती हैं॥७७॥

दिग्दर्शिनी टीका—किम्वा नाचरति, अपितु युद्धाकरणप्रतिज्ञादिकमपि त्यजति। भीष्मादिकृत-प्रहारमप्यङ्गीकरोतीत्यर्थः। ननु परमार्थत्वेन सर्वप्रियत्वात् सौहार्दं करोतु नाम निकृष्टेषु मर्त्येषु देहिषु विश्वासं सेवाञ्च किमिति करोतीत्यत्राह—सेवेति। तत्सेवादित्रयं अन्योन्यं मिश्रितमेव सद्भाति शोभते। न तु सेवां विना सख्यं, सख्यं विना च प्रियत्वम्, तथा प्रियत्वं विना सख्यं, संख्य विना च सेवा भातीत्यर्थः, अन्यथा कापट्यपर्यवसानात्। यद्वा, पाण्डवानां श्रीकृष्णस्य च परस्परं क्रियमाणमेव सेवादि भाति। पाण्डवैः सेवादौ विधीयमाने कृष्णेन तच्चेन्न क्रियेत तदा तन्न भाति। तत्र च मिश्रितं युगपदेव क्रियमाणं सदित्यर्थः॥७७॥

भावानुवाद—श्रीकृष्णने स्नेहके वशीभूत होकर पाण्डवोंके किस कार्यको नहीं किया है? उन्होंने पाण्डवोंके लिए 'युद्ध नहीं करूँगा'

अपनी इस प्रतिज्ञाको भंग किया है। उन्होंने पाण्डवोंके लिए भीष्मादि द्वारा किये गये अस्त्र प्रहारको भी अङ्गीकार किया है। यदि कहो कि परमार्थ विचारसे तो भगवान् सर्वप्रिय होनेके कारण सभीके प्रति सौहार्दपूर्ण व्यवहार करते हैं; किन्तु तुच्छ मरणशील देहधारीके प्रति उनका विश्वास ही क्या और सेवा ही क्या? इसके उत्तरमें कह रहे हैं कि उनकी सेवावृत्ति मर्त्यदेहके सम्बन्धमें प्रकाशित नहीं होती, बल्कि सेवा, सख्य और प्रियता, ये तीनों परस्पर मिश्रित भावमें प्रकाशित होती हैं। अर्थात् सेवाके बिना सख्य तथा सख्यके बिना प्रियता प्रकाशित नहीं होती; तथा प्रियताके बिना सख्य और सख्यके बिना सेवा प्रकाशित नहीं होती, अन्यथा ये सब कपटतामें ही फलित होती हैं। अथवा पाण्डवों और भगवान् श्रीकृष्णकी परस्परकी सेवा, सख्य और प्रियता एक समयमें प्रकाशित होती हैं। इस प्रकार पाण्डवोंके प्रतिकी गयी भगवान् श्रीकृष्णकी सेवा, सख्य और प्रियता तथा श्रीकृष्णके प्रति पाण्डवोंकी सेवा, सख्य और प्रियता एक ही समयमें प्रकाशित होती है। पक्षान्तरमें यदि पाण्डवगण केवल श्रीकृष्णकी सेवा करें, श्रीकृष्ण पाण्डवोंके प्रति सेवा न करें, तो वैसी सेवा शोभायमान नहीं होती। इसलिए परस्पर दोनों पक्षों द्वारा की गयी सेवाएँ एकत्रित होकर ही प्रकाशित होती हैं॥७७॥

यस्य सन्ततवासेन सा येषां राजधानिका।
तपोवनं महर्षीणामभूद्वा सत्तपः फलम्॥७८॥

श्लोकानुवाद—श्रीकृष्णके सदैव वासके कारण पाण्डवोंकी राजधानी महर्षियोंकी तपस्याके फल प्रदान करनेवाली तपोवन-भूमिके रूपमें प्रकाशित हो रही है॥७८॥

दिग्दर्शिनी टीका—अतो यस्य प्रभोः सन्ततवासेन हेतुना सा हस्तिनापुराख्या राजकुलसम्बन्धमयी येषां पाण्डवानां राजधान्यपि तपोवनं तपःसिद्धिकर तपस्विगणा-वासस्थानमभूत्। श्रीकृष्णसन्दर्शनाय तत्र सततागमनात् तेन च स्वयमेव परमतपःसिद्धेः। तथाचोक्तं श्रीयुधिष्ठिरं प्रति नारदेनापि सप्तमस्कन्धे (श्रीमद्भा॰ ७/१०/४८)—*'यूयं नृलोके वत भूरिभागा, लोकान् पुनाना मुनयोऽभियन्ति। येषां गृहानावसतीति साक्षाद्, गूढं परं ब्रह्म मनुष्यलिङ्गम्॥'* इति। 'किं वक्तव्यं तपः सिद्धम्' इति। तपः

फलमपि परमं तैः प्राप्तमित्याह—वेति पक्षान्तरे; सतः परमोत्कृष्टस्य तपसः फलं सैवाभूत्। तपोऽत्र चित्तैकाग्रता, सदिति फलविशेषणं वा सतत भगवत्–साक्षात्कार–हेतुत्वात्। फलदेति वक्तव्ये फलमित्युक्तिः कार्यकारणयोरभेद–विवक्षया, तत्र सतत तत्प्राप्तेरावश्यकत्वात्॥७८॥

भावानुवाद—अतएव श्रीकृष्णके निरन्तर वासके कारण हस्तिनापुर नामक पाण्डवोंकी राजधानी तपोवन बन गयी है, अर्थात् तपस्वियोंके लिए तप सिद्धिदायक स्थलमें बदल गई है। अथवा श्रीकृष्णके निश्चित अवस्थानके कारण पाण्डवोंकी राजधानी हस्तिनापुर स्वयं ही उत्तम तपस्याका स्थान बन गयी है। महर्षिगण भगवान् श्रीकृष्णका दर्शन करनेके लिए वहाँ पर सदैव आते रहते हैं और भगवान् श्रीकृष्णके दर्शनोंसे उनकी परम तपस्या भी स्वतःसिद्ध हो जाती है। इस विषयमें आपने (श्रीनारदने) महाराज श्रीयुधिष्ठरको कहा था—"श्रीप्रह्लाद अथवा अन्यान्य भक्तोंसे, यहाँ तक कि वशिष्ठ आदि महर्षियोंसे भी महासौभाग्यशाली आप (पाण्डव) ही हैं, क्योंकि अपने दर्शन आदिके द्वारा त्रिभुवनको पवित्र करनेवाले महर्षिगण भी अपने–आपको सम्पूर्णरूपसे पवित्र करनेके लिये आपके घर पर पधारते हैं। कारण, आपके घरमें ही नराकृति परब्रह्म निगूढ़भावसे (गुप्तरूपसे) रह रहे हैं।" अतएव हस्तिनापुर तप सिद्धिदायक स्थान है, इस विषयमें अधिक कहनेकी कोई आवश्यकता नहीं है। अतएव उस स्थान पर सभी प्रकारकी तपस्याओंका फल शीघ्र प्राप्त होता है। पक्षान्तरमें हस्तिनापुर स्वयं ही तपस्याका परमोत्कृष्ट फलस्वरूप है, क्योंकि तपस्याका फल चित्तकी एकाग्रता है तथा उस एकाग्रताका विशेष फल भगवान्का साक्षात्कार है, अतएव निरन्तर भगवान्का साक्षात्कार करनेके लिए हस्तिनापुर स्वयं ही फलस्वरूप है। यहाँ पर फलदाता न कहकर 'फलस्वरूप' कहनेका तात्पर्य है—कार्य और कारणमें अभेदकी विवेचना। इसके द्वारा निरन्तर तपस्याके फल प्राप्तिकी आवश्यकता भी सूचित हुई है॥७८॥

श्रीपरीक्षिदुवाच—

शृण्वन्निदं कृष्ण–पदाब्जलालसो द्वारावतीसन्ततवासलम्पटः।
उत्थाय चोत्थाय मुदान्तरान्तरा श्रीनारदोऽनृत्यदलं सहूङ्कृतम्॥७९॥

श्लोकानुवाद—महाराज श्रीपरीक्षितने कहा—यह सुनकर श्रीनारद भगवान् श्रीकृष्णके चरणकमलोंकी सेवा प्राप्तिकी लालसासे उस द्वारकापुरीमें सदैव वास करनेके लिए अत्यधिक लुब्ध हो गये तथा वार्त्तालापके बीच-बीचमें आनन्दपूर्वक पुनः-पुनः हुंकार करते हुए उठ-उठकर नृत्य करने लगे॥७९॥

दिग्दर्शिनी टीका—एवं श्रीकृष्णस्य तत्प्रियाणाञ्च माहात्म्यभरश्रवणेन श्रीनारदश्च नितरां ननन्देत्याह—शृण्वन्निति। इदं श्रीहनूमदुक्तम्; श्रीकृष्णपादाब्जयोर्लालसः सततंतत्-सेवात्यन्तोत्सुक इत्यर्थः। अतएव द्वारावत्यां तत्पुर्यां सन्ततवासे लम्पटो रसिकः। तथैकादशस्कन्धे (श्रीमद्भा॰ ११/२/१)—*'गोविन्द भुजगुप्तायां द्वारकायां कुरूद्वहः। अवात्सीन्नारदोऽभीक्ष्णं कृष्णोपासन लालसः॥'* इति। अतएव मुद्रा हर्षेण अन्तरान्तरा कथाया मध्ये मध्ये उत्थायोत्थाय हूङ्कृतेन हूङ्कारेण सहितं यथास्यात्तथा अलमतिशयेनानृत्यत्। वीप्सायां पौनःपुन्यं बोध्यते॥७९॥

भावानुवाद—इस प्रकार श्रीकृष्ण और उनके प्रिय पाण्डवोंके माहात्म्यको श्रवण करके श्रीनारद अत्यधिक आनन्दित हुए। यही 'शृण्वन' इत्यादि श्लोकमें कह रहे हैं। श्रीनारदने श्रीहनुमानकी बातको सुनकर भगवान् श्रीकृष्णके चरणकमलोंकी सेवाके लिए अत्यन्त उत्सुक होकर द्वारकापुरीमें सदैव वास करनेके लिए संकल्प किया। इस विषयमें एकादश-स्कन्धमें कहा गया है, "हे कुरुकुलतिलक! देवर्षि श्रीनारद श्रीकृष्णके दर्शनके लिये लालायित होकर गोविन्दकी भुजाओं द्वारा सुरक्षित द्वारकापुरीमें वास करते थे।" इसलिए श्रीनारद आनन्दमें भरकर वार्त्तालापके बीचमें ही पुनः-पुनः उठकर हुंकारपूर्वक अत्यधिक नृत्य करने लगे। अत्यधिक आनन्दके कारण 'उत्थाय उत्थाय' शब्द दो बार उक्त हुआ है॥७९॥

पाण्डवानां हनूमांस्तु कथारसनिमग्नहृत्।
तन्नृत्यवर्द्धितानन्दः प्रस्तुतं वर्णयत्यलम्॥८०॥

श्लोकानुवाद—पाण्डवोंकी कथारसके वर्णनमें निमग्न श्रीहनुमान, श्रीनारदको नृत्य करते देख अत्यधिक आनन्द सहित स्वयं भी नृत्य करने लगे। तदनन्तर वर्णित किये जा रहे विषयको आगे कहने लगे॥८०॥

दिग्दर्शिनी टीका—ननु ईदृशे महोत्सवे श्रीनारदेन सह श्रीहनूमानपि कथं नानृत्यत्? तत्राह—पाण्डवानामिति। कथायां पाण्डवमाहात्म्याख्याने रसोऽनुरागः माधुर्यविशेषो वा। यद्वा, कथैव रसः मादकमधुर-द्रवविशेषः संसार-विस्मारणात् परमसुखप्रदत्वाच्च। तस्मिन्निमग्नं हृदयस्य सः। किञ्च, तस्य नारदस्य नृत्येन वर्धित आनन्दः कथा-विषयको हर्षो यस्य सः। अतः अलमतिशयेन प्रस्तुतं प्रकृतं येषां माहात्म्यं वर्णयति एवं कथा रसावेशेन नानृत्यदिति भावः॥८०॥

भावानुवाद—यदि आशंका हो कि ऐसे कथा-महोत्सवमें श्रीनारदके साथ श्रीहनुमानने भी नृत्य क्यों नहीं किया? इसका उत्तर देते हुए 'पाण्डवानां' इत्यादि पद कह रहे हैं। पाण्डवोंके माहात्म्यरूपी कथामें अर्थात् पाण्डवोंके कथारसमें अनुरागवशतः अथवा उनकी कथाके माधुर्यमें श्रीहनुमानका चित्त निमग्न हो गया था, इसलिए वे स्वयं नृत्य करनेमें प्रवृत्त नहीं हुए। अथवा कथारस अपने आपमें ही मादक द्रव्य है, इसलिए उस रसपानसे हुई मत्तता संसारका सब कुछ विस्मरण कराकर परमसुख प्रदान करती है। अतएव ऐसी कथारसमें जिनका चित्त निमग्न है, उन श्रीहनुमानने देवर्षि श्रीनारदके नृत्यके दर्शनसे अत्यधिक आनन्दित होकर स्वयं नृत्य नहीं किया, परन्तु अत्यधिक रूपमें पाण्डवोंके माहात्म्यको वर्णन करनेमें ही प्रवृत्त हुए। इस प्रकार कथाके आवेशमें उन्होंने नृत्य नहीं किया, ऐसा समझना चाहिए॥८०॥

श्रीहनूमानुवाच—

तेषामापद्गणा एव सत्तमाः स्युः सुसेविताः।
ये विधाय प्रभुं व्यग्रं सद्यः संगमयन्ति तैः॥८१॥

श्लोकानुवाद—श्रीहनुमानने कहा—पाण्डवोंकी विपत्तियाँ ही भली-भाँति सेवित साधुओंके समान हैं, क्योंकि जिस प्रकार साधुजनोंकी सुष्ठु सेवा श्रीकृष्णकी प्राप्ति कराती हैं, उसी प्रकार पाण्डवों पर आनेवाली विपत्तियाँ भी भगवान् श्रीकृष्णको व्यग्र बनाकर पाण्डवोंके साथ उनका अतिशीघ्र मिलन करा देती हैं॥८१॥

दिग्दर्शिनी टीका—सुसेविताः परमोपासिताः सत्तमाः साधुवराः स्युरभवन्नित्यर्थः। तत्र हेतुमाह—ये आपद्गणाः प्रभुं व्यग्रं अन्याशेष कृत्यत्याजनेन तेषां निकटागमने परमसम्भ्रान्तं कृत्वा। तेः पाण्डवैः सह; यथा महान्तो भगवत् प्राप्तिं कारयन्ति,

तथा तेषामापद्गणा अपि। सम्पदां तु महिमा केन वर्ण्यतामिति भावः। स च राजसूयादौ जरासन्धवधाभ्यागत पादाब्जेनादिना प्रसिद्ध एव। पूर्वन्तु तेषामापद्गणास्तत्वतो न सन्ति, धैर्यादि प्रकटनार्थं भगवदिच्छयैव भवन्तीत्युक्तं, इदानीञ्च लोकदृष्टया सन्तु नाम, तथापि परम सत्फलप्रदा एवेति विशेषः॥८१॥

भावानुवाद—पाण्डवोंकी विपत्तियाँ भगवान्‌को अत्यधिक व्याकुल करके अर्थात् भगवान्‌के अन्य समस्त कार्योंका त्याग कराकर उन्हें पाण्डवोंके निकट आगमनके लिए व्याकुल करके उनके साथ शीघ्र ही मिलन करा देती हैं। जिस प्रकार सुन्दर रूपमें आराधित होने पर साधु-महात्मा भगवान्‌की प्राप्ति करा देते हैं, उसी प्रकार पाण्डवोंकी विपत्तियाँ भी उन्हें श्रीकृष्णकी प्राप्ति करा देती हैं। यथार्थतः जिनकी विपत्तियाँ इतनी महान हैं, उनकी सम्पत्तिकी महिमाको कौन वर्णन कर सकता है? यह सब विषय राजसूय-यज्ञ, जरासन्ध-वध, अतिथियोंके पाद-प्रक्षालन आदि व्यवहारसे ही प्रसिद्ध है। वास्तवमें उनके ऊपर विपत्तियाँ आ ही नहीं सकती; भगवान् इन विपत्तियोंको भेजकर उनके धैर्य आदि महान गुणोंको प्रकाशित करते हैं तथा वे भी श्रीभगवान्‌की इच्छा जानकर वैसी विपदाओंको स्वीकार करते हैं। यद्यपि लोकदृष्टिमें उन्हें विपत्तियाँ ही कहा जाता है, तथापि पाण्डवोंके लिए वे परम सत्फलदायक बन जाती हैं, यही इन विपत्तियोंकी विशेषता है॥८१॥

अरे! प्रेमपराधीना विचाराचारवर्जिताः।
नियोजयथ तं दौत्ये सारथ्येऽपि मम प्रभुम्॥८२॥

श्लोकानुवाद—अरे प्रेम-पराधीन विचार-आचार रहित पाण्डवों! तुमने मेरे प्रभुको अपना दूत और सारथी बनाया है॥८२॥

दिग्दर्शिनी टीका—एवं परमानन्दभरावेशेन साक्षादिव पाण्डवानेव सम्बोध्याह—अरे इति। प्रेम्णः पराधीनास्तन्नियन्त्रिता इत्यर्थः। अवएव विचारः;—अयं भगवान् जगदीश्वरो ब्रह्मादिनियन्ता दौत्यादौ नियोजनानर्ह इत्यादि लक्षणः, आचारश्च सतां व्यवहारः, सेव्यं सेवको न नियोजयेदित्यादिलक्षणस्ताभ्यां वर्जिताः रहिताः। मम प्रभुमित्युक्तिः प्रेम विशेषाविर्भावात्॥८२॥

भावानुवाद—इस प्रकार परमानन्दके आवेशमें श्रीहनुमान (मानों पाण्डव साक्षात्‌रूपसे दिख रहे हों) पाण्डवोंको सम्बोधन करके कहने

लगे—अरे पाण्डवों! तुम प्रेमके पराधीन हो अर्थात् प्रेम द्वारा नियन्त्रित हो, प्रेम जिस प्रकार तुम्हें परिचालित कर रहा है, तुमलोग भी उसी प्रकार चल रहे हो। तुममें तनिक भी स्वाधीनता नहीं है, इसलिए तुमलोग विचार-आचारसे रहित हो। अर्थात् ये भगवान् जगदीश्वर श्रीकृष्ण ब्रह्मा आदिके भी नियन्ता हैं, अतएव दूत आदि कार्यमें लगाने योग्य नहीं हैं। इस प्रकार आचार-विचार शून्य होकर तुमलोगोंने मेरे प्रभुको दूत और सारथी आदि कार्योंमें नियुक्त कर रखा है, तुम्हारे यह सब लक्षण सदाचार रहित हैं। अथवा सदाचार कहनेका तात्पर्य है साधुओंका व्यवहार अर्थात् सेवक होकर सेव्य भगवान्को अपनी सेवामें नियुक्त नहीं करना आदि लक्षण, अतः तुम्हारा व्यवहार सदाचार रहित है। 'मेरे प्रभु'—श्रीहनुमानकी ऐसी उक्ति अत्यधिक प्रेम उदित होनेके कारण समझनी चाहिए॥८२॥

नूनं रे पाण्डवा मन्त्रमौषधं वाथ किञ्चन।
लोकोत्तरं विजानीधेव महामोहनमोहनम्॥८३॥

श्लोकानुवाद—अरे पाण्डवों! तुम निश्चय ही कोई अलौकिक मन्त्र या औषधि जानते हो जिसके प्रभावसे तुमलोगोंने परम मनोहर भगवान् श्रीकृष्णचन्द्रको भी वशीभूत कर लिया है॥८३॥

दिग्दर्शिनी टीका—ननु प्रेमवैवश्येन विचारादिहान्या ते तथा व्यवहरन्तु नाम, भगवांस्तु कथं तत् स्वीकरोतीत्याशंक्य स्वयमेवाह—नूनमिति वितर्के। महामायाधीश्वरत्वात् परममोहनस्यापि भगवतो मोहनं वशीकारकम्; अतएव लोकोत्तरं सर्वलोकातीतं लोकेषु तदसम्भवात् जानीधेव जानीथ; वस्तुतः प्रियजनप्रेमभरमोहितत्वात् तथा करोतीति सिद्धान्तश्चाग्रे द्वितीयश्लोके व्यक्तो भावी॥८३॥

भावानुवाद—यदि आपत्ति हो कि प्रेमकी विवशताके कारण विचार आदि शून्य होनेसे अथवा उचित व्यवहार आदिके न होनेसे भगवान् ही उसे क्यों स्वीकार करते हैं? इसी आशंकाके समाधानके लिए स्वयं श्रीहनुमान 'नूनं' इत्यादि पद कह रहे हैं। यहाँ पर 'नूनं' शब्द वितर्कके अर्थमें प्रयुक्त हुआ है। अरे पाण्डवों! तुमलोग निश्चय ही महामायाधीश्वर परममोहन श्रीभगवान्को भी मोहित और वशीभूत करनेवाले हो। अतएव समस्त लोकोंसे अतीत अर्थात् नृलोकमें जो

असम्भव है, तुमलोग ऐसे किसी अलौकिक मन्त्र अथवा औषधिको जानते हो। वस्तुतः श्रीभगवान् अपने प्रियभक्तोंके प्रेममें मुग्ध होकर इस प्रकारका आचरण करते हैं। ये सब सिद्धान्त आगेके (८५) श्लोकमें कहे जायेंगे॥८३॥

इत्युक्त्वा हनूमान्मातः पाण्डवेय-यशस्विनि।
उत्प्लुत्योत्प्लुत्य मुनिना मुहुर्नृत्यति वक्ति च॥८४॥

श्लोकानुवाद—श्रीपरीक्षित बोले—हे पाण्डव-पुत्र अभिमन्युकी पत्नी! यशस्विनि! मेरी मैया! ऐसा कहकर श्रीहनुमान परमानन्द-पूर्वक कूद-कूद कर श्रीनारदके साथ बार-बार नृत्य करने लगे तथा कहने लगे॥८४॥

दिग्दर्शिनी टीका—इत्येतद् भगवतो भक्तजनपराधीनत्वमुक्तवा पाण्डवेयोऽभिमन्युः तस्य यशस्विनि यशस्कारिसत्पत्नीत्यर्थः। एवं सम्बोधनेन तेषां माहात्म्यमेतत्त्वय्यपि पर्यवस्यतीति भावः। मुनिना नारदेन सह मुहुरूत्प्लुत्योत्प्लुत्य परमानन्दभरवैवश्येन प्लुतिगत्या कूर्दनेन उर्ध्वं गत्वा गत्वा मुहुर्नृत्यति मुहुर्वक्ति च॥८४॥

भावानुवाद—इस प्रकार श्रीपरीक्षित भगवान्की भक्त-पराधीनताकी बात कहकर अन्तमें सम्बोधन करके कहने लगे—हे पाण्डव-पुत्र अभिमन्युकी पत्नी! यशस्विनि (यश प्रदान करनेवाली सत्पत्नी)! मेरी मैया उत्तरे (उत्तरा)! इस प्रकारके सम्बोधनका उद्देश्य यह है कि पाण्डवोंका माहात्म्य आपमें ही पर्यवसित हो रहा है। इसके उपरान्त श्रीहनुमान परमानन्द सहित पुनः-पुनः कूद-कूद कर श्रीनारदके साथ बार-बार नृत्य करने लगे और कहने लगे॥८४॥

अहो महाप्रभो भक्तवात्सल्य-भरनिर्जित।
करोष्येवमपि स्वीयचित्ताकर्षकचेष्टित॥८५॥

श्लोकानुवाद—श्रीहनुमानने कहा—अहो! भक्तवात्सल्यसे भरकर भगवान् अपने भक्तोंके वशीभूत होकर उनके चित्तको आकर्षण करनेके लिए इस प्रकारके दूत और सारथी आदिके कार्योंको भी करते हैं॥८५॥

दिग्दर्शिनी टीका—किं वक्ति? तदाह—अहो इति विस्मये, प्रेम सम्बोधने वा। महाप्रभो, जगदीश्वरेश्वर? एवमीदृशं सारथ्यादिकमपि करोषि; सम्भवेत्तावदेतदिति सम्बोधयति। भक्तेषु यद्वात्सल्यं स्नेहविशेषस्तस्य भरेण उद्रेकेण निर्जितः परमवशीकृतः। स्वातन्त्रयाभावात् भक्तानामिच्छानुरूपमेव व्यवहरसीति भावः; तदुक्तं श्रीभगवतैव श्रीनवमस्कन्धे (श्रीमद्भा॰ ९/४/६३)—*'अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज। साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः॥'* इति। नन्वेवं निजप्रियतमेश्वरस्यास्वातन्त्रेण व्यवहारे कथं भक्तानां मनोदुःखं न स्यात्? तत्र सम्बोधयति, स्वीयानां भक्तानां चित्तमाकर्षतीति तथाभूतं चेष्टितमाचरितं यस्य, परमप्रेमानन्दभरसम्पादनात्; एवं परमवात्सल्यात् स्वीयसन्तोषणार्थं क्रियमाणं कर्म कथञ्चित् कदाचिदपि भक्तानां दुःखदं न भवति, भक्तजनप्रियत्वात्; एतदेव भक्तजनप्रिय इति वदता भगवता; तत्पुरुषसमासेन बहुव्रीहिणावाभिप्रेतम्; एवञ्च सर्वं भक्तवात्सल्यादेव करोतीति तात्पर्यम्; तदुक्तं भगवतैव पद्मपुराणे—*'मुहूर्त्तेनापि संहर्त्तुं शक्तो यद्यपि दानवान्। मद्भक्तानां विनोदार्थं करोमि विविधाः क्रियाः॥ दर्शन-ध्यान-संस्पर्शैर्मत्स्य-कूर्म-विहङ्गमाः। स्वान्यपत्यानि पुष्णन्ति तथाहमपि पद्मज॥'* इति॥८५॥

भावानुवाद—प्रभुके भक्तवात्सल्यके विषयमें और अधिक क्या कहूँ? श्रीहनुमान विस्मय या प्रेमपूर्वक सम्बोधन करते हुए कहने लगे—हे महाप्रभो! जगदीश्वर! क्या आप ऐसे सारथी आदिके कार्योंको भी करते हैं? अहो! आप भक्तवात्सलताके कारण अथवा विशेष स्नेहवशतः भक्तके अत्यन्त वशीभूत हो जाते हैं। अर्थात् भक्तोंके समक्ष आपकी स्वाधीनता नहीं रहती तथा आप भक्तोंकी इच्छाके अनुरूप ही व्यवहार करते हैं। आपने अपने श्रीमुखसे ही कहा है—"मैं भक्तोंके अधीन हूँ, अतएव एक प्रकारसे उनके पराधीन हूँ, अर्थात् भक्तोंके समक्ष मेरी स्वाधीनता नहीं रहती। भक्तगण मेरे प्रिय हैं, अतः उन्होंने मेरे हृदय पर अधिकार प्राप्त कर रखा है।"

यदि आपत्ति हो कि अपने प्रियतम ईश्वरके इस प्रकारके अस्वतन्त्र व्यवहारसे क्या भक्तोंके मनको दुःख नहीं होता? इसीलिए कहते हैं—भगवान् भक्तोंके चित्तको आकर्षण करते हैं अर्थात् वे ऐसा आचरण करते हैं, जिससे भक्तोंका चित्त आकर्षित हो जाता है। अतएव भक्तोंको परमप्रेमानन्द प्रदान करनेके लिए तथा भक्तोंके स्नेहके अधीन होकर अत्यधिक वात्सल्य सहित भगवान् द्वारा अपने सन्तोषके लिए किये गये सब प्रकारके कार्य कभी भी भक्तोंके लिए

दुःखप्रद नहीं होते। श्रीभगवान् भक्तोंके प्रिय हैं और भक्तोंकी प्रसन्नता ही उनका एकमात्र उद्देश्य है। उद्धृत श्लोकके 'भक्तजनप्रिय'-पदको तत्पुरुष समास अथवा बहुव्रीहि समास करनेसे ऐसा ही अर्थ सूचित होता है। अतएव अर्थ यह हुआ कि भगवान् जो सब लीलाएँ करते हैं, वे सभी उनके भक्तवात्सल्यके कारण ही अनुष्ठित होती हैं। पद्मपुराणमें श्रीभगवान्ने स्वयं अपने श्रीमुखसे कहा है, "मैं एक क्षणमें ही सभी दानवोंका संहार करनेमें समर्थ हूँ, तथापि भक्तोंके आनन्दवर्द्धनके लिए ही अनेक प्रकारकी क्रियाएँ (लीलाएँ) करता हूँ। मच्छली, कूर्म और पक्षी, जिस प्रकार दर्शन, ध्यान और स्पर्श द्वारा अपने-अपने बच्चोंका पोषण करते हैं, मैं भी उसी प्रकार अपने भक्तोंका पोषण करता हूँ"॥८५॥

ममापि परमं भाग्यं पार्थानां तेषु मध्यमः।
भीमसेनो मम भ्राता कनीयान् वयसा प्रियः॥८६॥

श्लोकानुवाद—हे महाभाग्यवान्! मेरा भी परम सौभाग्य है कि श्रीकुन्तीदेवीके मध्यम पुत्र भीमसेन आयुमें मेरे कनिष्ठ भ्राताके समान होने पर भी गुणोंमें मुझसे श्रेष्ठ होनेके कारण मेरे परमप्रिय हैं॥८६॥

दिग्दर्शिनी टीका—दुर्भगोऽप्यहं तेषां सम्बन्धेनाधुना महाभाग्यवान् वृत्त इत्येवं तेषामेव महामहिम-कथनाय निजभाग्यं स्तोति—ममेति। तेषु पाण्डवेषु मध्ये ये पार्थाः पृथागर्भजातास्तेषां मध्यमः अन्यथा पाण्डवानां मध्यमोऽर्जुन एव स्यादिति पार्थानामिति प्रयोगः। किञ्च, पृथा कृष्णस्य परमभक्तेति तदुदरजातत्वाद्भीमसेनस्य माहात्म्येन स्वभाग्यमहत्वमपि सूचितं स्यात् वयसैव कनीयानित्यनेन गुणादिभिर्ज्यायानित्या-भिप्रेतम्; अतएव प्रियः मदीयस्नेहातिशयविषय इत्यर्थः। एवमपि स्वभाग्यमहिमैव सूचितः॥८६॥

भावानुवाद—मैं दुर्भागा हूँ, तथापि पाण्डवोंके सम्बन्धसे अब महाभाग्यशाली हो गया हूँ, इस प्रकार पाण्डवोंकी महिमाके कथनरसमें निमग्न होकर श्रीहनुमान अपने भाग्यकी प्रशंसा कर रहे हैं। उन पाण्डवोंमें जो पृथा (कुन्ती)के गर्भजात पुत्र हैं, उनमें मध्यम भीमसेन हैं। यहाँ पर 'पृथाके गर्भजात' कहनेसे मध्यम भीमसेन ही हैं, ऐसा समझा रहे हैं अन्यथा पाण्डवोंमें मध्यम तो अर्जुन हैं। इसलिए मूल

श्लोकमें 'पार्थानां' पदका प्रयोग हुआ है। पृथा श्रीकृष्णकी परमभक्त हैं, अतएव उनके गर्भसे उत्पन्न भीमसेनके माहात्म्य द्वारा अपने भाग्यकी भी सराहना कर रहे हैं। भीमसेन आयुमें मुझसे कनिष्ठ होने पर भी गुणोंमें मुझसे श्रेष्ठ हैं, अतः मेरे परमप्रिय हैं अर्थात् मेरे अत्यधिक स्नेहके पात्र हैं। अतएव उनके साथ मेरे इस सम्बन्धको भी मैं अपना परम सौभाग्य समझता हूँ। इस प्रकार श्रीहनुमानके भाग्यकी महिमा भी सूचित हुई है॥८६॥

स्वसृदानादिसख्येन यः सम्यगनुकम्पितः।
तेन तस्यार्जुनस्यापि प्रियो मद्रूपवान् ध्वजः॥८७॥

श्लोकानुवाद—अपनी बहनका दान (विवाह) तथा सख्य व्यवहार द्वारा श्रीकृष्णने जिन पर विशेष कृपाकी है, उन अर्जुनको मेरे रूपसे युक्त रथकी ध्वजा अति प्रिय है, ऐसा जानकर मैं अपनेको अत्यन्त सौभाग्यवान् समझता हूँ॥८७॥

दिग्दर्शिनी टीका—किञ्च स्वसुः श्रीसुभद्राया दानं हरिणानुमोदनेन प्रतिपादनं तदार्दियस्य सारथ्यादिलक्षणस्य सख्यस्य तेन कृत्वा, तेन भगवता यः सम्यक् तेष्वपि वैशिष्ट्येनानुकम्पितः, तस्यापि ध्वजो मद्रूपवान मदाकारयुक्तः स च तस्य प्रियः॥८७॥

भावानुवाद—श्रीहनुमान और भी कहते हैं कि जब अर्जुनने श्रीकृष्णकी बहन सुभद्राका हरण किया था, तब श्रीकृष्णने मित्रतावशतः उस हरणका अनुमोदन किया था। इसके अलावा सारथी आदिके कार्यको करके भी अर्जुन पर परम अनुग्रह किया था। उन्हीं अर्जुनको मेरे आकारसे युक्त रथकी ध्वजा (कपिध्वज) अत्यधिक प्रिय है, इसलिए मैं अपनेको परम भाग्यशाली समझता हूँ॥८७॥

प्रभोः प्रियतमानान्तु प्रसादं परमं विना।
न सिद्ध्यति प्रिया सेवा दासानां न फलत्यपि॥८८॥

श्लोकानुवाद—भगवान्‌के प्रियतम भक्तोंकी कृपाके बिना मेरे जैसे दासोंकी सेवा सिद्ध नहीं हो सकती और न ही कोई सुफल प्रदान कर सकती है॥८८॥

दिग्दर्शिनी टीका—एवं वर्णयन् प्रेमोदयेन तत्र गन्तुमुत्कण्ठया गमनावश्यकता युक्तिमाह—प्रभोरिति चतुर्भिः। दासानां दासकर्त्तृका सेवा दास्यमित्यर्थः; सा च दासानां प्रिया अनन्यप्रियत्वात्। न सिध्यति न सम्पद्यते कृतापि न फलति च परमप्रेमसम्पदं न वहतीत्यर्थः, भगवतः प्रियजनाधीनत्वात्॥८८॥

भावानुवाद—इस प्रकार श्रीहनुमान पाण्डवोंकी महिमाका वर्णन करते-करते प्रेमके उदित होनेके कारण पाण्डवोंके राजभवनमें जानेकी उत्कण्ठासे अर्थात् वहाँ जानेकी आवश्यकताको युक्ति सहित 'प्रभोः' इत्यादि चार श्लोकोंमें कह रहे हैं। वस्तुतः दासके द्वारा की गयी सेवा ही दास्य है तथा वही सेवा एकमात्र प्रिय वस्तु है, अर्थात् एकमात्र सेवाके अलावा दासोंको अन्य कुछ भी प्रिय नहीं है। तथा भगवान्‌की सेवा करने पर भी भगवान् अपने प्रियतम दासकी कृपाके बिना किसीको भी परमफल नहीं देते हैं अर्थात् उसमें प्रेम-सम्पदका सञ्चार नहीं करते हैं, क्योंकि भगवान् अपने प्रिय भक्तोंके अधीन हैं॥८८॥

तस्माद्भागवतश्रेष्ठ प्रभुप्रियतमोचितम्।
तत्र नो गमनं तेषां दर्शनाश्रयणे तथा॥८९॥

श्लोकानुवाद—अतएव हे भागवत श्रेष्ठ! हे प्रभुके प्रियतम देवर्षि! हमारा पाण्डवोंके घर जाकर उनका दर्शन करना और उनकी शरण लेना ही कर्त्तव्य है॥८९॥

दिग्दर्शिनी टीका—हे प्रभुप्रियतम्! एवं सम्बोधनद्वयेन तस्यापि पाण्डवसादृश्योत्त्या महाभाग्यं सूचितम्; तच्च सत्सङ्गत्या गमनौत्सुक्येनेति दिक्। तत्र पाण्डवगृहे नोऽस्माकं दासानां गमनमुचितं युक्तं, न च केवलं गमनमेव तेषामनुवृत्तिरपीत्याह—तथेति उक्तसमुच्चये भगवद्दर्शितप्रकारेणेति वा। तेषां पाण्डवानां दर्शनं आश्रयणं च सेवनं वीरासनादिना; यद्वा, शरणागतेत्वनाश्रयग्रहणम् उचितम्॥८९॥

भावानुवाद—अतएव हे भागवत श्रेष्ठ! हे भगवान्‌के प्रिय देवर्षि श्रीनारद! श्रीहनुमानके इस प्रकारके सम्बोधनसे यही सूचित होता है कि श्रीनारद भी पाण्डवों जैसे महासौभाग्यशाली हैं। इस प्रकार सत्संगके लिए पाण्डवोंके राजभवनमें गमनकी उत्सुकताका कारण प्रदर्शित हुआ है। अतएव हमारे जैसे दासोंका पाण्डवोंके यहाँ जाना उचित है। केवल गमन ही क्यों, उनकी सेवा करना भी उचित है।

कैसी सेवा? जिस प्रकारसे भगवान् प्रदर्शित कर रहे हैं अर्थात् पाण्डवोंका दर्शन, आश्रय और वीरासन आदि द्वारा उनकी सेवा करना अथवा शरणागत होकर उनका आश्रय ग्रहण करना ही उचित है॥८९॥

अयोध्यायां तदानीन्तु प्रभुणाविष्कृतं न यत्।
मथुरैकप्रदेशे तद्द्वारकायां प्रदर्शितम्॥९०॥
परमैश्वर्य–माधुर्यवैचित्र्यं वृन्दशोऽधुना।
ब्रह्मारुद्रादि–दुस्तर्क्यं भक्तभक्ति विवर्द्धनम्॥९१॥

श्लोकानुवाद—प्रभुने उस समय अयोध्यामें भी श्रीब्रह्मा-रुद्रादिके लिए तर्कसे अगोचर तथा भक्तोंकी भक्तिको वर्द्धित करनेवाली जिस परम ऐश्वर्य-माधुर्य आदिकी विचित्रताको प्रकट नहीं किया, इस समय उसीको मथुरा प्रदेशके अन्तर्गत द्वारकापुरीमें प्रचुररूपसे प्रदर्शित कर रहे हैं॥९०-९१॥

दिग्दर्शिनी टीका—किञ्च परममहालाभस्तत्र भवितेति गमनोत्कण्ठाभरेणाह—अयोध्यायामिति। श्रीमथुराया एकप्रदेशः एकांशरूपा द्वारका तस्यामित्यर्थः। यथोक्तं हरिवंशे श्रीविकद्रुणा स्वजामातृविषयक-मधुदैत्यवाक्यम्—*'स्वागतं वत्स! हर्यश्व! प्रीतोऽस्मि तव दर्शनात्। यदेतन्मम राज्यं वै सर्वं मधुवनं विना॥ ददामि तव राजेन्द्र! वासश्च प्रतिगृह्यताम्। पालयैनं शुभं राष्ट्रं समुद्रानूपभूषितम्॥ गोसमृद्धं श्रिया जुष्टमाभीरप्रायमानुषम्। अत्र ते वसतस्तात! दुर्गं गिरिपुरं महत्। भविता पार्थिवावासः सुराष्ट्रविषयो महान्॥ अनुपविषयश्चैव समुद्रान्ते निरामयः। आनर्त्तं नाम ते राष्ट्रं भविष्यत्यायतं महत्॥'* इति। एवं समुद्रान्तमेव श्रीमथुराराष्ट्रं ज्ञेयम्। यच्च *'विंशतियोजनानान्तु माथुरं मम मण्डलम्।'* इति श्रीवराहेणोक्तम्; तच्च श्रीनन्दनन्दनचरणारविन्दक्रीड़ाविशेषभूमित्वेन तन्मण्डलस्य परमपावनत्वादि-गुणापेक्षयेतुह्यम्; एवं द्वारकामाहात्म्यमपि श्रीमथुरामाहात्म्य एव पर्यवस्यति, तथा द्वारकायामपि परमैश्वर्यविशेषप्रकटनं तस्या मथुरापेक्षयैवेति दिक्। अलमतिप्रसङ्गेन, प्रकृतमनुसरामः। तत्परमैश्वर्यस्य यन्माधुर्यं तस्य वैचित्र्यं बहुविधत्वम् अधुना वृन्दशः प्रकर्षेण परमकाष्ठाप्रापणादिना दर्शितं प्रकटितमित्यन्वयः। ब्रह्मादिभिर्दुःखेनापि तर्कयितुमशक्यं तैर्यत्तर्कयितुमपि न शक्यते, तदस्माभिस्तत्र गत्वैव साक्षादनुभवितव्यमिति भावः। मदिष्टतमा सेवा च विशेषतोऽधुना वृद्धिमाप्स्यतीत्याशयेनाह—भक्तेति, तदनुभवेन प्रेमभरोदयात्॥९०-९१॥

भावानुवाद—श्रीहनुमान और भी कहते हैं कि पाण्डवोंके राजभवनमें गमन करनेसे महालाभ होगा। इस प्रकार गमनकी उत्कण्ठासे

भरकर—'अयोध्यायां' इत्यादि पद कह रहे हैं। द्वारका मथुराका एक प्रदेश (एक अंश-स्वरूप) है, श्रीहरिवंशमें अपने जामाता विकद्रुके प्रति मधुदैत्यका कथन है—"आओ आओ पुत्र हर्यक्ष! तुम्हें देखकर अत्यधिक आनन्दित हुआ। हे राजेन्द्र! इस समय मैं तुम्हें मधुवनके अलावा अपना समस्त राज्य-सम्पत्ति और भवन-गृह आदि अर्पण करता हूँ। तुम इसे ग्रहण करके समुद्रसे भूषित विशाल राज्य अर्थात् गो-सम्पत्तिसे समृद्ध तथा नाना प्रकारकी सम्पदओंसे युक्त आभीर प्रायः मनुष्योंसे परिपूर्ण विशाल राज्यका उपभोग करो। हे तात! तुम सुदृढ़ दुर्गसे घिरे हुए इस गिरिपुरमें आवास स्थान बनाकर राजोचित सांसारिक विषयोंका उपभोग करो। यह महान सुराष्ट्र अनुपम विषय-वैभवसे परिपूर्ण है तथा समुद्र तक विस्तृत होने पर भी उपद्रवोंसे रहित अर्थात् शान्त है। विपुल क्षेत्रसे युक्त यह आनर्त्तदेश तुम्हारा राज्य होगा।" इत्यादि—इन वचनोंसे मथुरा राज्यका समुद्र तक विस्तार प्रमाणित होता है। श्रीवराहपुराणमें भी कहा गया है—"बीस योजनात्मक (अस्सी क्रोश विस्तृत) मेरा श्रीमथुरामण्डल है।" परन्तु यह मथुरामण्डल श्रीनन्दनन्दनके श्रीचरणकमलोंकी अनेक लीलाओंसे विभूषित है और परम पावन गुणोंसे युक्त है। इसीलिए उसका वृत्तान्त यहाँ पर अधिक विस्तारपूर्वक वर्णन नहीं किया गया। तात्पर्य यह है कि इस प्रकार द्वारका-माहात्म्य भी मथुरा-माहात्म्यमें ही पर्यवसित हो रहा है तथा द्वारकाका परम-ऐश्वर्य भी मथुराके ऐश्वर्य पर निर्भर करता है। यही इस विचारका दिग्दर्शन है।

अब प्रस्तावित विषयका वर्णन किया जा रहा है। भगवान् श्रीरामचन्द्रने त्रेतायुगमें अयोध्यापुरीमें भी जिस परम ऐश्वर्य-माधुर्यसे पूर्ण विचित्रताओंको प्रकटित नहीं किया, अब उसे मथुरा राज्यके अन्तर्गत द्वारकापुरीमें चरम सीमा तक प्रदर्शन कर रहे हैं। प्रभुकी वैसी महिमा ब्रह्मा और रुद्र आदिके लिए भी तर्कातीत है, अर्थात् ब्रह्मा आदि देवगण भी बहुत तर्क करके भी इसकी मीमांसा करनेमें समर्थ नहीं हैं। किन्तु वही ऐश्वर्य-माधुर्यकी विचित्रताएँ भक्तोंकी भक्तिका वर्धन करती हैं, इसलिए द्वारकापुरीमें जाकर साक्षात्रूपमें इसे अनुभव करना ही हमारा कर्त्तव्य है। विशेषतः वहाँ गमन द्वारा हमारे

द्वारा साक्षात् अभीष्ट सेवा करनी भी हो जायगी। श्रीहनुमानकी वह सम्पद् अब अति उत्कृष्ट विविध प्रकारकी ऐश्वर्य–माधुर्य लीलाओंके द्वारा परिसेवित होनेसे अत्यधिक वृद्धि प्राप्त हो रही है। अतएव वहाँ जानेसे अभिलषित सेवाकी प्राप्ति होगी। इसी अभिप्रायसे कह रहे हैं कि उस सम्पद्राशिका अनुभव प्रेमका उदय करानेवाला है तथा भक्तोंकी भक्तिको बढ़ाने वाला है॥९०–९१॥

श्रीनारद उवाच—

आः किमुक्तमयोध्यायामिति वैकुण्ठतोऽपि न।
उत्तिष्ठोत्तिष्ठ तत्तत्र गच्छावः सत्वरं सखे॥९२॥

श्लोकानुवाद—श्रीनारदने कहा—अहो! सखे! अयोध्याका तो कहना ही क्या, वैसा ऐश्वर्य और माधुर्य वैकुण्ठमें कहीं भी नहीं है। अतएव उठो–उठो शीघ्र ही पाण्डवोंके घर पर चलें॥९२॥

दिग्दर्शिनी टीका—आ इत्यव्ययं परमखेदे। यत्परमैश्वर्यमाधुर्य–वैचित्र्यमयोध्यायां नाविष्कृतमिति किमुक्तं त्वया? वैकुण्ठेऽपि नाविष्कृतमस्तीत्यर्थः। तत्तस्मात् उत्तिष्ठोत्तिष्ठेति परमाग्रहे वीप्सा; तत्र द्वारकायां पाण्डवराजधान्यां वा॥९२॥

भावानुवाद—अत्यधिक खेदके लिए 'आः' (अहो) अव्ययका प्रयोग किया गया है। अहो! सखे, अयोध्याकी बात क्या कह रहे हो? अर्थात् ऐसे परम ऐश्वर्य और माधुर्यकी विचित्रताएँ अयोध्यामें तो क्या, यहाँ तक कि वैकुण्ठमें कहीं भी प्रकटित नहीं है। अतएव उठो, शीघ्र ही पाण्डवोंके घर अर्थात् द्वारकामें अथवा पाण्डवोंकी राजधानी हस्तिनापुरमें चलें। परम आग्रहके कारण 'उठो उठो' दो बार कहा गया है॥९२॥

श्रीपरीक्षिदुवाच—

अथ क्षणं निशश्वास हनूमान् धैर्यसागरः।
जगाद नारदं नत्वा क्षणं हृदि विमृश्य सः॥९३॥

श्लोकानुवाद—श्रीपरीक्षित महाराजने कहा—यह सुनकर धैर्यके सागर श्रीहनुमानने दीर्घ निःश्वास छोड़ा तथा थोड़ी देर तक मनमें चिन्ता करके श्रीनारदको कहने लगे॥९३॥

दिग्दर्शिनी टीका—निशश्वास नितरां श्वासं जहौ। निजैकपातिव्रत्य चिन्तादुःखेन धैर्यसागर इति। तादृश्यां दिदृक्षायां जातायामपि तथा तादृश्यां नारद प्रेरणायामपि गमनार्थानुत्थानात् निजैकपातिव्रत्यभङ्गादि-विचारणाच्च। नत्वेति, तद्वाक्याद्यनादरापराध-क्षमापनार्थं ज्ञेयम्॥९३॥

भावानुवाद—श्रीनारदकी बात सुनकर श्रीहनुमानने दीर्घ निःश्वासका त्याग किया। यद्यपि वे धैर्यके सागर हैं, तथापि थोड़ी देर तक उन्होंने मनमें विचार किया। अर्थात् वैसी प्रेम सम्पत्तिके दर्शनकी इच्छा जागृत होने पर भी तथा श्रीनारद द्वारा वैसी प्रेरणा दिये जाने पर भी श्रीहनुमान एकपतिव्रत-धर्म (श्रीरामचन्द्रजीके प्रति एकान्तिकता) भंग होनेकी चिन्तासे जानेके लिए चेष्टारहित हो गये अर्थात् धैर्यकी मूर्त्ति होनेके कारण वे पाण्डवोंके घर चलनेके लिए नहीं उठे। किन्तु 'नत्वा' अर्थात् श्रीनारदके वचनोंके अनादरसे उत्पन्न अपराधको क्षमा करानेके लिए उनको प्रणामकर कहने लगे॥९३॥

श्रीहनूमानुवाच—

श्रीमन्महाप्रभोस्तस्य प्रेष्ठानामपि सर्वथा।
तत्र दर्शनसेवार्थं प्रयाणं युक्तमेव नः॥९४॥

श्लोकानुवाद—श्रीहनुमानने कहा—श्रीकृष्णके प्रियतम भक्त पाण्डवोंके दर्शन और सेवाके लिए हमारा वहाँ जाना ही उचित है॥९४॥

दिग्दर्शिनी टीका—दर्शनञ्च सेवा च परिचर्या तयोर्निमित्तम्। यद्वा, दर्शनमेव सेवा परमोपासनं तदर्थं नोऽस्माकं तत्र प्रयाणं सर्वथा युक्तमेव॥९४॥

भावानुवाद—पाण्डवोंके दर्शन और सेवाके लिए अथवा दर्शनरूप परम उपासनाके लिए हमारा वहाँ जाना ही सब प्रकारसे युक्तियुक्त है॥९४॥

किन्तु तेनाधुनाऽजस्रं महाकारुण्यमाधुरी।
यथा प्रकाश्यमानास्ते गम्भीरा पूर्वतोऽधिका॥९५॥
विचित्रलीलाभङ्गी च तथा परममोहिनी।
मुनीनामप्यभिज्ञानां यया स्यात् परमो भ्रमः॥९६॥

श्लोकानुवाद—किन्तु श्रीकृष्ण इस समय पहलेसे भी कहीं अधिक गम्भीर महाकारुण्यमयी माधुरीको प्रकटित कर रहे हैं। विशेषकर उनकी विचित्र लीलाभंगी अत्यधिक मोहजनक है। इन लीलाओंका दर्शन करके अभिज्ञ मुनियोंको भी अत्यधिक भ्रम हो जाता है॥९५–९६॥

दिग्दर्शिनी टीका—किन्तु तेन महाप्रभुणा यथा यादृशी महाकारुण्य-माधुर्यधुनाजस्रं प्रकाश्यमानास्ते, तथा परममोहिनी विचित्राणां विविधानां लीलानां भङ्गी च परम्परापि प्रकाश्यमानास्ते। तत्तस्मात्तस्या या लीलाभङ्ग्या हेतोर्यः अपराधस्तस्माद्विशङ्के इति चतुर्णामन्वयः। यदि कदाचित्तदीयतत्तल्लीला-दर्शनादन्येषामिव ममापि भ्रमादिकं स्यात्तदापराधः स्यात्तस्माच्चाहं विशेषेण शङ्कां प्राप्नोमीत्यर्थः। गम्भीरा अनवगाह्या अनवच्छिन्ना वा। पूर्वत इति श्रीरघुनाथादिरूपेण प्रकाशिताया अपि सकाशादधिकेत्यर्थः। परममोहिनीत्वमाह—मुनीनामिति सार्धेन। यया लीलाभङ्ग्या; भ्रमः अयम्-अवतारोऽवतारीत्यादि-भ्रान्तिः स्यात्॥९५–९६॥

भावानुवाद—किन्तु श्रीभगवान् इस समय पहलेसे भी अधिक गम्भीर महाकारुण्य माधुरीको निरन्तर प्रकाश कर रहे हैं, तथा मनमोहक विचित्र लीलाभङ्गी श्रेणीको भी प्रकाशित कर रहे हैं। श्रीभगवान्की वह लीलाएँ मोहजनक है, अर्थात् वैसी लीलाभङ्गीके कारण अपराधकी आशंका कर उसे चार श्लोकोंमें कह रहे हैं। यदि कभी उनकी लीला दर्शन करके दूसरोंकी भाँति मुझे भी भ्रम हो गया, तब तो अपराध हो जायेगा। इसीलिए मुझे विशेषरूपमें शंका हो रही है। 'गम्भीर' अर्थात् वे लीलाएँ अत्यन्य गम्भीर, अथाह और सीमा रहित हैं। 'पूर्वतः' कहनेसे श्रीरामचन्द्र आदि रूपमें प्रकाशित लीलाओंकी तुलनामें अधिक गम्भीर हैं। परम मोहिनी अर्थात् इन सब लीलाओंका दर्शन करके अभिज्ञ मुनि भी अत्यधिक भ्रमित हो जाते हैं। यहाँ 'भ्रम' कहनेसे 'ये अवतार हैं अथवा अवतारी' इत्यादि भ्रान्तिमूलक तर्क उपस्थित होते हैं॥९५–९६॥

अहो भवादृशां तातो यतो लोकपितामहः।
वेदप्रवर्त्तकाचार्यो मोहं ब्रह्माप्यविन्दत॥९७॥

श्लोकानुवाद—अहो! आप जैसे ऋषिके पिता, समस्त लोकोंके पितामह, वेदप्रवर्त्तक आचार्य स्वयं श्रीब्रह्मा भी भगवान्‌की उन लीलाओंके दर्शनसे मोहित हो गये थे॥९७॥

दिग्दर्शिनी टीका—अहो विस्मये; यतो लीलाभङ्गीतः; वेदप्रवर्त्तकानां व्यासादीनां मन्वादीनां वा; गुरुरुपदेष्टा; एतादृशोऽप्यमुह्यदित्यर्थः वत्सबालहरण-प्रसङ्गे परम-आश्चर्यावलीदर्शनेन ज्ञानक्रियाशक्त्यपगमात्॥९७॥

भावानुवाद—अहो! (विस्मय) जिनकी लीलाभंगिमासे वेदके प्रवर्त्तक व्यास और मनु आदिके गुरु (उपदेष्टा) अर्थात् ऐसे ज्ञानियोंके आचार्य स्वयं श्रीब्रह्मा भी वत्स-बालकहरण प्रसंगमें भगवान्‌की परम आश्चर्यमयी लीलाओंके दर्शनसे ज्ञान और क्रियाशक्तिका लोप होनेके कारण मोहित हो गये थे॥९७॥

वानराणामबुद्धीनां मादृशां तत्र का कथा।
वेत्सि त्वमपि तद्वृत्तं तद्विशङ्केऽपराधतः॥९८॥

श्लोकानुवाद—मेरे जैसे निर्बोध बन्दरका तो कहना ही क्या? इन लीलाओंकी मोहनशक्तिसे आप भी भलीभाँति अवगत हैं, इसलिए मैं अपराधके भयसे भयभीत हो रहा हूँ॥९८॥

दिग्दर्शिनी टीका—तत्र तस्यां मादृशां का कथा, वयन्तु मनाग्दर्शनमात्रेणैव मोहं प्राप्स्याम इत्यर्थः। ननु ज्ञानपरा मुनयो भ्रान्ता भवन्तु नाम? महाधिकारसम्बन्धेन ब्रह्मापि मुह्यतु, भक्तानान्तु तया मोहनं कथं सम्भवेदित्याशङ्क्य परमभागवतोत्तमो भवानपि मोहितोऽस्तीत्याशयेनाह—वेत्सीति। तस्या लीलाभङ्ग्या वृत्तम्, द्वारकायां प्रतिमहिषीगृह भ्रमणात्॥९८॥

भावानुवाद—अतएव मेरे जैसे निर्बोध बन्दरका उस विषयमें कहना ही क्या? अर्थात् उस लीलाके दर्शन मात्रसे ही मैं मोहग्रस्त हो जाऊँगा। यदि कहो कि ज्ञान परायण मुनि तो भ्रमित हो सकते हैं, और अधिकार प्राप्त ब्रह्मा भी मोहित हो सकते हैं, किन्तु भगवान्‌की लीलाओंसे भक्तोंमें मोह उत्पन्न होनेकी सम्भावना कैसे हो सकती है? इसी आशंकासे कह रहे हैं, परम भागवतोत्तम आप (श्रीनारद) भी तो उनकी लीलाभंगिमासे मोहित हो गये थे। अतएव उन लीलाओंकी

मोहनशक्तिसे आप भी भलीभाँति अवगत हैं, क्योंकि आप द्वारकामें प्रत्येक महिषीके भवनमें इधर–उधर चक्कर काटने लगे थे॥९८॥

आस्तां वानन्यभावानां दासानां परमा गतिः।
प्रभोर्विचित्रा लीलैव प्रेमभक्ति विवर्द्धिनी॥९९॥

श्लोकानुवाद—हमारा पाण्डवोंके घर जाना अवश्य कर्त्तव्य है, इस विषयमें अधिक कहनेकी आवश्यकता नहीं है। विशेषतः अनन्यभावसे भजन करनेवाले दासोंके लिए भगवान्‌की वैसी लीलाएँ परम गति हैं, क्योंकि वे प्रेमभक्तिको वर्धित करनेवाली हैं॥९९॥

दिग्दर्शिनी टीका—ननु तर्हि परमसेव्यस्य भगवतो दर्शनं तदेकापेक्षकैः सेवकैः किं न कर्त्तव्यमेवेत्याशंक्य तत्स्वीकृत्यापि तत्र निजप्रयाणमन्यथा परिहरति आस्तामिति षड्भिः। न विद्यतेऽन्यस्मिन् प्रभोस्तद्दर्शनाद्वा तदीयविचित्रलीलानुभवाद्वा इतरत्र भावो येषाम् तेषाम्। गतिः सर्वापत्सु शरणम्; न च केवलं गतिरेवेत्याह, प्रेम्णा भक्तिः सेवा तस्या विशेषेण वृद्धिकारिणी च॥९९॥

भावानुवाद—यदि कहो कि परमसेव्य भगवान्‌का दर्शन करना क्या उनके एकान्त सेवकोंके लिए कर्त्तव्य नहीं है? इस आशंकाको दूर करनेके लिए ही उसको स्वीकार करके भी श्रीहनुमान अपने द्वारका न जानेका कारण 'आस्तां' इत्यादि छह श्लोकोंमें बतला रहे हैं। हमारा पाण्डवोंके घर जाना अवश्य ही कर्त्तव्य है, इस विषयमें अधिक क्या कहूँ? विशेषकर भगवान्‌का दर्शन और उनकी विचित्र लीलाओंके अनुभवके अलावा अन्य कोई भाव या अभिलाषा जिनमें नहीं है, ऐसे एकान्त दासोंके लिए भगवान्‌की विचित्र लीलाएँ ही परम गति हैं। यहाँ पर 'गति'का तात्पर्य है—सभी प्रकारकी विपत्तियोंमें आश्रय-स्थल हैं। ये लीलाएँ केवल परम गति ही है, ऐसा ही नहीं, बल्कि ऐसी लीलाएँ तो दासोंकी प्रेमभक्तिको वर्धित करनेवाली हैं। अर्थात् भगवान्‌की ऐसी लीलाएँ ही विशेषरूपसे प्रेमभक्तिकी वृद्धि करती हैं॥९९॥

अथापि सहजाव्याजकरुणाकोमलात्मनि।
अवक्रभावप्रकृतावार्यधर्मप्रदर्शके ॥१००॥

एकपत्नीव्रतधरे सदा विनयवृद्धया।
लज्जयावनतश्रीमद्वदनेऽधोविलोकने ॥१०१॥
जगद्रञ्जनीशीलाढ्येऽयोध्यापुर पुरन्दरे।
महाराजाधिराजे श्रीसीतालक्ष्मणसेविते ॥१०२॥
भरतज्यायसि प्रेष्ठ सुग्रीवे वानरेश्वरे।
विभीषणाश्रिते चापपाणौ दशरथात्मजे ॥१०३॥
कौशल्यानन्दने श्रीमद्रघुनाथस्वरूपिणि।
स्वस्मिन्नात्यन्तिकी प्रीतिर्मम तेनैव वर्द्धिता ॥१०४॥

श्लोकानुवाद—तथापि श्रीदेवकीनन्दनके अभिन्नस्वरूप कौशल्यानन्दन श्रीरामचन्द्रके स्वरूपमें ही मेरी परम प्रीति है तथा उन्हीं श्रीदेवकीनन्दनने अपने अभिन्न स्वरूप श्रीरघुनाथके श्रीचरणकमलोंमें मेरी भक्तिको वर्धित किया है। अतएव जो अपने स्वभाव द्वारा ही निरुपाधिक करुणावशतः कोमलचित्त, सरल, आर्यधर्म-प्रदर्शक, एकपत्नी-व्रतधारी, विनययुक्त लज्जा द्वारा सदैव ही अपने मुखमण्डलको झुकाये रहनेवाले, सदैव नीची दृष्टि रखनेवाले, जगतके लोगोंका रञ्जन करनेवाले, अयोध्यापुरीके पुरन्दर, महाराजाधिराज, श्रीसीता-लक्ष्मण द्वारा सेवित, श्रीभरतके ज्येष्ठ भ्राता, वानरोंके राजा सुग्रीवसे प्रीतियुक्त, मेरे जैसे वानरोंके ईश्वर, विभीषणके आश्रय, धनुष धारण करनेवाले, दशरथ-कौशल्या-नन्दन उन श्रीरघुपतिरूपमें ही मेरी परम प्रीति है॥१००-१०४॥

दिग्दर्शिनी टीका—यद्यप्येवं सर्वथा तत्रागमनं युक्तमेव अथापि तथापि श्रीमत्परमशोभायुक्तं यद्रघुनाथस्य स्वरूपं श्रीरामचन्द्रत्वं तद्वति स्वस्मिन्नेव तेनैव महाप्रभुणा श्रीदेवकीनन्दनेन ममात्यन्तिकी परमनिष्ठा प्राप्ता प्रीतिर्भावविशेषो वर्द्धितास्तीत्यन्वयः। तमेवासाधारणविशेषणैः सप्तदशभिरात्मसहजप्रीत्यनुसारेण विशिनष्टि—सहजेति। सहजा स्वाभाविकी या अव्याजा निर्व्यलीका करुणा तया कोमल आत्मा चित्तं स्वभावो वा यस्य। न विद्यते वक्रभावो वक्रता कौटिल्यं यस्यां तथाभूता प्रकृतिः स्वभावो यस्य। आर्याः पूज्यतमाः आप्तास्तेषां धर्म आचारस्तस्य प्रकर्षेण दर्शके स्वयमाचरण द्वारा प्रवर्त्तके। विनयेन वृद्धया वृद्धिं प्राप्तया लज्जया अवनतं अतएव श्रीमत्परमसुन्दरं वदनं यस्य; अतोऽध एव न इतस्ततोऽवलोकनं दृष्टिर्यस्य। जगद्रञ्जयतीति तथाभूतं यत् शीलं स्वभावो वृत्तं वा

तेन आढ्ये युक्ते। प्रेष्ठः सख्येन परमप्रियः सुग्रीवो यस्य। वानराणां मादृशानामीश्वरे विभीषणेन शरणतया आश्रिते॥१००–१०४॥

भावानुवाद—यद्यपि हमारा पाण्डवोंके घर जाना अवश्य कर्त्तव्य है, तथापि श्रीदेवकीनन्दनसे अभिन्न परमशोभायुक्त श्रीरामचन्द्र स्वरूपमें ही मेरी सम्पूर्ण परम निष्ठापूर्ण प्रीति भी है तथा वह प्रीति उन्हीं श्रीदेवकीनन्दन द्वारा ही वर्धित हुई है। इसलिए श्रीहनुमान अपनी स्वाभाविक प्रीतिके अनुसार 'सहज इत्यादि' सप्तदश (सत्रह) असाधारण विशेषणोंके द्वारा श्रीरामचन्द्रजीकी विशेषताओंका वर्णन कर रहे हैं। सहजा—स्वाभाविक, निष्कपट करुणा द्वारा कोमल चित्त होनेके कारण श्रीरामचन्द्र कुटिलिता–रहित अथवा सरल–सहज स्वभावसे युक्त हैं। आर्य अर्थात् परम पूजनीय तथा स्वयं अपने आचरणके द्वारा वे आर्य धर्मके प्रवर्त्तक हैं। अत्यधिक विनयके कारण लज्जासे सदा झुके हुए परमसुन्दर मुखमण्डलवाले हैं, उनकी दृष्टि इधर–उधर न देखकर सदैव नीचेकी ओर रहती है, जो जगत अर्थात् समस्त प्राणियोंका रञ्जन (प्रसन्न) करनेवाले स्वभावसे युक्त हैं, सुग्रीव जिनके परमप्रिय सखा हैं, जो मेरे जैसे वानरोंके ईश्वर तथा विभीषणके आश्रय हैं, उन श्रीरघुनाथमें ही मेरी परम प्रीति है॥१००–१०४॥

तस्मादस्य वसाम्यत्र तादृग्रूपमिदं सदा।
पश्यन् साक्षात् स एवेति पिबंस्तच्चरितामृतम्॥१०५॥

श्लोकानुवाद—श्रीदेवकीनन्दनके उसी श्रीरामचन्द्र स्वरूपमें ही मेरी परमप्रीति वर्धित हो रही है। अतएव अपने सामने स्थित इसी श्रीविग्रहको ही मैं साक्षात् श्रीरामचन्द्रके रूपमें देखता हूँ तथा इन्हींका चरितामृत पान करके इस किम्पुरुषवर्षमें निवास करता हूँ॥१०५॥

दिग्दर्शिनी टीका—तस्मात्तद्विषयक प्रीतिवर्धनाद्धेतोः अस्य श्रीदेवकीनन्दनस्य तादृग् उक्तलक्षणमिदं साक्षाद्वर्त्तमानं रूपं श्रीमूर्त्तिम्। साक्षाद्भूतः स श्रीरघुनाथ एवेति पश्यन् जानन् अवलोकयन् वा। तस्य चरितमेवामृतं आर्ष्टिषेनादिद्वारा पिबंश्च अत्र किम्पुरुषवर्षे वसामि। एवं मम कुत्रापि स्वातन्त्र्यं नास्ति मदिच्छया च किमपि न सिध्यतीति भावः॥१०५॥

भावानुवाद—अतएव श्रीरामचन्द्रके प्रति मेरी प्रीति वर्द्धन होनेके कारण श्रीदेवकीनन्दनसे अभिन्न श्रीरामचन्द्रजीके लक्षणोंसे युक्त मेरे सामने स्थित इस श्रीविग्रहको ही मैं साक्षात् श्रीरामचन्द्रके रूपमें देखता हूँ और आर्ष्टिसेन आदि द्वारा गाये जानेवाले उनके चरितामृतके रससे परिपुष्ट होकर इस किम्पुरुषवर्षमें वास कर रहा हूँ। अतएव मैं स्वतन्त्र नहीं हूँ, तथा मेरी स्वतन्त्र इच्छा होनेसे भी कोई लाभ नहीं होगा॥१०५॥

यदा च मां कमप्यर्थमुद्दिश्य प्रभुराह्वयेत्।
महानुकम्पया किञ्चिद्दातुं सेवासुखं परम्॥१०६॥

श्लोकानुवाद—किन्तु यदि कभी विशेष कृपापूर्वक प्रभु आवश्यकता वशतः किञ्चित् सेवासुख प्रदान करनेके लिए मुझे बुलायेंगे—॥१०६॥

दिग्दर्शिनी टीका—अतो भगवदिच्छयैव तत्र मे गमनं भवतीत्याह—यदेति सपादद्वयेन। कमप्यर्थं प्रयोजनमुद्दिश्य भारतयुद्धादौ कौरवसैन्यभयोत्पादनादि-निमित्तं परमन्यद्वा किञ्चित् सेवासुखं दातुं परमानुग्रहेण प्रभुः श्रीकृष्णदेव आह्वयेत्। तदा तत्र द्वारकायां हस्तिनापुरे वा यत्र स्थित आह्वयेत्तत्रैव आशु भवेयं सद्य एव गन्तास्मीत्युत्तरेणान्वयः। यद्वा, ननु तत् सेवैव तत्परमप्रिया किमन्यप्रयोजनेन ते तत्राह—किञ्चिदिति। परं श्रेष्ठम्; तदादिष्टार्थ-सम्पादनमेव मम परम सेवा-सुखमित्यर्थः॥१०६॥

भावानुवाद—अतएव भगवान्की इच्छा होने पर मैं पाण्डवोंके घर जा सकता हूँ; वह भी तब, जब प्रभु श्रीकृष्ण अपने किसी कार्यवशतः मुझे बुलायेंगे। जैसे महाभारत युद्धके समय कौरवोंकी सेनाको भयभीत करनेके लिए अथवा मेरे प्रति अनुग्रह प्रकाश करनेके लिए अर्थात् किञ्चित् सेवासुख प्रदान करनेके लिए यदि वे मुझे बुलायेंगे, तो मैं तत्क्षणात् उनके श्रीचरणकमलोंमें उपस्थित हो जाऊँगा। उस समय वे द्वारकामें हों अथवा हस्तिनापुर या किसी भी स्थान पर ही क्यों न हों। अथवा यदि कहो कि उनकी सेवा जब तुम्हें अत्यन्त प्रिय है, तब प्रभुको और दूसरी क्या आवश्यकता हो सकती है? इसके लिए कह रहे हैं कि प्रभुके द्वारा आदेश किये हुए कार्यको पूर्ण करनेमें ही मेरा परमसुख है॥१०६॥

किं वा मद्विषयकस्नेहप्रेरितः प्राणतो मम।
रूपं प्रियतमं यत्तत् सन्दर्शयितुमीश्वरः ॥१०७॥

श्लोकानुवाद—अथवा मेरे प्रति स्नेह द्वारा प्रेरित होकर (श्रीभगवान् द्वारा) मेरे प्राणोंसे भी अधिक प्रियतम श्रीरामचन्द्र रूपके दर्शनोंके लिए मुझे बुलाते ही— ॥१०७॥

दिग्दर्शिनी टीका—नन्वत्रापि तत् सम्पद्यमानमस्तीत्याशंक्य स्वयमेव पक्षान्तरमाह— किं वेति। अहं विषयः पात्रं यस्य तेन स्नेहेन वात्सल्येन प्रेरितः सन् मम प्राणतो जीवनादपि प्रियतमं यद्रूपं श्रीरघुनाथस्वरूपं तत्। यत्तदिति। परमानिर्वचनीयमिति वा सम्यक् तत्तल्लीलामाधुर्यादि प्रकाशनपूर्वकं दर्शयितुमाह्वयेत्। अत्र च तत्तन्मधुर-वचनचातुरी लीलाचरित माधुरीविशेषस्य सदा साक्षादनुभवो न स्यादिति भावः। तत्र कथं तत् सिध्येत? तत्राह—ईश्वरः सर्वं कर्त्तुं समर्थः; यद्वा, साक्षाद्भगवान् अवतारित्वात्। अत्र च प्रसिद्धेयमाख्यायिकाऽनुसन्धेया। एकदा श्रीगरुड़ादेर्गर्वभञ्जन-कौतुकाय निजपादपद्मभक्तिविषयैकान्त्य-विशेषप्रदर्शनाय द्वारकायां श्रीभगवान् गरुड़-मादिदेश,—'मदाज्ञां श्रावयित्वा किम्पुरुष-वर्षान्मत्पार्श्वं हनूमन्तमानय।' इति। स तत्र गत्वा तमब्रवीत्—'भो हनूमन्! भगवान् श्रीयादवेन्द्रस्त्वामाह्वयति सत्त्वरमागच्छ।' इति। स च श्रीरघुनाथचरणारविन्दैक-भक्तिनिष्ठ-स्तदेकरतस्तद्वचनमनाद्रियमाणः क्रुद्धेन गरुत्मता बलात् भगवत्पार्श्वमानेतुं गृहीतः सन् लाङ्गुलाग्रेण हेलयामुं चिक्षेप। स च सद्यो द्वारकायां निपतितो विह्वलो दृष्टवा भगवता विहस्योक्तः—भो गरुड़! श्रीरघुनाथस्त्वामाह्वयतीति तं गत्वा वदेति। स्वयञ्च भगवान् श्रीरामचन्द्रस्वरूपो भूत्वा श्रीबलरामं लक्ष्मणं विधाय सीतारूपं कर्तुमशक्तां सत्यभामामपि विहस्य श्रीरुक्मिणीं धृतसीतारूपां निज वामपार्श्वे निधाय द्वारकायामासीत्। गरुड़श्च पुनर्गत्वा तथैव तमुवाच। तच्छ्रुत्वा च स हनूमान् सद्यः परमानन्दविवशः सन् धावन् समागतस्तथैव भगवन्तं ददर्श, भक्त्या तुष्टाव च। अथ परमप्रीताद्भगवतो निजाभीष्टान् वरानपि प्रापेति॥१०७॥

भावानुवाद—आप तो यहीं पर रहकर वह सब सेवासुख उपभोग कर रहे हैं, कहीं दूसरी जगह जानेकी आवश्यकता क्या है? ऐसे प्रश्नकी आशंका करके श्रीहनुमान स्वयं ही पक्षान्तरमें सिद्धान्त कर रहे हैं। श्रीकृष्ण द्वारा मेरे प्रति वात्सल्यपूर्वक प्रेरित होकर, मेरे प्राणोंसे भी अधिक प्रियतम उस परम अनिर्वचनीय श्रीरघुनाथ-स्वरूपके लीला-माधुर्य आदिको प्रकाश करके उसके दर्शनके लिए मुझे बुलाने पर, मैं उसी समय प्रभुको सेवासुख प्रदान करनेके लिए उनके

श्रीचरणकमलोंमें उपस्थित होऊँगा। कारण, यहाँ किम्पुरुषवर्ष पर प्रभुकी मधुर वचनचातुरी और लीलाचरित्रकी विशेष माधुरी सदैव साक्षात् रूपमें अनुभूत नहीं होती है।

यदि कहो कि वहाँ द्वारकामें भी वह लीलामाधुरी किस प्रकारसे अनुभूत होगी? इसके उत्तरमें कह रहे हैं कि श्रीदेवकीनन्दन स्वयं ईश्वर होनेके कारण सब कुछ कर सकते हैं। अथवा वे स्वयं अवतारी साक्षात् भगवान् हैं, अतएव वे श्रीरामचन्द्र-स्वरूपको दिखानेमें समर्थ हैं। इस विषयमें प्रसिद्ध उपाख्यान है—एक समय द्वारकापुरीमें गरुड़का गर्व भंगरूप लीलाके लिए तथा श्रीहनुमानके हृदयमें अपने चरणकमलोंमें भक्तिकी ऐकान्तिकता स्थापित करनेके लिए श्रीभगवान्ने गरुड़को आदेश दिया, 'गरुड़! तुम किम्पुरुषवर्षमें जाकर हनुमानको मेरी आज्ञा सुनाकर मेरे पास ले आओ।' तदुपरान्त गरुड़ने किम्पुरुषवर्षमें जाकर श्रीहनुमानको कहा—'हे श्रीहनुमान! आपको भगवान् श्रीयादवेन्द्रने बुलाया है, शीघ्रतासे वहाँ पर चलें।' श्रीहनुमान श्रीरघुनाथजीके चरणकमलोंमें एकनिष्ठ भक्तिमान हैं और उन्हींकी सेवामें सर्वदा निमग्न रहते हैं, अतएव पतिव्रतधर्मके भंग होनेके भयसे उन्होंने गरुड़के वचनोंका आदर नहीं किया। इससे गरुड़ क्रोधित होकर उनको बलपूर्वक भगवान्के पास ले जानेके लिए पकड़ने लगे, तो श्रीहनुमानने अपनी पूँछके अग्रभाग द्वारा अनायास ही उनको दूर फेंक दिया। इस प्रकार गरुड़ सुदूर द्वारकापुरीमें आ गिरे। उनको विह्वल देखकर श्रीभगवान्ने मुस्कराते हुए कहा, 'हे गरुड़! तुम पुनः हनुमानके पास जाकर कहो कि श्रीरघुनाथजीने तुम्हें बुलाया है।' तदनन्तर श्रीकृष्ण स्वयं श्रीरामचन्द्र बन गये, श्रीबलरामजी लक्ष्मण हो गये, श्रीसत्यभामाको सीता होनेके लिए कहा गया, किन्तु वे सीतारूप धारण करनेमें समर्थ नहीं हुईं, इसलिए भगवान्ने उनका उपहास कर श्रीरुक्मिणीदेवीको श्रीसीताजीका रूप धारण करनेके लिए कहा। श्रीरुक्मिणीदेवीके श्रीसीतारूप धारण करने पर भगवान् अपने बाँयी ओरमें उनको बैठाकर द्वारकाके सिंहासन पर विराजमान हुए। दूसरी ओर गरुड़ने पुनः श्रीहनुमानके पास जाकर उनको भगवान्के वचन सुनाये। श्रीहनुमान अपने प्रभु श्रीरघुनाथजीका आदेशमात्र सुनते ही

परमानन्दमें विवश होकर उसी समय कूद कर द्वारका आ पहुँचे तथा श्रीभगवान्के ऐसे अर्थात् श्रीरामस्वरूपमें दर्शन करके उनको सेवा द्वारा सन्तुष्ट किये। श्रीभगवान्ने भी परम प्रीतिपूर्वक उनको अभीष्ट वर प्रदान किया॥१०७॥

तदा भवेयं तत्राशु त्वन्तु गच्छाद्य पाण्डवान्।
तेषां गृहेषु तत् पश्य परं ब्रह्म नराकृति॥१०८॥

श्लोकानुवाद—मैं अवश्य ही उनके श्रीचरणोंमें उपस्थित होऊँगा जब वे मुझे बुलाएँगे। अभी आप पाण्डवोंके पास जाइये तथा उनके घरमें विराजमान उन नराकृति परब्रह्मका दर्शन कीजिए॥१०८॥

दिग्दर्शिनी टीका—प्रस्तुतं व्याख्यामः। ननु तदानीमेवाहमपि त्वत्सङ्गत्या गमिष्यामि तत्राह—त्वन्त्विति। तत्र हेतुं वदन् भगवतस्तेषु कारुण्यभरमेव दर्शयति—तेषामिति। परं ब्रह्म साक्षाच्छ्रीनारायणं पश्य दृग्भ्यां साक्षात्कुरु। अत्र च नराकृति–परमसुन्दर–श्रीमद्द्विभुजत्वाविष्कारात्। तत्रापि तदनिर्वचनीयविविध–मधुरतर–माहात्म्यमित्यर्थः॥१०८॥

भावानुवाद—अब श्रीहनुमान प्रस्तुत विषयकी व्याख्या कर रहे हैं। यदि श्रीनारद कहें कि मैं भी उसी समय उनके (श्रीहनुमानके) साथ ही जाऊँगा, इसीका उत्तर देते हुए 'तदा' इत्यादि पद कह रहे हैं। आप आज ही पाण्डवोंके निकट जाइये। उसका कारण बतलाते हुए सर्वप्रथम पाण्डवोंके प्रति श्रीभगवान्की करुणाका वर्णन कर रहे हैं। यद्यपि भगवान् मुनियोंके भी वाक्य और मनके अगोचर हैं, तथापि पाण्डवोंके घरमें सुन्दर नराकृति द्विभुज श्रीमूर्त्ति धारण कर अनेक प्रकारके अनिर्वचनीय सुमधुर माहात्म्यको प्रकट कर रहे हैं। अतः आप उनके घर पर विराजमान परब्रह्म साक्षात् श्रीनारायणका दर्शन करके कृतार्थ होवें॥१०८॥

स्वयमेव प्रसन्नं यन्मुनिहृद्वागगोचरम्।
मनोहरतरं चित्रलीलामधुरिमाकरम्॥१०९॥

श्लोकानुवाद—यद्यपि वे प्रभु मुनियोंके भी वाक्य और मनके अगोचर, परम मनोहर और विचित्र प्रकारकी मधुर लीलाओंके

आधार-स्वरूप हैं, तथापि स्वयं सुप्रसन्न होकर पाण्डवोंके घर पर विराजमान हो रहे हैं॥१०९॥

दिग्दर्शिनी टीका—ननु कथं तर्हीदृशं परमदुलर्भं तत्तैः प्राप्तम्? तत्राह—स्वयमिति। विनैव किञ्चित् साधनं तान् प्रति प्रसन्नं कृतकारुण्यभरमित्यर्थः; एवं तेषां नित्यतादृशमहाभाग्यवत्तामाहात्म्यविशेष उक्तः। एवमुक्तमलभ्यलाभेन माहात्म्यविशेषमेव दर्शयितुं तस्यान्यदुर्लभतामाह—मुनीनां हृदो वाचश्चागोचरमविषयं तदिति सूचितमेव। परम सौन्दर्यादिकमाह—मनोहरतरमिति। यतः चित्रो बहुविधो यो लीलाया मधुरिमा तस्य; यद्वा, चित्रयोर्लीला-मधुरिम्नोराकरमुत्पत्तिक्षेत्रं कामादीनामपि तदंशलेशस्पर्शेनैव मनोहरत्वात्॥१०९॥

भावानुवाद—यदि प्रश्न हो कि ऐसे परम दुर्लभ परब्रह्म पाण्डवोंको किस प्रकार दर्शन देते थे। इसीके उत्तरमें 'स्वयमेव' इत्यादि पद कह रहे हैं। यद्यपि वे मुनियोंके भी वाक्य और मनके अगोचर हैं, तथापि वे स्वयं ही सुप्रसन्न हैं, अर्थात् बिना किसी साधनके अथवा किञ्चित् साधन द्वारा अपनी करुणाको प्रकाश करनेवाले हैं। इसी प्रकार स्वयं ही प्रसन्न होकर पाण्डवोंके प्रति करुणाको प्रकट करते हैं और निरन्तर वैसी अनेक प्रकारकी मनोहर मधुर लीलाओंके आधार-स्वरूप नराकार परब्रह्म रूपमें दिखाई देते थे। इस प्रकार पाण्डवोंके सौभाग्य और विशेष माहात्म्यका उल्लेख किया गया है। मुनियोंको ऐसा सौभाग्य प्राप्त न होनेके कारण वे मुनियोंकी वाणी और मनके अगोचर हैं, ऐसा कहने पर भी दूसरे रूपमें पाण्डवोंके ही विशेष माहात्म्यको सूचित किया गया है। परम सौन्दर्य आदि कहनेका तात्पर्य यह है कि वे अनेक प्रकारकी मनोहर सुमधुर लीलाओंके आधार हैं अर्थात् विविध मधुर लीलाओंकी खान या उत्पत्ति-स्थल हैं। अथवा विविध मधुर लीलाओंके उत्पत्ति-स्थल होनेके कारण केवल उनके अंशमात्रके स्पर्श द्वारा ही कामदेव आदिका मन हरण हो जाता है॥१०९॥

बृहद्व्रतधरानस्मांस्तांश्च गार्हस्थ्यधर्मिणः।
साम्राज्यव्यापृतान्मत्वा मापराधावृतो भव॥११०॥

श्लोकानुवाद—(हे श्रीनारद) हमलोग नैष्ठिक ब्रह्मचारी हैं, पाण्डवगण गृहस्थ धर्मका पालन करनेवाले और साम्राज्यकी

व्यवस्थामें व्यस्त रहनेवाले हैं, ऐसा विचार करके अपने आपको अपराधी मत बना लेना॥११०॥

दिग्दर्शिनी टीका—ननु तैर्महाविषय भोगैश्वर्ययुक्तैः सहाकिञ्चनानां नैष्ठिकानां मादृशां सङ्गोऽनुचितः इत्याशंक्य शिक्षयति—बृहदिति। अस्मादिति बहुत्वेन श्रीनारद-सनकादयः सर्व एव नैष्ठिकब्रह्मचारिणः संगृह्यन्ते। तान् पाण्डवान् गार्हस्थ्यं गृहस्थता, तत्सम्बन्धि धर्मयुक्तान्, तत्र च साम्राज्यं चक्रवर्त्तित्वं, तत्र व्यापृतान् तत्कृत्यानुष्ठातृन् मत्वा अपराधेन आवृतो मा भव; तादृशेषु महत्तमेषु तथामननमेवापराधः, स च कदापि नापयाति, अतस्तादृशो माभूरित्यर्थ॥११०॥

भावानुवाद—'पाण्डवगण अत्यधिक विषयभोग और ऐश्वर्य आदिसे युक्त हैं, किन्तु हमलोग अकिञ्चन और नैष्ठिक ब्रह्मचारी हैं, अतएव मेरे जैसे व्यक्तिके लिए उनका संग करना अनुचित है'—ऐसी आशंका करके श्रीहनुमान (श्रीनारदको) शिक्षा देनेके लिए 'बृहद्' इत्यादि पद कह रहे हैं। हम नैष्ठिक ब्रह्मचर्यरूप बृहद् व्रतधारी हैं, यहाँ पर 'हमलोग' कहनेसे श्रीनारद और श्रीसनक आदि भी नैष्ठिक ब्रह्मचारीके रूपमें ग्रहण किये गये हैं। पाण्डव गृहस्थ हैं अर्थात् गृहस्थधर्म पालन करते हैं, विशेषकर चक्रवर्त्ती साम्राज्य होनेके कारण साम्राज्यकी परिचालना करनेमें व्यस्त रहते हैं तथा राजकार्य करनेमें रत रहते हैं—ऐसा विचार करके अपनेको अपराधी मत बना लेना। अर्थात् वैसे महाभागवतोंके प्रति इस प्रकार सोचना अर्थात् उन्हें नीचा सोचना अपराध है और वह अपराध कभी भी दूर होने वाला नहीं है। अतएव ऐसा विचार करके अपराध मत करना॥११०॥

निःस्पृहाः सर्वकामेषु कृष्णपादानुसेवया।
ते वै परमहंसानामाचार्याच्चर्यपदाम्बुजाः॥१११॥

श्लोकानुवाद—यथार्थतः पाण्डवगण निष्किञ्चन हैं अर्थात् निरन्तर श्रीकृष्णके चरणकमलोंकी सेवा करके वे सब प्रकारके भोगोंकी कामनासे रहित हो गये हैं। अतएव उन पाण्डवोंके चरणकमल परमहंसोंके आचार्यों द्वारा भी पूजित हैं॥१११॥

दिग्दर्शिनी टीका—यतस्तादृक्साम्राज्येऽपि तेषां परमाकिञ्चन-साम्राज्यमेवेत्याह—निःस्पृहा इति, सर्वेषु ऐहिकामुष्मिकेषु कामेषु भोगेषु निःस्पृहाः स्पृहामात्रमपि न

कुर्वन्तीत्यर्थः। अतः परमहंसानां अन्त्याश्रमिमूर्द्धन्यानां ये आचार्या गुरवस्तैरपि अर्च्यानि अर्चयितुं योयानि पदाम्बुजानि येषां ते, तेषां परमतुच्छात्मानुभवसुख-निष्ठत्वात्, एषाञ्च परममहानन्दमय भक्तिरसिकत्वात्॥१११॥

भावानुवाद—अतएव पाण्डवोंका वैसा ऐश्वर्य और साम्राज्य होने पर भी वे परम अकिञ्चन हैं तथा साम्राज्यके अधिकारी होने पर भी वे भोगोंकी कामनासे रहित हैं; अर्थात् वे ऐहिक और पारत्रिक सब प्रकारके भोगोंकी कामनासे रहित हो गये हैं। अतएव वे परमहंसोंके भी गुरु हैं, अर्थात् अन्तिम आश्रमके शिरोमणि परमहंसोंके भी आचार्य होनेके कारण वे अर्चनके योग्य हैं, क्योंकि वे निरन्तर श्रीकृष्णके चरणकमलोंकी सेवा करके सभी विषयोंकी कामनासे रहित हो गये हैं। किन्तु परमहंसगण अति तुच्छ आत्मानुभव-सुखकी निष्ठा तकका भी त्याग नहीं कर पाते। इस प्रकार पाण्डवगण परम आनन्दमय भक्तिके रसिक होनेके कारण परमहंसोंके भी पूजनीय हैं॥१११॥

तेषां ज्येष्ठस्य साम्राज्ये प्रवृत्तिर्भगवत्प्रियात्।
अतो बहुविधा देवदुर्लभा राज्यसम्पदः॥११२॥

श्लोकानुवाद—पाण्डवोंमें ज्येष्ठ श्रीयुधिष्ठिर महाराजकी साम्राज्यमें प्रवृत्ति केवल भगवान्‌की प्रीतिके लिए ही है और इसीलिए उनके पास ऐसी राज्य-सम्पत्ति है, जो देवताओंके लिए भी दुर्लभ है॥११२॥

दिग्दर्शिनी टीका—एवञ्चेत्तर्हि साम्राज्येन किम्? तत्राह—तेषामिति। पाण्डवानां ज्येष्ठस्य श्रीयुधिष्ठिरस्य; भगवतः प्रियात् प्रीतिं पर्यालोच्येत्यर्थः साम्राज्यस्वीकारे सति सर्वत्र भगवद्भक्तिप्रवर्त्तनेनाखिललोकानां परमं हितं स्यात्तेन च भगवतः सन्तोषविशेषः स्यादित्येतदर्थमेवेति भावः। तथा च प्रथमस्कन्धे (श्रीमद्भा॰ १/१२/४)— *'अपीपलद्धर्मराजः पितृवद्रञ्जयम् प्रजाः। निस्पृहः सर्वकामेभ्यः कृष्ण-पादानुसेवया॥'* इति। अत्र च प्रजा रञ्जयन्निति वदता श्रीसूतेन भगवद्भक्ति-प्रवर्त्तनद्वारैव प्रजारञ्जनात् पितृवत्ताः पालयामासेत्येवाभिप्रेतम्। तदुक्तं श्रीनारदेन शौनकं प्रति हरिभक्तिसुधोदये— *'अहोऽति धन्योऽसि यतः समस्तो, जनस्त्वयेश प्रवलीकृतोऽयम्। उत्पादयेद् योऽत्र भवार्द्दितानां, भक्तिं हरौ लोकपिता स धन्यः॥'* इति। अतोऽस्मादुक्ताद्धेतोः देवैर्दुर्लभा अपि राज्यं सम्पदादयो राज्ञो युधिष्ठिरस्य कामपि प्रीतिं मनोविकारविशेषं जनयितुं क्वचित् कदाचिदपि नाशकन्निति तृतीयश्लोकोत्तरार्धेनान्वयः। राज्यं राज्ञः कर्म

प्रजापालनादि, तेन सम्पदः प्रजाकृतपुण्य-षष्ठांश प्राप्त्या धर्मसम्पत्तयः; यद्वा राज्यं राष्ट्रं तस्मिन् सम्पदः ताश्चात्र सद्धर्मलक्षणा एव गृह्यन्ते, प्राधान्यात्। अग्रेते त्वैहिकोक्तेश्च; एवं ज्येष्ठस्य तत्र प्रवृत्त्या कनिष्ठानामपि तत्र प्रवृत्तिस्तस्य साम्राज्ये न च तेषामपि साम्राज्यमित्याद्युक्त्या तेषामैक्येन परस्परं परमसौहार्देन सद्धर्मपालनादि-माहात्म्यविशेषश्च दर्शितः॥११२॥

भावानुवाद—यदि आपत्ति हो कि ऐसे भक्तिरसिक होने पर साम्राज्यकी क्या आवश्यकता है? इसके उत्तरमें 'तेषां' इत्यादि पद कह रहे हैं। ऐसा करनेसे प्रभु प्रसन्न होंगे—यह विचार करके ही पाण्डवोंमें ज्येष्ठ महाराज श्रीयुधिष्ठिरकी साम्राज्यमें प्रवृत्ति हुई है। साम्राज्य स्वीकार करने पर सर्वत्र भगवद्भक्तिके प्रवर्त्तन द्वारा सभीका परम कल्याण होगा तथा भगवान् भी सन्तुष्ट हो जायेंगे, इसी उद्देश्यसे उन्होंने साम्राज्यको स्वीकार किया। यथा, प्रथम-स्कन्धमें उक्त है—"धर्मराज श्रीयुधिष्ठिर निरन्तर श्रीकृष्णके चरणकमलोंका स्मरण करते थे, इसी कारण समस्त विषयोंकी कामनासे रहित हो गये थे। वे अपने पिताकी भाँति प्रजाको आनन्दित करते हुए तथा भक्तिका प्रवर्त्तन करते हुए राज्य पर शासन करने लगे।" उक्त श्लोकमें 'प्रजारञ्जन'-पदकी व्याख्यामें श्रीसूतगोस्वामीने कहा है—भगवद्भक्तिके प्रवर्त्तन द्वारा प्रजाको आनन्दित करना। और 'पितृवत्-पालन'का अर्थ भी भगवद्भक्तिके प्रवर्त्तन द्वारा पालन ही है।

श्रीहरिभक्तिसुधोदय ग्रन्थमें शौनकके प्रति श्रीनारदका उपदेश भी इस प्रकार है—"आप अत्यधिक धन्य हैं, क्योंकि आप सभी व्यक्तियोंमें ईश्वरके प्रति भक्तिको जागृत कर रहे हैं। वास्तवमें जो संसारके दुःखोंसे पीड़ित व्यक्तियोंके हृदयमें हरिभक्तिको जाग्रत करते हैं, वे सभी लोकोंके पिता और पालनकर्त्ता हैं, वे ही धन्य हैं।" अतएव महाराज श्रीयुधिष्ठिरको अनेक प्रकारके देव-दुर्लभ राज-ऐश्वर्यसे बिलकुल भी प्रीति नहीं है और उनके मनमें कभी भी विकार उत्पन्न नहीं हो सकता है। यहाँ पर सम्पत्ति कहनेसे राज्य और राज्यकी प्रजाका पालन करनेसे प्रजा द्वारा किये गये पुण्योंका जो छटा अंश राजाको प्राप्त होता है, वही पुण्य सम्पत्ति है। अथवा सम्पत्तिका अर्थ है राज्य और राज्यमें स्थित सम्पूर्ण सम्पत्ति और इस सम्पत्तिको

सद्धर्मका लक्षण समझना चाहिए। 'पाण्डव-ज्येष्ठ' इस उक्ति द्वारा ज्येष्ठ भ्राताकी सम्पत्तिको कनिष्ठ भ्राताओंकी भी सम्पत्ति समझना चाहिए। इस प्रकार पाण्डवोंके परस्पर ऐक्यवशतः परम सौहार्द सहित सद्धर्म पालन आदिके विशेष माहात्म्यका प्रदर्शन किया गया है॥११२॥

राजसूयाश्वमेधादिमहापुण्यार्जितास्तथा ।
विष्णुलोकादयोऽत्रापि जम्बुद्वीपाधिराजता॥११३॥

श्लोकानुवाद—श्रीयुधिष्ठिर राजसूय और अश्वमेध आदि यज्ञोंके अनुष्ठानसे उदित महापुण्य द्वारा अर्जित विष्णुलोक आदि तथा इस लोकमें भी जम्बुद्वीपके अधिपति हैं॥११३॥

दिग्दर्शिनी टीका—राजसूयाश्वमेधादिकस्य स्वयमेव साक्षाद्विहितस्य यागादि कर्मणस्तेन यन्महापुण्यं भक्तिलक्षणं भगवत्समर्पणात्, तेनार्जिताः साधिताः; तथेत्युक्तसमुच्चये, तेन प्रकारेणेति वा, तादृशा इति वा। विष्णुलोकः श्रीवैकुण्ठ आदिः सर्वतः श्रैष्ठ्यात् सर्वोपरितनत्वाच्च मुख्यो येषां स्वर्लोकादीनां ते श्रीवैकुण्ठलोकप्राप्त्या तत्रैव तदन्तर्वर्त्ति सर्वलोकप्राप्तेः। तत्रत्य सुखसागरेऽन्य सर्वसुखप्रवाहान्तर्भावाद्वा, किम्वा स्वेच्छया स्वर्गादिभोगक्रमेण वैकुण्ठगमनात्। एवं पारलौकिकीः सम्पदो निगद्य ऐहिकीरप्याह—अत्रापीत्यादिना पादत्रयेण। अत्र अस्मिँल्लोकेऽपि॥११३॥

भावानुवाद—श्रीयुधिष्ठिर महाराज राजसूय और अश्वमेध आदि भक्तिलक्षणसे युक्त यज्ञोंको स्वयं अनुष्ठान करने पर भी उन सबको श्रीभगवान्‌को ही समर्पित करते थे, इसलिए राज-ऐश्वर्यको महापुण्य द्वारा अर्जित कहा गया है। 'तथा' शब्दका अर्थ है समूह अर्थात् एकजातीय वस्तुओंका एकत्व। अतएव उनके लिए उस प्रकारसे महान पुण्योंके द्वारा अर्जित श्रीवैकुण्ठ आदि लोकोंकी प्राप्तिकी बात कही गयी है। यहाँ 'आदि' शब्दसे सबसे ऊपर स्थित वैकुण्ठलोक और उसके अन्तर्गत सभी लोकोंकी प्राप्ति अर्थात् श्रीवैकुण्ठलोककी प्राप्ति होनेसे उसके अन्तर्गत स्वर्ग आदि लोकोंकी भी प्राप्ति हो गयी, ऐसा समझना चाहिए। श्रीवैकुण्ठके सुखसमुद्रके तुल्य होनेके कारण अन्यान्य लोकोंके सुख उसमें मिलनेवाले प्रवाहके समान हैं, अतएव सब प्रकारके सुख ही वैकुण्ठ-सुखके अन्तर्गत हैं। अथवा श्रीयुधिष्ठिर आदि पाण्डव स्वेच्छापूर्वक स्वर्ग आदिका भोग करके वैकुण्ठमें गये।

इस प्रकार उनकी पारलौकिक सम्पत्तिका वर्णन करके अब ऐहिक सम्पत्तिकी महिमाका 'अत्रापि' इत्यादि तीन पदों (चरणों)के द्वारा वर्णन कर रहे हैं॥११३॥

त्रैलोक्यव्यापकं स्वच्छं यशश्च विषयाः परे।
सुराणां स्पृहणीया ये सर्वदोषविवर्जिताः॥११४॥
कृष्णप्रसादजनिताः कृष्ण एव समर्पिताः।
नाशकन्कामपि प्रीतिं राज्ञो जनयितुं क्वचित्॥११५॥

श्लोकानुवाद—श्रीयुधिष्ठिर महाराजके त्रिभुवनव्यापी अमल यश तथा दूसरे समस्त दोष रहित विषय देवताओंके लिए स्पृहनीय हैं। श्रीकृष्णकी कृपासे यह सम्पद उन्हें स्वयं ही प्राप्त हुई है तथा श्रीकृष्णके लिए ही समर्पित है। इसलिए यह सब विषय महाराज युधिष्ठिरकी किसी प्रकारसे भी प्रीति उत्पन्न करनेमें सक्षम नहीं हैं॥११४-११५॥

दिग्दर्शिनी टीका—परे अन्येऽपि विषयाः स्रक्चन्दनाद्युपभोगद्रवाणि; ये विषयाः स्पृहनीया एव, न तु लभ्याः। पूर्वं पारलौकिक्यः सम्पदो देवदुलर्भा इत्युक्तम्, इदानीमैहिक्योऽपि देवस्पृहणाया इत्येवमपुनरुक्तार्थता द्रष्टव्या। स्पृहणीयत्वे हेतुः; सर्वैर्दोषैर्नश्वरत्वादिभिर्विवर्जिताः परित्यक्ताः; यतः कृष्णप्रसादेन जनिताः, न तु स्वकर्मोपार्जिताः। ननु तथापि विषया वह्नुष्णतावत् सहजसर्वदोषाश्रया अनर्थकारिण एव। सत्यं, भगवत् समर्पणेन विषयस्याप्यमृतत्वश्रवणात्। किञ्चिदपि दोषं कर्त्तुं न प्रभवन्ति, प्रत्युत गुणानेव वहन्तीत्याशयेनाह—कृष्ण एव सम्यक् निष्काम-त्वादिनाऽर्पिताः॥११४-११५॥

भावानुवाद—श्रीयुधिष्ठिरका इस लोक और जम्बुद्वीपका आधिपत्य तथा त्रिभुवनव्यापी अमल यश और सब प्रकारके दोषोंसे रहित अन्य भोग्य-विषय, माला-चन्दन आदि देवताओंके द्वारा भी कामना किये जाते हैं, किन्तु प्राप्त नहीं होते है। यद्यपि पहले भी उनकी पारलौकिक सम्पत्ति-वर्णनके प्रसंगमें 'देवदुर्लभ' कहा गया है, तथापि अब ऐहिक सम्पत्ति-वर्णनके प्रसंगमें भी 'देवताओंके द्वारा कामना' कहनेसे द्विरुक्ति हुई है। 'देवताओंके द्वारा भी कामना किये जाते हैं' कहनेका कारण यह है कि वे सब द्रव्य नश्वरता आदि समस्त प्रकारके दोषोंसे रहित हैं, क्योंकि यह सारी सम्पत्ति भगवान् श्रीकृष्णकी कृपासे प्राप्त हुई है—अपने कर्मोंके द्वारा उपार्जित नहीं है।

यदि कहो कि अग्नि जैसे स्वभावसे ही उष्ण है, उसी प्रकार विषय-समूह स्वभावतः समस्त दोषोंके आश्रय होनेसे क्या अनर्थकारी नहीं हैं। यह बात सत्य है, किन्तु वे सब विषय श्रीभगवान्‌के चरणकमलोंमें अर्पित होने पर अमृतके समान हो जाते हैं—ऐसा सुना जाता है, अतएव उनमें किसी प्रकारका दोष नहीं रहता है; अथवा वह अनर्थ आदि भी अपना प्रभाव विस्तार नहीं कर पाते, अपितु वे महान गुणके रूपमें बदल जाते हैं। यहाँ पर श्रीकृष्णको सर्मर्पित कहनेसे सम्पूर्णरूपसे निष्कामता अर्थात् केवल श्रीकृष्ण-सेवाके लिए प्रीतिपूर्वक श्रीकृष्णको ही समर्पण, समझना चाहिए॥११४-११५॥

कृष्णप्रेमाग्निदन्दह्यमानान्तःकरणस्य हि।
क्षुदग्निविकलस्येव वासः स्रक्चन्दनादयः॥११६॥

श्लोकानुवाद—वस्त्र, माला और चन्दन आदि वस्तुएँ जिस प्रकार भूखसे पीड़ित व्यक्तिको सुख देनेमें समर्थ नहीं होतीं, उसी प्रकार ये समस्त विषय भी महाराज श्रीयुधिष्ठिरके, श्रीकृष्णप्रेमरूपी अग्नि द्वारा दग्ध, अन्तःकरणको सुख प्रदान करनेमें समर्थ नहीं होते हैं॥११६॥

दिग्दर्शिनी टीका—तथापि प्रीत्युत्पादनाशक्तौ मुख्यं हेत्वन्तरं दर्शयितुं कृष्ण-समर्पण-फलमेव वदन् राजानं विशिनष्टि—कृष्णेति। कृष्णे यः प्रेमा स एव स्पर्शमात्रेणाशेष-महादोषराशिदाहकत्वात्, तथा तद्वतां हृदि विरहावसरे सन्तापजनकत्वात्, सम्भोगसमयेऽपि भाविविरहशंकया अन्तर्ज्वालकत्वात्। किम्वा परममहानन्दचरमकाष्ठा परिणामरूप निजसहजोत्तापधर्मेणाग्नितुल्यत्वादग्निस्तेन दन्दह्यमानमतिशयेन भृशं दह्यमानमन्तःकरणं मनो यस्य तस्य; हि हेतौ निश्चये वा। तथा च दशमस्कन्धे (श्रीमद्भा॰ १०/२०/४५) शरद्वर्णने—*'आश्लिष्य समशीतोष्णं प्रसूनवनमारुतम्। जनास्तापं जहुर्गोप्यो न कृष्णहृतचेतसः॥'* इति। अस्यार्थः—शरत्कालीन-पुष्पित-वनवायुमनुभूय सर्वे जनास्तापं जहुः, गोप्यस्तु तापं न जहुः। कुतः? कृष्णेन हृतानि चेतांसि यासां ताः, कृष्णप्रेमाग्निगाढ़दग्धत्वात्; अतएव महातापमेव प्रापुरित्युक्तं स्यात्। शरदाधिकं तत्प्रेम्णः उद्दीपनादिति, तत्राप्येवमुह्यम्। तत्र दृष्टान्तमाह—क्षुदेवाग्निः सर्वधातुशोषकत्वात्, तेन विकलस्य विह्वलस्य यथा स्वीकृता अपि वस्त्रादयो हर्षं जनयितुं न शक्नुवन्ति, अपि तु शोकमेव जनयन्ति। आदिशब्देन कलत्र-पुत्रादयः। यथा तस्यानुभोगेनैव तच्छान्तिः सुखञ्च स्यात्तथास्य कृष्णप्राप्त्यैव विरहाग्निशान्तिः सुखञ्चेति दृष्टान्तेन ध्वनितम्। अथवा प्रीत्युत्पादन शक्तयभावमात्रे एकांशे दृष्टान्तोऽयम्॥११६॥

भावानुवाद—तथापि समस्त भोग्य पदार्थ श्रीयुधिष्ठिर महाराजके अन्तःकरणको किसी प्रकारसे भी सुख प्रदान करनेमें समर्थ नहीं हैं। क्यों? इसका मुख्य कारण प्रदर्शन करनेके उद्देश्यसे श्रीकृष्णमें समर्पणका उल्लेख करके अब महाराज श्रीयुधिष्ठिरका वैशिष्ट्य बतला रहे हैं। श्रीकृष्णके प्रति जो प्रेम है, उस प्रेमके स्पर्शमात्रसे ही अनन्त प्रकारके महान दोष भी स्वतः ही विनष्ट हो जाते हैं, इसलिए प्रेमको अग्नि तुल्य कहा गया है। प्रेमवानके हृदयमें वह प्रेम श्रीकृष्णके विरहके समयमें सन्तापजनक हो जाता है तथा सम्भोगके समय भावी-विरहकी आशंकासे मिलन सुखका अन्तर्ध्यान हो जाता है। इसलिए श्रीकृष्णप्रेम सदैव अग्नि तुल्य ज्वालामयी है।

अथवा प्रेम नामक वस्तु परमानन्दकी चरमसीमा स्वरूप है, इसलिए उसका परिणाम भी अपने स्वाभाविक अत्यन्त ताप-धर्मयुक्त अग्नितुल्य ही है। अर्थात् यह प्रेमानन्द जिसके हृदयमें उदित होता है, उसका हृदय भी सदा अग्निके समान अत्यधिक ज्वालायमान हो जाता है। इस विषयका प्रमाण दशम-स्कन्धमें शरद ऋतुके वर्णनमें व्यक्त हुआ है, "कुसुमित वनके सुगन्धित समशीतोष्ण वायुका सेवन कर प्राणीमात्रका ताप तो प्रशमित हुआ, किन्तु श्रीकृष्णके द्वारा अपहृत-चित्तवाली गोपियोंका ताप दूर नहीं हुआ, बल्कि और भी अधिक बढ़ गया।" तात्पर्य यह है कि शरद ऋतुमें पुष्पित-वन-वायुके सेवनसे सभीका ताप शान्त हो गया, किन्तु गोपियोंका ताप और अधिक बढ़ गया। क्यों? जिनके चित्तको श्रीकृष्णने हरण कर लिया था, वे गोपियाँ श्रीकृष्णप्रेमरूपी अग्निमें अत्यधिकरूपसे जल जानेके कारण महाताप-ग्रस्त हो गयीं। अर्थात् शरद ऋतुकी पुष्पित-वन-वायुसे उनकी प्रेमाग्नि और भी अधिक उद्दीप्त हो गयी। (यहाँ उन लीलाओंका वर्णन नहीं किया गया।) इस विषयमें दृष्टान्त है—वस्त्र और माला-चन्दन आदि वस्तुएँ भूखसे पीड़ित व्यक्तिको सुख देनेमें समर्थ नहीं होतीं, क्योंकि भूखरूपी अग्नि शरीरकी सभी धातुओंका शोषण करके शरीरको व्याकुल कर देती हैं। अतः वस्त्र और माल्य-चन्दन आदि पदार्थ भूखे व्यक्तिके लिए सुखदायक नहीं, बल्कि उसे दुःखदायक ही होते हैं। 'आदि' शब्दसे पुत्र-पत्नी आदि भी

ग्रहणीय हैं। परन्तु यदि भूखसे पीड़ित व्यक्तिको अन्न-भोजन आदि प्राप्त हो जाए, तभी उसकी जठराग्नि शान्त हो सकती है; उसी प्रकार श्रीकृष्णप्रेमरूपी अग्नि द्वारा तप्त व्यक्तिको विषय-भोगकी वस्तुएँ सुखी नहीं कर सकती, परन्तु यदि उस व्यक्तिको श्रीकृष्णकी प्राप्ति हो जाए, तभी वह विरहाग्निकी ज्वालासे शान्ति प्राप्त कर सकता है तथा पूर्णता सुखी हो सकता है। यही इस दृष्टान्त द्वारा सूचित होता है। अथवा यह दृष्टान्त प्रीति-उत्पन्न करनेकी शक्तिके अभावके कारण मात्र एकांशसे ही ग्रहणीय है॥११६॥

अहो! किमपरे श्रीमद्द्रौपदी महिषीवरा।
तादृशा भ्रातरः श्रीमद्भीमसेनार्जुनादयः॥११७॥
न प्रिया देहसम्बन्धान्न चतुर्वर्गसाधनात्।
परं श्रीकृष्णपादाब्जप्रेमसम्बन्धतः प्रियाः॥११८॥

श्लोकानुवाद—अहो! विषयोंकी बात और अधिक क्या कहूँ? महिषी-शिरोमणि श्रीमती द्रौपदीदेवी तथा अनेक गुणोंसे अलंकृत भीम, अर्जुन आदि भाई भी श्रीयुधिष्ठिरके प्रिय नहीं हैं। तथापि श्रीयुधिष्ठिरकी उनके प्रति जो प्रीति देखी जाती है, वह भी देहसे सम्बन्ध होनेके कारण नहीं है, बल्कि श्रीकृष्णके चरणकमलोंके प्रति प्रेम सम्बन्धवशतः ही वे सब उनके प्रिय हैं॥११७-११८॥

दिग्दर्शिनी टीका—ननु तस्य द्रोपद्यां पत्न्यां भातृष्वपि कनिष्ठेषु परमाप्रीतिर्वर्त्तते, तत्राह—अहो इति द्वाभ्याम्। अपरे धनभोगादयो बान्धवादयश्च तस्य प्रीतिं जनयितुं नाशकन्निति किं वक्तव्यं, श्रीमद्द्रौपद्यादयोऽपि नाशकन्नित्यर्थः। या च कदाचिदन्योन्यं तेषां प्रीतिर्दृश्यते, सा च न देहसम्बन्धादिना, किन्तु श्रीकृष्णभक्तिसम्बन्धेनैवेत्याह—नेति। अथवा श्रीकृष्णैकप्रियस्य तस्यापरे प्रिया न भवन्तीति किं वक्तव्यं, द्रौपद्यादयोऽपि देहसम्बन्धादिना न प्रिया इति द्वाभ्यामन्वयः। महिषीषु राजपत्नीषु वरा श्रेष्ठा सर्वसद्रूपगुणाद्यलङ्कृतत्वात्; अतएव श्रीमती चासौ द्रौपदी चेति तादृशा रूपगुणादिभिर-अनिर्वचनीया; देहसम्बन्धात् पाणिग्रहणजन्मादि-दैहिकसम्बन्धाद्धेतोः। चतुर्वर्गस्य धर्मार्थकाममोक्षाणां साधनात् सम्पादनादपि न प्रियाः। तच्च *'माता तीर्थं पिता तीर्थं भार्या तीर्थं तथैव च। पुत्रतीर्थं'* इत्यादि पद्मपुराणीयवचनं तत्तदुपाख्यानानुसारेण भार्याया द्रौपद्याः पुत्रतुल्यानां कनिष्ठभातृणामपि भीमादीनां तीर्थत्वात् स्वत एव तत्तत् साधन सामर्थ्ययोगाच्चोह्यम् परं केवलं श्रीकृष्णपादाब्जयोस्तेषां प्रेम किम्वा

तेष्वेव तयोः प्रेम तत्सम्बन्धेनैव। प्रिया इति पुनः प्रयोगेण कृष्णप्रेम सम्बन्धात् प्रियत्वातिशयः सूचितः। श्रीकृष्णभक्तानां हि परस्परं प्रियताभक्तिस्वभावेन तद्वृद्धये तद्रसास्वादन–महासुखाय वा भवतीति प्रसिद्धमेव। एवमेकस्यापि गुणाः सर्वष्वन्येष्वपि पर्यवस्यन्तीति सर्वेषामेव तेषां तत्तदुक्तमाहात्म्यं द्रष्टव्यम् कनिष्ठानां ज्येष्ठानुवर्त्तित्वात्। अयं च *'सम्पदः क्रतवो लोका महिषी भ्रातरो मही। जम्बुद्वीपाधिपत्यञ्च यशश्च त्रिदिवं गतम्॥ किं ते कामाः सुरस्पार्हा मुकुन्दमनसो द्विज। अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे॥'* इति प्रथमस्कन्धोक्त (श्रीमद्भा॰ १/१२/५–६) श्लोकद्वयार्थस्य विस्तरो ज्ञेयः॥११७–११८॥

भावानुवाद—यदि कहो कि महाराज श्रीयुधिष्ठिरकी अपनी पत्नी श्रीमती द्रौपदीके प्रति तथा भीम–अर्जुन आदि कनिष्ठ भाइयोंके प्रति अत्यधिक प्रीति क्यों देखी जाती है? इसके लिए 'अहो' इत्यादि दो श्लोकोंकी अवतरणा कर रहे हैं। बान्धव आदि भी उनकी प्रीतिको उत्पन्न करनेमें सक्षम नहीं हैं, फिर भोग्य–धन सम्पत्तिके विषयमें तो कहना ही क्या? श्रीमती द्रौपदी भी उनकी प्रीति उत्पन्न करनेमें समर्थ नहीं हैं, फिर भी कदाचित् द्रौपदीके प्रति उनकी प्रियता देखी जाती है। वह प्रीति देह आदिके सम्बन्धवशतः नहीं, बल्कि केवल मात्र श्रीकृष्णभक्ति सम्बन्धवशतः ही होती है। अथवा श्रीकृष्ण–सम्बन्धसे रहित अन्य भोग्य विषयोंकी बात तो दूर रहे, रमणी–शिरोमणि, राजमहिषियोंमें सर्वश्रेष्ठ, समस्त सद्‌गुण–रूप आदिसे अलंकृत श्रीमती द्रौपदी तथा वैसे महान गुणोंसे समलंकृत भीम–अर्जुन आदि भाई भी श्रीयुधिष्ठिरको प्रीतिप्रद नहीं हैं। फिर भी उनके प्रति कभी–कभी जो प्रीति दिखती है, वह भी पाणिग्रहण (विवाह)के कारण देह–सम्बन्ध अथवा जन्म आदि दैहिक सम्बन्धसे धर्म, अर्थ, काम, मोक्ष आदिमें सहायताके कारण नहीं है। "माता तीर्थ, पिता तीर्थ, पत्नी तीर्थ, पुत्र तीर्थ" इत्यादि पद्मपुराणके वचन तथा वैसे उपाख्यानके अनुसार पत्नी द्रौपदी, पुत्र तुल्य भीम–अर्जुन आदि कनिष्ठ भ्राता स्वतः ही तीर्थ स्वरूप हैं। अतएव यद्यपि वे परस्पर पुरुषार्थके साधनमें सहायक होते हैं, तथापि श्रीयुधिष्ठिरकी अपने भाइयों और पत्नीके प्रति जो प्रीति है, वह देह सम्बन्धीय नहीं है, परन्तु केवल श्रीकृष्णके श्रीचरणकमलोंमें प्रेम सम्बन्धके कारण ही है। अथवा श्रीकृष्णके भक्तोंमें परस्पर जो प्रीति होती है, उस प्रीतिके सम्बन्धवशतः ही उनमें प्रियता लक्षित होती है।

मूल श्लोकमें 'प्रिया' शब्दके पुनः प्रयोगका कारण है कि कृष्णप्रेम-सम्बन्धमें ही उनकी परस्पर प्रियता सूचित होती है। वस्तुतः कृष्णभक्तोंकी एक दूसरेके प्रति परस्पर ममता या प्रियता भक्तिका ही स्वभाव है तथा इससे महासुखकी प्राप्ति होती है, ऐसा प्रसिद्ध है। इस प्रकार एकके गुण दूसरेमें पर्यवसित होते हैं। अतएव केवल श्रीयुधिष्ठिर महाराजके माहात्म्यको दिखलानेसे सभीका माहात्म्य सूचित होता है और फिर कनिष्ठ भी ज्येष्ठके अनुवर्त्ती होते हैं, अतएव ज्येष्ठ भ्राताके समस्त गुण कनिष्ठमें पर्यवसित होते हैं। ऐसी महामहिमा प्रथम-स्कन्धमें (श्रीमद्भा॰ १/१२/५-६) वर्णित है—"महाराज श्रीयुधिष्ठिरकी सम्पत्ति, यज्ञ, यज्ञोपार्जित सद्गति, स्त्री, भ्राता तथा जम्बुद्वीपके आधिपत्यके विषयमें स्वर्गके देवता भी प्रशंसा करते हैं। किन्तु उस देव-दुर्लभ अतुल ऐश्वर्यमें भी धर्मराज श्रीयुधिष्ठिरको आकर्षण करनेका सामर्थ्य नहीं है, क्योंकि वे केवल श्रीकृष्णके चरणकमलोंका ही चिन्तन करते थे। इस विषयमें और अधिक क्या कहूँ? जिस प्रकार भूखसे पीड़ित व्यक्तिका मन अन्नके अलावा माल्य-चन्दन आदि अन्य विषयोंकी ओर कभी नहीं जाता, उसी प्रकार श्रीकृष्णप्रेमकी अग्नि द्वारा दग्ध श्रीयुधिष्ठिरके अन्तकरणमें विशाल राज्य-ऐश्वर्य आदि कोई भी भोग्य पदार्थ, प्रीति उत्पन्न करनेमें समर्थ नहीं हैं।" इस टीकाको आलोच्य दो श्लोकोंके अभिप्रेत अर्थका विस्तार कहा जा सकता है॥११७-११८॥

वानरे मया तेषां निर्वक्तुं शक्यते कियत्।
माहात्म्यं भगवन् वेत्ति भवानेवाधिकाधिकम्॥११९॥

इति श्रीबृहद्भागवतामृते भगवत्कृपासार निर्द्धारखण्डे
भक्तोनाम चतुर्थोऽध्यायः।

श्लोकानुवाद—हे भगवन्! मैं वानर हूँ, पाण्डवोंका माहात्म्य मैं क्या जानूँ, और उनका माहात्म्य वर्णन करनेकी शक्ति भी मुझमें कहाँ है? आप तो उनके माहात्म्यको मुझसे भी अधिक जानते हैं॥११९॥

श्रीबृहद्भागवतामृतके प्रथमखण्डके चतुर्थ अध्यायका
श्लोकानुवाद समाप्त।

दिग्दर्शिनी टीका—तेषां पाण्डवानां कियन्माहात्म्यं निर्वक्तुं निरूपयितुं शक्यते, अपितु किञ्चिदपि न शक्यत एव। कुतः? वानरेण अनुकृत वानर जातित्वादित्यर्थः। अतोऽलं तत् कथनेनेति भावः। ननु तर्हि कथं मया ज्ञेयं? तत्राह—भगवन्! हे सर्वज्ञवर! मदुक्तादप्यधिकं ततोऽप्यधिकं भवानेव जानाति; तच्च द्वारकागमनोन्मुख—श्रीभगवतः प्रेम बोधनादिकमूह्यम्॥११९॥

इति श्रीभागवतामृतटीकायां दिग्दर्शिन्यां प्रथमखण्डे चतुर्थोऽध्यायः।

भावानुवाद—क्या मैं पाण्डवोंके माहात्म्यको वर्णन करनेमें समर्थ हूँ? अर्थात् उनके माहात्म्यका निरूपण करनेकी कुछ भी शक्ति मुझमें नहीं है। क्यों? मैं वानर हूँ, अर्थात् वानरोंके लिए इससे अधिक शक्ति और क्या होगी? यही बहुत है। यदि श्रीनारद कहें कि तो फिर मैं पाण्डवोंकी महिमासे कैसे अवगत होऊँगा? उसके उत्तरमें कहते हैं—हे भगवन्! हे सर्वज्ञवर! आप मेरे द्वारा कही गयी पाण्डवोंकी महिमाकी तुलनामें और भी अधिक उनके माहात्म्यको जानते हैं। अभी द्वारका जानेके लिए प्रस्तुत श्रीनारदके लिए भगवान्के प्रेम आदिका विषय अव्यक्त रहा॥११९॥

श्रीबृहद्भागवतामृतके प्रथमखण्डके चतुर्थ अध्यायकी दिग्दर्शिनी टीकाका भावानुवाद समाप्त।

पञ्चमोऽध्यायः (प्रियः)

श्रीपरीक्षिदुवाच—

तत्र श्रीनारदो हर्षभराक्रान्तः सनर्त्तनम्।
कुरुदेशं गतो धावन् राजधान्यां प्रविष्टवान्॥१॥

श्लोकानुवाद—महाराज श्रीपरीक्षितने कहा—तब श्रीनारदने हर्षपूर्वक नृत्य करते-करते कुरुदेशमें उपस्थित होकर शीघ्रतासे महाराज श्रीयुधिष्ठिरकी राजधानीमें प्रवेश किया॥१॥

दिग्दर्शिनी टीका

पञ्चमे निजमाहात्म्यं मुन्युक्तं पाण्डवा यथा।
निरस्योचुर्यदूनां तत्तथा तेऽप्युद्धवस्य तत्॥

नर्त्तनेन नृत्येन सहितं यथा स्यात्तथा धावन् राजधान्यां श्रीयुधिष्ठिर-महापुर्यां प्राविशत्॥१॥

भावानुवाद—इस पञ्चम अध्यायमें पाण्डवोंने जिस प्रकार श्रीनारद द्वारा कहे गये अपने माहात्म्यका खण्डन करके यादवोंके माहात्म्यका वर्णन किया है, उसी प्रकार यादवोंने भी अपने माहात्म्यका खण्डनकर श्रीउद्धवकी महिमाका गुणगान किया है।

श्रीनारदने नृत्य करते-करते और कभी धावित होकर महाराज श्रीयुधिष्ठिरकी राजधानीमें प्रवेश किया॥१॥

तावत् कस्यापि यागस्य विपत्पातस्य वा मिषात्।
कृष्णमानय पश्याम इति मन्त्रयता स्वकैः॥२॥
धर्मराजेन तं द्वारि तथा प्राप्तं महामुनिम्।
निशम्य भ्रातृभिर्मात्रा पत्नीभिश्च सहोत्थितम्॥३॥

श्लोकानुवाद—उस समय धर्मराज श्रीयुधिष्ठिर अपने आत्मीय-जनोंके साथ यह परामर्श कर रहे थे कि किसी यज्ञ या विपत्तिके बहाने

श्रीकृष्णको बुलाकर उनका दर्शन किया जाय। किन्तु उसी समय द्वारपालके मुखसे श्रीनारदके आगमनका समाचार सुनकर उनके स्वागतके लिए स्वयं धर्मराज अपनी माता, पत्नी और भाइयोंके सहित उठ खड़े हुए॥२–३॥

दिग्दर्शिनी टीका—यावदन्तः प्रविशति तावदेव धर्मराजेन श्रीयुधिष्ठिरेण, तथा तेन नर्त्तनादिप्रकारेण द्वारि प्राप्तमागतं तं नारदं निशम्य द्वारापालाधिकारितः श्रुत्वा भ्रात्रादिभिः सह उत्थितं मन्त्रणादासनाद्वेति द्वाभ्यामन्वयः। किं कुर्वता? स्वकैर्भ्रात्रमात्यादिभिः समं मन्त्रयता। किं कृष्णमानाय भीमादिप्रेषणेन द्वारकातो हस्तिनापुरमिदं प्रापय पश्यामः? इत्येतत्। कथं कस्यचिद्यागस्य अश्वमेधादियागस्य वेति तदर्थं शीघ्रागमना सम्भावनया, पक्षान्तरे विपदां दुष्टारिकुलविहिताभिभवादि रूपाणामापदं पातस्य पातनस्य विनाशनस्येत्यर्थः। यद्वा, अकस्मादागमनस्य तथापि तन्निरसनस्येत्येष एवार्थः पर्यवस्यति। मिषात् छलेन; वस्तुतस्तु तत्तदसद्भावेऽपि केवलं श्रीभगवद्दर्शनार्थमेव तत्तदुद्भावनात्। एवं तेषामश्वमेधादियज्ञविधानं तत्तदापद्गणस्वीकरणञ्च सर्वं श्रीकृष्ण–सन्दर्शन लाभायैवेति ध्वनितम्। इत्थं पूर्वोक्तप्रकारेणापि तदापदां द्वैविध्यं बोद्धव्यम्। कतिचित्तास्तेषां माहात्म्यविख्यापनाय भगवतैव प्रेर्षन्ते, कतिचिच्च भगवत्सन्दर्शनार्थं तैरेव स्वयमुत्थाप्यन्त इति। एवमन्येष्वपि भक्तेषूह्यम्॥२–३॥

भावानुवाद—जब श्रीनारदने नृत्य करते–करते अन्तःपुरके द्वारमें प्रवेश किया, तब धर्मराज श्रीयुधिष्ठिर अपनी माता, भाई आदि आत्मीयजनोंके साथ परामर्श कर रहे थे। क्या परामर्श कर रहे थे? अश्वमेध आदि यज्ञके अनुष्ठान अथवा दुष्ट शत्रुओंके आक्रमणसे आयी हुई विपत्तिके बहाने किसी भी प्रकारसे भीम आदिको भेजकर श्रीकृष्णको द्वारकासे हस्तिनापुरमें बुलाकर उनका दर्शन किया जाय। किन्तु अश्वमेध आदि यज्ञकी बात सुनकर उनका शीघ्रतापूर्वक आना असम्भव है। पक्षान्तरमें शत्रुओंके आक्रमणसे उत्पन्न विपत्ति तथा हमारी हारका संवाद भेजनेसे वे शीघ्र आ जायेंगे। उसी समय अचानक द्वारपालके मुखसे नृत्य करते हुए श्रीनारदके आगमनका समाचार सुनकर धर्मराज श्रीयुधिष्ठिर उनके स्वागतके लिए अपनी माता, पत्नी और भाइयोंके साथ आसनसे उठ खड़े हुए।

वास्तवमें उस समय पाण्डवोंको किसी प्रकारके यज्ञ आदि अनुष्ठानकी कोई आवश्यकता नहीं थी और न ही किसी प्रकारकी विपत्ति आदिकी आशंका थी, फिर भी भगवान्के दर्शनोंके लिए वे

आपसमें परामर्श कर रहे थे। इससे यह भी ध्वनित होता है कि उनके द्वारा अश्वमेध आदि यज्ञानुष्ठान और विपत्तियोंका संवाद भेजना, सब कुछ श्रीकृष्णके दर्शनके लिए ही है। अतएव पूर्वोक्त प्रकारकी विपत्तियाँ भी दो प्रकारकी हैं। कुछ विपत्तियाँ तो जगतमें उनकी महिमाको विख्यात करनेके लिए स्वयं भगवान्के द्वारा भेजी जाती हैं और कुछ उनकी अपनी इच्छाकृत होती हैं अर्थात् श्रीभगवान्के दर्शन करनेके लिए वे स्वयं ही उनका सृजन करते हैं। किन्तु यहाँ पर अन्य भक्तोंसे सम्बन्धित वैसी विपत्तियोंकी बात अव्यक्त रही॥२-३॥

ससम्भ्रमं धावता तु सोऽभिगम्य प्रणम्य च।
सभामानीय सत्पीठे प्रयत्नादुपवेशितः॥४॥
राज्ञा पूजार्थमानीतैः पूर्ववद्द्रव्यसञ्चयैः।
मातस्त्वच्छ्वशुरानेव सभृत्यानार्चयत् स तान्॥५॥

श्लोकानुवाद—धर्मराज श्रीयुधिष्ठिरने उत्साह सहित दौड़कर श्रीनारदको प्रणाम किया तथा उनको आदरपूर्वक सभामें लाकर उन्हें बड़े यत्नपूर्वक उत्तम आसन पर बैठाया। तदुपरान्त जो सब द्रव्य धर्मराज श्रीयुधिष्ठिर श्रीनारदकी पूजाके लिए लाये थे, हे माता! श्रीनारद उन्हीं समस्त द्रव्योंके द्वारा आपके श्वसुर श्रीयुधिष्ठिर तथा उनके सेवकोंकी पूजा करने लगे॥४-५॥

दिग्दर्शिनी टीका—स च नारदः अभिगम्य पुरोभूय गृहीत्वा; प्रणम्य साष्टाङ्गं नत्वा। धर्मराजेनेत्यनुवर्त्तत एव तथापि राज्ञेति पुनः प्रयोगो विचित्रासंख्यपूजाद्रव्यसद्यः-सम्पादनशक्तिबोधनार्थम्। यथापूर्वं, महामुनेः पूजार्थमानीतैरेव न तु समर्पितैः। यावत्ते तैस्तस्य पूजां कर्त्तुमारभेरन् तावदेवेत्यर्थः। तान् युधिष्ठिरादीन् भृत्यसहितान् स महामुनिरार्चयत् पूजयामास। त्वच्छ्वशुरानिति तेषां सम्बन्धेन तस्या अपि तादृशं माहात्म्यं ध्वनयति। हे मातरिति परमाश्चर्येण सम्बोधनम्॥४-५॥

भावानुवाद—महाराज श्रीयुधिष्ठिर उत्साहके साथ दौड़ते हुए श्रीनारदके समक्ष उपस्थित हुए तथा उन्हें दण्डवत् प्रणाम किया। श्रीनारदने भी उनको प्रणाम किया। फिर महाराज श्रीयुधिष्ठिरने पूर्वकी भाँति श्रीनारदकी पूजाके लिए विविध-प्रकारकी पूजन-सामग्रियोंको

मँगवाया। यहाँ पर 'राज्ञा' शब्दके पुनः प्रयोग द्वारा तत्क्षणात् अनेक प्रकारकी विचित्र–विचित्र पूजन–सामग्री प्रस्तुत करनेकी उनकी असाधारण शक्ति सूचित हो रही है। महाराजने पूजनकी सारी सामग्रियोंको मँगवाया, किन्तु समर्पण नहीं किया। किन्तु उन पूजन सामग्रियोंके द्वारा जैसे ही महाराज श्रीयुधिष्ठिर श्रीनारदकी पूजा करनेके लिए प्रवृत्त हुए, उसी समय हे माता! श्रीनारद उन्हीं पूजन–सामग्रियोंसे महाराज श्रीयुधिष्ठिर आदि आपके श्वसुरों तथा उनके सेवकोंकी पूजा करने लगे। 'आपके श्वसुर' इस सम्बन्धके कारण श्रीउत्तरादेवीकी भी पाण्डवोंके समान महिमा सूचित हो रही है॥४–५॥

हनूमद्गदितं तेषु कृष्णानुग्रहवैभवम्।
मुहुः संकीर्त्तयामास वीणागीत विभूषितम्॥६॥

श्लोकानुवाद—पाण्डवोंके प्रति श्रीकृष्णके अनुग्रहकी महिमाके विषयमें श्रीहनुमानने जिस प्रकार वर्णन किया था, श्रीनारद उसीका वीणाकी झंकारके साथ बारम्बार अत्यधिक मधुर स्वरसे संकीर्त्तन करने लगे॥६॥

दिग्दर्शिनी टीका—तेषु पाण्डवेषु यः कृष्णस्यानुग्रहस्तस्य वैभवं विस्तारं महत्त्वं वा। वीणागीतेन विभूषितं यथा स्यात्तथा वीणां मध्ये मध्ये वादयन् तया तद्गायंश्च परम–मधुर–प्रकारेण संकीर्त्तयामासेत्यर्थः॥६॥

भावानुवाद—श्लोकानुवाद द्रष्टव्य है॥६॥

श्रीनारद उवाच—

यूयं नृलोके वत भूरिभागा, येषां प्रियोऽसौ जगदीश्वरेशः।
देवो गुरुर्बन्धुषु मातुलेयो, दूतः सुहृत् सारथिरुक्तितन्त्रः॥७॥

श्लोकानुवाद—श्रीनारदने कहा—इस नरलोकमें आपलोग ही परम सौभाग्यशाली हैं, क्योंकि जगदीश्वरोंके भी ईश्वर भगवान् श्रीकृष्ण आपके प्रिय, इष्टदेव, गुरु, बन्धुओंमें ममेरे भाई, दूत, सारथी, मित्र और आज्ञाकारी सेवक हैं॥७॥

दिग्दर्शिनी टीका—तदेवाह—यूयमित्यादिना भवतां कृते परमित्यन्तेन। नृलोक इति महाभोगैश्वर्यास्पदस्वर्गादौ वैराग्याद्यभावेन स्वत एव भगवदनुग्रहविशेष–प्राप्त्ययोगात्।

भूरिर्महत्तापरमकाष्ठाप्राप्तः भागः भगवदनुग्रहभरप्रापकभक्तिविशेषलक्षणं भागधेयं भजनमेव वा। यद्वा, भगवदनुग्रहविशेषे अंशो येषां ते। तत्र हेतुः—येषां युस्माकमसौ श्रीदेवकीनन्दनः प्रियः प्रियताविषयः। कथम्भूतोऽसौ? जगदीश्वराणां ब्रह्मरुद्रादीनामपीशः नियन्ता, अनेन भूरिभागत्वमेव साधितम्। किञ्च, न केवलं प्रिय एव, देवश्च नित्योपास्यः सर्वापत्सु रक्षक इत्यर्थः। गुरुश्च साक्षात् सर्वोपदेशकर्त्ता। बन्धुषु जन्मादिसम्बन्धबद्धेषु बान्धवेषु मध्ये वर्त्तमानश्च बन्धुरित्यर्थः। तत्रापि मातुलेयः लोके मातुलेयपैतृस्वसेय-भ्रातृणामन्योन्यं सौहृदविशेषदर्शनात् परमस्नेहविषय इत्यर्थः। यद्वा, बन्धुषु मध्ये मातुलेयो मातृसम्बन्धेन परमस्निग्ध इत्यर्थः। दूतश्च उपप्लवाख्य-विराटनगराद्धस्तिनापुरे दुर्योधन-सदसि प्रेषणात्; सुहृच्च प्रत्युपकारानपेक्षकतया निरुपाधिपरम-हिताचरणपरः; सारथिश्च भारतयुद्धादावर्जुनस्य रथयोजनाश्वग्रहणादिना। उक्तितन्त्रश्च वचन प्रतिपालनपरः; *'उभयोः सेनयोर्मध्ये रथं स्थापय मेऽच्युत।'* (श्रीगीता १/२१) इत्याद्यर्जुनवचसेतस्ततः सद्यो रथनयनात्। यद्वा, एवमुक्तितन्त्र इत्युपसंहारः; यद्वा, किमन्यद्बहु वक्तव्यं, उक्तितन्त्रोऽपि। यदा भवन्तो यदाज्ञापयन्ति, तदैव तदा स इव निष्पादयतीत्यर्थः। अथवा उक्तितन्त्रशब्देन सेवक एवोच्यते, स्पष्टतया तथानुक्तिश्च श्रवणकटुकत्वात्। ततश्चैवं हनूमदुक्तसेवन-वीरासनादिकमपि सूचितं भवति; एवं देवत्वादिना प्रियत्वमेव साधितमित्यपि ज्ञेयम्; यद्वा, प्रिय इत्यस्य सर्वेणैवान्वयः, ततश्च प्रियो देवः इष्टदेवता प्रेमभरेण नित्यमुपास्य इत्यादिकं यथायथमूह्यम्; एवमर्जुनादिसेवित-श्रीरुद्रद्रोणादि व्यवच्छेदो द्रष्टव्यः। प्रियत्वञ्च सर्वत्रैवान्तर्भूतमिति परमप्रियताविषयत्वञ्च स्वत एव सिध्येदिति दिक्। अयं भावः;—ब्रह्म-रुद्रादीनां केवलमीश्वर एव युस्माकं च प्रिय इत्यादिरूपः। यद्वा, नियन्तृत्वात्तैः केवलमीश्वर त्वेनोपास्यते, युस्माकन्तु प्रियो देवस्तथापि गुरुः; एवमग्रेऽपि अतस्तेभ्योऽपि यूयं श्रेष्ठा इति॥७॥

भावानुवाद—श्रीनारद द्वारा पाण्डवोंके प्रति श्रीकृष्णके अनुग्रहकी महिमाके गानको 'यूयं' इत्यादि श्लोक संख्या ७से आरम्भ करके 'भवतां कृते परम' श्लोक संख्या ४४ तक विस्तारपूर्वक कहा गया है। इस नरलोकमें आपलोग ही सौभाग्यशाली हैं। यहाँ 'नृलोक' शब्दके प्रयोगसे कोई यह न समझे कि केवल नृलोक अर्थात् नरलोकमें ही भूरि भाग्यवान लोग हैं, परन्तु स्वर्ग आदि लोकोंमें इनसे भी अधिक सौभाग्यशाली अनेक व्यक्ति हैं। इसलिए कह रहे हैं कि अत्यधिक भोग और ऐश्वर्य-सम्पत्तिसे भरपूर स्वर्ग आदि लोकोंमें वैराग्य आदिके अभावके कारण स्वाभाविकरूपमें ही भगवान्‌की कृपा-प्राप्तिकी उपयोगिता नहीं है। 'भूरिभाग्य' पदके 'भूरि' शब्दका अर्थ महत् अथवा पराकाष्ठा

(चरम सीमा) प्राप्त है तथा 'भाग्य' शब्दका अर्थ है जिसके द्वारा पूर्ण रूपमें भगवान्‌की कृपाकी प्राप्ति होती है, वैसे भक्ति-लक्षणसे युक्त भाग्य अथवा भगवान्‌का भजनरूप भाग्य। अतएव उसी भगवत्कृपाको प्राप्त करानेवाली भक्तिके लक्षणसे युक्त भाग्यकी चरमसीमाका नाम भूरिभाग्य है। अथवा 'भूरिभाग्य' पदका तात्पर्य यह है कि भगवान्‌की कृपामें जिनको अंश प्राप्त है अथवा जो भगवान्‌की कृपाके अंशीदार हैं, अतः पाण्डवगण ही भूरि भाग्यवान हैं। उसका कारण बताते हुए कह रहे हैं कि ब्रह्मा, रुद्र आदि ईश्वरोंके भी जो ईश्वर हैं, वे श्रीदेवकीनन्दन आप लोगोंके प्रिय हैं। इसके द्वारा पाण्डवोंका भूरिभाग्यत्व सिद्ध हुआ।

श्रीनारद और भी कह रहे हैं कि श्रीदेवकीनन्दन आप लोगोंके केवल प्रिय ही नहीं हैं, अपितु इष्टदेव, गुरु और बान्धव भी हैं। 'इष्टदेव' अर्थात् नित्य उपास्य तथा सब प्रकारकी विपत्तियोंसे रक्षा करनेवाले। 'गुरु' अर्थात् साक्षात्‌रूपमें सब प्रकारके उपदेशदाता हैं। 'बान्धव' अर्थात् जन्म आदि सम्बन्धके कारण बान्धव हैं और मातुलेय अथवा मातृसम्बन्धसे सम्बन्धित कुटुम्बी हैं। अर्थात् माता जैसे स्नेहमयी होती हैं, श्रीकृष्ण भी वैसे ही परम स्निग्ध हैं और 'बन्धु' शब्दसे भी जन्म आदि सम्बन्धसे बन्धु तथा वैसे बन्धुओंमें भी मातुलेय अथवा बुआके पुत्र-सम्बन्धसे भ्राता हैं। इस प्रकार भ्रातृवत् परस्पर सौहार्द प्रदर्शनके कारण वे परम स्नेहके पात्र हैं। वे आपके दूत हैं, क्योंकि वे आपके पक्षसे दूतरूपमें उपप्लव नामक विराट नगरसे हस्तिनापुरमें दुर्योधनके महलमें भेजे गये थे। वे आपके सुहृद् हैं, क्योंकि उपकारके बदलेमें किसी भी प्रकारकी आशा न करके बिना किसी कारण ही आप लोगोंका हित करते हैं। वे आपके सारथी हैं, क्योंकि उन्होंने महाभारतके युद्धमें अर्जुनके रथमें घोड़ोंकी लगामको धारणकर रथकी परिचालनाकी थी। वे आपके आज्ञाकारी सेवक हैं, क्योंकि युद्धके समय जब अर्जुनने कहा था—"हे अच्युत! मेरे रथको दोनों सेनाओंके बीचमें ले चलो।" इस आदेशको सुनकर तत्क्षणात् श्रीकृष्णने रथको दोनों सेनाओंके बीचमें लाकर खड़ा किया था। इस प्रकार उनके आज्ञाधीन सेवक होनेके प्रसंगका उपसंहार

करते हुए कह रहे हैं कि और अधिक क्या कहूँ; वे आपके आज्ञाकारी सेवक हैं, क्योंकि आपलोग जिस समय जैसा आदेश देते हैं, वे उसी समय उस आदेशका पालन करते हैं। अथवा यहाँ 'उक्तितन्त्र' शब्दसे सेवकको समझना चाहिए, क्योंकि श्रीकृष्णके लिए 'सेवक' शब्दका व्यवहार सुननेमें अत्यधिक कटु लगता है, इसलिए स्पष्टरूपमें 'सेवक' शब्दका उल्लेख न करके 'उक्तितन्त्र' शब्द प्रयोग कर रहे हैं। इसके द्वारा श्रीहनुमान द्वारा कही गयी सेवक और वीरासन आदिकी बात भी सूचित हुई है।

इस प्रकार मूल श्लोकके 'देवो गुरु' इत्यादि वाक्योंमें भी प्रियत्व ही सिद्ध हुआ है; अथवा 'प्रिय' शब्दका सभी पदोंके साथ अन्वय करके ही अर्थ करना होगा, जैसे प्रिय देवता, प्रिय गुरु इत्यादि। 'प्रिय देवता' अर्थात् प्रिय इष्टदेव, जो प्रीतिपूर्वक नित्य उपास्य हैं। इस प्रकार अर्जुन आदि द्वारा देवतारूपमें सेवित रुद्र तथा गुरुरूपमें सेवित द्रोणाचार्य आदिकी बातका खण्डन हुआ। अर्थात् किसी विशेषकार्यकी सिद्धिके लिए ही अर्जुनने कभी रुद्रदेवकी आराधना की थी और द्रोणाचार्यको गुरुके रूपमें सम्मानित किया था। किन्तु श्रीरुद्रकी तुलनामें श्रीकृष्ण ही उनके प्रियदेवता हैं तथा द्रोणाचार्यके स्थान पर श्रीकृष्ण ही उनके प्रिय गुरु हैं। इस प्रकार 'प्रिय' शब्दका सभी पदोंके साथ अन्वय करने पर स्वाभाविकरूपमें यही सिद्ध होता है कि श्रीकृष्ण ही उनके परम प्रिय हैं। अतएव सारार्थ यह है कि ब्रह्मा–रुद्र आदि केवल ईश्वर हैं और ये (श्रीदेवकीनन्दन) आप लोगोंके प्रिय ईश्वर हैं। अथवा ब्रह्मा–रुद्र आदि केवल नियन्ता रूपमें ही उपास्य हैं और श्रीकृष्ण प्रिय इष्टदेवके रूपमें उपास्य हैं। इसके अलावा और भी घनिष्ठ सम्बन्ध यह है कि ये गुरु हैं। इसी प्रकार पहले ही यह सब विचार किया जा चुका है, अतएव नरलोकमें आप ही सबसे अधिक सौभाग्यवान हैं॥७॥

यो ब्रह्मरुद्रादिसमाधिदुर्लभो, वेदोक्तितात्पर्यविशेषगोचरः।
श्रीमान् नृसिंहः किल वामनश्च श्रीराघवेन्द्रोऽपि यदंशरूपः॥८॥

श्लोकानुवाद—उन भगवानके दर्शन ब्रह्मा-रुद्र आदि देवताओंको समाधिमें भी दुर्लभ हैं, वे वेदोंके निखिल तात्पर्यके विषय हैं तथा श्रीनृसिंहदेव, श्रीवामन और श्रीरामचन्द्र आदि अवतार भी उनके अंश स्वरूप हैं॥८॥

दिग्दर्शिनी टीका—ननु श्रीदेवकीनन्दनस्य प्रियत्वादिना अस्माकं माहात्म्यं तदा भवति। यद्यसौ निगूढ़ो दुर्लभतरः स्यात्, स चास्मादृशानां गृहेषु सदा सुलभः सम्बन्धीति किमित्यतिस्तुतिः क्रियते? इत्याशंका तस्यात्यन्तदौर्लभ्यादि-परममहिमानमाह—य इत्यादिना चित्रताचित्तेत्यन्तेन ग्रन्थेन। तत्रादौ परमदुलर्भत्वं दर्शयति—श्लोकार्धेन; ब्रह्म-रुद्रादीनां समाधावपि दुर्लभः। कुतः? वेदानामुक्तयो वचनानि तेषामपि यत्तात्पर्यं न तु साक्षाद्वृत्तिः तस्यापि विशेषः कोऽपि सारांशः तस्यैव गोचरः, न तु अतन्निरसनद्वारा ब्रह्मवत्तात्पर्यमात्रस्य विषय इत्यर्थः, श्रीकृष्णस्य मधुरमधुर-सच्चिदानन्दघनरूपत्वात्। ननु तर्हि श्रीनृसिंहादयोऽपीदृशा एवेत्याशंक्य तेभ्योऽपि वैशिष्ट्यमाह—श्रीमानिति पादत्रयेण; श्रीमानित्यनेन नृसिंहस्य परमभयंकररूपत्वेऽपि तथा वामनस्य ह्रस्वत्वेऽपि परमविचित्रशोभोद्दिष्टा। अयमर्थः—स्वभक्त-वात्सल्यात्तादृशरूपत्वेन स्तम्भमध्यादाविर्भूतो नृसिंहदेवस्तथा पादद्वयाक्रान्तत्रैलोक्यः वलये विश्वरूपप्रदर्शकस्त्रिविक्रमो वामनश्च। तथा साक्षाद्भगवान् श्रीराघवेन्द्रः श्रीरामचन्द्रोऽपि यस्य देवकीनन्दनस्य अंशरूपः अवतारतुल्यः, साक्षाद् भगवत्वेऽप्यनाविस्कृताशेष-पारमैश्वर्यत्वेन अवतारवत् प्रतीतेः। किलेति, *'एते चांश कलाः पुंसः कृष्णस्तु भगवान् स्वयम्।'* (श्रीमद्भा॰ १/३/२८) इत्यादि प्रसिद्धं प्रमाणयति; इत्थं श्रीनृसिंह-श्रीवामन-रघुनाथसेवकेभ्यः श्रीप्रह्लाद-बलि हनूमद्भयोऽपि पाण्डवानां माहात्म्यं सुसिद्धम्॥८॥

भावानुवाद—यदि आपत्ति हो कि हमारे प्रिय, इष्ट आदि होने पर भी वे (श्रीदेवकीनन्दन) तो अति निगूढ़ और दुर्लभ परब्रह्मस्वरूप हैं, अतएव हमारे जैसे मनुष्योंके घरमें वे सदैव वास क्यों करेंगे? इसके द्वारा यह समझा जा सकता है कि आप हमलोगोंकी अतिस्तुति कर रहे हैं, परन्तु ऐसा क्यों कर रहे हैं? इस प्रश्नकी आशंका करके श्रीनारद पहले श्रीदेवकीनन्दनकी परमदुर्लभता आदिको प्रदर्शित कर रहे हैं। उनके दर्शन ब्रह्मा-रुद्र आदि देवताओंको समाधिमें भी दुर्लभ हैं। क्यों? वे केवल वेद-वाक्योंके निखिल तात्पर्यके विषय हैं, किन्तु साक्षात्‌रूपमें नहीं, अर्थात् वेद-वाक्योंकी तात्पर्य वृत्ति द्वारा वे ब्रह्मा आदिके अनुभवके विषय होते हैं, किन्तु साक्षात्‌रूपमें नहीं। साक्षात्‌रूपमें वे वेदोंके द्वारा भी अगोचर हैं।

ये देवकीनन्दन श्रीकृष्ण परममधुर सच्चिदानन्दघन-स्वरूप हैं। ब्रह्मकी भाँति केवल चिन्मात्र सत्ता नहीं हैं, अतएव ये वेदोंकी साक्षात् वृत्ति द्वारा गोचर नहीं हैं। यदि कहो, तो क्या श्रीनृसिंह, श्रीवामन इत्यादि भी ऐसे ही हैं? ऐसी आशंकाके कारण उनकी तुलनामें श्रीकृष्णका वैशिष्ट्य-प्रदर्शन करनेके लिए 'श्रीमान्' इत्यादि कह रहे हैं। श्रीनृसिंह, श्रीवामन और श्रीरामचन्द्रजी भी उनके ही अंश हैं, अतएव ये सभी सच्चिदानन्दघन-स्वरूप हैं, किन्तु इन भगवदवतारोंकी तुलनामें श्रीकृष्णका अधिक वैशिष्ट्य है। जैसे श्रीमान् नृसिंहदेव परम भयंकर रूपमें भी अनेक प्रकारकी शोभासे युक्त हैं तथा श्रीवामनदेव अत्यन्त लघु-स्वरूप होने पर भी परम विचित्ररूपसे शोभायमान हैं। तात्पर्य यह है कि श्रीनृसिंहदेव अपने भक्तके प्रति वात्सल्यवशतः कृपापूर्वक स्तम्भसे आविर्भूत हुए थे और श्रीवामनदेव भी अपने भक्तके प्रति कृपा करके दो पगसे त्रिलोकको नापकर विश्वरूप-प्रदर्शक त्रिविक्रम मूर्त्तिको धारण किये थे। साक्षात् भगवान् श्रीरामचन्द्र भी श्रीदेवकीनन्दनके अंशावतार हैं। यद्यपि श्रीरामचन्द्रजी साक्षात् भगवान् हैं, तथापि उन्होंने इस अवतारमें अपने असीम ऐश्वर्यका प्रकाश नहीं किया, इसलिए वे अवतार जैसे ही प्रतीत होते हैं। श्रीकृष्ण ही सभीके अवतारी हैं; यथा—"पूर्वोक्त सभी अवतार पुरुषोत्तम भगवान्के अंश या कला हैं, किन्तु सर्वशक्तिमान होनेके कारण श्रीकृष्ण ही स्वयं भगवान् हैं।" इत्यादि प्रसिद्ध प्रमाणों द्वारा श्रीनृसिंहदेव, श्रीवामनदेव और श्रीरामचन्द्रके सेवक यथाक्रमसे श्रीप्रह्लाद महाराज, श्रीबलि महाराज और श्रीहनुमानसे भगवान् श्रीकृष्णके सेवक पाण्डवोंका अधिक माहात्म्य सिद्ध होता है॥८॥

अन्येऽवताराश्च यदंशलेशतो ब्रह्मादयो यस्य विभूतयो मताः।
माया च यस्येक्षणवर्त्मवर्तिनी दासी जगत्सृष्ट्यवनान्तकारिणी॥९॥

श्लोकानुवाद—अन्यान्य सभी अवतार श्रीदेवकीनन्दनके अंशके लेशमात्र हैं, ब्रह्मा आदि देवगण उनकी विभूतियाँ हैं, जगतकी सृष्टि-स्थिति-प्रलयकारिणी माया उनके संकेतके अनुसार उनकी आज्ञाका पालन करती हैं॥९॥

दिग्दर्शिनी टीका—अन्ये मत्स्य-कूर्मादयो यस्य अंशतस्तल्लेशतश्च पृथ्वादय इति ज्ञेयम्; अतो ब्रह्मादयोऽपि यस्य देवकीनन्दनस्य विभूतयः वैभवरूपाः सेवका इत्यर्थः न तु लीलावतारा मताः शास्त्रतत्त्वविद्भिः। यथोक्तं नारदं प्रति ब्रह्मणैव द्वितीयस्कन्धे (श्रीमद्भा॰ २/६/४३-४६)—*'अहं भवो यज्ञ इमे प्रजेशा, दक्षादयो ये भवदादयश्च। स्वर्लोकपालाः खगलोकपाला, नृलोकपालास्तललोकपालाः॥ गन्धर्व-विद्याधरचारणेशा, ये यक्षरक्षोरगनागनाथाः। ये वा ऋषीणामृषभाः पितृणां, दैत्येन्द्रसिद्धेश्वर दानवेन्द्राः॥ अन्ये च ये प्रेतपिशाचभूत, कुष्माण्ड-यादोमृगपक्ष्यधीशाः। यत्किञ्च लोके भगवन्महस्वदोजः सहस्वद्बलवत् क्षमावत्। श्रीह्रीविभूत्यात्मवदद्भूतार्णं, तत्त्वं परंरूपवद्स्वरूपम्॥ प्राधान्यतो यानृष आमनन्ति, लीलावतारान् पुरुषस्य भूम्नः। आपीयतां कर्णकषायशोषान्, अनुक्रमिष्ये त इमान् सुपेशान्॥'* इति। व्याख्यातञ्च श्रीधरस्वामिपादैः—'अहं ब्रह्मा, भवः श्रीरुद्रः, यज्ञो विष्णुः, दक्षादयो ये इमे प्रजेशाः, भवदादयश्च नैष्ठिकाः, तललोकपालाः पातालाधिपतयः, गन्धर्वादीनामीशाः, यक्षादीनां नाथाः रक्षोरगेति सन्धिरार्षः; ऋषीणां पितृणाञ्च श्रेष्ठाः; प्रेतादीनामधीशाः, किं बहुना, यत् किञ्चित् भगवदादि तत् सर्वं परमं तत्त्वं तद्विभूतिरित्यर्थः। तत्र भगवदैश्वर्ययुक्तं, महस्वत्तेजोयुक्तं, ओजःसहसी इन्द्रियमनःशक्ती तद्युक्तम्; बलं दार्ढ्यं तद्युक्तम्, श्रीः शोभा, ह्रीरकर्मजुगुप्सा, विभूतिः सम्पत्तिः, आत्मा बुद्धिस्तद्युक्तम्, अर्णो वर्णः, अद्भुतार्णम् आश्चर्यवर्णमित्यर्थः, रूपमेव स्वरूपम्, रूपवत् अस्वरूपञ्च यत् तत् सर्वं परं तत्त्वं तद्विभूतिरित्यर्थः।' एवं श्रीभगवद्गीता विभूत्यध्यायोक्तानुसारेण गुणावतारानपि विभूतिषु गणयित्वा अधुना सच्चिदानन्दघनलीलावतारान् वक्तुमाह—प्राधान्यत इति; अन्येऽप्यप्रसिद्धाः क्षुद्रावतारा बहवः सन्ति, इमांश्च मुख्यान् तेऽनुक्रमेण कथयिष्यामीत्यर्थः। तथा च प्रथमस्कन्धे (श्रीमद्भा॰ १/३/२६)—*'अवतारा ह्यसंख्येयाः हरेः सत्त्वनिधेर्द्विजाः। यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः॥'* इति। अस्यार्थः—सत्त्वमत्र परमकारुण्यम्; अतएवासंख्येया अवताराः अविदासिनः उपक्षयशून्यात् सरसः सकाशात् कुल्याः क्षुद्रप्रवाहा इवेति। यद्यपि ब्रह्मादयस्त्रयो गुणावतारा एव, न तु विभूतयस्तथापि श्रीभगवद्भक्तिप्रवर्त्तनात् भक्तसादृश्येन श्रीब्रह्म-रुद्रौ विभूतिमध्येऽपि क्वचित् कथ्येते; तयोः साहचर्येण किम्वा प्रतिमन्वन्तर-मवतरतो भगवतो रूपस्यैकस्य मन्वन्तरपालनाधिकारा- पेक्षया यज्ञादिरूपः श्रीविष्णुरपि; तत्र च यद्यपि यज्ञो लीलावतार एव; यथोक्तं तेन तत्रैव (श्रीमद्भा॰ २/७/२) लीलावतारकथनाध्याये—*'जातो रुचेरजनयत् सुयमान् सुयज्ञ, आकूतिसुनुरमरानथ दक्षिणायाम्।'* इत्यादि। तथापि तस्य स्वायम्भुवमन्वन्तरपालनाधिकारापेक्षया तदानीन्तनेन्द्रत्वापेक्षया वा, विभूतिषु गणनेत्युह्यम्। मुख्यलीलावताराणां क्रमसंख्या च लीलास्तोत्रादवगन्तव्या। तेषां तद्विभूतित्वे हेतुं दर्शयन् सकलप्रपञ्चैश्वर्या मायाया अपि साक्षात्तत्प्राप्त्यभावेन पुनस्तस्यैव दुलर्भतामाह—मायेति। यस्य श्रीदेवकीनन्दनस्य

ईक्षणं दृष्टिः, तस्य वर्त्मनि अतिदूर इत्यर्थः। वर्तितुं शीलमस्याः सा, अतएव दासीतुल्यत्वात् दासी परमाधीनेत्यर्थः। कथम्भूता? जगतः सर्वप्रपञ्चस्य सृष्टि-स्थिति-संहारकारिण्यपि; अतस्तदधीनानां ब्रह्मादीनां स्वत एव परमदासत्वं सिद्धम्॥९॥

भावानुवाद—मत्स्य-कूर्म आदि अवतार श्रीदेवकीनन्दनके अंश हैं। पृथु आदि उनके अंशोंके भी अंश मात्र हैं और ब्रह्मा आदि देवता उनकी विभूति अथवा वैभव स्वरूप सेवकमात्र हैं, किन्तु लीलावतार नहीं हैं, यही शास्त्रोंको जाननेवाले साधुओंका मत है। इस विषयमें श्रीनारदके प्रति श्रीब्रह्माकी उक्तिमें भी अभिव्यक्त किया गया है। जैसे—"हे नारद! मैं, रुद्र, विष्णु, प्रजापतिगण, अन्य समस्त देवर्षि, स्वर्गलोकपाल, मनुष्यलोकपाल, पाताल आदि पाल, गन्धर्वपति, विद्याधरपति, चारणपति, यज्ञपति, उरगपति, नागपति, ऋषिश्रेष्ठ, पितृश्रेष्ठ, दैत्येन्द्र, सिद्धेश्वर, दानवेन्द्र, प्रेतपति, पिशाचपति, भूतपति, कुष्माण्डाधिपति, यादोपति, मृगराज, पक्षीराज और अधिक क्या, लोकमें जो कुछ ऐश्वर्यशाली, तेजशाली, इन्द्रियशक्ति-सम्पन्न, मनःशक्ति सम्पन्न, बलवान, क्षमावान, शोभाशाली, सम्पत्ति-सम्पन्न, लज्जाशील, बुद्धिमान, आत्मवत् अद्भुत रूपसम्पन्न अथवा विरूप आकृति-विशिष्ट जो सब वैभव देखे जाते हैं, वे परमपुरुष भगवान्‌की विभूति अथवा अवतार तत्त्व हैं। परन्तु उन परमपुरुषके अनेक प्रकारके अन्य जो सब लीला अवतार हैं, उनके नाम और चरित्र आदिके श्रवणसे कानोंका मल नष्ट हो जाता है। हे नारद! मैं उन अवतारोंका चरित्र कीर्त्तन कर रहा हूँ, तुम कर्णपुट (कानों)के द्वारा पान करो अर्थात् श्रवण करो।" इस श्लोककी व्याख्यामें श्रीधरस्वामीपाद लिखते हैं—"मैं (ब्रह्मा), रुद्र, विष्णु, दक्ष आदि प्रजापति, तुम्हारे जैसे नैष्ठिक ब्रह्मचारी, स्वर्ग-लोकपाल, भुवलोकपाल, भूलोकपाल, पाताल आदि लोकोंके पाल, गन्धर्व-अधिपति, विद्याधर अधिपति, चारणाधिपति, यक्षाधिपति, उरगगणपति, नागगणाधिपति, ऋषि और पितृगण, प्रेत-पिशाच-भूत-कुष्माण्ड-यादपति, मृग-पक्षी जैसोंके अधीश्वरगण और अधिक क्या, समस्त लोकोंमें जो सब ऐश्वर्ययुक्त है, अर्थात् तेजयुक्त, इन्द्रिय और मनकी शक्तिसे युक्त तथा बल, दृढ़ता, शोभा, अकर्म, जुगुप्सा, सम्पत्ति, बुद्धि, आश्चर्यसम्पन्न, रूपवान—ये सभी भूमा पुरुषकी विभूतियाँ हैं।"

इस प्रकार श्रीभगवद्‌गीताके विभूतियोग अध्यायके क्रमानुसार गुणावतारोंको विभूतिमें गणना करके, अब सच्चिदानन्दघन लीलावतारके विषयमें कहनेके लिए ही उद्धृत 'प्रधान्यत' इत्यादि श्लोक द्वारा कह रहे हैं कि उक्त क्रमके अनुसार प्रथमतः चतुःसन रूपमें ब्राह्मण होकर वही परमपुरुष आविर्भूत हुए थे। इस प्रकार लीलावतारोंके नामोंका वर्णन करनेमें प्रवृत्त होकर श्रीब्रह्माने यह भी कहा कि उन परमपुरुषके बहुतसे क्षुद्र-क्षुद्र अवतार हैं। किन्तु उनमें से प्रसिद्ध अर्थात् इन सभीमें मुख्य अवतारोंके विषयमें क्रमशः कीर्त्तन करूँगा। इस विषयमें प्रथम-स्कन्धमें कहा गया है—"हे द्विजगण! सत्त्वनिधि श्रीहरिके असंख्य अवतार हैं, उनका और अधिक क्या वर्णन करूँ? जैसे किसी एक अक्षय सरोवरसे असंख्य छोटी-छोटी जल-धाराएँ निकलकर अलग-अलग दिशाओंमें प्रवाहित होती हैं, उन सत्त्वनिधि भगवान्‌से भी उसी प्रकार अनेक अवतार आविर्भूत होते हैं।" इस उद्धृत श्लोकमें 'सत्त्व' शब्दसे परम कारुण्यशक्ति अर्थात् असंख्य अवतारोंके प्रादुर्भावकी शक्तिका बोध होता है। अतएव असंख्य अवतार ही नित्य हैं तथा सभी अवतार ही करुणावशतः जगतमें पुनः-पुनः अवतरित होते हैं। अक्षय सरोवरसे निकलनेवाली जलकी धाराएँ जैसे नित्य होती हैं, इस दृष्टान्तके अनुसार उन स्वयं-भगवान्‌के असंख्य अवतार भी उसी प्रकार नित्य हैं। अतएव उन सभी अवतारोंकी देह भी घनीभूत परमानन्द, सभी प्रकारके गुणोंसे युक्त तथा सभी प्रकारके दोषोंसे रहित हैं। यद्यपि श्रीब्रह्मा-विष्णु-रुद्र गुणावतार हैं—विभूति नहीं, तथापि ये भगवद्भक्तोंकी भाँति भगवद्भक्तिका प्रवर्त्तन करते हैं, इसलिए इनको कभी-कभी विभूति भी कहा जाता है। परन्तु श्रीविष्णुको गुणावतार अथवा विभूतिरूपमें गणना करने पर भी अथवा प्रति मन्वन्तरमें अवतरणकारी होनेसे अर्थात् श्रीभगवान्‌के मन्वन्तर पालन या अधिकार आदिकी आशासे यज्ञादिरूप अथवा श्रीविष्णुरूप होने पर भी वे लीलावतार हैं। लीलावतार वर्णनके प्रसंगमें कहा गया है, "वे प्रजापति रुचिसे आकुतिके गर्भमें सुयज्ञ नामसे जन्मग्रहण कर दक्षिणाके गर्भसे सुषम जैसे श्रेष्ठ देवताओंको उत्पन्न कर इन पुत्रोंके सहित स्वायम्भुव मन्वन्तरका पालन करते हैं।" वे यज्ञरूप भगवान् ही अब इस

मन्वन्तरमें स्वयं इन्द्र बने हैं। यद्यपि किसी–किसी स्थान पर उनको विभूति कहा गया है, तथापि वे लीलावतार हैं। अर्थात् मन्वन्तर पालनके अधिकारके विचारसे तथा उस समयमें उनके इन्द्रत्वके विचारसे उनका विभूतिरूपसे वर्णन किया गया है, वस्तुतः वे लीलावतार ही हैं। अतः मुख्य लीलावतारोंकी क्रम संख्या लीलास्तोत्र आदिसे समझनी होगी।

इस प्रकार उनके विभूति रूपमें परिगणित होनेके कारणको प्रदर्शित करके अब सभी प्रपञ्चोंकी ईश्वरी मायाके साक्षात् सम्बन्धसे श्रीकृष्णकी प्राप्तिके अभाव और दुर्लभता आदिको 'माया' इत्यादि पदों द्वारा दिखला रहे हैं। यह माया दासीकी भाँति श्रीदेवकीनन्दनके दृष्टिपथसे बहुत दूर स्थित है, यही मायाका स्वभाव है। अर्थात् दासी जैसे अपने प्रभुकी दृष्टिसे दूर रहकर ही कार्य करती है, उसी प्रकार मायाका स्वभाव जानना चाहिए। अतएव दासीके तुल्य होनेके कारण पराधीना है। वह माया कैसी है? जगतकी सृष्टि, स्थिति और प्रलय करनेवाली है, अतएव मायाके अधीन ब्रह्मा आदि देवताओंका भी स्वभावतः दास होना सिद्ध हुआ॥९॥

यस्य प्रसादं धरणीविलापतः क्षीरोदतीरे व्रतनिष्ठया स्थिताः।
ब्रह्मादयः कञ्चन नालभन्त स्तुत्वाप्युपस्थानपराः समाहिताः॥१०॥

श्लोकानुवाद—धरणीके विलापसे कातर होकर ब्रह्मादि देवताओं द्वारा क्षीरसागरके तट पर उपस्थित होकर पूर्ण निष्ठाके साथ व्रत, पूजा और एकाग्र चित्तसे स्तुति करने पर भी वे देवता भगवान्के दर्शन या अन्य किसी भी प्रकारसे उनकी कृपाकी प्राप्ति नहीं कर पाये थे॥१०॥

दिग्दर्शिनी टीका—समाधिदुर्लभत्वमेवेतिहासद्वारा किञ्चिद्दर्शयति—यस्येति। अपीति यथापेक्षं सर्वत्रैव योजनीयम्। धरण्या विलापतो हेतोः व्रतनिष्ठया वायुभोजनादि नियमपरतया क्षीरोदस्य लक्ष्मीपितुस्तीरे स्थिता अपि उपस्थानं अर्चनवन्दनादिकं तत्प्रवणा अपि समाहिताः तन्निष्ठीकृतबहिरन्तःकरणा अपि सन्तः स्तुत्वा पुरुषसूक्तादिना स्तुतिं कृत्वा कञ्चन दर्शनाश्वासनादिरूपं प्रसादमपि नालभन्त, कुतस्तं प्राप्नुयूरित्यर्थः। इदञ्च दशमस्कन्धारम्भे सुप्रसिद्धमेव॥१०॥

भावानुवाद—पिछले श्लोकमें कहा गया है कि वे श्रीकृष्ण ब्रह्म-रुद्रादि देवताओंको समाधिमें भी दुर्लभ हैं, अब उसीका इतिहास द्वारा (उदाहरण द्वारा) वर्णन कर रहे हैं। धरणी देवीके विलापको सुनकर ब्रह्मा आदि देवताओं द्वारा कातर होकर निष्ठापूर्वक व्रताचरण करके अर्थात् केवल वायुभोजनका नियम पालन करते हुए, क्षीरसागरके तट पर वास करके, अर्चन-वन्दन आदिमें रत होकर, बाह्य और अन्तर इन्द्रियोंको निरोधकर (विषयोंसे हटाकर), एकाग्र चित्तसे पुरुषसूक्त आदि मन्त्रों द्वारा स्तुति करने पर भी, वे प्रभुके दर्शन अथवा किसी भी प्रकार उनके आश्वासन आदि रूप कृपाको भी प्राप्त नहीं कर पाये, साक्षात् प्रभुको प्राप्त करना तो बहुत दूरकी बात है। यह सुप्रसिद्ध उपाख्यान दशम-स्कन्धमें द्रष्टव्य है॥१०॥

ब्रह्मणैव समाधौ खे जातामधिगतां हृदि।
यस्य प्रकाश्यतामाज्ञां सुखिता निखिलाः सुराः॥११॥

श्लोकानुवाद—केवल श्रीब्रह्मा ही समाधिमें अपने हृदयरूपी आकाशमें आविर्भूत दैव-वाणीके रूपमें उनकी आज्ञासे अवगत हुए थे तथा उस प्रसिद्ध आज्ञाको प्रकाश करके उन्होंने देवताओंको सन्तुष्ट किया था॥११॥

दिग्दर्शिनी टीका—ननु तदुपस्थानादिकं न कदापि वैफल्यमर्हति। सत्यं, तेषां प्रार्थनायाः परमगरिष्ठत्वेन द्रुतसिद्धेरसम्भवादिति वदन् परमदौर्लभ्यमेवाह—ब्रह्मणैवेति। यस्य जगदीश्वरेशस्य तां सुप्रसिद्धामाज्ञाम्। *'पुरैव पुंसावधृतो धराज्वरो, भवद्भिरंशै-र्यदुषूपजन्यताम्। स यावदुर्व्या भरमीश्वरेश्वरः, स्वकालशक्तया क्षपयंश्चरेद्भुवि॥ वसुदेवगृहे साक्षाद् भगवान् पुरुषः परः। जनिष्यते तत्प्रियार्थं सम्भवन्त्वमरस्त्रियः॥ वासुदेव कलानन्तः सहस्रवदनः स्वराट्। अग्रतो भविता देवो हरेः प्रियचिकीर्षया॥ विष्णोर्माया भगवती यया सम्मोहितं जगत्। आदिष्टा प्रभुणांशेन कार्यार्थे संभविष्यति॥'* (श्रीमद्भा॰ १०/१/२२-२५) इत्यत्रोद्दिष्टाम्। ब्रह्मणैव केवलमधिगतां ज्ञानद्वारात्म-साक्षात्कृताम्; तत्रापि समाधौ बहिरिन्द्रियवृत्तिप्रत्याहारेण मनस एकाग्रतायां सत्याम्; तत्रापि खे आकाशे जातामार्विभूताम् आकाशवाणीरूपां, न तु साक्षाद्दृष्ट-वक्तृकामित्यर्थः। प्रकाश्य परमनिगूढ़ामपि देवान् प्रति प्रकाशं नीत्वेत्यर्थः। सुखिताः सुखिनः कृताः॥११॥

भावानुवाद—यदि कहो कि भगवान्‌का अर्चन आदि कभी भी विफल नहीं हो सकता है। इसके लिए कहते हैं कि यह सत्य है, किन्तु उनके प्रति प्रार्थनाओंके अत्यधिक महत्वपूर्ण होने पर भी उन्हें प्रसन्न करना सहज नहीं है, अतः ऐसी प्रार्थनाओंका शीघ्र ही सिद्ध होना असम्भव है। इस विचारको पूर्व श्लोकमें वर्णन करके अब भगवान्‌की परमदुर्लभताकी बात कह रहे हैं। श्रीब्रह्मा समाधिमें आकाशवाणी श्रवण करके देवताओंको कहने लगे, "हे देवताओं! मैंने भगवान्‌के आदेशको श्रवण किया है, तुमलोग कोलाहल बन्दकर उसे श्रवण करो और शीघ्र ही उनकी आज्ञाका पालन करो। (यह कहकर श्रीब्रह्माने श्रीभगवान् द्वारा कहे गये वचनोंको सुनाया।) तुम्हारे निवेदन करनेसे पहले ही पुरुष (श्रीभगवान्) धरणीदेवीके विलापके विषयमें जानते हैं; (यहाँ श्रीक्षीरोदकशायीके लिए कथित 'पुरुष' शब्दसे भगवान् श्रीकृष्णको समझना चाहिए) तुमलोग अपने-अपने अंशसे यदुवंशियोंके पुत्र-पौत्रादि रूपमें जन्म ग्रहण करो तथा जब तक वे परमेश्वर (श्रीकृष्ण) कालशक्ति द्वारा पृथ्वीका भार हरण करनेके लिए पृथ्वी पर प्रकट होकर विहार करेंगे, तब तक तुमलोग भी (यहाँ पर 'तुमलोग भी' अर्थात् क्षीरोदकशायी विष्णु सहित देवतागण) यदुकुलमें अवस्थान करो। परमपुरुष साक्षात्-भगवान् श्रीकृष्ण शीघ्र ही श्रीवसुदेवके घरमें आविर्भूत होंगे। उनको प्रसन्न करनेके लिए देववधुएँ भी धरणी तल पर जन्म ग्रहण करें। उन्हीं श्रीवासुदेवके अंश सहस्रवदन स्वराट् अनन्तदेव भी भगवान्‌की प्रसन्नताके लिए उनसे पहले ही आविर्भूत होंगे। भगवती विष्णुमाया जो जगतको मोहित करती हैं, वे भी भगवान्‌के आदेशसे कार्यसिद्धिके लिए श्रीयशोदाके गर्भसे अंश रूपमें आविर्भूत होंगी।" श्रीभगवान्‌के इस आदेशको श्रीब्रह्मा केवल बुद्धि-वृत्तिकी प्रेरणासे अपने हृदयमें समाधि-अवस्थामें ही अवगत हुए थे। अर्थात् बाह्य इन्द्रियोंको वशीभूत करके केवल मनकी एकाग्रता द्वारा आकाशवाणी रूपमें इस आदेशको प्राप्त किये थे, किन्तु वक्ताका दर्शन प्राप्त नहीं कर पाये थे। अपने हृदयरूपी आकाशमें आविर्भूत उस दैववाणी रूप परम निगूढ़ आज्ञाको प्रकाश करके श्रीब्रह्माने सभी देवताओंको सुख प्रदान किया था॥११॥

कस्मिन्नपि प्राज्ञवरैर्विविक्ते गर्गादिभिर्यो निभृतं प्रकाश्यते।
नारायणोऽसौ भगवाननेन साम्यं कथञ्चिल्लभते न चापरः॥१२॥
अतः श्रीमधुपुर्यां यो दीर्घविष्णुरिति श्रुतः।
महाहरिर्महाविष्णुर्महानारायणोऽपि च॥१३॥

श्लोकानुवाद—विद्वानोंमें श्रेष्ठ गर्ग आदि मुनियोंने किसी एक निर्जन स्थानमें गुप्तरूपसे उनको प्रकाश करते हुए कहा था कि इन श्रीकृष्णकी तुलना केवल भगवान् श्रीनारायण ही कुछ-कुछ अंशमें कर सकते हैं, किन्तु सर्वांशमें नहीं। अतएव वे श्रीमधुपुरीमें दीर्घविष्णु, महाहरि, महाविष्णु, महानारायण जैसे नामोंसे भी प्रसिद्ध हैं॥१२-१३॥

दिग्दर्शिनी टीका—ननु तर्हि साक्षाद्भगवान् श्रीनारायण एवायमित्याशंक्य श्रीगरुड़ादि वैकुण्ठपार्षदेभ्योऽपि तेषां महत्वातिशयं वक्तुं श्रीनारायणादपि माहात्म्यमाह—कस्मिन्निति द्वाभ्याम्। श्रीनन्दादौ व्यक्ततया तस्यानुक्तिरग्रे परमानुग्रहचरमकाष्ठापात्रतया वक्ष्यमानत्वेनाधुना तत्प्रसङ्गानौचित्यात्। विविक्ते एकान्ते; तत्रापि निभृतं शनैः शनैर्यः श्रीदेवकीनन्दनः प्रकाश्यते। कथं? असौ श्रीवैकुण्ठेश्वर एव अनेन श्रीकृष्णेन समतां केनापि प्रकारेण अवतारित्वादिना श्रीमदङ्ग-सौष्ठवादिना वा लभते, न तु सम्यक्तयेत्यर्थः। कथम्भूतः भगवान? *'ऐश्वर्यस्य समग्रस्य धर्मस्य (वीर्यस्य) यशसःश्रियः। ज्ञानवैराग्ययोश्चापि षण्णां भग इतीङ्गना॥'* इत्युक्त-भगशब्दार्थयुक्तोऽपि। अतएव नारं जीवसमुहं अयते कारुण्यभरेण पश्यति, ज्ञानक्रियाशक्ति दानेन पालयति, सत्कर्मणि प्रवर्त्तयति चेति। नारायणोऽपि, न च अपरः श्रीमहापुरुषादिः *'एतन्नानावताराणां निधानं बीजमव्ययम्'*—(श्रीमद्भा॰ १/३/५) इत्यादिनाऽवतारिवत्तस्य महिम्नि श्रूयमाणेऽपि तादृशपरममधुरगुणरूपलीलाद्य श्रवणात्। यद्वा, अप्यर्थे चकारः, न विद्यते परः श्रेष्ठो यस्मात् स सर्वश्रेष्ठ इत्यर्थः। सोऽपि कथञ्चिदपि साम्यं न लभते परमप्रेमविशेषविस्तारकतादृशरूपगुणलीलामाधुरी-सारतरङ्गाप्रकटनात्। यथोक्तं श्रीनन्दं प्रति गर्गेण दशमस्कन्धे (श्रीमद्भा॰ १०/८/१९) *'तस्मान्नन्दात्मजोऽयं ते नारायण समो गुणैः। श्रिया कीर्त्त्यानुभावेन गोपायस्व समाहितः॥'* इति। अस्यार्थः—'नारायण एव समो यस्य सः सोऽपि कैः श्रीगुणादिभिरेव न तु मधुरमधुरवेशविहारविशेष-विस्तारणादिना। यद्वा; गुणादीनामुत्तरेण सम्बन्धः। गोपानां तादृशां आयः प्रेमसम्पदां वृद्धिर्लाभो वा यद्वा, अयः शुभावहो विधिस्तस्मिन् सुसमाहितः परमोद्युक्तः। स्वेति पाठे आयस्वशब्दाभ्यां योगक्षेमे अभिधीयेते। अतस्तदर्थमत्र रूपगुणलीलाविशेष प्रकटनात् वैकुण्ठे च तदविधानात् अयमेव साक्षाद्भगवान् श्रीनारायणादप्यधिक इति भावः। अतः अस्मादेवोक्ताद्धेतोः यः श्रीदेवकीनन्दनः श्रुतः विश्रुतः प्रसिद्ध इत्यर्थः। अपि शब्दः पुनः प्रयुक्तो, यच्छब्दश्चाप्रसिद्धमपि महानारायणेति साधयतः पूर्वोक्तानुसारात्॥१२-१३॥

भावानुवाद—यदि प्रश्न हो कि क्या ये श्रीदेवकीनन्दन साक्षात् भगवान् श्रीनारायण हैं? इस आशंकाको दूर करनेके लिए तथा श्रीगरुड़ आदि वैकुण्ठ पार्षदोंकी तुलनामें श्रीनन्द आदि व्रजवासियोंका महत्व वर्णन करनेके अभिप्रायसे प्रथमतः श्रीनारायणसे भी श्रीदेवकीनन्दनके अधिक माहात्म्यको 'कस्मिन्' इत्यादि श्लोक द्वारा बतला रहे हैं। यद्यपि इस 'कस्मिन्' पदसे उन्हीं श्रीनन्द आदि व्रजवासियोंको ही निर्देश किया गया है, तथापि उनके नामको स्पष्टरूपसे व्यक्त नहीं किया गया है। उन्होंने श्रीकृष्णके परमानुग्रहको चरमसीमा तक प्राप्त किया है, इसलिए उनके माहात्म्यको आगे व्यक्त करेंगे। किन्तु, इस प्रसंगमें उनके माहात्म्यको व्यक्त करना उचित नहीं है, ऐसी विवेचना करके ही केवल 'कस्मिन्' पदसे इंगित मात्र कर रहे हैं।

इस प्रकार विद्वानोंमें श्रेष्ठ गर्ग आदि मुनियोंने किसी निर्जन स्थानमें धीरे-धीरे श्रीदेवकीनन्दनको प्रकाशित किया। किस प्रकारसे? षडैश्वर्यशाली श्रीवैकुण्ठेश्वर इन श्रीकृष्णके साथ किसी-किसी अंशमें समता प्राप्त करते हैं, किन्तु सर्वांशमें नहीं। अवतारी होनेके कारण अथवा अंगसौष्ठव आदि किसी-किसी विषयमें श्रीकृष्णके साथ श्रीनारायणकी कुछ-कुछ समानता है, किन्तु सब प्रकारसे या समस्त विषयोंमें समानता नहीं है। भगवान् श्रीनारायण कैसे हैं? समग्र ऐश्वर्य, धर्म (वीर्य), यश, श्री, ज्ञान और वैराग्य यह छह गुण 'भग' शब्द-वाच्य हैं और ये छह गुण पूर्णरूपसे श्रीनारायणमें वर्त्तमान हैं, इसलिए उनको षड्-ऐश्वर्यशाली भगवान् कहा जाता है। 'नार' शब्दका अर्थ है जीवसमूह और 'अयन' शब्दका अर्थ है कारुण्यभावसे जो दर्शन करते हैं तथा ज्ञान-क्रिया शक्तिको प्रदान कर पालन और सत्कर्ममें प्रवर्तित करते हैं। अतएव उन्हीं श्रीवैकुण्ठेश्वरका नाम ही श्रीनारायण है तथा ऐसे भगवान् श्रीनारायण भी कभी-कभी श्रीकृष्णका सादृश्य प्राप्त करते हैं। परन्तु इन देवकीनन्दनमें उक्त गुण अद्भुत रूपसे अर्थात् पूर्णतमरूपमें प्रकटित रहते हैं, इसलिए ये ही मूल नारायण या महानारायणके रूपमें प्रसिद्ध हैं। इसलिए गर्ग मुनिने कहा है, "वैकुण्ठेश्वर श्रीनारायण इन श्रीकृष्णके साथ किसी-किसी अंशमें समता प्राप्त करते हैं।" श्रीनारायणसे श्रेष्ठ अन्य कोई महापुरुष नहीं

हैं, यथा—"जिनकी मूर्त्ति अन्य सभी अवतारोंकी बीज स्वरूप है।" इत्यादि प्रमाणोंके द्वारा यह जाना जाता है कि श्रीनारायण नाना अवतारोंके मूल अथवा सर्वावतारी हैं, तथापि वे श्रीदेवकीनन्दनके समान परममधुर रूप-गुण-लीला आदिसे युक्त नहीं हैं। अथवा 'न चापरः' पदसे जो सर्वश्रेष्ठ हैं—ऐसा बोध होता है। ऐसे सर्वश्रेष्ठ श्रीनारायण भी इन श्रीदेवकीनन्दनके साथ किञ्चित् मात्र भी समता प्राप्त नहीं करते हैं, क्योंकि श्रीकृष्ण परम प्रेमको विस्तार करनेवाले रूप, गुण और लीला माधुरीकी सार-तरंगको प्रकट कर उस प्रेमका विस्तार कर रहे हैं। यथा, श्रीनन्दमहाराजके प्रति श्रीगर्गाचार्यके वचन हैं—"हे नन्द! तुम्हारा यह पुत्र गुण, श्री, कीर्त्ति और प्रभावमें नारायणके समान है, तुम सावधानीपूर्वक इसका पालन करो।"

तात्पर्य यह है कि श्रीनारायणके समान जिनके गुण, रूप, श्री (ऐश्वर्य) आदि हैं, वही श्रीनारायणके समान हैं। अब उन्हीं श्रीनारायणका कोई-कोई गुण इनके समान है, किन्तु मधुर-मधुर वेश-विहारका विस्तार करनेमें समानता नहीं है। अथवा ये श्रीकृष्ण श्रीनन्द आदि गोपोंके 'आयः' अर्थात् प्रेम सम्पत्तिको बढ़ानेवाले हैं। अथवा 'अयः' शब्दका अर्थ है—कल्याणजनक विधि तथा सुष्ठुरूपमें एकत्र की हुई परमानन्दस्वरूप सम्पत्ति। अथवा 'स्वेति' पाठ होनेसे 'आयः' और 'स्व' शब्द द्वारा योगक्षेम अर्थ होता है। अतएव ये गोपोंके योगक्षेम-स्वरूप हैं, अतएव इनके प्रति एकाग्रचित्त होओ। श्रीगर्गके इन वचनोंके द्वारा यह सूचित होता है कि श्रीकृष्ण गोपोंके योगक्षेमकी व्यवस्था करनेवाले हैं, इसलिए व्रजमें सर्वाधिक मधुर गुण, रूप, लीला आदिको प्रकाशित करते हैं। किन्तु वैकुण्ठमें ऐसी योगक्षेम व्यवस्था नहीं है, अतः ये ही साक्षात् भगवान् हैं; अर्थात् श्रीकृष्णमें श्रीनारायणसे भी अधिक अद्भुत रूपमें गुण विराजमान हैं, इसलिए ये श्रीकृष्ण ही स्वयं-भगवान्के नामसे प्रसिद्ध हैं॥१२-१३॥

यस्य प्रसादः सन्मौनशान्तिभक्त्यादिसाधनैः।
प्राथ्यों नः स स्वयं वोऽभूत् प्रसन्नो वशवर्त्यपि॥१४॥

श्लोकानुवाद—आत्मारामता, मुक्ति, भक्ति और साधुसंग आदि साधनोंके द्वारा जिनकी कृपा प्राप्त नहीं की जा सकती, वही श्रीकृष्ण बिना किसी साधनके स्वयं ही आपलोगोंके प्रति प्रसन्न हैं तथा आपलोगोंके वशीभूत भी हैं॥१४॥

दिग्दर्शिनी टीका—इदानीं जगद्वन्द्येभ्योऽपि महामुनिभ्यो भवन्तः श्रेष्ठा इत्याशयेनाह—यस्येति। सत् उत्कृष्टं यन्मौनं आत्मारामता शान्तिर्मुक्तिः, भक्तिर्नवधा, आदिशब्देन श्रीमूर्त्तिदर्शनवैष्णवसङ्गमादि; तैरव साधनैः यस्य श्रीदेवकीनन्दनस्य प्रसादोऽनुग्रहविशेषो नोऽस्माकं प्रार्थणीय एव, न त्वद्यापि प्राप्तः प्राप्तव्यो वा। सः स्वयमेव साधनैर्विना वो युस्माकं प्रसन्नोऽभूत्; न च केवलं प्रसन्न एव वशवर्ती वश्योऽपि तत्तदाज्ञाप्रति पालनादिना। तथा च सप्तमस्कन्धे श्रीनारदेनैव श्रीयुधिष्ठिरं प्रति (श्रीमद्भा॰ ७/१०/४८-५०, ७/१५/७५-७७) *'यूयं नृलोके बत भूरिभागा, लोकान् पुनाना मुनयोऽभियन्ति। येषां गृहाणावसतीति साक्षाद् गूढ़ं परंब्रह्म मनुष्यलिङ्गम्॥ स वा अयं ब्रह्म महद्विमृग्य कैवल्य निर्वाणसुखानुभूतिः। प्रियः सुहृद्वः खलु मातुलेय आत्मार्हणीयो विधिकृद्गुरुश्च॥ न यस्य साक्षाद् भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितम्। मौनेन भक्तयोपशमेन पूजितः, प्रसीदतामेष स सात्वतां पतिः॥'* इति। अहो महाधन्यः श्रीप्रह्लादः यः किल तादृशभगवद्नुग्रहगोचरः, वयन्त्वधन्या इति मनसि विषीदत इव पाण्डवानालक्ष्य प्रह्लादचरिताख्यानशेषे श्रीनारदः श्लोकत्रयीमेतामब्रवीत्। अस्यास्त्वयमर्थः—येषां युस्माकं गृहान् मुनयोऽभियन्ति सर्वतः समायान्ति तत् कस्य हेतोः? गूढ़ं परं ब्रह्म नराकारं सत्यं प्रत्यक्षं वसतीति तद्दर्शनार्थमित्यर्थः। गूढ़त्वमेव वदन् तस्य परमदुर्लभतामाह—ब्रह्मणा मादृशतातेन महद्भिश्चान्यैः सनकादिभिः। यद्वा, वेदेन ब्रह्मादिभिश्च विमृग्यमेव, न तु साक्षाल्लभ्यं यत्कैवल्य निर्वाणसुखं निरुपाधिपरमानन्दः तदनुभूतिरूप एव। एवं गूढ़त्वादिना परमानिर्वचनीयो यः स एव वो युस्माकं प्रियः सुहृदित्यादिरूपो भवति। तत्र प्रियः प्रीतिकारी; सुहृत् निरुपाधिहितकारी; आत्मा परमप्रीतिविषयः; अर्हणीय इष्ट-देवतात्वेनोपास्यः; विधकृत् आज्ञानुवर्ती; अयमिति तत्रैव सभायामासीनं भगवन्तमङ्गुल्या निर्दिशति। एवं परमदुर्लभ तरोऽपि युष्मद्विषयकानुग्रहविशेषेण सर्वेषामधुना लोचनदृश्यतां गतः इति भूरिभागत्वं युक्तमेवेत्यर्थः। ननु ईदृशं परं ब्रह्म चेत्तर्हि कथं द्वष्टसहस्रस्त्रीषु रतिः, कथं वा धर्माद्याचरणं तस्येत्यत्राह—यस्य रूपम् तत्त्वम्। यद्वा, साक्षाद्दृश्यमानं एकाङ्गसौन्दर्यमपि भवादिभिरपि धिया स्वबुद्ध्यापि वस्तुतया इदमित्थमिति साक्षान्नोपवर्णितं वर्णयितुं न शक्तं, कुतो लीलावैभवं तच्च मुख्येन तदपि मादृशेनेत्यर्थः। स तु युस्माकं स्वयमेव प्रसन्नः; अस्माकन्तु मौनादिसाधनैस्तत्प्रसादः प्रार्थनीय एवेत्याह—मौनेनेति। एष इति पूर्वोक्तोऽयमितिवत्। अयं भावः—न हि

प्रह्लादस्य गृहे परं ब्रह्म वसति; न च तद्दर्शनाय मुनयस्तद्गृहानभियन्ति; न च तस्य परं ब्रह्म मातुलेयादिरूपेन वर्तते; न च स्वयमेव प्रसन्नः; अतो यूयमेव ततोऽपि महामुनिभ्योऽपि भवपद्मजादिभ्योऽपि भक्तेभ्योऽप्यस्मत्तो भूरिभागा इति॥१४॥

भावानुवाद—अब श्रीनारद पाण्डवोंको जगत-वन्दनीय महामुनियोंसे भी अधिक श्रेष्ठ बतलानेके लिए 'यस्य' इत्यादि पद कह रहे हैं। उत्कृष्ट मौनव्रत अर्थात् आत्मारामता, शान्ति अर्थात् मुक्ति, नवधा भक्ति तथा श्रीविग्रहका दर्शन और वैष्णव-संग आदि साधनोंके द्वारा श्रीदेवकीनन्दनकी विशेष कृपाके लिए केवल प्रार्थना मात्र की जा सकती है, किन्तु वह कृपा प्राप्त नहीं की जा सकती है। वही भगवान् श्रीकृष्ण किसी साधनके बिना स्वयं ही आपके प्रति प्रसन्न हो गये हैं, केवल प्रसन्न ही नहीं, आपके वशीभूत होकर आज्ञापालन आदि कार्य भी कर रहे हैं। किसी समय महाराज श्रीयुधिष्ठिरने कहा था, "अहो! श्रीप्रह्लाद महाराजका कैसा सौभाग्य है! वे महाधन्य हैं! वे भगवान्की विशेष कृपाके पात्र हैं, किन्तु हमलोग अधन्य हैं।" इस प्रकार अपनेको अधन्य मानकर जब महाराज श्रीयुधिष्ठिर दुखित हो गये, तब उनको लक्ष्यकर (श्रीप्रह्लाद चरित्र-उपाख्यानके अन्तिम भागमें) श्रीनारदने कहा, "हे राजेन्द्र! प्रह्लाद भाग्यवान हैं, और हम अभागे हैं—ऐसा मानकर आप दुखित न होवें। मनुष्यलोकमें आपलोग ही अत्यन्त भाग्यवान हैं, क्योंकि लोकपावन मुनिगण निरन्तर आपके घरमें आवागमन करते रहते हैं तथा आपके घरमें साक्षात् परमब्रह्म नराकाररूपमें गुप्तरूपसे वास कर रहे हैं। वे श्रीकृष्ण ही परमब्रह्म हैं, इसलिए महत् व्यक्तियोंके द्वारा भी कैवल्य-निर्वाणसुखके अनुभवरूपमें वे अन्वेषणीय (खोजे जा रहे) हैं। परन्तु वही परमब्रह्म आपके प्रिय, सुहृद, मामाके पुत्र, आत्मा, पूजनीय इष्टदेव, आज्ञाकारी सेवक और गुरु हैं। अतएव आपके समान कौन भाग्यशाली है? हे राजन्! साक्षात् शिव, ब्रह्मादि देवता भी अपनी-अपनी बुद्धि द्वारा जिनके रूपका निश्चय करके वर्णन नहीं कर पाते, मैं उनका क्या वर्णन कर सकता हूँ? वही भक्ताधीन भगवान् मौनव्रत, इन्द्रिय निग्रह तथा भक्तिके द्वारा ही पूजित होकर प्रसन्न हों।" ऐसा कहकर श्रीनारदने अपनी अंगुली द्वारा उस सभामें विराजमान श्रीभगवान्का निर्देश

किया। इसका भावार्थ यह है कि ऐसे परम दुर्लभ परमब्रह्म आपलोगोंके प्रति अत्यधिक कृपाशील होकर इस समय सभीको दर्शन देते हुए विराजित हैं, अतएव आपलोगोंके भूरिभाग्यके विषयमें मैं अधिक क्या कहूँ? यदि कहो कि हमारे घरमें जगतको पावन करनेवाले मुनियोंके सदैव आवागमन करनेका कारण क्या है? इसके उत्तरमें कह रहे है कि आपके घरमें मनुष्यरूपमें गुप्तरूपसे परमब्रह्म प्रत्यक्ष रूपमें विराजमान हो रहे हैं, इसलिए मुनिगण उनके दर्शनके लिए आवागमन करते हैं।

इस प्रकार भगवान्के गूढ़ (गुप्त) वासकी बात कहकर अब उनकी परम दुर्लभताकी बात कह रहे हैं। ब्रह्मादि देवगण और मेरे जैसे सनकादि महामुनि भी जिनके रूपका निश्चितरूपमें वर्णन नहीं कर पाये, अथवा ब्रह्मादि देवता भी जिनको वेदोंमें ढूढ़ते रहते हैं, किन्तु साक्षात्‌रूपमें प्राप्त न करके उनको कैवल्य-निर्वाणसुखके रूपमें अर्थात् निरुपाधिक परमानन्द-स्वरूप बतलाते हैं। ऐसे गूढ़ तथा परमानिर्वचनीय परमब्रह्म भगवान् ही आपके प्रिय, सुहृद् इत्यादि हैं। यहाँ पर प्रिय कहनेसे प्रीतिकारी, सुहृद् अर्थात् निरुपाधिक हितकारी, आत्मा अर्थात् परम प्रीतिके विषय, पूजनीय अर्थात् इष्टदेवता होनेके कारण उपास्य, विधकृत अर्थात् आज्ञाका पालन करनेवाले हैं।

यदि प्रश्न हो कि ऐसे परमब्रह्म होकर भी उन्होंने सोलह हजार एक सौ आठ रानियोंका पाणिग्रहण क्यों किया अथवा धर्मादिका आचरण क्यों किया? इसीलिए कह रहे हैं—'यस्य रूपं तत्त्वम्' ब्रह्मा आदि देवतागण भी उनके तत्त्वको निश्चितरूपमें वर्णन नहीं कर पाये, अथवा साक्षात् दृश्यमान इन परमब्रह्मके एक अंगके (आंशिक) सौन्दर्यको ही अपनी-अपनी बुद्धिके बलसे अनुभव करके 'वे ऐसे हैं' 'वे ऐसे हैं' कहकर दिग्दर्शन न्यायके अनुसार किञ्चित् मात्र वर्णन किये हैं। किन्तु साक्षात्‌रूपमें अर्थात् सम्पूर्णरूपमें वर्णन करनेमें समर्थ नहीं हो पाये। अतएव उनका जो महान लीला-वैभव है, वह अनिर्वचनीय है, देवता उसका किस प्रकार अनुभव या वर्णन कर सकते हैं। यद्यपि यहाँ पर मैंने भव (शिव) और पद्मयोनि (ब्रह्मा)के नामका ही मुख्यरूपमें उल्लेख किया है, तथापि हमलोग भी अर्थात्

मैं और सनक आदि मुनिगण भी उस तत्त्वको निश्चितरूपमें वर्णन करनेमें अथवा उनकी लीलाको अनुभव करनेमें असमर्थ हैं। परन्तु ऐसे महामहिमायुक्त परमब्रह्म आपके प्रति स्वयं ही प्रसन्न हैं। यद्यपि हम मौनव्रत आदि साधनोंके द्वारा उनकी कृपाके लिए प्रार्थना करते हैं, तथापि प्राप्त नहीं कर पाते।

सारार्थ यह है कि श्रीप्रह्लादके घरमें इन परमब्रह्मने साक्षात्‌रूपमें निवास नहीं किया और उनके दर्शनके लिए मुनिगण भी वहाँ पर नहीं गये। अथवा परमब्रह्मका श्रीप्रह्लादके साथ पाण्डवोंकी भाँति मामाके पुत्र आदि जैसा कोई सम्बन्ध भी नहीं है। अतएव आपलोग श्रीप्रह्लादकी तुलनामें अधिक सौभाग्यशाली हैं, इससे अधिक क्या कहूँ? शिव, ब्रह्मा आदि देवतागण तथा मेरे जैसे सनकादि मुनिगण और अन्य भगवद्भक्तोंकी तुलनामें आप ही भूरिभाग्यवान है॥१४॥

अहो शृणुत पूर्वन्तु केषाञ्चिदधिकारिणाम्।
अनेन दीयमानोऽभून्मोक्षः स्थितिरियं सदा॥१५॥

श्लोकानुवाद—अहो! श्रवण करें। पूर्वकालमें यह नियम था कि श्रीभगवान् किसी विशेष-विशेष अधिकारीको ही मोक्ष प्रदान करते थे॥१५॥

दिग्दर्शिनी टीका—एवमुक्तस्य परमश्रैष्ठ्यस्य प्राप्तौ निदानं तु तदीयासाधारण-महिमभरमाधुरी-प्रकाशनमेवेत्याशयेनाह—अहो! इति दशभिः। आश्चर्यम्, मोक्षादिकारिणां मध्ये केषाञ्चित्; अनेन श्रीदेवकीनन्दनेनैव; स्थितिमर्यादा; कदाचिदप्यत्र व्यभिचारो नास्तीत्यर्थः॥१५॥

भावानुवाद—पाण्डवों द्वारा ऐसी श्रेष्ठताको प्राप्त करनेका मूल कारण है, श्रीकृष्णकी वैसी असाधारण महिमायुक्त माधुरीका प्रकाशन। इसी अभिप्रायसे 'अहो' इत्यादि दस श्लोकोंमें श्रीकृष्णकी महिमा-माधुरीका वर्णन कर रहे हैं। कितने आश्चर्यकी बात है! इन्हीं श्रीदेवकीनन्दनने अपने पूर्व-पूर्व अवतारोंमें मोक्ष प्राप्तिके अधिकारियोंमें भी किसी-किसी विशेष अधिकारीको ही मोक्ष प्रदान किया था। किन्तु अब उस मोक्षको ये सर्वत्र प्रदान कर रहे हैं और इस विषयमें कुछ अनुचित भी नहीं है॥१५॥

कालनेमिर्हिरण्याक्षो हिरण्यकशिपुस्तथा।
रावणः कुम्भकर्णश्च तथान्ये घातिताः स्वयम्॥१६॥
मुक्तिं न नीता भक्तिर्न दत्ता कस्मैचिदुत्तमा।
प्रह्लादाय परं दत्ता श्रीनृसिंहावतारतः॥१७॥

श्लोकानुवाद—श्रीभगवान्ने कालनेमि, हिरण्याक्ष और हिरण्यकशिपु जैसे असुरोंका तथा रावण और कुम्भकर्ण जैसे राक्षसोंका स्वयं वध करके भी उन्हें मुक्ति प्रदान नहीं की; अतएव उन्होंने किसीको भी अपनी उत्तमा भक्तिदान नहीं की, इस विषयमें फिर क्या कहा जाए? तथापि उन्होंने केवल श्रीनृसिंह अवतारमें श्रीप्रह्लादको ज्ञानमिश्रा-भक्ति प्रदान की थी॥१६-१७॥

दिग्दर्शिनी टीका—तदेवाह—कालेति सपञ्चाक्षरश्लोकेन। अनेनेत्यनुवर्त्तते एव कालनेमिर्घातितो मारितः। स्वयमेव श्रीवैकुण्ठेश्वररूपेण देवासुरयुद्धे। हिरण्याक्षश्च श्रीवराहरूपेण, हिरण्यकशिपुः श्रीनृसिंहरूपेण, रावणकुम्भकर्णौ श्रीरघुनाथरूपेण, अन्ये च दैत्यराक्षसादयः तत्तत्-सम्बन्धिप्रभृतयः। स्वयमेवानेनैते घातिता अपि मुक्तिं न प्रापिताः। अस्मिन्नेवावतारे तद्दानेनास्यैव महामहिमविशेषबोधनाय। अथ कथं भगवद्भक्तिप्राप्तास्त्वित्याह—भक्तिरिति। उत्तमा विशुद्धा प्रेमलक्षणा वा परं केवलं दत्ता भक्तिः; सा च ज्ञानमिश्रेति बोद्धव्यम्। उत्तरत्र शुद्धामित्युक्तेः। प्राक् प्रह्लादेन स्वयमेव तथोक्तत्वाच्च सप्तम्यांतस्॥१६-१७॥

भावानुवाद—श्रीभगवान्ने मुक्ति भी सहजरूपमें प्रदान नहीं की, इसे बतानेके लिए 'कालेति' श्लोक कह रहे हैं। प्रभुने श्रीवैकुण्ठेश्वररूपमें देवासुर-संग्राममें कालनेमिका, श्रीवराहरूपमें हिरण्याक्षका, श्रीनृसिंहदेवरूपमें हिरण्यकशिपु आदि असुरोंका तथा श्रीरघुनाथरूपमें रावण, कुम्भकर्ण जैसे राक्षसोंका स्वयं वध करके भी उन्हें मुक्ति प्रदान नहीं की। अतएव उनके द्वारा किसीको उत्तमा भक्ति प्रदान नहीं की गयी, इस विषयमें फिर अधिक क्या कहा जाए? परन्तु श्रीकृष्ण अवतारमें उसी मुक्तिको प्रदान करनेके कारण उनकी अत्यधिक महिमाको सूचित करनेके लिए ही ऐसा उल्लेख हुआ है। अर्थात् पूर्वकालमें जब मुक्ति ही दान नहीं की, तब विशुद्ध प्रेमाभक्तिका दान किस प्रकार करेंगे? किन्तु केवल श्रीनृसिंह अवतारमें ही उन्होंने श्रीप्रह्लादको ज्ञानमिश्रा-भक्ति प्रदान की थी। श्रीप्रह्लादकी भक्ति शुद्धभक्ति नहीं है, ऐसा इससे पूर्व स्वयं श्रीप्रह्लाद द्वारा ही कहा गया है॥१६-१७॥

हनूमान जाम्बुवान् श्रीमान् सुग्रीवोऽथ विभीषणः।
गुहो दशरथोऽप्येते नूनं कतिपये जनाः॥१८॥

श्लोकानुवाद—श्रीरामावतारमें श्रीमान् हनुमान, जाम्बुवान, सुग्रीव, विभीषण, गुहक और राजा दशरथ जैसे कुछ व्यक्तियोंने इनसे शुद्धभक्ति प्राप्त की थी॥१८॥

दिग्दर्शिनी टीका—हनूमदादयः कतिपये जना जीवाः सेवका वा शुद्धां ज्ञानकर्माद्य-संभिन्नां भक्तिं तु रघुनाथावतारे अस्माच्छ्रीदेवकीनन्दनाल्लेभिरे इत्युत्तरेणान्वयः। श्रीमान् परमसौभाग्यसम्पद्युक्तः; अस्य च सर्वत्रैवानुषङ्गः। नूनं निश्चये वितर्के वा, लक्षणेन तेषु शुद्धभक्तेरनुमानात्। यद्वा, नूनमित्यस्य दशरथोऽपीत्यनेनैव सम्बन्धः। ततश्च ब्रह्मशापादेव पुत्रविच्छेदशोकेन मरणाच्छुद्धभक्तौ संशये जातेऽपि तस्य पुत्रस्नेहेन शुद्धभक्तिसम्भावनया वितर्कः। अतएवात्रापि शब्दोऽपि॥१८॥

भावानुवाद—श्रीरामचन्द्रजीके अवतारमें श्रीहनुमान जैसे कुछ सेवकों तथा कुछ जीवोंने इन्हीं श्रीदेवकीनन्दनसे शुद्धभक्ति अर्थात् ज्ञान-कर्म आदिसे अनावृत भक्ति प्राप्त की थी। 'श्रीमान्' कहनेसे परमसौभाग्यरूपी सम्पत्तिको ही समझना चाहिए तथा ऐसे सभी लोग परम सौभाग्यसे युक्त हैं। यहाँ पर 'नूनं' शब्द निश्चयार्थ अथवा वितर्करूपमें प्रयोग किया गया है, अर्थात् जिन लक्षणोंके द्वारा उनकी शुद्धभक्तिका अनुमान किया जाता है वह लक्षण। अथवा इस 'नूनं' शब्दका श्रीदशरथसे भी सम्बन्ध है, जैसे ब्रह्म-शापके कारण पुत्रविच्छेदके शोकमें उनकी मत्यु होनेसे उनकी शुद्धभक्तिके सम्बन्धमें संशय उत्पन्न होता है। दूसरी ओर श्रीरामचन्द्रजीके प्रति उनके पुत्रस्नेहको देखकर शुद्धभक्तिकी सम्भावना होती है, यही वितर्क है। इसीलिए मूलश्लोकमें 'दशरथ' शब्दके बाद 'अपि' शब्दका प्रयोग किया गया है॥१८॥

रघुनाथावतारेऽस्माच्छुद्धां भक्तिं तु लेभिरे।
विशुद्धस्य च कस्यापि प्रेम्णो वार्त्तापि न स्थिता॥१९॥

श्लोकानुवाद—यद्यपि श्रीरामावतारमें कुछ महात्माओंने शुद्धभक्ति तो प्राप्त की थी, किन्तु उस अवतारमें विशुद्ध प्रेम प्राप्तिकी बात नहीं सुनी जाती है॥१९॥

दिग्दर्शिनी टीका—विशुद्धस्य स्वारसिकस्य, न तु गुणरूपाद्यपेक्षकस्येतार्थः। कस्यापीति पतिपुत्रादिभावेन जायमानेषु नानाविधेषु विशुद्धेषु प्रेमसु मध्ये कस्यचित् एकतरस्यापीत्यर्थः। यद्वा, अनिर्वाच्यस्य श्रीगोपीनामिव श्रीकृष्णप्रेम-विशेषस्येत्यर्थः। वार्त्तापि तदानीं नासीत् कुतश्च प्राप्तिरित्यर्थः॥१९॥

भावानुवाद—इस प्रकार श्रीदशरथके विशुद्ध स्वारसिक भक्त होने पर भी उनकी भक्ति श्रीरामचन्द्रके गुण-रूप आदि पर निर्भर नहीं करती, क्योंकि पति-पुत्र आदि भावसे उत्पन्न नाना-प्रकारके विशुद्ध प्रेममें से किसी एक भावका विचार भी उस समय प्रचलित नहीं था। अथवा गोपियोंके समान विशुद्ध अनिर्वचनीय श्रीकृष्णप्रेमकी वार्त्ता भी उस समय किसीके कर्णगोचर नहीं हुई थी। अतएव वैसे विशुद्ध प्रेमकी प्राप्ति कैसे सम्भव होती?॥१९॥

इदानीं भवदीयेन मातुलेयेन नो कृताः।
मुक्ता भक्तास्तथा शुद्धप्रेमसम्पूरिताः कति॥२०॥

श्लोकानुवाद—किन्तु क्या इस समय आपके मातुलेय (मामाके पुत्र) श्रीकृष्णने अनेक व्यक्तियोंको मुक्ति, भक्ति और शुद्ध प्रेमरस प्रदान नहीं किया है?॥२०॥

दिग्दर्शिनी टीका—कति मुक्ताः, कति भक्ताः, कति शुद्धप्रेमरससम्पूरिताश्च न कृता, अपि तु बहव एव ते ते कृता इत्यर्थः। भवदीयमातुलेयेनेति तादृशमहिमवतः श्रीकृष्णस्य तादृक् सम्बन्धेन तेषामपि तादृङ्माहात्म्यं सूचयति॥२०॥

भावानुवाद—क्या श्रीकृष्णने बहुतसे व्यक्तियोंको मुक्ति, भक्ति तथा शुद्ध प्रेमरस प्रदान नहीं किया है? अपितु अनेक व्यक्ति मुक्ति, भक्ति तथा प्रेमरसमें निमज्जित होकर कृतार्थ हुए हैं। मूल श्लोकके 'भवदीयेन मातुलेयेन' अर्थात् 'आपके मामाके पुत्र' पदके द्वारा वैसे महिमायुक्त श्रीकृष्णके साथ सम्बन्धवशतः आप लोगोंका भी वैसा ही माहात्म्य सूचित हो रहा है॥२०॥

आत्मना मारिता ये च घातिता वार्जुनादिभिः।
नरकार्हाश्च दैतेयास्तन्महिम्नामृतं गताः॥२१॥

श्लोकानुवाद—श्रीकृष्णने स्वयं जिनका वध किया है अथवा जिनको अर्जुन आदि द्वारा वध करवाया है, वे सब दैत्य नरक भोगनेके योग्य थे, किन्तु उन्होंने श्रीकृष्णकी महिमासे मुक्ति प्राप्त की है॥२१॥

दिग्दर्शिनी टीका—तत्रादौ प्राप्तमोक्षान्निर्दिशति—आत्मनेति। ये दैतेयाः पुतनादयः; वेत्युक्त-समुच्चये; ये च अर्जुन भीमादिभिः कृत्वा घातिताः कर्णदुर्योधनादयः, तेऽपि दैत्यांशप्रवेशाद्दैतेया एव। अप्यर्थे चकारः। नरकार्हा नरकयोग्या अपि विष्णुवैष्णवद्रोहात्। तस्य भवदीय मातुलेयस्य महिम्नैव अमृतं मुक्तिं प्राप्ताः। तथा च द्वितीयस्कन्धे (श्रीमद्भा॰ २/७/३४-३५) *'ये च प्रलम्बखरदर्दूरकेश्यरिष्टमल्लेभकंसयवनाः कुज-पौण्ड्रकाद्याः । अन्ये च साल्वकपिबल्वल-दन्तवक्र-सप्तोक्ष-सम्बरविदूरथ-रुक्मिमुख्याः॥ ये वा मृधे समितिशालिन आत्तचापाः, काम्बोजमत्स्यकुरुसृञ्जयकैकयाद्याः। यास्यन्त्यदर्शनमलं बलपार्थभीमव्याजाह्वयेन हरिणा निलयं तदीयम्॥'* इति। एतयोरर्थः—ये च प्रलम्बादयस्ते सर्वे हरिणा हेतुभूतेन तदीयं तेषां योग्यं निलयं नितरां लयं मोक्षम् अदर्शनं दर्शनाविषयं पुनर्दर्शनरहितं वा परमाभावरूपत्वात्। अलमत्यर्थम्; यद्वा, अदर्शनेषु अदृश्येषु मध्ये मलरूपं परमहेयमित्यर्थः, भक्तिरसविघातकत्वात्। यास्यन्ति प्राप्स्यन्तीत्युत्तरेणान्वयः। दर्दूर इव दुर्दूरो वकः; कपिर्द्विविदः। ननु खरकपिबल्वल-प्रमुखाः बलभद्रेण निहताः; काम्बोजादयश्च भीमार्जुनादिभिः; शम्बरः प्रद्युम्नेन, यवनो मुचुकुन्देन न तु हरिणा। तत्राह—बलपार्थभीमेत्यादयः व्याजाह्वया कपटनामानि यस्य तेनेति। यदि च तदीय निलयं श्रीवैकुण्ठमिति व्याख्या तदा मुक्ता इत्यस्य वैकुण्ठनयनेन संसारबन्धछेदनान्मुक्ताः कृताः मोचिता इत्यर्थो द्रष्टव्यः॥२१॥

भावानुवाद—'आत्मनेति' श्लोक द्वारा सर्वप्रथम मोक्षको प्राप्त करनेवाले दैत्योंके नाम बतला रहे हैं। इस श्रीकृष्णावतारमें उन्होंने पूतना आदि जिन दैत्योंका स्वयं वध किया है, अथवा जिनको भीम-अर्जुन आदि द्वारा मरवाया है, वे सभी नरक भोगनेके ही योग्य थे, तथापि आपके मामाके पुत्र श्रीकृष्णकी कृपासे उन सबने मुक्ति प्राप्त की है। यहाँ पर कर्ण-दुर्योधन आदि क्षत्रिय राजाओंको दैत्य कहा गया है, क्योंकि उनके शरीरमें दैत्योंके अंश होनेके कारण वे श्रीविष्णु और वैष्णवोंके प्रति द्रोहाचरण करते थे, इसलिए उनकी गिनती भी दैत्योंमें की गयी है।

द्वितीय-स्कन्धमें कहा गया है—"प्रलम्बासुर, खर, बक, केशी, अरिष्ट, मल्लगण, कुवलयपीड़, कालयवन, कपि, पौण्ड्रक, शाल्व,

नरक, बल्वल, दन्तवक्र, सप्तोक्ष, सम्बर, विदुरथ और रुक्मी जैसे प्रमुख योद्धागण तथा काम्बोज, मत्स्य, कुरु, सृञ्जय और केकय आदि जिस किसीने धनुष आदि अस्त्रोंको धारण करके युद्धमें अत्यधिक अहंकार प्रकाश किया था, वे सभी श्रीकृष्णके हाथसे निहत होकर मुक्त हुए थे। सचमुच श्रीकृष्णका यह कार्य अलौकिक है। यद्यपि इन दैत्योंमें कोई-कोई तो स्वयं श्रीकृष्णके हाथोंसे निहत हुए थे; खर, कपि, बल्वल आदि दैत्य श्रीबलरामके हाथों निहत हुए थे; काम्बोज आदि दैत्य भीम और अर्जुन द्वारा निहत हुए थे; प्रद्युम्नके द्वारा सम्बर निहत हुआ था; मुचुकुन्दके द्वारा कालयवन निहत हुआ था, तथापि वे सभी श्रीकृष्णके हाथोंसे ही निहत हुए थे—ऐसा समझना होगा, क्योंकि श्रीबलराम, भीम, अर्जुन आदि श्रीकृष्णके ही कपट (दूसरे) नाम हैं।

अतएव ये सभी मारे गये दैत्य पुनर्दर्शनसे रहित सम्पूर्ण मोक्षपदको प्राप्त हुए। अथवा 'यास्यन्तदर्शनमलं' पदका अन्य प्रकारसे भी अर्थ हो सकता हैं; वे सब दैत्य पुनर्दर्शनसे रहित या परम अभावरूप अर्थात् सम्पूर्ण लयरूप मोक्षपदको प्राप्त हुए, अर्थात् पुनः उन्हें किसी देहकी प्राप्ति नहीं हुई थी। अथवा अदर्शनमल-स्वरूप मोक्षको प्राप्त हुए थे, अदर्शनरूप लय अथवा मोक्ष भक्तिरसका विघातक होनेके कारण मलस्वरूप है। यद्यपि 'तदीय निलय' कहनेसे श्रीवैकुण्ठ पदका ही बोध होता है, तथापि (मूल श्लोकमें) 'मुक्ति' शब्द होनेसे वैकुण्ठमें लाये जाने पर भी संसार-बन्धनसे मोचनरूप मुक्ति ही समझना होगा। अतएव यहाँ पर मुक्ति कहनेसे दैत्योंके संसार-बन्धनरूप मोचनको ही समझना चाहिए॥२१॥

तपोजपज्ञानपरा मुनयो येऽर्थसाधकाः।
विश्वामित्रो गौतमश्च वशिष्ठोऽपि तथापरे॥२२॥
तं कुरुक्षेत्रयात्रायां गत्वा कृष्णप्रसादतः।
भक्तिं तं प्रार्थ्यतां प्राप्याभवंस्तद्भक्तितत्पराः॥२३॥

श्लोकानुवाद—तपनिष्ठ विश्वामित्र, जपनिष्ठ गौतम, ज्ञाननिष्ठ वशिष्ठ तथा अन्य-अन्य मुनियोंने धर्म, अर्थ, काम और मोक्षके

साधक होकर भी कुरुक्षेत्र यात्राके समय श्रीकृष्णसे भक्तिकी प्रार्थना की थी तथा श्रीकृष्णकी कृपासे भक्ति प्राप्त करके अन्तमें वे भक्तिमें रत हुए थे॥२२-२३॥

दिग्दर्शिनी टीका—इदानीं प्राप्तभक्तिकानाह—तप इति द्वाभ्याम्। विश्वामित्रादयस्त्रयः क्रमेण तप आदि परा अपि। अतएव अर्थानां धर्मार्थकाममोक्षाणां साधका अपि। तं कृष्णं, तां भक्तिम्। तथा च तेषां प्रार्थनं दशमस्कन्धे (श्रीमद्भा॰ १०/८४/२६)—*'तस्याद्य! ते ददृशिमाङ्घ्रिमघौघमर्ष, तीर्थास्पदं हृदिकृतं सुविपक्वयोगैः। उत्सिक्त-भक्त्यपहताशयजीवकोषा,-श्चापुर्भवद्गतिमथानुगृहाण भक्तान्॥'* इति। व्याख्यातञ्च श्रीधरस्वामीपादैः—'अघौघस्य मर्षं नाशकरं यद्गङ्गाख्यं तीर्थं तस्यास्पदमाश्रयम्। सुविपक्वयोगैरपि हृदि कृतं केवलं न तु दृष्टम्। तस्य तेऽङ्घ्रिं ददृशिम दृष्टवन्तो वयं बहुभिः पुण्यैः। अतोऽस्माननुगृहाण, भक्तान् कृत्वानुग्रहं कुर्वित्यर्थः। ननु किं भक्तया यथा पूर्वं तप एव तप्यतां तत्राहुः—उत्सिक्ता उद्रिक्ता या भक्तिस्तयाऽपहत आशयलक्षणो जीवकोषो येषां त एव पूर्वं भगवद्गतिं परमपदमापुर्नान्ये' इति॥२२-२३॥

भावानुवाद—अब 'तपेति' दो श्लोकोंमें श्रीकृष्णके द्वारा भक्तिको प्राप्त करनेवाले मुनियोंकी बात कह रहे हैं। तपनिष्ठ विश्वामित्र, जपनिष्ठ गौतम, ज्ञाननिष्ठ वशिष्ठ तथा अन्य-अन्य मुनियोंने धर्म, अर्थ, काम और मोक्षके साधक होकर भी कुरुक्षेत्रमें उपस्थित होकर श्रीकृष्णसे सर्वप्रथम भक्तिकी प्रार्थना की थी, तथा उनकी कृपासे अपनी प्रार्थित भक्तिको प्राप्त करके अन्तमें वे भक्तिमें रत हुए थे।

इस विषयमें दशम-स्कन्धमें कहा गया है, "हे श्रीकृष्ण! आज हमने आपके चरणकमलोंका दर्शन किया है। ये श्रीचरणकमल सब प्रकारके पापोंको ध्वंस करनेवाले हैं, गंगा तीर्थके जनक हैं तथा योगमें सिद्धि प्राप्त करनेवाले योगियोंके द्वारा भी हृदयमें ध्यान किये जाते हैं। अतः आज हमने साक्षात्‌रूपमें उन श्रीचरणोंके दर्शन किये हैं, अतएव भक्ति प्रदान करके हमारे प्रति अनुग्रह कीजिए। तत्त्वज्ञानसे युक्त भक्ति द्वारा जिनका वासनारूप जीव-कोष ध्वंस हो गया है, वे ही आपके श्रीचरणकमलोंकी भक्ति करते हैं।" इस श्लोककी व्याख्यामें श्रीधरस्वामीने कहा है—"सुपक्व अर्थात् परमसिद्धिको प्राप्त किये हुए योगी जिन श्रीचरणकमलोंका अपने हृदयमें ध्यान करते हैं, किन्तु साक्षात् दर्शन प्राप्त नहीं कर पाते; जो श्रीचरणकमल समस्त पापोंको

ध्वंस करनेवाले हैं; गंगा नामक तीर्थके आश्रयस्वरूप हैं; हे प्रभो! आपके उन्हीं श्रीचरणकमलोंका आज हमने अनेक पुण्योंके फलस्वरूप साक्षात्‌रूपमें दर्शन किया है। अब आप हमें अपना भक्त बनाकर अपनी कृपा प्रकाश कीजिए।"

यदि कहो कि भक्तिकी क्या आवश्यकता है, तुम पहलेकी तरह ही जप-तप आदि करो। उसके लिए ही मुनिगण कह रहे हैं—'हे प्रभो! आपके श्रीचरणकमलोंके दर्शनसे हमारे हृदयमें भक्तिका उदय हुआ है और उसके कारण वासनारूप हमारे जीवकोषका ध्वंस हुआ है। अतएव हम आपके श्रीचरणकमलोंको प्राप्त करनेकी इच्छा करते हैं, कोई दूसरी गति नहीं चाहते हैं'॥२२-२३॥

स्थावराश्च तमोयोनिगतास्तरुलतादयः।
शुद्धसात्विकभावाप्त्या तत्प्रेमरसवर्षिणः॥२४॥

श्लोकानुवाद—तामसयोनिको प्राप्त किये हुए तरु-लता आदि स्थावर प्राणी भी श्रीकृष्णकी कृपासे शुद्ध सात्विक भावको प्राप्तकर सदा प्रेमरसकी धाराका वर्षण कर रहे हैं॥२४॥

दिग्दर्शिनी टीका—अधुना प्रेमसम्पूरितानाह—स्थावरा इति। अप्यर्थः चकारः। तमोयोनिः स्थावरत्वं बहिरिन्द्रियशक्त्यसद्भावात् तां प्राप्ता अपि वृन्दावनादौ स्थितास्तरुलतादयः। यद्यपि तत्रत्यास्तामसा न भवन्ति, तथापि साधारणस्थावर-तुल्यतादृष्ट्या तथोक्तमिति ज्ञेयम्। यद्वा, हस्तिनापुरादिवर्तिनः यथोक्तं श्रीभगवन्तं प्रति श्रीकुन्त्या प्रथमस्कन्धे (श्रीमद्भा॰ १/८/४०)—*'इमे जनपदाः स्वृद्धाः सुपक्वौषधि-वीरुधः। वनाद्रिनद्युदन्वन्तो ह्येधन्ते तव वीक्षिताः॥'* इति। अत्र च भवता परमानुकम्पया दृष्टाः सन्तः एधन्ते परमप्रेमसम्पत्प्राप्त्या वर्धन्ते सर्वतोऽधिकतरा भवन्तीति वदन्त्या स एवार्थोऽभिप्रेतः। शुद्धसात्विकानां परमवैष्णवानां यो भावस्तत्ता। यद्वा, शुद्धसात्त्विकः रजस्तमोऽसंस्पृष्टो यो भावः प्रेमानुभावरूपस्तम्भादिस्तस्य प्राप्तया। तस्य भगवतः प्रेमरसवर्षिणः सततमधुधारास्रावव्याजेन प्रेमसम्पत्तिलक्षणाश्रुधारा-वृष्टियुक्ता अभवन्नित्यर्थः॥२४॥

भावानुवाद—अब 'स्थावरा' इति श्लोक द्वारा प्रेमसे परिपूर्ण स्थावर आदि प्राणियोंकी महिमा कह रहे हैं। तामस योनिको प्राप्त तरु-लता आदि प्राणी साधारणतः बाह्य इन्द्रियोंकी क्रियाशक्तिके अभावमें जड़

रहते हैं, तथापि श्रीवृन्दावन आदि धामोंमें स्थित तरु-लता बाह्य इन्द्रियोंकी क्रियावृत्तिके अभावमें स्थावर जातिके होने पर भी, श्रीकृष्णकी कृपासे सात्त्विक भावको प्राप्त हुए हैं। यद्यपि श्रीवृन्दावनके तरु-लता आदि तामस योनिमें नहीं है, तथापि साधारण स्थावर जातिके साथ तुलना करनेके कारण ऐसा वर्णन कर रहे हैं। अथवा हस्तिनापुर स्थित तरु-लता आदिके सम्बन्धमें ऐसा समझना चाहिए। यथा, प्रथम-स्कन्धमें भगवान् श्रीकृष्णके प्रति श्रीकुन्तीदेवीकी उक्ति है—"हे श्रीकृष्ण! क्योंकि तुम यहाँ पर विराजमान हो, इसलिए यह देश भी समृद्धशाली हो रहा है और यहाँकी औषधि और तरु-लताएँ आदि समय पर सुपक्व फल उत्पन्न कर रही हैं। अर्थात् आपकी कृपादृष्टिसे ये सब पर्वत, वन, सरोवर इत्यादि अत्यधिक वृद्धिको प्राप्त हो रहे हैं।" उद्धृत श्लोकके 'तव वीक्षिताः' पदका अर्थ है—आपकी परम कृपापूर्ण दृष्टिसे ये सब समृद्धिशाली हो रहे हैं, तथा 'एधन्ते' पदका अर्थ है—आपकी प्रेम-सम्पत्तिको प्राप्त करके सर्वाधिक वृद्धिको प्राप्त हो रहे हैं, यही इस श्लोकका अभिप्रेत अर्थ है। अथवा वास्तवमें तरु-लता आदि स्थावर होने पर भी परम वैष्णवोंके शुद्ध-सात्त्विक भावको प्राप्त कर चुके हैं। यहाँ पर 'शुद्ध-सात्त्विक' कहनेसे रजोगुण और तमोगुणसे रहित जो शुद्धभाव है, प्रेमके उसी अनुभावरूप स्तम्भ आदि सात्त्विक भावोंको प्राप्त किया है, ऐसा समझना चाहिए। इस प्रकार वे तरु-लतादि भी श्रीभगवान्के प्रेमरस-धाराके वर्षणसे अर्थात् निरन्तर मधु-धाराके वर्षणके बहाने प्रेम-सम्पत्ति लक्षण रूप अश्रुधाराका वर्षण कर रहे हैं॥२४॥

हे कृष्णभ्रातरस्तस्य किं वर्णोऽपूर्वदर्शितः।
रूप-सौन्दर्य-लावण्य-माधुर्याश्चर्यताभरः ॥२५ ॥

श्लोकानुवाद—हे श्रीकृष्णके भाईयों! श्रीकृष्णके रूप, सौन्दर्य, लावण्य और माधुर्य आदि आश्चर्यपूर्ण महिमाओंका मैं कहाँ तक वर्णन करूँ, वे सभी तो अपूर्व हैं॥२५॥

दिग्दर्शिनी टीका—एवं मुक्त्यादिदानेन माहात्म्यभरमुक्त्वाधुना स्वत एव तत्तद्धेतुत्वेन तदीयरूपादि-महिमानमाह—हे कृष्णेति द्वाभ्याम्। अपूर्वदर्शितः पूर्वं

वैकुण्ठेऽवतारेषु-चाप्रकटीकृतः। रूपमाकारः, सौन्दर्यमवयवसौष्ठवम्, लावण्यं कान्तिविशेषः, माधुर्यं स्मितभ्रूनर्त्तनकटाक्षादि; तेषामाश्चर्यता चित्तचमत्कारकारित्वं तस्या भरोऽतिशयः किं वर्ण्यः अपितु वर्णयितुमशक्य इत्यर्थः॥२५॥

भावानुवाद—इस प्रकार श्रीकृष्णके द्वारा मुक्ति, भक्ति और प्रेम आदि दानके माहात्म्यका कीर्त्तन करके अब उनकी समस्त महिमाओंका कारण अर्थात् स्वतःस्फूर्त उनके रूप आदिकी महिमाका वर्णन 'हे कृष्णोति' दो श्लोकोंके द्वारा कर रहे हैं। हे श्रीकृष्णके भ्रातृगण! श्रीकृष्णका रूप आदि सब कुछ ही अपूर्व है, पहले कभी भी अर्थात् वैकुण्ठेश्वर श्रीनारायणके अवतारमें भी ऐसा सब कुछ प्रकटित नहीं हुआ है। रूप अर्थात् उनका आकार; सौन्दर्य अर्थात् उनके अंगोंकी सुन्दरता और सुडौलता; लावण्य अर्थात् कान्तिविशेष; माधुर्य अर्थात् स्मित हास्य, भ्रूनर्त्तन अर्थात् कटाक्ष आदि। इन गुणोंकी आश्चर्यपूर्ण-महिमा अर्थात् अत्यन्त चित्त-चमत्कारिताका वर्णन कहाँ तक करूँ; अपितु मैं वर्णन करनेमें भी असमर्थ हूँ॥२५॥

अपूर्वत्वेन तस्यैव यो विस्मयविधायकः।
तथा लीलागुणाः प्रेमा महिमा केलिभूरपि॥२६॥

श्लोकानुवाद—श्रीकृष्णका अपूर्व रूप आदि उन्हींको विस्मित करनेवाला है; उनकी लीला, गुण, प्रेम, महिमा तथा लीलाभूमि भी उसी प्रकार अपूर्व हैं॥२६॥

दिग्दर्शिनी टीका—कुतस्तस्य श्रीकृष्णस्यापि यो रूपसौन्दर्याद्याश्चर्यताभरः विस्मयं विदधातीति तथा सः। केन हेतुना; अपूर्वत्वेन परमाश्चर्यतया। यद्वा, पूर्ववृत्तत्वेन पूर्वं कदापीदृशो नासीत्, कथमधुना जात इत्येतेनेत्यर्थः। यथा रूपादि तथा तादृश्य एव लीलादयः; तत्र लीला विचित्रचरितानि, गुणाः कारुण्यादयः, प्रेमा भक्तविषयकः, भक्तानां वा तद्विषयकः। महिमा दीनवात्सल्यादिर्भक्तजनाधीनत्वादिर्वा, केलिभूमिः श्रीवृन्दावनादि; कृष्णभ्रातर इति तत्तत्त्वं भवन्त एव सम्यग् विदन्त्यनुभवन्ति चेति यूयमेव भूरिभागा इति भावः॥२६॥

भावानुवाद—श्रीकृष्णके रूप और सौन्दर्य आदि उन्हींको विस्मित कर देते हैं। क्यों? क्योंकि, उनका ऐसा परम आश्चर्यमय रूप-सौन्दर्य आदि पहले कभी भी प्रकटित नहीं हुआ। उसी प्रकार उनकी लीला,

उनका विचित्र चरित्र, कारुण्य आदि गुण, भक्तोंके प्रति उनका प्रेम तथा उनके प्रति भक्तोंका प्रेम, दीनजनोंके प्रति उनके वात्सल्यकी महिमा अथवा भक्तोंके अधीन होनेकी महिमा तथा उनकी लीलाभूमि श्रीवृन्दावन आदि भी वैसी महिमायुक्त हैं। 'श्रीकृष्णभ्रातृगण' कहनेका तात्पर्य यह है कि आप उनके भाई होनेके नाते उनकी वैसी महिमासे तत्त्वतः अवगत हैं तथा अनुभवी भी हैं। अतएव आपलोग ही भूरिभाग्यवन्त अर्थात् अत्यन्त भाग्यशाली हैं॥२६॥

मन्येऽत्रावतरिष्यन्न स्वयमेवमसौ यदि।
तदास्य भगवत्तैवाभविष्यत् प्रकटा न हि॥२७॥

श्लोकानुवाद—मैं ऐसा मानता हूँ कि यदि श्रीकृष्ण स्वयं इस भूमण्डलमें अवतीर्ण न हुए होते, तो उनकी परम भगवत्ता अर्थात् परम भगवान् होनेकी महिमा भी जगतमें प्रकाशित नहीं होती॥२७॥

दिग्दर्शिनी टीका—ननु यद्येते पूर्वं नासन्, तदा नित्यत्वहानिः स्यात्। यदि वासन् तदा पूर्वतोऽस्य श्रैष्ठ्यं न सिध्येदित्याशंक्याह—मन्य इति द्वाभ्याम् अहमेवं मन्ये। अत्र भूतले श्रीमथुरायां वा असौ श्रीकृष्णः स्वयं यदि नावतरिष्यत्; अप्यर्थे एव-शब्दः, भगवता परमेश्वरत्वमपि प्रकटा व्यक्ता ना भविष्यत्, किं पुनः परमाश्चर्यरूपादिभरस्तादृशलीलादयश्च, साक्षात् सर्वैरननुभूयमानत्वात्। हि निश्चितम्; यद्वा, तादृशरूपादिकमेव भगवत्ता सा प्रकटा नाभविष्यदेव। अप्रकटत्वेन तेनासन्नेवेति मन्य इति भावः॥२७॥

भावानुवाद—यदि आपत्ति हो कि पहले कभी भी ऐसा रूप आदि प्रकटित नहीं हुआ, तो फिर अब कैसे प्रकट हुआ है? यदि उनके रूप आदि अपूर्व हैं, तो फिर उनकी नित्यता कहाँ रही; और यदि कहा जाए कि वह पहले भी था, तो फिर उनके अपूर्व होनेकी श्रेष्ठता सिद्ध नहीं होती। इस प्रकारके प्रश्नकी आशंका करके 'मन्ये' इत्यादि दो श्लोक कह रहे हैं। मेरा मन्तव्य यह है कि श्रीकृष्ण यदि स्वयं इस भूमण्डलके श्रीमथुराधाममें अवतीर्ण न हुए होते, तब उनके परम आश्चर्यमय रूप आदिकी तो बात ही क्या, उनकी परमेश्वरता भी अभिव्यक्त नहीं होती। निश्चयके अर्थमें 'हि' अव्ययका प्रयोग है। तात्पर्य यह है कि यद्यपि उनका परम ऐश्वर्य तथा रूप, लीला और

धाम आदि नित्य हैं अर्थात् प्रपञ्चातीत गोलोकमें नित्य वर्त्तमान हैं, तथापि भूमण्डलमें अवतरण नहीं कराने पर वह कभी भी प्रकटित नहीं होते अथवा जगतका कोई भी जीव उनको अनुभव नहीं कर पाता। अतः उनके वैसे रूप-लीलादिके कारण जगतमें उनकी भगवत्ता अपूर्व ही थी, किन्तु इस समय जगतमें प्रकटित होनेसे सभी उसको अनुभव कर रहे हैं। अतएव मेरा मन्तव्य यह है कि जगतमें यदि ऐसे रूप आदि वैभवसे युक्त उनकी भगवत्ता प्रदर्शित नहीं होती, तो फिर वह भगवत्ता नित्य होने पर भी जगतमें अप्रकट ही रहती। अतएव मैं निश्चय ही भगवत्ताके उस स्वरूपको 'न होनेमें' ही गणना करता अर्थात् 'नहीं है' कहकर ही मानता॥२७॥

इदानीं परमां काष्ठां प्राप्ताभूत् सर्वतः स्फुटा।
विशिष्टमहिमश्रेणी-माधुरीचित्रताचिता ॥२८॥

श्लोकानुवाद—इस समय श्रीकृष्णकी विशिष्ट महिमाओंकी बहुविध माधुरी अनेक प्रकारसे परिव्याप्त और चरमसीमाको प्राप्त हुई है, अतः वही भगवत्ता सब प्रकारसे सर्वत्र परिस्फुट हो रही है॥२८॥

दिग्दर्शिनी टीका—इदानीमत्रावतरणे तु सर्वतः सर्वथा सर्वत्र स्फुटाभूत्। तत्रापि परमां काष्ठां निष्ठां प्राप्ता सती। तत्प्रकारमेवाह—विशिष्टा उत्तमा या महिमश्रेण्यस्तासां माधुरी तस्याश्चित्रता वैचित्री बहुविधत्वं तया आचिता व्याप्ता सती। एवं श्रीकृष्णस्यावतारित्वमवतारत्वमपि प्रसक्तम्। अतएव तत्तत्परमैश्वर्यादिकं परममाधुर्यादिकमपि युगपदेव तस्मिन् सुसङ्गच्छत इति भावः॥२८॥

भावानुवाद—अभी उनके इस अवतारमें वैसे रूप आदिसे युक्त उनकी भगवत्ता सब प्रकारसे सभी स्थानों पर परिस्फुट हुई है तथा उनका माधुर्य आदि भी चरमसीमाको प्राप्त हो रहा है। किस प्रकारसे? उनकी विशिष्ट और उत्तम महिमाएँ अनेक प्रकारकी माधुरीकी वैचित्री द्वारा व्याप्त होकर चरमसीमाको प्राप्त हुई हैं। इस प्रकार श्रीकृष्णके अवतारी होने पर भी उनके अवतारकी बात ही उपलब्ध हो रही है। अतएव श्रीकृष्णके अवतारी होनेके कारण उनमें वैसे परम ऐश्वर्य और परम माधुर्य आदिका विद्यमान रहना सुसंगत ही हुआ है॥२८॥

कृष्णस्य कारुण्यकथास्तु दूरे तस्य प्रशस्यो वत निग्रहोऽपि।
कंसादयः कालियपूतनाद्या बल्यादयः प्रागपि साक्षिणोऽत्र॥२९॥

श्लोकानुवाद—श्रीकृष्णकी कृपाकी बात तो दूर रहे, उनका निग्रह (दण्ड) भी प्रशंसनीय है। इसके साक्षी इस श्रीकृष्णावतारमें कंस, कालिय और पूतना आदि और पूर्व अवतारोंमें बलि जैसे असुरगण हैं॥२९॥

दिग्दर्शिनी टीका—इत्थं श्रीभगवतोऽनुग्रहादिगुणमहिमानं संक्षेपेणोक्त्वा निग्रह-व्याजमाहात्म्य-विशेषमाह—कृष्णस्येति। वत हर्षे, तस्य कृष्णस्य निग्रहोऽपि प्रशस्यः परमस्तुत्यः। अत्र निग्रहप्रशंसने कंसादयः साक्षिणः प्रमाणम्। तथाहि जीवने कंसस्य श्रीमथुराधिपत्यम्। तथा *'आसीनः संविशंस्तिष्ठन् भुञ्जानः पर्यटन् पिबन्। चिन्तयानो हृषीकेशमपश्यत्तन्मयं जगत्॥'* (श्रीमद्भा॰ १०/२/२४) इत्येष महायोगिदुर्लभो भावोऽजनि। मरणे च मञ्चान्निपातितस्य तस्योपर्येव पतनाद् वक्षसि पादपद्माश्लेषः साक्षाच्छ्रीमुखदर्शनम्। विश्रान्तौ तद्देहस्य यदुकुलगोपवर्ग-परिवृत-श्रीभगवत्-साक्षाद्राजयोग्यदाहादिसंस्कारः। परम बन्धुवत् तत्पत्नीनामाश्वासनं तत्पित्रे राज्य-समर्पणमित्यादि। आदिशब्देन कंससदृशाश्चाणूरादयो मल्ला जरासन्धादयश्च राजानः शिशुपाल-दन्तवक्राभ्यां व्यतिरिक्ताः ग्राह्याः। तयोर्ब्राह्मणापराधिनोरपि पूर्वभक्तत्वापेक्षया कृपायोग्यत्वात्। तत्र मल्लादीनां कंसाज्ञादिना भगवता सह मल्लयुद्धार्थं कंसवद्भावविशेषो नूनं जात एव। विशेषतो निजगोपैरिव मल्लैः सहालिङ्गनमहाप्रसादरूपनियुद्धक्रीड़ा वृत्ता। *'यामाहुर्लौकिकीं संस्थां हतानां समकारयत्'*—(श्रीमद्भा॰ १०/४४/४९) इत्यनेन तेषामपि तथैवान्तासंस्कारः सिद्धः। जरासन्धस्य च श्रीबलदेवगृहीतस्यापि वीरयशोविस्तारणाय मुहुर्मुहुः परिमोचनम्। अन्ते च स्वयं तद्गृहे सुहृद्भ्यां सह गत्वा ब्रह्मण्यता-वदान्यता-दुर्जयत्वादि-महाकीर्त्तिर्जगति व्यक्तं स्थापितैव। एवं पौण्ड्रादीनामन्येषामप्यूह्या। मुक्तिश्च सर्वेषां तेषामपि विशेषणैवेत्युक्तमेवात्र आत्मना मारिता ये चेति। श्रीभागवतादौ च (श्रीमद्भा॰ ११/५/४८)—*'वैरेण यं नृपतयः शिशुपालपौण्ड्र-शाल्वादयो गतिविलासविलोकनाद्यैः। ध्यायन्तः आकृतिधियः शयनासनादौ, तत्साम्यमापुरनुरक्तधियां पुनः किम्॥'* इत्यादिवचनैः। अधुना तेभ्योऽपि विशेषं गोकुलगतानां वक्तुं पृथक्त्वेनाह—कालियेति। नियुद्धे चानूरादिभ्योऽपि तस्य च महाभोगेन श्रीमदङ्गालिङ्गनं सम्यग्प्रवृत्तमेव। श्रीपादाब्जरजःस्पर्श-सौभाग्यञ्च तत्पत्नीभिः *'कस्यानुभावोऽस्य न देव! विद्महे'*—(श्रीमद्भा॰ १०/१६/३६) इत्यादिना वर्णितमेव। तत्र च तद्रजःस्पर्शमहाकौतुक-नृत्यलीलागतिविशेषेण। ततश्च तस्य सर्वापि फणराजी प्रत्येकं तादृशरङ्गस्थली बभूव। पश्चात् स्तुतिपूजाविशेषः; आज्ञा प्रसादलाभः; श्रीगरुड़भयपरित्यक्तनिजावास-रमणकाख्यमहाद्वीप-सुखवासलाभः; सहजवैरि श्रीवैनतेयेन

सह परमं सख्यं तेन सम्मानञ्च। यतः परमदुलर्भस्य श्रीमत्पादारविन्दासाधारणचिह्नस्य सुदर्शनस्य मस्तके धारणमित्यादि। पूतनायाश्च गोकुले गोगोपीगणमध्ये सत्तमवेशेनागमनम्। अतएवोक्तं तत्प्रसङ्गे श्रीबादरायणिना—(श्रीमद्भा॰ १०/६/३) *'न यत्र श्रवणादीनि'* इति। अतस्तया केवलं भाग्यविशेषेणैव तत्रागतमिति तदभिप्रायः। ततश्च श्रीब्रह्मादिध्येयं तच्छ्रीपादाब्जद्वयं निजोत्सङ्गे सलालनं निवेशितम्; परमपि लालनादिकं तथाकृतम्। येन श्रीयशोदा मातापि परमविस्मिता अभूत्। तच्च तत्रैवोक्तम् (श्रीमद्भा॰ १०/६/९)— *'अतिवामचेष्टिताम्'* इति, *'निरीक्ष्यमाणे जननी ह्यतिष्ठताम्'* इति। एवं मातृवल्लालनेनैव मातृगतिराप्ता। तच्च *'पूतना लोकबालघ्नी'* (श्रीमद्भा॰ १०/६/३५) इत्यादि श्रीशुकोक्त्या *'सद्वेषादिव पूतनापि सकुला त्वामेव देवापिता'* (श्रीमद्भा॰ १०/१४/३५) इति ब्रह्मोक्त्या *'अहो! वकी यं स्तनकालकूटम्'* (श्रीमद्भा॰ ३/२/२३) इत्यादि श्रीमदुद्धवोक्त्या चाभिव्यञ्जितमेवास्ते। अथ मरणेऽपि तद्वक्षःस्थले भगवतः क्रीड़ाकौतुकम्। *'बालञ्च तस्या उरसि क्रीड़न्तम्'* (श्रीमद्भा॰ १०/६/१८) इति तत्रैवोक्तेः। तथा पाञ्चभौतिकस्यापि तद्राक्षसदेहस्य दाहेऽगुरुतोऽपि सौरभं दिक्षु प्रसृतम्। *'दह्यमाणस्य देहस्य धूमश्चागुरुसौरभः। उत्थितः'* (श्रीमद्भा॰ १०/६/३४) इति तत्रैवोक्तेरिति दिक्। आद्यशब्देन कालियादिवद्-गोकुल-सम्बन्धिनो यमलार्जुनाघासुरादयः। तत्र यमालार्जुनयोस्तादृशाद्भुतदामोदरबन्धलीलाया मध्ये प्रवेशः। महामुनिशापविमोचनं तादृशस्तुतिप्रार्थना-प्रेमभक्तिवरप्राप्तिरिति दिक्। अघासुरस्य च महाशरीरान्तरे ससखिवत् सगणस्य भगवतोऽद्भुतप्रवेशादिक्रीड़ा, विश्वाद्भुतत्वावहमोक्षप्राप्तिः, मृतशरीरस्यापि महाक्रीड़ता जाता। *'राजन्नाजगरं चर्म शुष्कं वृन्दावनेऽद्भुतम्। व्रजौकसां बहुतिथं बभूवाक्रीड़गह्वरम्॥'* (श्रीमद्भा॰ १०/११/३६) इति तत्रैवोक्तेः। एवमन्येषामपि बकारिष्टकेशिप्रभृतीनां दशमस्कन्धादुक्तया स्फुटमेव मनीषिभिरूह्यम्। एवं श्रीगोपिकादीनां रासक्रीड़ादौ त्यागदोषोऽपि प्रेम विशेषवृद्धये। प्रेमभराकृष्टचित्तस्य भगवतस्तत्तत्-प्रेमालापश्रवणपरतया सम्वृत्तः परमगुण एव पर्यवसितः। तच्च तत्रैव। *'नाहन्तु सख्यो भजतोऽपि जन्तून् भजाम्यमीषामनुवृत्तिवृत्तये।'* (श्रीमद्भा॰ १०/३२/२०) इत्यादि श्लोकत्रयेण श्रीभगवन्मुखादेव व्यक्तम्। अत्राप्यग्रे तथैव व्यक्तं भावि। प्रागपि इत्यपि शब्दस्यायमर्थः। साक्षादवतारिणोऽस्य तद्युज्यत एव; अस्य श्रीवामनावतारेऽपीति। तत्र च बन्धनादिना श्रीबलेः परमैश्वर्यादि विख्यापनं व्यक्तमेव। तथा स्वर्गराज्यात् भ्रंसितस्यापि तस्य स्वर्गराज्याधिक-सुतलराज्य-महाविभूतिसम्पादनं द्वारेऽवस्थानम्; रावणादिनिवारणादिना द्वारपालव्यवहारपरिपालनम्; कुशदैत्यपीड़ित-दुर्वाससः परमार्तिप्रार्थनयापि बलिद्वारात्यजनादिकं तत्तदाख्यानतः श्रीमद्भागवतादौ प्रसिद्धमेव। एतच्चावतारेऽपि तस्मिन्ननेनेदृशं कृतमित्यधुना अवतारिणोऽस्य महामाहात्म्य एव पर्यवस्यतीत्यत्रोक्तम्। आदि-शब्देन मधु-कैटभ-कालनेमि प्रभृतयः। तेषां तथा तथा युद्धक्रीड़ादिकौतुकेन महाप्रसादलाभः पुराणेषु प्रसिद्ध एवेति दिक्। अलमति विस्तरेण॥२९॥

भावानुवाद—इस प्रकार भगवान्‌की कृपा आदि गुणोंकी महिमाका संक्षेपमें वर्णन करके अब उनके निग्रहके (दण्डके) बहाने भी जो विशेष माहात्म्य प्रकटित हुआ है, उसे 'कृष्णस्य' इत्यादि श्लोकमें बतला रहे हैं। अहो! कैसे आनन्दकी बात है! श्रीकृष्णकी कृपाकी बात तो दूर रहे, उनका दण्ड भी प्रशंसनीय है अर्थात् परम स्तुतिका विषय है। इस प्रकार श्रीकृष्णके दण्डकी प्रशंसाके विषयमें कंस आदि असुरगण ही साक्षी और प्रमाण हैं। यथा, "कंस अपने जीवित कालमें श्रीमथुराके अधिपति होकर भी राज-सिंहासन पर बैठने, उठने, वास करने, भोजन, पान, पर्यटन आदि सभी कार्योंमें सब समय श्रीहृषीकेशकी वैरभावसे चिन्ता करके उनमें तन्मय हुए थे।" इस प्रकार जीवितकालमें ही कंसको महायोगियोंके लिए भी जो दुर्लभ है, उस भावकी प्राप्ति हुई थी। श्रीकृष्णके द्वारा मंचसे गिराने पर मृत्युके समय कंसने अपने वक्षःस्थल पर श्रीकृष्णके श्रीचरणकमलोंका आलिङ्गन प्राप्त किया और साक्षात् श्रीकृष्णके मुखमण्डलका दर्शन करते-करते देहत्याग किया। देहत्याग करनेके पश्चात् भी उसके देहका सत्कार हुआ अर्थात् श्रीभगवान्‌ने स्वयं यादवों और गोपों सहित उपस्थित होकर राजोचित रीतिसे उसका दाह आदि संस्कार करवाया था। तदुपरान्त श्रीकृष्णने परमबन्धुके समान मधुर वाक्योंके द्वारा कंसकी पत्नियोंको आश्वासन प्रदान किया था और उसके पिता श्रीउग्रसेनको राज्य समर्पित किया था। मूल श्लोकके 'आदि' शब्दसे कंसके समान चाणूर आदि मल्ल तथा शिशुपाल और दन्तवक्रको छोड़कर जरासन्ध आदि राजाओंको भी सम्मिलित करना होगा। शिशुपाल और दन्तवक्र ब्राह्मणोंके अपराधी थे, इसलिए दैत्यों जैसा आचरण करते थे। किन्तु वे पहले भक्त थे, इसलिए प्रभुकी कृपाके योग्य बने—ऐसा समझना चाहिए। कंसकी आज्ञासे जिन सब मल्लोंने भगवान्‌के साथ मल्लयुद्ध किया था, उन्होंने भी श्रीकृष्णके प्रति कंसके समान अथवा उससे कुछ कम भावको प्राप्त करके भी उसके जैसी सद्गतिको प्राप्त किया था। विशेषतः श्रीकृष्ण अपने प्रिय गोपोंके साथ जैसी मल्ल-क्रीड़ा करते थे, इन मल्लोंके साथ भी वैसी मल्ल-क्रीड़ाके बहाने श्रीकृष्णने उनको आलिङ्गन आदि रूपमें अपना

महाप्रसाद दान किया था। "तदुपरान्त लोकपावन श्रीभगवान्ने राजरानियोंको सान्त्वना प्रदान की तथा अपने द्वारा मृत सभी व्यक्तियोंकी लौकिक सत्क्रिया आदि सम्पूर्ण करवायी।" इसके द्वारा उन सबका भी कंस जैसा ही अन्तिम संस्कार हुआ—ऐसा स्थापित होता है।

जरासन्धके श्रीबलराम द्वारा पकड़ लिए जाने पर भी श्रीकृष्णने उसके वीर-यशका विस्तार करनेके लिए पुनः-पुनः उसको छुड़वा दिया था। उसके मृत्युकालमें भी स्वयं अपने बन्धु-बान्धवोंके साथ उसके घर जाकर श्रीकृष्णने अपनी ब्रह्मण्यता, महावदान्यता और दुर्जयत्व आदि महाकीर्त्तिको जगतमें प्रतिष्ठित किया था। पौण्ड्रक आदिके सम्बन्धमें भी ऐसी सद्‌गतिकी प्राप्ति ही समझनी चाहिए। इन सभीने मुक्ति प्राप्त की थी, इस विषयमें अधिक क्या कहा जाए? विशेषतः जो स्वयं श्रीकृष्णके हाथोंसे निहत हुए थे, उनके विषयमें पहले ही कहा जा चुका है। श्रीमद्भागवतमें कहा गया है, "शिशुपाल, पौण्ड्रक और शाल्व आदि राजा शत्रुतावशतः शयन, भोजन और उठते-बैठते सब समय श्रीकृष्णकी गति, विलास और आवलोकन आदि क्रियाओं द्वारा उनकी चिन्ता करते-करते उनके सारूप्य, सायुज्य आदिको प्राप्त हुए थे, अतः जिनका मन श्रीकृष्णमें निरन्तर अनुरक्त है, उनकी सद्‌गतिके विषयमें फिर क्या सन्देह है?" इत्यादि वाक्यों द्वारा शत्रुता भावको प्राप्त राजाओंकी बात कहकर अब उनकी तुलनामें अधिक सौभाग्यशाली गोकुलके कालिय और पूतना आदिके वैशिष्ट्यको पृथक्‌रूपसे बतला रहे हैं।

मल्लयुद्धके समय चाणूर आदि मल्लोंको जिस प्रकार श्रीकृष्णको आलिङ्गन करनेका सौभाग्य प्राप्त हुआ था, गोकुलके कालियको उनकी तुलनामें श्रेष्ठ अर्थात् भगवान्के श्रीचरणकमलोंकी रज प्राप्त करनेका सौभाग्य प्राप्त हुआ था। इस विषयमें कालियकी पत्नियाँ ही कहती हैं, "हे देव! हम यह नहीं समझ पा रही हैं कि यह कालिय नाग किस पुण्यके बलसे आज श्रीलक्ष्मी द्वारा भी वाञ्छित आपके श्रीचरणोंकी रजको मस्तक पर धारण कर सका है।" इस प्रकार कालियके मस्तक पर भगवान्के श्रीचरणकमलोंकी रज स्पर्शरूप महाकौतुक अर्थात् नृत्य-लीलाकी विशेष गति द्वारा उसका प्रत्येक फण

ही भगवान्‌की नृत्य-स्थली बन गया था। उस कालियने भगवान्‌की स्तुति, पूजा आदि भी की थी तथा उनकी आज्ञारूपी कृपाको भी प्राप्त किया था; अर्थात् श्रीगरुड़के भयसे परित्यक्त अपने निवासस्थल रमणक नामक महाद्वीपमें फिरसे सुखपूर्वक निवास करनेका सौभाग्य प्राप्त किया था। श्रीगरुड़ने भी अपनी स्वभावसिद्ध शत्रुताका परित्याग करके उसके साथ मित्रताकर उसके प्रति सम्मान प्रदर्शित किया था, क्योंकि कालियने अपने मस्तक पर परमदुर्लभ भगवान्‌के श्रीचरणकमलोंके सुदर्शन आदि असाधारण चिह्नोंको धारण कर रखा था।

पूतनाके सौभाग्यका कारण यह है कि वह राक्षसी होकर भी गोकुलमें गोप-गोपियोंके बीच साधुवेश अर्थात् माताका वेश धारण करके आयी थी। इसलिए उसके विषयमें श्रीशुकदेव गोस्वामीने कहा है, "जिस स्थानके निवासी अपना-अपना कार्य करते समय भगवान्‌के राक्षस-नाशक नामोंका श्रवण और कीर्त्तन नहीं करते, उसी स्थान पर ही यातुधान आदि राक्षसोंका प्रादुर्भाव हो सकता है।" किन्तु जहाँ पर श्रीभगवान् साक्षात्‌रूपमें निवास कर रहे हों, क्या उस स्थान पर राक्षसी प्रवेश कर सकती है? कदापि नहीं, अतः इस परिस्थितिमें पूतनाका असाधारण सौभाग्य होनेके कारण ही वह साधुवेश धारण करके प्रविष्ट हुई थी। फिर नारीरूप धारण करनेवाली उस राक्षसीने ब्रह्मादिके भी ध्येय भगवान्‌के श्रीचरणकमलोंको अपनी गोदमें रखकर माताके समान अत्यधिक स्नेहपूर्वक उनका लालन किया था। पूतनाने ऐसा अद्भुत लालन किया था कि उसके दर्शनसे माता यशोदा भी अत्यधिक विस्मित हो गई थी। यह बात श्रीमद्भागवतमें पूतना-वध प्रसङ्गमें कही गयी है—"श्रीकृष्णकी दोनों माताएँ, श्रीयशोदा और श्रीरोहिणी, पूतनाको घरके भीतर देखकर उसकी ओर देखती ही रह गयीं, उसे मना नहीं कर पायीं।" इस प्रकार माताके समान लालन द्वारा पूतनाको मातृगतिकी प्राप्ति हुई थी। तथा "शिशुघातिनी, रक्त-पान करनेवाली राक्षसी पूतना, श्रीकृष्णके प्राण नाश करनेके अभिप्रायसे उन्हें स्तनपान कराकर भी मातृगतिको प्राप्त हुई।" इत्यादि विषय श्रीशुकदेव गोस्वामीकी उक्तिमें भी कथित हुए हैं। तथा "भक्तोंका अनुकरण करने मात्रसे ही पूतना आदिने अपने समस्त

कुलके साथ श्रीभगवान्‌को प्राप्त किया है।" इत्यादि श्रीब्रह्माकी उक्ति भी द्रष्टव्य है। "अहो भगवान्‌की दयालुता अति आश्चर्यजनक है! दुष्ट पूतनाने प्राणोंको नाश करनेकी कामनासे श्रीकृष्णको अपने विषलिप्त स्तनोंका पान कराया था, किन्तु फिर भी उस पूतनाको धात्री-उचित गति प्राप्त हुई। अर्थात् श्रीकृष्णने केवल उसके भक्तवेशको देखकर ही उसे सद्‌गति प्रदान की थी।" इत्यादि श्रीउद्धवकी उक्तिमें भी यह विषय कथित हुआ है। पूतनाकी मृत्युके समय भी भगवान्‌ने उसके वक्षःस्थल पर क्रीड़ा की थी—"बालकने उसके वक्षःस्थल पर क्रीड़ा की थी।" इत्यादि प्रमाणोंके द्वारा यह और भी परिस्फुट हुआ है। पूतनाकी पाञ्चभौतिक राक्षसी देह होने पर भी दाहकालके समय अगरु-चन्दन आदिकी तुलनामें भी श्रेष्ठ सुगन्ध चारों ओर फैल गयी थी। "पूतनाकी देह जब दग्ध हो रही थी, तब उसमें से अगुरु जैसा सुगन्धित धुआँ उठ रहा था।" इत्यादि प्रसिद्ध वाक्य भी द्रष्टव्य है।

मूल श्लोकके 'पूतनादि' पदके 'आदि' शब्दसे गोकुलसे सम्बन्धित कालिय, यमलार्जुन और अघासुर आदिको भी ग्रहण करना होगा। उनमें से यमलार्जुनका सौभाग्य यह है कि दामबन्धन-लीलामें श्रीकृष्णने उन यमलार्जुनके बीचमें प्रवेश करके उन्हें जड़से उखाड़कर महामुनिके शापसे मुक्त किया था तथा उनको स्तुति, प्रार्थनाका सुयोग देकर प्रेमभक्तिका वरदान दिया था। अघासुरका सौभाग्य यह है कि उसके सर्पकी आकृतिवाले विशाल शरीरमें श्रीकृष्णने अपने मित्रोंके साथ प्रवेश किया था तथा वहाँ अपने सखाओंके साथ अद्भुत लीलाएँ की था। उस क्रीड़ाके बहाने श्रीकृष्णने अघासुरको भी समस्त विश्वको चमत्कृत करनेवाली अति अद्भुत मुक्ति प्रदानकी थी। उसके मृत शरीरका सूखा हुआ चमड़ा बहुत दिनों तक श्रीकृष्ण और उनके सखाओंके लिए महाक्रीड़ा स्थलीमें बदल गया था। "वृन्दावनमें अघासुरका अद्भुत चर्म सूखकर अनेक दिनों तक व्रजवासियोंकी क्रीड़ाके लिए गुफा बन गया था।" इस प्रकार बक, केशी, अरिष्ट जैसे असुरोंकी कथा दशम-स्कन्धमें स्पष्टरूपसे व्यक्त हुई है, इसलिए श्रीनारदने उसका उल्लेख नहीं किया।

इसी प्रकार रासलीलाके समय श्रीकृष्ण द्वारा गोपियोंका त्यागरूप दोष भी प्रेमकी वृद्धि करनेके कारण महागुणमें ही परिणत हुआ है। गोपियोंके प्रेमसे आकृष्ट-चित्त श्रीकृष्ण विच्छेदके समयमें उनके प्रेमालापको सुननेमें पूर्णता रत हुए थे, अतएव उनके द्वारा किये गये त्याग आदि दोष भी महान गुणमें पर्यवसित हो गये हैं। रासलीला प्रसङ्गमें ही कहा गया है—(श्रीकृष्णने देखा कि गोपियाँ उनको अकृतज्ञ और गुरुद्रोही मानकर आपसमें नेत्रोंके संचालनके माध्यमसे गूढ़रूपमें मुस्कुराने लगीं, गोपियोंके इस भ्रमको दूर करनेके लिए भक्तोंके प्रति भगवान्का जो भाव है, उसे व्यक्त कर रहे हैं।) "हे सखियों! मैं अकृतज्ञ, गुरुद्रोही आदिमें से कोई भी नहीं हूँ; मैं आत्माराम और पूर्णकाम होने पर भी तुम्हारे प्रेमके वशीभूत होकर रमण करता हूँ, अतएव इस अर्थमें मैं अनात्माराम तथा शान्त-दास्यादिसे भी मधुररसके आस्वादनमें परम उत्सुक होनेके कारण अपूर्णकाम हूँ। मैं अकृतज्ञ नहीं हूँ, क्योंकि गोपबालक होनेके कारण नीति-शास्त्रका अध्ययन न करने पर भी नारायण होनेके कारण मैं सर्वज्ञ और कृतज्ञ भी हूँ; मैं गुरुद्रोही नहीं हूँ, इस सम्बन्धमें अधिक क्या कहा जाए, क्योंकि तुम्हारे सविलास-कटाक्ष द्वारा आहत होकर ही मैं अदृश्य हुआ था, वह भी केवल तुम्हें अपने वशीभूतकर किसी एक अनिर्वचीय स्वप्रेमको दान करनेके उद्देश्यसे ही। यदि कहो कि वह प्रेम कैसा है? तो बतला रहा हूँ, सुनो। जो मेरा भजन करते हैं, मैं उनका भजन नहीं करता हूँ, क्योंकि ऐसा करनेसे वे निरन्तर मेरी वैसी ही चिन्ता करेंगे, जैसे कोई निर्धन व्यक्ति धन प्राप्त करनेके उपरान्त उस धनको खो देने पर उस धनकी चिन्तामें ही निमग्न रहकर अन्य सब कुछ भूल जाता है। इसीलिए मैं तुम्हारे नेत्रोंसे ओझल होने पर भी तुमसे दूर नहीं रहता। यदि कहो कि फिर आप अदृश्य क्यों हो जाते हैं? यद्यपि मैंने पहले ही तुम्हें इसका कारण बतला दिया है, तथापि फिरसे श्रवण करो। हे अबलाओं! मेरे लिए धर्म-अधर्मका परित्याग करके तुम निरन्तर मेरी चिन्तामें निमग्न रहती हो; तथापि मेरे प्रति तुम्हारी आसक्तिकी वृद्धिके लिए तथा तुम्हारा प्रेमालाप सुनते-सुनते और उसके द्वारा परोक्ष रूपमें सेवित होकर,

तुम्हारे नेत्रोंसे ओझल होकर भी मैं तुम्हारे पीछे-पीछे चल रहा था। अतएव हे प्रियाओं! मैं वास्तवमें तुम्हारा प्रियतम हूँ, इसलिए परोक्ष रूपमें तुम्हारा ही भजन कर रहा था, अतएव प्रियतमके प्रति दोषारोपण करना तुम्हारे लिए उचित नहीं है।" इत्यादि तीन श्लोकों द्वारा भगवान्ने गोपियोंके प्रति अपनी कृपाके विषयमें स्वयं अपने मुखसे ही कहा है, इसे आगे भी बतलाया जायेगा।

वस्तुतः साक्षात् अवतारी श्रीकृष्णके सम्बन्धमें ऐसा व्यवहार ही युक्तियुक्त है। इन्हीं श्रीकृष्णके वामनावतारमें भी ऐसा व्यवहार सुप्रसिद्ध है। श्रीभगवान्ने बलिको बाँधकर उनके असीम धैर्यको सम्पूर्ण विश्वमें विख्यात करनेके लिए ही ऐसी निष्ठुरता दिखलायी थी। पुनः बलिसे स्वर्ग राज्य छीन लिए जाने पर श्रीवामनदेवने उनको स्वर्गसे भी अधिक महाविभूतिसे सम्पन्न सुतल राज्यका आधिपत्य प्रदान करके तथा उनके द्वार पर द्वारपाल बनकर उनके प्रति अपने विशेष अनुग्रहको प्रकाश किया है। रावण आदि जैसे दिग्विजयीके उपद्रवसे उनकी रक्षाकर अपने कर्त्तव्यका भी पालन किया है। कुश-दैत्यसे प्रपीड़ित दुर्वासा द्वारा अत्यधिक आर्त्तिपूर्वक प्रार्थना करने पर भी भगवान् श्रीवामनदेवने उनकी प्रार्थनाको सुना तक नहीं; अर्थात् श्रीभगवान् दुर्वासाकी रक्षाके लिए बलिके द्वारको छोड़कर जानेके लिए तैयार नहीं हुए। यह उपाख्यान श्रीमद्भागवत आदि पुराणोंमें लिपिबद्ध है। अतएव इन श्रीवामनावतारकी वैसी महिमा भी मूलतः अवतारी भगवान् श्रीकृष्णकी महिमामें ही पर्यवसित हुई है। 'आदि' शब्दसे मधुकैटभ, कालनेमि जैसे असुरोंको भी ग्रहण करना होगा तथा उनके साथ भगवान्की युद्धक्रीड़ा आदि कौतुक और महाप्रसाद (कृपाका) दान आदि भी उक्तपुराणमें वर्णित हैं। ग्रन्थ विस्तारके भयसे इस स्थान पर उन लीलाओंका उल्लेख नहीं हुआ है॥२९॥

श्रीपरीक्षिदुवाच—

इति प्रगायन् रसनां मुनिर्निजा,-मशिक्षयन्माधव-कीर्तिलम्पटाम्।
अहो प्रवृत्तासि महत्त्ववर्णने प्रभोरपीति स्वरदैर्विदश्यताम्॥३०॥

श्लोकानुवाद—महाराज श्रीपरीक्षितने (अपनी मातासे) कहा—इस प्रकार भगवान् श्रीकृष्णका गुणगान करते-करते मुनिवर श्रीनारदने सहसा अपनी जिह्वाका दंशन करके कहा—'अहो! तुम प्रभु श्रीकृष्णकी महिमाका वर्णन करनेमें प्रवृत्त हो रही हो?' ऐसा करके उन्होंने माधवकी कीर्त्ति वर्णनमें लोभी अपनी जिह्वाको उचित शिक्षा प्रदान की॥३०॥

दिग्दर्शिनी टीका—इत्येवं प्रकर्षेण गायन् निजां रसनां जिह्वामशिक्षयत् वक्ष्यमाणं शिक्षयामास। माधवस्य मधुवंशसमुद्रचन्द्रस्य भगवतः कीर्त्तौ यशसि तन्माहात्म्य कीर्त्तने वा रसिकामपि। किं कृत्वाशिक्षयत्? तां रसनां स्वरदैर्निजदन्तैर्विदश्य। कथम? अहो! विस्मये खेदे वा। अनुचितप्रवृत्त्या प्रभोः श्रीकृष्णस्यापि महत्त्ववर्णने त्वं प्रवृत्तासि इत्येवं तथोक्तेयत्यर्थः। अयं भावः—चतुरानन-सहस्रवदनादयो यद्वर्णयितुं न शक्नुवन्ति तत् कथं त्वं वर्णयसि? अतस्त्वदशक्तया धाष्टर्यमेव ते फलिष्यतीति॥३०॥

भावानुवाद—इस प्रकार उत्कर्षके सहित श्रीकृष्णका गुणगान करते-करते देवर्षि श्रीनारदने अपनी जिह्वाको शिक्षा प्रदान की। 'माधव' कहनेसे मधुवंशरूप समुद्रके चन्द्रस्वरूप भगवान् श्रीकृष्णका बोध होता है, अतएव उनकी महिमा कीर्त्तन करनेमें प्रवृत्त हुई अथवा कीर्त्तिको वर्णन करनेवाली जिह्वाको शिक्षा प्रदान की। कैसे शिक्षा दी? उस रसनाको अपने दाँतोंके द्वारा दंशन करके अर्थात् दातोंके बीचमें दबाकर। क्यों दंशन किया? हाय! (विस्मय और खेदपूर्वक) चतुरानन ब्रह्मा और सहस्रानन अनन्तशेष आदि भी जिनकी महिमा वर्णन करनेमें असमर्थ हैं, तुम उन्हीं श्रीकृष्णकी महिमाका वर्णन कर रही हो? ऐसे अनुचित कार्यको करनेमें क्यों प्रवृत्त हो रही हो? इसके द्वारा तो केवल मेरी धृष्टता ही लक्षित हो रही है॥३०॥

रसने ते महद्भाग्यमेतदेव यदीहितम्।
किञ्चिदुच्चारयैवैषां तत् प्रियाणां स्वशक्तितः॥३१॥

श्लोकानुवाद—अरी मेरी रसने (जिह्वा)! यदि तुम प्रभुके इन प्रियभक्तोंकी किञ्चित् मात्र महिमा भी अपनी शक्तिके अनुसार वर्णन कर सको, तो मैं उसे तुम्हारा महासौभाग्य समझूँगा॥३१॥

दिग्दर्शिनी टीका—किमशिक्षयत्तदाह—रसने इति। अप्यर्थे एवशब्दो यथापेक्ष्यं सर्वत्र सम्बन्धनीयः। एषामपि, किमुत एषामीश्वरस्य? ईहितं चेष्टितमपि किमुत महिम्नः? तत्रापि किञ्चिदपि किमुत समग्रम्? उच्चारयेति उच्चारणमात्रं कुर्याः; सम्भावनायां सप्तमी। किमुत संकीर्त्तयसीति दिक्। इति यदेतदपि तव महद्भाग्यम्; एतदुक्तं भवति। यद्यपि श्रीभगवत इव तत्प्रियजनानामपि माहात्म्यमर्निवचनीयमेव, तथाप्यनाद्यन्ततया परमदुर्वितर्क्यतया च निजज्ञानाविषयत्वाद् भगवन्महिम्नो वर्णनं किल दुःशकमेव। तद्भक्तानान्तु कथञ्चिन्निजसादृश्येन साक्षादनुभूयमानत्वेन च यथादृष्टचेष्टितमात्रस्य वर्णने काचित् किल शक्तिर्घटतेऽपि कदाचिदसत्यादिना तदन्यथावर्णने जायमानमपराधं ते दीनवत्सलाः क्षमितुमप्यर्हन्तीति तेषां महत्त्व-वर्णनमेवोचितमिति। अत्र च श्रीमद्भक्तानां माहात्म्यवर्णनमेव श्रीभगवतो माहात्म्यवर्णनं परमिति गूढ़ोऽभिप्राय इति दिक्॥३१॥

भावानुवाद—देवर्षि श्रीनारदने अपनी रसनाको क्या शिक्षा दी, इसे 'रसने' इत्यादि श्लोकमें बतला रहे हैं। 'अपि'के अर्थमें 'एव' शब्दका भी यथायोग्य सर्वत्र सम्बन्ध है। रसने! तुम यदि उन भगवान् श्रीकृष्णके प्रियभक्तोंका किञ्चित् मात्र चरित्र भी वर्णन कर सको, तभी तुम्हें अत्यधिक सौभाग्यशाली समझूँगा, उनके इष्टदेव अर्थात् श्रीभगवान्की महिमाके वर्णनकी तो फिर बात ही क्या? तथापि, यदि तुम अपने सामर्थ्यके अनुसार भक्तोंकी महिमा किञ्चित् उच्चारण मात्र भी कर पाओ तो तुम्हारा परम सौभाग्य समझूँगा, सम्पूर्णरूपमें कीर्त्तन कर सको तो उसका कहना ही क्या? अर्थात् भक्तोंकी महिमा भी अनिर्वचनीय है; अतएव उसको उच्चारण करनेका सौभाग्य भी अवर्णनीय है और फिर तुम जो उच्चारण कर रही हो, उसीको अपना बड़ा सौभाग्य मानो। संकीर्त्तन करनेसे क्या फल प्राप्त होता है, उसे कहा नहीं जा सकता। यद्यपि भगवान्के समान ही उनके भक्तोंकी महिमा भी अनिर्वचनीय है, तथापि भगवान्की महिमा अनादि अनन्त तथा परम दुर्वितर्क्य (तर्कसे अतीत) है और मेरे ज्ञानके अतीत होनेके कारण मेरे द्वारा उसका वर्णन करना भी दुःसाध्य है। किन्तु उनके भक्तोंका आचरण कुछ-कुछ अपने आचरणके समान तथा साक्षात् अनुभवका विषय होनेके कारण उसका वर्णन कदाचित् चेष्टा किये जाने पर किसी प्रकार सम्भव भी हो सकता है। अपनी असमर्थतावशतः उस वर्णनमें त्रुटि रहनेकी सम्भावना है और उससे

अपराध होना ही सम्भव है; किन्तु वह अपराध दीनवत्सल भक्तोंके लिए क्षमा योग्य है अर्थात् वे उस अपराधको क्षमा कर देते हैं। अतएव भक्तोंका माहात्म्य वर्णन करना ही कर्त्तव्य है। इसका गूढ़ अभिप्राय यह है कि भगवान्‌के माहात्म्यका वर्णन करनेकी तुलनामें भगवान्‌के भक्तोंका माहात्म्य वर्णन करना अधिक श्रेष्ठ है। यही इस प्रसंगका दिग्दर्शन है॥३१॥

श्रीनारद उवाच—

महानुभावा भवतास्तु तस्मिन् प्रतिस्वकं यः प्रियताविशेषः।
भवत्सु तस्यापि कृपाविशेषो धृष्टेन नीयेत स केन जिह्वाम्॥३२॥

श्लोकानुवाद—हे महानुभावों! भगवान् श्रीकृष्णके प्रति आप सबकी जैसी प्रियता दृष्टिगोचर होती है, भगवान् श्रीकृष्णकी भी आप सभीके प्रति वैसी ही विशेष कृपाका दर्शन होता है। कोई धृष्ट व्यक्ति ही इस कृपाके विषयमें अपनी जिह्वासे वर्णन करनेका साहस कर सकता है॥३२॥

दिग्दर्शिनी टीका—एवं सामान्येन सर्वेषामेव माहात्म्यमुक्त्वा इदानीं प्रत्येकं भगवत्कृपाविशेषेण माहात्म्यविशेषं वक्तुमादौ तथावर्णने स्वकीयायोग्यतामाशंक्याह— महेति। हे महानुभावाः! परममाहात्म्यवन्तः! तस्मिन् श्रीकृष्णे प्रतिस्वकं प्रत्येकमित्यर्थः। तस्य श्रीकृष्णस्यापि प्रतिस्वकं भवत्सु यः कृपाविशेषः, स केन धृष्टेन जिह्वां नीयेत प्राप्येत? यस्तं वर्णयेत् स निर्लज्ज इत्यर्थः। निजाशक्येऽनिवर्चनीय वर्णने प्रवृत्तेः॥३२॥

भावानुवाद—इस प्रकार सामान्य रूपमें पाण्डवोंके माहात्म्यका वर्णन करके अब श्रीनारद पृथक्‌रूपमें प्रत्येकके प्रति भगवान्‌की विशेष कृपाका माहात्म्य वर्णन करनेमें प्रवृत्त हो रहे हैं। सर्वप्रथम उस वर्णनमें अपनी अयोग्यताकी आशंकासे 'महेति' श्लोक कह रहे हैं। हे महानुभवगण! हे परम माहात्म्य युक्त महात्माओं! श्रीकृष्णके प्रति आप सभीका जो विशेष प्रेम देखा जाता है, भगवान् श्रीकृष्णकी भी आप सभीके प्रति वैसी ही विशेष कृपा भी दिखाई देती है। कौन धृष्ट व्यक्ति उनकी इस विशेष कृपाकी महिमा अपनी जिह्वासे उच्चारण करनेका साहस करेगा। यदि उसे वर्णन करनेकी चेष्टा करता है तो

वह निर्लज्ज है, क्योंकि वह ऐसे विषयका वर्णन करनेमें प्रवृत्त हो रहा है जो अनिर्वचनीय है॥३२॥

माता पृथेयं यदुनन्दनस्य स्नेहार्द्रमाश्वासनवाक्यमेकम्।
अक्रूरवक्त्रात् प्रथमं निशम्य प्रेमप्रवाहे निममज्ज सद्यः॥३३॥

श्लोकानुवाद—आपकी माता श्रीकुन्तीदेवी, श्रीयदुनन्दनके केवलमात्र एक स्नेहभरे आश्वासन वाक्यको अक्रूरके मुखसे सुनते ही उसी क्षण प्रेमके प्रवाहमें निमग्न हो गयी थीं॥३३॥

दिग्दर्शिनी टीका—तथापि तत्कीर्त्तनैकरसिकत्वात् तत्परित्यागाशक्तेस्तथैव माहात्म्यं वर्णयति—मातेति सप्तभिः, भवतां माता; यद्वा भवन्मातृत्वेन मादृशामपि मातैव। समाश्वासनवाक्यम्—*'स भवान् सुहृदां वै नः श्रेयान् श्रेयश्चिकीर्षया। जिज्ञासार्थं पाण्डवानां गच्छस्व गजसाह्वयम्॥'* (श्रीमद्भा॰ १०/४८/३२) इत्यादि दशमस्कन्धानुरूपम्। प्रथममिति, ततः पूर्वं तादृश-वाक्याश्रवणात्॥३३॥

भावानुवाद—तथापि श्रीनारद भक्तोंके माहात्म्यका कीर्त्तन करनेमें परम रसिक होनेके कारण तथा उसका परित्याग करनेमें असमर्थ होकर ही पाण्डवोंके माहात्म्यका वर्णन कर रहे हैं। इसे 'माता' इत्यादि सात श्लोकोंके माध्यमसे विस्तृतरूपसे कहा जा रहा है। आपकी माता, अथवा आपकी माता होनेके कारण मेरे जैसे व्यक्तियोंकी भी माता, ये श्रीकुन्तीदेवी (अक्रूरके माध्यमसे भेजे गये) श्रीकृष्णके केवल मात्र एक आश्वासन वाक्य, "हे तात! मेरे जितने भी आत्मीयस्वजन हैं, आप उन सबमें श्रेष्ठ हैं, अतएव आप पाण्डवोंकी कुशल कामनाके लिए अर्थात् वे कैसे हैं, यह सम्वाद लानेके लिए शीघ्र ही हस्तिनापुर गमन कीजिए।" अक्रूरके मुखसे पहली बार इन वचनोंको श्रवण करके वे प्रेमके प्रवाहमें निमग्न हो गयी थीं, क्योंकि इससे पहले उन्होंने ऐसे प्रेमभरे वचन कभी भी श्रवण नहीं किये थे॥३३॥

विचित्रवाक्यैर्बहुधा रुरोद स्फुटेन्नृणां यच्छ्रवणेन वक्षः।
भवत्स्वपि स्नेहभरं परं सा ररक्ष कृष्णप्रियतामपेक्ष्य॥३४॥

श्लोकानुवाद—श्रीयदुनन्दनके आश्वासनपूर्ण वचनोंको सुनकर श्रीकुन्तीदेवीने अनेक प्रकारसे विलाप करते हुए क्रन्दन किया था।

उनके उस क्रन्दनको श्रवण करने मात्रसे ही मानवका हृदय विदीर्ण हो जाए। वे केवल श्रीकृष्णकी कृपा प्राप्त करनेकी आशासे ही आप लोगोंके प्रति अत्यधिक स्नेह करती हैं॥३४॥

दिग्दर्शिनी टीका—प्रेमरसपूरनिमग्नतालक्षणमाह—विचित्रेति। *'कृष्ण! कृष्ण! महायोगिन् विश्वात्मन् विश्वभावन। प्रपन्नां पाहि गोविन्द! शिशुभिश्चावसीदतीम्॥ नान्यत्तव पदाम्भोजात् पश्यामि शरणं नृणाम्।'* (श्रीमद्भा॰ १०/४९/११-१२) इत्यादि दशमस्कन्धोक्तैर्विचित्रैर्वाक्यैः कृत्वा। यस्य रोदनस्य येषां वा वाक्यानां वा श्रवणेन नृणां हृदयं स्फुटेत् विदीर्येताद्यापि; सम्भावनायां सप्तमी। ननु कथं तर्हि पुत्रेष्वस्मासु तस्याः स्नेहः सम्भवेत्तत्राह—भवत्स्विति। अपिशब्देन परमसत्पुत्रतया स्नेहभरयोग्यता बोध्यते। तथापि सा पृथा; भवत्सु कृष्णस्य प्रियता प्रेम; यद्वा, कृष्णः प्रियो येषां, कृष्णस्य प्रिया इति वा; तेषां भावः कृष्णप्रियता तामेव परं केवलमपेक्ष्य। ररक्षेति;—श्रीकृष्णविषयक-भक्तिभरस्वभावेन स्वयमेव पुत्रादि-स्नेहमपसरन्तमपि निरुध्य रक्षतीत्यर्थः। रक्षणस्य दाढर्यबोधनार्थं वर्त्तमानेऽप्यतीत-निर्द्देशः॥३४॥

भावानुवाद—श्रीकुन्तीदेवीके प्रेमरसमें निमग्न होनेका लक्षण 'विचित्रेति' श्लोक द्वारा बतला रहे हैं। उन्होंने नाना-प्रकारसे विलाप करते हुए कहा था, "हे कृष्ण! हे कृष्ण! हे महायोगिन्! हे विश्वात्मन्! हे विश्वपालक! मैं आपके शरणागत हूँ, अपने बालकोंके साथ मैं निरन्तर क्लेशसे भरे हुए संसारमें रह रही हूँ। हे गोविन्द! मेरी रक्षा करो। कालके भयसे भयभीत मनुष्योंके लिए तुम्हारे श्रीचरणकमलोंके अलावा और कोई शरणस्थल नहीं देख रही हूँ।" इत्यादि; दशम-स्कन्धमें उक्त विचित्र प्रकारसे विलाप करते हुए उन्होंने रोदन किया था। उनके वैसे रोदन या विलापको सुनने मात्रसे ही मनुष्यका हृदय विदीर्ण हो जाए।

यदि आपत्ति हो कि उनमें यदि इतना कृष्णप्रेम है, तो फिर उनका अपने पुत्रोंके प्रति स्नेह कैसे सम्भव है? 'भवत्स्वपि' इत्यादि पदों द्वारा इसका समाधान कर रहे हैं। इस पदके 'अपि' शब्द द्वारा सूचित हो रहा है कि आप लोगों जैसे परम सत्पुत्रोंके होनेके कारण ही उनका वैसा परम स्नेह सम्भव हुआ। तथापि वे आप लोगोंके साथ श्रीकृष्णके सम्बन्धको लक्ष्य करके, अथवा आपके प्रति भगवान् श्रीकृष्णकी प्रियताको लक्ष्य करके, अथवा श्रीकृष्ण जिनके प्रिय हैं,

वे ही कृष्णप्रिय हैं तथा उन्हीं कृष्णप्रिय व्यक्तियोंकी श्रीकृष्णके प्रति प्रियता (प्रीति)के कारण ही आपके प्रति वैसा स्नेह रखती हैं। यहाँ पर 'ररक्ष' पदका तात्पर्य यह है कि श्रीकृष्णके प्रति भक्तिपूर्ण स्वभावके कारण श्रीकुन्तीदेवीका स्वतः ही अपने पुत्रोंके प्रति स्नेह नहीं रहा, किन्तु पुत्रोंके श्रीकृष्णभक्ति-स्वभावके कारण ही अर्थात् उन्हें श्रीकृष्ण-सम्बन्धीय जानकर ही वे उनके प्रति स्नेह रखती थीं। उनकी वैसी प्रीति करनेकी दृढ़ता दिखलानेके लिए ही वर्त्तमान कालकी क्रियामें अतीत कालका प्रयोग किया है॥३४॥

चिरेण द्वारकां गन्तुमुद्यतो यदुजीवनः।
काकुस्तुतिभिरावृत्य स्वगृहे रक्षतेऽनया॥३५॥

श्लोकानुवाद—यादवोंके प्राणस्वरूप श्रीकृष्ण दीर्घकाल तक आप लोगोंके राजभवनमें निवास करनेके उपरान्त जब द्वारका जानेके लिए प्रस्तुत हुए, तो श्रीकुन्तीदेवीने ही विनयपूर्ण स्तुति-वाक्योंके द्वारा उनको रोककर अपने भवनमें रखा था॥३५॥

दिग्दर्शिनी टीका—किञ्च चिरेणेति, भारतयुद्धादिनिमित्तं युधिष्ठिरादिनिकटे तत्-पुर्यादौ चिरमवस्थानात्। यदुजीवन इति चिरविरहेण मृतप्रायान् यादवान्जीवयितुमित्यर्थः। काकुयुक्ताभिः स्तुतिभिः; *'नमस्ये पुरुषं त्वाद्यम्'* (श्रीमद्भा॰ १/८/१८) इत्यादि प्रथमस्कन्धोक्ताभिः। आवृत्य निरुध्य; अनया पृथया; रक्षत इति वर्त्तमाननिर्द्देशेन पौनःपुन्यं बोध्यते॥३५॥

भावानुवाद—श्रीनारद कुछ और भी कह रहे हैं, महाभारत युद्धके लिए श्रीयुधिष्ठिर आदि पाण्डवोंके साथ दीर्घकाल तक रहनेके पश्चात् श्रीकृष्ण जब द्वारका जानेके लिए प्रस्तुत हुए, तो इन्हीं श्रीकुन्तीदेवीने विनयपूर्ण वचनोंके द्वारा कहा था, "हे कृष्ण! तुम्हें नमस्कार करती हूँ, तुम स्वयं ईश्वर हो, प्रकृतिके अगोचर आदि-पुरुष हो।" इत्यादि प्रथम-स्कन्धमें उक्त स्तुति वाक्योंके द्वारा श्रीकृष्णको जानेसे रोककर अपने भवनमें कुछ और दिनों तक रखा था। मूल श्लोकका 'रक्षते' क्रियापद वर्त्तमान कालका बोधक है, अर्थात् (श्रीकुन्तीदेवीने) यादवोंके जीवन-स्वरूप श्रीकृष्णको पुनः-पुनः रोक लिया था, ऐसा सूचित हो रहा है। 'यदुजीवन' पदका तात्पर्य यह है कि अपने जीवन-स्वरूप

श्रीकृष्णके अनेक दिनोंके विरहसे यादवगण मृतकी भाँति हो गये थे, इसलिए यादवोंके प्राणस्वरूप श्रीकृष्ण उनको दर्शन प्रदान कर जीवित करनेके लिए पुनः–पुनः द्वारका जानेके लिए तैयार होते थे और श्रीकुन्तीदेवी भी पुनः–पुनः उनको रोककर अपने भवनमें रख लेती थीं॥३५॥

युधिष्ठिरायापि महाप्रतिष्ठा लोकद्वयोत्कृष्टतरा प्रदत्ता।
तथा जरासन्धवधादिना च भीमाय तेनात्मन एव कीर्त्तिः॥३६॥

श्लोकानुवाद—भगवान् श्रीकृष्णने जिस प्रकार महाराज श्रीयुधिष्ठिरको इस लोक और परलोकमें महान कीर्त्ति प्रदान की है, उसी प्रकार जरासन्ध वध आदि द्वारा भीमसेनको भी महान कीर्त्ति प्रदान की है॥३६॥

दिग्दर्शिनी टीका—महती प्रतिष्ठा कीर्त्तिः; तेन कृष्णेन प्रकर्षेण दत्ता, राजसूयादि—सम्पादनात्। अतएवोक्तमष्टोत्तरशतनामस्तोत्रे—'युधिष्ठिरप्रतिष्ठाता' इति। आत्मन एवेति बारंबारं हन्तुं प्राप्तस्यापि जरासन्धस्याहननात्॥३६॥

भावानुवाद—महाप्रतिष्ठा—महान कीर्त्ति अर्थात् श्रीकृष्णने राजसूय यज्ञ सम्पूर्ण कराकर श्रीयुधिष्ठिर महाराजको महान कीर्त्ति प्रदान की थी। अतएव अष्टोत्तरशतनामस्तोत्रमें श्रीकृष्ण 'युधिष्ठिर–प्रतिष्ठाता' नामसे विख्यात हुए हैं। इस प्रकार जरासन्ध आदि राजाओंका वध करनेमें स्वयं समर्थ होने पर भी तथा बार–बार उनके वधका सुयोग प्राप्त होने पर भी भीमसेन द्वारा उनका वध कराकर श्रीकृष्णने अपनी कीर्त्ति उनको प्रदान की थी॥३६॥

भगवानयमर्जुनश्च तत् प्रियसख्येन गतः प्रसिद्धताम्।
न पुराणशतैः परैरहो महिमा स्तोतुममुष्य शक्यते॥३७॥

श्लोकानुवाद—सब प्रकारके ऐश्वर्यसे सम्पन्न इन अर्जुनने भी श्रीकृष्णके प्रिय सखाके रूपमें प्रसिद्धि प्राप्त की है। अहो! सैकड़ों पुराण और श्रेष्ठ शास्त्र भी इनकी महिमाका वर्णन नहीं कर सकते॥३७॥

दिग्दर्शिनी टीका—भगवानिति परमगौरवेण; किम्वा *'उत्पत्तिं प्रलयञ्चैव भूतानामागतिं गतिम्। वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति॥'* एवंलक्षणेन भगवत्तुल्यतया वा; तस्य कृष्णस्य प्रियसख्येन प्रियसखतयैव प्रसिद्धिं प्राप्तः। परैरन्यैश्च श्रेष्ठैरिति वा; अहो आश्चर्ये; अमुष्य अर्जुनस्य॥३७॥

भावानुवाद—अत्यधिक गौरवके कारण प्रस्तुत श्लोकमें अर्जुनके लिए 'भगवान्' शब्दका प्रयोग किया गया है। अथवा "जो सभी प्राणियोंकी उत्पत्ति, प्रलय, गति-अगति तथा विद्या और अविद्याके तत्त्वको जानते हैं, उन्हींके लिए 'भगवान्' शब्दका प्रयोग होता है।" इन शास्त्रीय लक्षणोंके आधार पर भगवान्के समान होनेसे अथवा भगवान् श्रीकृष्णके प्रियसखा होनेके कारण अर्जुन जगतमें प्रसिद्ध हुए हैं। अहो! (आश्चर्य) अनेक पुराण तथा अन्य शास्त्र भी उनकी महिमाको भलीभाँति वर्णन करनेमें असमर्थ हैं॥३७॥

नकुलः सहदेवश्च यादृक् प्रीतिपरौ यमौ।
अग्रपूजाविचारादौ　सर्वैस्तद्वृत्तमीक्षितम्॥३८॥

श्लोकानुवाद—(जुड़वाँ भाई) नकुल और सहदेवकी भी श्रीकृष्णके प्रति जिस प्रकारकी प्रीति है, उसका सम्पूर्ण परिचय उन्होंने राजसूय यज्ञके समय सर्वप्रथम श्रीकृष्णकी पूजाका प्रस्ताव रखकर दिया था, जिसे सभीने प्रत्यक्ष देखा है॥३८॥

दिग्दर्शिनी टीका—यमौ यमलावित्यनेन एकस्य वृत्तमन्यस्मिन्नपि पर्यवस्यतीति बोध्यते। अग्रपूजायाः राजसूयेऽग्रार्हणं कस्मै देयमित्येवं विचारादौ, आदिशब्देन व्यवहारादि। तद्वृत्तं तयोः श्रीकृष्णप्रियतावृत्तम ईक्षितं साक्षादनुभूतं राजसूयादौ॥३८॥

भावानुवाद—ये नकुल और सहदेव श्रीकृष्णके प्रति अत्यधिक प्रीतियुक्त हैं। यहाँ 'यमौ' (जुड़वाँ भाई) कहनेसे एककी वृत्ति दूसरेमें भी पर्यवसित होती है, ऐसा समझना चाहिए, अर्थात् दोनोंकी एक समान प्रीति है। अग्रपूजा अर्थात् राजसूय यज्ञके अवसर पर सबसे पहले किसको अर्घ्य प्रदान (पूजन) किया जाए, इत्यादि प्रस्ताव तथा वैसा ही व्यवहार। राजसूय यज्ञमें उपस्थित सभी लोगोंने उन जुड़वाँ भ्राताओंकी श्रीकृष्ण प्रीतिकी वृत्तिको प्रत्यक्षरूपसे अनुभव किया है॥३८॥

श्रीद्रौपदी च हरिणा स्वयमेव राजसूयादिषूत्सववरेष्वभिषिक्तकेशा।
सम्बोध्यते प्रियसखीत्यवितात्रिपुत्र–दुःशासनादिभयतो हृतसर्वशोका॥३९॥

श्लोकानुवाद—श्रीकृष्णने स्वयं राजसूय यज्ञ उत्सवमें द्रौपदीके केशोंको अभिषिक्त किया है; वे द्रौपदीको 'प्रियसखी' कहकर सम्बोधन करते हैं तथा दुर्वासा और दुशासनके भयसे रक्षा करके श्रीकृष्णने उसके सम्पूर्ण शोकका हरण किया है॥३९॥

दिग्दर्शिनी टीका—हरिणा स्वयमेवाभिषिक्ताः; स्वहस्तेन मन्त्रपूतजलकलसैः स्नापिताः केशा यस्याः सा। हे प्रियसखि! इत्येवं सम्बोध्यते आमन्त्रयते अत्रिपुत्रो दुर्वासास्तस्माद् यद्भयं, धर्मराजेन निमन्त्रितस्य सशिष्यगणस्य तस्य भोजनार्थं सूर्यवरप्राप्त–निजभोजनान्तर–त्यक्तान्नपात्रेऽन्नासद्भावात्, दुःशासनाच्च सभामध्ये वस्त्र–आकर्षणादिना यद्भयं, तस्मात्तस्मादविता रक्षिता च या। स्वयमागत्य स्थालीलग्न–शाकान्नप्राशनमात्रेण शिष्यगणसहितदुर्वाससस्तृप्तिजननात् क्षुदभावेनाधिकपाकदोषभीत्या सद्योऽपसारणात्, सभामध्ये च वस्त्रानन्त्यापादनात्। किञ्च, हृता नाशिता दुःशासनघातनादिना सर्वे शोकाः सभामध्यानयनादि सम्भवाः यस्याः सा॥३९॥

भावानुवाद—स्वयं श्रीकृष्णने राजसूय यज्ञके उत्सवमें द्रौपदीको अपने हाथों द्वारा मन्त्रोंसे शुद्ध किये जलके कलशसे स्नान करवाया और उसके केशोंको अभिषिक्त किया था। श्रीकृष्ण उनको 'हे प्रियसखि!' कहकर सम्बोधन करते हैं तथा उन्होंने अत्रिऋषिके पुत्र दुर्वासाके अभिशापसे द्रौपदीकी रक्षा की है। इसका वृत्तान्त इस प्रकार है—किसी एक समय जब पाण्डव काम्यवनमें वनवासका समय व्यतीत कर रहे थे, महाराज श्रीयुधिष्ठिरने महर्षि दुर्वासाको अपने साठ हजार शिष्योंके साथ भोजनके लिए निमन्त्रण दिया, किन्तु वे बहुत देरसे पाण्डवोंके पास पहुँचे। उस समय श्रीयुधिष्ठिर महाराज अपने भ्राताओं और पत्नी द्रौपदीके साथ भोजन कर चुके थे। सूर्यने वरदान दिया था कि द्रौपदीके भोजनके पश्चात् भोजनकी थालीको धोकर साफ कर लेने पर उनके पास अन्न समाप्त हो जाएगा; अतः उस समय उनकी भोजन सामग्री समाप्त हो चुकी थी। तब अन्नके अभावसे उत्पन्न भयसे श्रीकृष्णने उन लोगोंकी रक्षा की थी। किस प्रकार? श्रीकृष्णने स्वयं वनमें आकर थालीके भीतर लगे हुए कणमात्र शाकका भोजन कर 'तृप्तोऽस्मि' कहा, ऐसा कहनेके साथ ही शिष्यों

सहित महर्षि दुर्वासाका पेट पूर्णरूपसे भर गया तथा अधिक भोजन करनेमें असमर्थ होनेके भयके कारण वे वहाँसे तुरन्त भाग गये। भय इसलिए था कि उनके भोजन ग्रहण न करनेसे पाण्डवोंके द्वारा बनायी गयी सारी भोज्य सामग्री नष्ट हो जायगी और इसमें सारा दोष उनका ही होगा।

भरी सभाके बीच दुःशासन द्वारा द्रौपदीका वस्त्र खींचते समय श्रीकृष्णने उनके वस्त्रको अनन्तगुणा बढ़ा दिया था। इस प्रकार दुःशासनके भयसे भी द्रौपदीकी रक्षा की थी। फिर कुरुक्षेत्रके युद्धमें दुःशासन आदिके वध द्वारा सभामें खींचकर लानेके कारण हुए द्रौपदीके समस्त शोकका हरण किया था॥३९॥

आस्वादनं श्रीविदुरौदनस्य श्रीभीष्म-निर्याणमहोत्सवश्च।
तत्तत्कृतत्वादृशपक्षपात-स्यापेक्षयैवेति विचारयध्वम्॥४०॥

श्लोकानुवाद—श्रीकृष्णने जो विदुरके घरमें भोजन आस्वादन किया था और भीष्मका निर्याण अर्थात् वैकुण्ठ-गमन महोत्सव सम्पन्न किया था, उसको भी विचार करके देखो। वे केवल आपके पक्षपात या प्रीतिके कारणसे ही हुआ था, अन्य किसी कारणसे नहीं॥४०॥

दिग्दर्शिनी टीका—ननु अन्नभक्षणेन श्रीविदुरे, श्रीभीष्मे च मरणसमयेऽपि महोत्सवापादनेनास्मत्तोऽधिकोऽस्यानुग्रहो दृश्यते? तत्राह—आस्वादनमिति। प्रीत्या तत्तद्रसग्रहणपूर्वकं सश्लाघं भक्षणम्; श्रीभीष्मस्य निर्याणं निःशेषेण गमनं मरणम्; यद्वा, अपुनरावृत्तिकं श्रीवैकुण्ठलोकलाभाय भगवत्सादृश्येन भगवत्सायुज्यमित्यर्थः; तदेव महानुत्सवः। एवं यत्र कुत्रापि भक्तानां भगवत्सायुज्यप्राप्त्युक्तिस्तु केवलं सच्चिदानन्दविग्रहत्वेन भगवत्सादृश्याद् वैकुण्ठप्राप्तियोग्यता-बोधनायैवेत्यग्रे व्यक्तं भावि। तेन विदुरेण, तेन च भीष्मेण कृतो यस्त्वादृशेषु पक्षपातः साहायं स्नेहविशेषो वा तस्यैवापेक्षया, न तु तयोः सद्वृत्ताद्यपेक्षयाः; तयोः स्वकीयल्पानुवृत्त्या तादृशमहाप्रसादलाभासम्भवादित्यर्थः। इत्येतत् विचारेण जानीथ। एवं लोके परमानुग्रह-पात्रतया प्रसिद्धाभ्यामाभ्यामपि सकाशात् पाण्डवानां भूरिभागत्वं दर्शितम्॥४०॥

भावानुवाद—यदि कहो कि श्रीकृष्णने विदुरके घरमें अन्न भोजन किया था और भीष्मकी मृत्युके समय भी महोत्सव किया था, अतएव हमारी (पाण्डवोंकी) तुलनामें उनके प्रति श्रीकृष्णका अनुग्रह अधिक

दिखाई देता है? इसीके लिए 'आस्वादनं' इत्यादि पद कह रहे हैं। वे लोग तुम पाण्डवोंके प्रति स्नेह रखते थे, इसीलिए उनके प्रति भी श्रीकृष्णका ऐसा अनुग्रह दिखाई दे रहा है। श्रीकृष्णने प्रीतिपूर्वक या प्रशंसापूर्वक विदुरका अन्नरस आस्वादन किया था तथा भीष्मका निर्याण अर्थात् निःशेषरूपमें गमन या मरणरूप महोत्सवको भी सम्पन्न किया था। अथवा निर्याण कहनेसे अपुनरावृत्तिरूप (संसारमें पुनः आगमन न कर) श्रीवैकुण्ठ प्राप्तकर भगवत् सादृश्य अर्थात् भगवान्के समान रूप प्राप्त किया था—समझना होगा। अतः इस भगवत् सायुज्य रूप भीष्मनिर्याण महोत्सवको श्रीकृष्णने सम्पूर्ण किया था। इस प्रकार यदि किसी-किसी स्थल पर भक्तोंकी सायुज्यमुक्तिकी बात आती है, तो ऐसी बात उस स्थान पर केवल भगवान्के समान सच्चिदानन्द विग्रह प्राप्तिकी अथवा वैकुण्ठ प्राप्तिकी योग्यताका बोध करानेके लिए ही कथित होती है; इस विषयमें आगे चर्चा होगी।

वास्तवमें इसी प्रकार विदुरका अन्नरूपी रस आस्वादन अथवा भीष्मका भगवत् सादृश्यरूप वैकुण्ठ-प्राप्ति महोत्सव हुआ था। वह भी इसलिए कि वे दोनों आप (पाण्डवों)के प्रति स्नेहशील थे और आपका पक्ष लेते थे। इसीलिए उन्होंने श्रीकृष्णकी ऐसी कृपाको प्राप्त किया था, अन्य किसी कारणसे नहीं। अर्थात् उनकी साधुवृत्तिके कारण उन पर ऐसी कृपा नहीं हुई, क्योंकि उनमें भगवान्के प्रति सेवावृत्ति बहुत कम थी तथा वैसी अल्प सेवावृत्ति द्वारा उस प्रकारकी कृपा प्राप्त होना असम्भव है। यह आप स्वयं ही विचार करके देखिये। इस प्रकार संसारमें श्रीभगवान्के परम अनुग्रहके पात्र समझे जानेवाले विदुर और भीष्मकी तुलनामें पाण्डवोंका अधिक सौभाग्य प्रदर्शित हुआ है॥४०॥

अहो वत महाश्चर्यं कवीनां गेयतां गताः।
भवदीय-पुरस्त्रीणां ज्ञानभक्त्युक्तयो हरौ॥४१॥

श्लोकानुवाद—अहो! कैसे महान आश्चर्यका विषय है! आपके नगरकी सभी स्त्रियाँ भी श्रीकृष्णके उद्देश्यसे जिस ज्ञान और भक्तिकी

चर्चा करती हैं, वह सब श्रीव्यास जैसे कवियोंके वर्णनका विषय बन गया है॥४१॥

दिग्दर्शिनी टीका—अस्तु तावद्भवतां वार्त्ता, भवत्सम्बन्धेन पौरजनानामपि परमाश्चर्यमहिमेत्याह—अहो इति। कवीनां श्रीव्यासादीनां गेयतां संकीर्त्तन-योग्यतां प्राप्ताः। हरौ श्रीकृष्णे यत् ज्ञानं भक्तिश्च ताभ्यां कृत्वा उक्तयो वचनानि। तथा च प्रथमस्कन्धे (श्रीमद्भा॰ १/१०/२१) *'स वै किलायं पुरुषः पुरातनो, य एक आसीदविशेष आत्मनि। अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मन्निशि सुप्तशक्तिषु॥'* इत्याद्याः पञ्चश्लोकाः ज्ञानोक्तयः। *'अहो अलं श्लाघ्यतमं यदोः कुलमहो अलं पुण्यतमं मधोर्वनम्। यदेष पुंसामृषभः प्रियः श्रियः, स्वजन्मना चंक्रमणेन चाञ्चति॥'* (श्रीमद्भा॰ १/१०/२६) इत्यादयश्च चत्वारो भक्त्युक्तय इति॥४१॥

भावानुवाद—आप लोगोंकी महिमाका तो कहना ही क्या, आप लोगोंके सम्बन्धसे आपके नगरवासियोंकी भी अद्भुत महिमा है—इसे 'अहो' इत्यादि श्लोकमें बतला रहे हैं। अहो! कैसे महान आश्चर्यकी बात है! आपके नगरकी सभी स्त्रियाँ श्रीकृष्णके उद्देश्यसे जिस ज्ञान और भक्तिकी परस्पर चर्चा करती हैं, वह चर्चा श्रीव्यास जैसे कवियोंके वर्णनका विषय हुआ है। यथा, प्रथम-स्कन्धमें कथित है—"ये पुराणपुरुष साक्षात् ईश्वर हैं। ये गुणोंके क्षुब्ध होनेसे पहले तथा (अविद्या ध्वंस करनेके लिए जीवोंके उपाधिभूत) तीनों गुणोंके लयरूप प्रलयकालमें अकेले ही प्रपञ्च रहित अपनेमें अवस्थित थे। बादमें इन्होंने जीवके नाम और रूपको प्रकाश करनेके लिए अपनी कालशक्ति द्वारा प्रेरित जीवमोहिनी तथा सृष्टिकी इच्छा करनेवाली प्रकृतिके प्रति दृष्टिपात किया था।" इत्यादि श्रीमद्भा॰ (१/१०/२१-२५) पाँच श्लोकोंमें ज्ञानकी बात सुनाकर फिर श्रीमद्भा॰ (१/१०/२६-२९) तक चार श्लोकोंमें भक्तिकी बात कह रहे हैं, यथा—"अहो! ये पुरुषोत्तम भगवान् जिस यदुवंशमें अवतीर्ण हुए हैं, वह यदुवंश धन्य है। मधुवनका (वृन्दावनका) भी क्या सौभाग्य है! श्रीदेवकीनन्दनके जन्म और विहार आदिके कारण उनकी पदरेणुके स्पर्शसे वह स्थान परम पवित्र हो गया है। द्वारकाके माहात्म्यकी भी कोई सीमा नहीं है, पृथ्वी उसे अपने वक्षःस्थल पर धारण करके धन्य हो गयी है।" इत्यादि भक्तिको संकेत करनेवाली उक्तियाँ हैं॥४१॥

सहैकपौत्रेण कयाधुनन्दनोऽनुकम्पितोऽनेन कपीन्द्र एकलः।
ससर्वबन्धुः सजना भवादृशा महाहरेः प्रेमकृपाभरास्पदम्॥४२॥

श्लोकानुवाद—कयाधुनन्दन श्रीप्रह्लाद महाराजने एकमात्र अपने पौत्रके साथ तथा कपीन्द्र श्रीहनुमानने अकेले ही श्रीहरिकी कृपाको प्राप्त किया था। परन्तु आप लोग अपने समस्त बन्धु-बान्धवों और स्वजनोंके सहित श्रीहरिकी विशेष कृपा और प्रेमके पात्र बने हैं॥४२॥

दिग्दर्शिनी टीका—एवमुपसंहरिष्यन् पूर्वोद्दिष्टं श्रीप्रह्लाद-हनूमद्‌भ्यां सकाशात् भूरिभागत्वं साक्षादेवाह—सहेति, एकेन पौत्रेण बलिनैव सह कयाधुनन्दनः प्रह्लादः। यथोक्तं श्रीभगवता एकादशस्कन्धे (श्रीमद्भा॰ ११/१२/५)—*'बहवो मत्पदं प्राप्तास्त्वाष्ट्रकायाधवादयः'* इति। अनेन श्रीकृष्णेन; कपीन्द्रो हनूमांस्तु एकलः एकाक्येव, नैष्ठिकब्रह्मचारित्वेन पुत्राद्यभावात्। बान्धवाः पुत्रकलत्रादयः; स्वजनाः पौरामात्यादयः; यद्वा, बान्धवा सम्बन्धिनः, द्रुपदविराटाद्याः; स्वा ज्ञातयः दुर्योधनादीनामपि सद्‌गतिप्राप्तेः; जनाः भृत्य प्रजादयः; तै सर्वैरेव सहिताः। तत्रापि महाहरेः परमावतारिणः परममहामनोहरस्य श्रीकृष्णस्य तत्रापि प्रेमयुक्तायाः कृपायाः भरस्य भाजनम्॥४२॥

भावानुवाद—अब उपसंहार करते हुए पूर्वकथित श्रीप्रह्लाद और श्रीहनुमानसे भी पाण्डवोंके साक्षात् भूरिभाग्यत्व अर्थात् महाभाग्यशाली होनेका वर्णन कर रहे हैं। कयाधुनन्दन श्रीप्रह्लाद महाराजने अपने एकमात्र पौत्र बलि महाराजके साथ श्रीभगवान्‌की कृपा प्राप्त की थी। यथा, एकादश-स्कन्धमें भगवान्‌की उक्ति है—"वृत्रासुर और कयाधुनन्दन श्रीप्रह्लाद आदि अनेक व्यक्तियोंने मुझे प्राप्त किया था।" कपीन्द्र श्रीहनुमानने अकेले ही श्रीकृष्णकी कृपा प्राप्त की थी। श्रीहनुमान नैष्ठिक ब्रह्मचारी थे, इसलिए उनके पुत्र-पत्नी आदि नहीं थे। किन्तु आप लोगोंने अपने पुत्र-पत्नी आदि स्वजनों, सेवक, मंत्री और प्रजा आदि नगरवासियोंके साथ श्रीकृष्णकी कृपा प्राप्त की है। अथवा बान्धव-सम्बन्धीय द्रुपद और विराटादि तथा आपके ज्ञाति दुर्योधन आदिने भी श्रीकृष्णकी कृपासे सद्‌गति प्राप्त की है। आप लोगोंका और भी वैशिष्ट्य यह है कि श्रीप्रह्लाद और श्रीहनुमानने श्रीकृष्णके अवतार द्वारा कृपा प्राप्त की हैं, किन्तु आपने तो परम मनोहर स्वयं अवतारी श्रीकृष्णकी ही विशेष कृपाको प्राप्त किया है; केवल कृपा ही नहीं, प्रेमयुक्त कृपाको प्राप्त किया है॥४२॥

उद्दिश्य यान् कौरवसंसदं गतः
कृष्णः समक्षं निजगाद मादृशां।
ये पाण्डवानां सुहृदोऽथ वैरिणस्ते
तादृशा मेऽपि ममासवो हि ते॥४३॥

श्लोकानुवाद—श्रीकृष्णने कौरवोंकी भरी सभामें हम लोगोंके सामने ही आपलोगोंको उद्देश्य करके कहा था, 'जो पाण्डवोंके सुहृत् हैं, वे मेरे भी सुहृत् हैं; जो उनके शत्रु हैं, वे मेरे भी शत्रु हैं, क्योंकि पाण्डव मेरे प्राणोंके समान हैं'॥४३॥

दिग्दर्शिनी टीका—तदेव दर्शयति—उद्दिश्येति; मादुशां महामुनिप्रभृतीनां समक्षं साक्षादेव; अनेन सर्वमहाजनविदितत्त्वं सत्यत्वञ्चेति सूचितम्। किं तत्। ये पाण्डवानां सुहृदः हितकर्त्तारः ते ममापि सुहृदः, ये च तेषां वैरिणो विद्वेष्टारस्ते ममापि वैरिण इत्यर्थः। हि यस्मात् ते पाण्डवाः मम असवः प्राणतुल्याः परमप्रियतमा इत्यर्थः। तथा च श्रीभगवद्वाक्यं उद्योगपर्वणि—*'यस्तान् द्वेष्टि स मां द्वेष्टि यस्ताननु स मामनु। ऐकात्म्यमागतं विद्धि पाण्डवैधर्माचारिभिः॥'* इति। अन्यत्रापि—*'द्विषदन्नं न भोक्तव्यं द्विषन्तं नैव भोजयेत। पाण्डवान् द्विषसे राजन्! मम प्राणा हि पाण्डवाः॥'* इति॥४३॥

भावानुवाद—पाण्डवों पर श्रीकृष्णकी कैसी कृपा थी, इसे 'उद्दिश्य' इत्यादि श्लोकमें बतला रहे हैं। श्रीकृष्णने कौरवोंकी सभामें आप लोगोंको उद्देश्य करके मेरे जैसे महामुनियोंके समक्ष ही कहा था। इसके द्वारा सभी महाजनोंके द्वारा अवगत परम सत्य ही सूचित हुआ। श्रीकृष्णने क्या कहा था? "जो लोग पाण्डवोंके सुहृत् (हितकारी) हैं, वे मेरे भी सुहृत् हैं तथा जो उनके शत्रु हैं, वे मेरे भी शत्रु हैं, क्योंकि पाण्डव मुझे प्राणोंके समान प्रिय हैं।" यथा, महाभारतके उद्योगपर्वमें भगवान्ने कहा है—"जो लोग पाण्डवोंसे विद्वेष करते हैं, वे मुझसे ही विद्वेष करते हैं और जो पाण्डवोंके अनुगत हैं, वे मेरे भी अनुगत हैं। अतएव धर्मका आचरण करनेवाले पाण्डवोंको और मुझको एक समान ही समझना।" और दूसरे स्थान पर भी कहा गया है कि किसी समय जब कौरवोंने भगवान् श्रीकृष्णको भोजनके लिए प्रार्थना की थी, तब भगवान् श्रीकृष्णने कहा था—"विद्वेषी व्यक्तियोंका भोजन ग्रहण नहीं करना चाहिए और न ही उनको भोजन कराना चाहिए।

हे राजन्! आपलोग तो पाण्डवोंके विद्वेषी हैं, परन्तु पाण्डव मेरे प्राणोंके समान हैं"॥४३॥

धार्ष्ट्यं ममाहो भवतां गुणान् किल
ज्ञातुञ्च वक्तुं प्रभवेत् स एकलः।
निर्णीतमेतत्तु मया महाप्रभुः
सोऽत्रावतीर्णो भवतां कृते परम्॥४४॥

श्लोकानुवाद—अहो! आपलोगोंके गुणोंका वर्णन करना मेरी धृष्टता है, क्योंकि आपलोगोंके गुणोंको तो एकमात्र भगवान् श्रीकृष्ण ही भलीभाँति जानते हैं तथा वे ही उनका वर्णन कर सकते हैं। तथापि मैंने यह निश्चय किया है कि भगवान् श्रीकृष्ण इस जगतमें केवल आप लोगोंके लिए ही अवतीर्ण हुए हैं॥४४॥

दिग्दर्शिनी टीका—उपसंहरति—धार्ष्ट्यमिति। स श्रीकृष्णः एकलः एक एव भवतां गुणान् ज्ञातुं वक्तुञ्च शक्नुयात् नान्यः, तस्यैव तदनुरूपव्यवहारदर्शनात्। किलेति निश्चये वितर्के वा, अनिर्वचनीयादिस्वभावकत्वेन सम्यगनवधारणात्। अतस्तदवर्णने मम प्रवृर्त्तिधार्ष्टयमेवेत्यहो कष्टमित्यर्थः। 'किं नु बहुनोक्तेन? किं मया तु एतन्निर्णीतम्? किं स महाप्रभुः श्रीदेवकीनन्दनः परं केवलं भवताम् कृते निमित्तम् भवदीयसुखसम्पन्माहात्म्यविशेषविस्तारणार्थमेवात्रावतीर्णः?' इति॥४४॥

भावानुवाद—अतएव आप लोगोंके गुणोंका वर्णन करनेका प्रयास करना भी मेरी धृष्टता ही है, ऐसा कहते हुए देवर्षि श्रीनारद उपसंहार कर रहे हैं। आप लोगोंके गुणोंको केवल श्रीकृष्ण ही भलीभाँति जानते हैं और वे ही उसका वर्णन कर सकते हैं, अन्य कोई भी नहीं। विशेषतः श्रीकृष्णके आपलोगोंके गुणोंके अनुरूप व्यवहारके दर्शनसे मैंने यह निश्चय कर लिया है कि आपके समस्त गुणोंको समझना और निश्चय करना असम्भव है। वे अनिर्वचनीय हैं, अतएव उनको वर्णन करनेका प्रयास करना भी मेरी धृष्टता ही है। इसी अभिप्रायसे कह रहे हैं—अहो! उनको वर्णन करनेमें मेरी प्रवृत्ति कैसे दुःसाहसका विषय है! अतएव अधिक कहनेकी आवश्यकता नहीं है, मैंने यह निर्धारित कर लिया है कि भगवान् श्रीदेवकीनन्दन केवल

आपकी सुख-सम्पत्ति (प्रसन्नता) तथा महिमाका विस्तार करनेके लिए ही इस पृथ्वी पर अवतीर्ण हुए हैं॥४४॥

श्रीपरीक्षिदुवाच—

अथ क्षणं लज्जयेव मौनं कृत्वाथ निःश्वसन्।
धर्मराजोऽब्रवीन्मातृभ्रातृपत्नीभिरन्वितः ॥४५॥

श्लोकानुवाद—महाराज श्रीपरीक्षितने कहा—हे माता! तब एक क्षणके लिए मौन रहकर तथा लज्जासहित एक लम्बी सांस लेकर महाराज श्रीयुधिष्ठिर अपनी माता, भाई और पत्नी सहित कहने लगे— ॥४५॥

दिग्दर्शिनी टीका—स्वमाहात्म्यश्रवणेन लज्जया; इवेति वस्तुतश्चातृप्त्या मनोदुःखेन परमोपहासमिव मत्वा शोकेनेत्यर्थः। अतएव निःश्वसन् उच्चैर्दीर्घश्वासं मुञ्चन्; यद्यपि मात्रादिभिरन्वित इत्युक्तं, तथापि तेषां क्रमेणैवोक्तिरवगन्तव्या, अग्रे तथैवोक्तेः॥४५॥

भावानुवाद—महाराज श्रीयुधिष्ठिर अपने माहात्म्यको सुनकर लज्जितकी भाँति हो गये। यहाँ पर 'इव' कारका तात्पर्य है कि वास्तवमें भक्तिका स्वभाव—अतृप्ति है, अतएव उक्त माहात्म्यको अत्यधिक उपहासजनक मानकर श्रीयुधिष्ठिर मनमें दुखित हुए। फिर एक क्षणके लिए मौन धारण करके दीर्घ श्वास लेते हुए अपनी माता, भाई और पत्नीके सहित कहने लगे। यद्यपि यहाँ माता, भाई इत्यादिके सहित कहा गया है, तथापि उन्होंने क्रमानुसार अपना-अपना मन्तव्य प्रकाश किया है, वह आगे व्यक्त होगा॥४५॥

वावदूक्-शिरोधार्य नैवास्मासु कृपा हरेः।
विचार्याभीक्ष्णमस्माभिर्जातु काप्यवधार्यते॥४६॥

श्लोकानुवाद—श्रीयुधिष्ठिरने कहा—हे वाग्मि-शिरोमणि (श्रीनारद)! हमलोग बारम्बार विचार करके भी अपने प्रति भगवान् श्रीकृष्णकी कभी भी किसी प्रकारकी कृपाको निश्चित नहीं कर पाये हैं॥४६॥

दिग्दर्शिनी टीका—हे वावदूकानां वाग्मिनां शिरोधार्य! तेषु श्रेष्ठतमेत्यर्थः। एतेन वाक्चातुर्यादेव भवतैवमुक्तं, न तु परमार्थविचारादिति ध्वनितम्। यतः

अस्मासु काचिदपि हरेः कृपास्माभिरभीक्ष्णं मुहुर्मुहुर्विचार्य जातु कदाचिदपि नैवावधार्यते, न निश्चयेन ज्ञायते॥४६॥

भावानुवाद—हे वाग्मि-शिरोमणि (श्रीनारद)! आप अपनी वाक् चातुरीवशतः ऐसा कह रहे हैं, किन्तु परमार्थका विचार करके नहीं कह रहे हैं। यही इस सम्बोधनसे सूचित हो रहा है। इसका कारण है कि हमलोग बारम्बार विचार करके भी अपने प्रति भगवान् श्रीकृष्णकी कभी भी किसी प्रकारकी कृपाको निश्चितरूपसे जान नहीं पाये हैं अर्थात् उसे ठीकसे समझ ही नहीं पाये हैं॥४६॥

प्राकृतानां जनानां हि मादृगापद्गणेक्षया।
कृष्णभक्तौ प्रवृत्तिश्च विश्वासश्च ह्रसेदिव॥४७॥

श्लोकानुवाद—ऐसा लगता है कि हमारी विपत्तियोंको देखकर साधारण लोगोंमें श्रीकृष्णका भजन करनेकी प्रवृत्ति और विश्वास नष्ट होगा॥४७॥

दिग्दर्शिनी टीका—तदेव सहेतुकं दर्शयति—प्राकृतानामिति दशभिः, प्राकृतानां बहिर्दृष्टिदुष्टानाम्, मादृक्षु तद्भक्तेषु य आपद्गणः तस्येक्षया दृष्ट्या *'न वासुदेव-भक्तानामशुभं विद्यते क्वचित्'*, इत्यादिरूपो विश्वासः, तस्य ह्रासात् प्रवृत्तिश्च ह्रसेत् त्रुट्यतीव। तदानीमपि सम्यक् तादृशत्वाभावादिवशब्दः॥४७॥

भावानुवाद—'हमारे प्रति भगवान् श्रीकृष्णकी कृपा नहीं है' इसीको कारण सहित प्रदर्शन करनेके लिए श्रीयुधिष्ठिर 'प्राकृतानां' इत्यादि श्लोकसे आरम्भ करके 'अस्मासु' तक दस श्लोक कह रहे हैं। हमारे जैसे भक्तोंकी विपत्तियोंको देखकर प्राकृत अर्थात् सांसारिक दृष्टिके दोषसे दुष्ट लोगोंकी श्रीकृष्ण-भजनमें प्रवृत्ति मानो कम हो जाएगी; अथवा 'श्रीवासुदेवके भक्तोंका कदापि अशुभ नहीं हो सकता है' इत्यादि शास्त्रीय वचनोंके प्रति उनकी श्रद्धा घट जाएगी। वास्तवमें उस समय वहाँके लोगोंमें ऐसे विश्वासका अभाव ही दिखलायी दे रहा था। इसलिए 'इव' कारका प्रयोग किया गया है॥४७॥

एतदेवातिकष्टं नस्तदेकप्राणजीविनाम्।
विनान्नं प्राणिना यद्वन्मीनानाञ्च विना जलम्॥४८॥

श्लोकानुवाद—प्राणी जिस प्रकार अन्नके बिना और मछली जिस प्रकार जलके बिना जीवन धारण नहीं कर पाती, हम भी उसी प्रकार श्रीकृष्णके बिना जीवन धारण नहीं कर पाते हैं। श्रीकृष्ण ही हम लोगोंके एकमात्र प्राण हैं, अतः उनके द्वारा ही हम जीवन धारण करते हैं॥४८॥

दिग्दर्शिनी टीका—एतत् कृष्णभक्तिविश्वासप्रवृत्ति-ह्रसनमेव, नत्वापद्गणभोगः; यतः स कृष्ण एव, सा कृष्णभक्तिर्वा; एकोऽद्वितीयो मुख्यो वा। प्राणः सूत्रात्माख्यो देहधारकः तद्धेतुर्वायुर्वा; तेनैव जीवितुं शीलमेषामिति तथा तेषाम्। तत्र दृष्टान्तद्वयं विनेति, जलं विना मीनानाञ्च यद्वदित्यनेन क्षणमपि तदतिकष्टसहनासामर्थ्यमुक्तम्॥४८॥

भावानुवाद—साधारण लोगोंमें श्रीकृष्णका भजन करनेकी प्रवृत्ति और विश्वासका नाश होगा, हमारे लिए केवल यही अत्यधिक कष्टका विषय है, अन्यथा विपत्तियोंको भोग करनेमें हमें कोई कष्ट नहीं है। भगवान् श्रीकृष्ण और उनकी भक्ति ही हमारे एकमात्र प्राण हैं अर्थात् उनको अपने प्राणोंका प्राण जानकर ही हमलोग अपना जीवन धारण करते हैं। यहाँ पर 'प्राण' कहनेसे 'आत्मा' नामक देहधारण करनेवालेको अथवा उसके कारण प्राणवायुको समझना चाहिए। वायुके बिना जैसे प्राणी क्षणकाल भी प्राणोंको धारण नहीं कर पाते, उसी प्रकार हमलोग भी श्रीकृष्ण और श्रीकृष्णकी भक्तिके बिना जीवन धारण नहीं कर पाते हैं। इस विषयमें दृष्टान्त हैं—प्राणी जैसे अन्नके बिना तथा मछली जैसे जलके बिना एक क्षणके लिए भी जीवन धारण नहीं कर पाती। इसके द्वारा यह दिखाया जा रहा है कि भगवान् श्रीकृष्ण और उनकी भक्तिके बिना पाण्डवोंके प्राणोंको जो कष्ट होता है, उसको क्षणकालके लिए भी सहन करनेमें वे असमर्थ हैं॥४८॥

अतोऽर्थितं मया यज्ञसम्पादनमिषादिदम्।
निष्ठां दर्शय भक्तानामभक्तानामपि प्रभो॥४९॥

श्लोकानुवाद—इसीलिए मैंने राजसूय यज्ञ सम्पूर्ण करानेके बहाने श्रीकृष्णके चरणकमलोंमें यही प्रार्थना की थी, 'हे प्रभो! आप अपने भक्तों और अभक्तोंकी निष्ठाका प्रदर्शन कीजिए'॥४९॥

दिग्दर्शिनी टीका—अतोऽस्मादेव हेतोः राजसूयादियज्ञसम्पादनच्छलेन इदमर्थितं याचितम्, मिषादिति; अन्यथा तत्फलादौ तात्पर्याभावात्; अथवास्य पदस्योत्तरेणान्वयः। किन्तदाह—निष्ठामिति। स्थितिं—त्वद्भक्ता ऐहिकामुष्मिकाशेषसम्पद्भाजो भवन्ति, अन्ये च तद्विपरीता इत्येवंलक्षणाम्। यथोक्तमनेनैव दशमस्कन्धे (श्रीमद्भा॰ १०/७२/५) *'तद्देवदेव भवतश्चरणारविन्द-सेवानुभावमिह पश्यतु लोक एषः। ये त्वां भजन्ति न भजन्त्युत वोभयेषां, निष्ठां प्रदर्शय विभो! कुरु सृञ्जयानाम्॥'* इति॥४९॥

भावानुवाद—इसी कारण मैंने राजसूय यज्ञ सम्पूर्ण करानेके छलसे भगवान् श्रीकृष्णसे प्रार्थना की थी, 'हे प्रभो! आप अपने भक्तों और अभक्तोंकी निष्ठा अर्थात् स्थितिका प्रदर्शन कीजिए', नहीं तो हमारे द्वारा इस राजसूय यज्ञके फल प्राप्तिकी कोई सार्थकता ही नहीं है। यहाँ पर स्थिति कहनेसे यह समझना चाहिए कि केवल भगवान्के भक्त ही ऐहिक और पारत्रिक असीम सम्पत्तिके अधिकारी होते हैं, अतएव वही 'स्थिति' शब्दवाच्य हैं। भक्तोंके अलावा और सभी लोग उसके विपरीत लक्षणों अर्थात् इस लोकमें और परलोकमें केवल दुःख ही भोग करते हैं। इस विषयमें स्वयं धर्मराज श्रीयुधिष्ठिरने ही कहा है, "हे भगवन्! ये सब लोग आपके श्रीचरणकमलोंकी सेवाके महत्वका दर्शन करें। हे विभो! कौरवों और पाण्डवोंमें जो आपका भजन करते हैं और जो आपका भजन नहीं करते हैं, उन दोनोंकी ही निष्ठा या गतिका प्रदर्शन कीजिए"॥४९॥

लोकोऽयन्तु यतो लोका सर्वे त्वद्भक्तसम्पदः।
ऐहिकामुष्मिकीश्चित्राः शुद्धाः सर्वविलक्षणाः॥५०॥
भूत्वा परमविश्वस्ता भजन्तस्तत्पदाम्बुजम्।
निर्दुःखा निर्भया नित्यं सुखित्वं यान्ति सर्वतः॥५१॥

श्लोकानुवाद—तभी संसारके समस्त जीव आपके भक्तोंकी लौकिक तथा पारलौकिक विचित्र, पवित्र और विलक्षण सम्पत्तिको देखकर अत्यधिक विश्वासपूर्वक आपके श्रीचरणकमलोंका भजन करके समस्त प्रकारके दुःख और भयसे रहित होकर नित्य सुखको प्राप्त कर सकेंगे॥५०–५१॥

दिग्दर्शिनी टीका—यतो निष्ठादर्शनाद्धेतोः; त्वद्भक्तानां सम्पदो विभूतीर्लोकयन्तः वीक्ष्यमाणाः सर्वेऽपि लोकाः परमविश्वस्ता भूत्वा तव पादाम्बुजं भजन्तः नित्यं निर्गताशेषदुःखा निर्गताखिलभयाश्च सन्तः सर्वत्र सुखित्वं सौख्यं यान्ति प्राप्नुवन्तीति द्वाभ्यामन्वयः। कीदृशीस्ताः? ऐहिकीः राजसूयादियागसाम्राज्यादीः, आमुष्मिकीर्देवगण-पूज्यत्वाद्याः; चित्रा बहुविधाः; शुद्धाः सर्वदोषरहिताः; अतएव सर्वाभ्यो धर्मादि-परलोकसम्पदभ्यो विलक्षणा असाधारणीरित्यर्थः॥५०-५१॥

भावानुवाद—अतएव सभी लोग भगवद्भक्तोंकी निष्ठाका दर्शन करके अर्थात् भक्तोंकी लौकिक और पारलौकिक सम्पत्तिका दर्शन करके, अत्यधिक विश्वासके साथ आपके श्रीचरणकमलोंका भजन करते हुए, सदैव सर्वत्र असीम दुखों तथा अखिल भयसे रहित होकर नित्य सुखको प्राप्त करें। वह सम्पत्ति कैसी है? लौकिक सम्पत्ति कहनेसे राजसूय यज्ञ आदि अनेक प्रकारके यज्ञोंको सम्पूर्ण करनेके योग्य अर्थात् सब प्रकारके दुखोंसे रहित साम्राज्य आदिका होना; तथा पारलौकिक सम्पत्ति कहनेसे देवताओंके भी पूज्य होना आदि असाधारण सम्पदको समझना चाहिए। अतएव सर्वश्रेष्ठ तथा धर्म आदिके पालन द्वारा प्राप्त होनेके कारण ही भक्तोंकी सम्पत्तिको सबसे विलक्षण सम्पत्ति कहा गया है॥५०-५१॥

सम्प्रत्यभक्तानस्माकं विपक्षांस्तान् विनाश्य च।
राज्यं प्रदत्तं यत्तेन शोकोऽभूत्पूर्वतोऽधिकः॥५२॥

श्लोकानुवाद—अब श्रीकृष्णने हमारे विपक्षी अभक्तोंका नाश करके हमें राज्य प्रदान किया है, परन्तु इसके द्वारा हमें पहलेसे भी अधिक शोककी प्राप्ति हुई है॥५२॥

दिग्दर्शिनी टीका—नन्वीदानीमापद्गण-विनाशादिना तन्मनोरथस्तेन सम्पादित एव, कथं शोचसि? तत्राह—सम्प्रतीति। तस्या भक्ता एवास्माकं विपक्षास्तान्, तान् सुप्रसिद्धान् जरासन्ध-शिशुपाल-दुर्योधनादीन् विशेषेण पुनर्जन्माभावात् समूलतया नाशयित्वा, तेन राज्यदानेन, पूर्वतः आपत्कालीनाच्छोकादप्यधिकः॥५२॥

भावानुवाद—यदि कहो कि अब तो श्रीकृष्णने आपकी सारी विपत्तियोंका नाश करके आपके सारे मनोरथोंको पूर्ण कर दिया है, अतएव शोक क्यों कर रहे हो? इसीके उत्तरमें 'साम्प्रत्य' इत्यादि पद

कह रहे हैं। यद्यपि इस समय श्रीकृष्णने अपने अभक्तों और हमारे विपक्षियोंमें प्रसिद्ध जरासन्ध, शिशुपाल और दुर्योधन आदिका विनाश करके अर्थात् उन्हें मोक्ष प्रदानकर उनके पुनर्जन्मकी सम्भावनाका समूल विनाश करके हमें राज्य प्रदान किया है, यह सत्य है; किन्तु इससे हमें विपत्तियोंके समय हुए दुःखकी तुलनामें अधिक दुःखकी ही प्राप्ति हुई है॥५२॥

द्रोणभीष्मादिगुरवोऽभिमन्युप्रमुखाः सुताः।
परेऽपि बहवः सन्तोऽस्मद्धेतोर्निधनं गताः॥५३॥

श्लोकानुवाद—इस राज्यके लिए ही द्रोण और भीष्म आदि गुरुवर्ग, अभिमन्यु आदि पुत्रों तथा बहुतसे धर्म परायण राजाओंका निधन हो गया है॥५३॥

दिग्दर्शिनी टीका—तत्र हेतुमाह—द्रोणेति त्रिभिः। सन्तः साधवः श्रीकृष्णभक्ता इत्यर्थः। निधनं गताः मृताः, तत्रापि अस्माद्धेतोः अस्मद्राज्यादि-सिद्धयर्थमित्यर्थः॥५३॥

भावानुवाद—श्रीयुधिष्ठिर अपने शोकका कारण बता रहे हैं—इस राज्यकी प्राप्तिके लिए द्रोणाचार्य और भीष्म पितामह आदि गुरुवर्ग तथा बहुतसे धार्मिक अर्थात् श्रीकृष्णभक्त राजाओंका निधन हो गया है। इन सबकी मृत्युका कारण एकमात्र हम ही हैं अर्थात् हमें राज्य प्राप्त करवानेके लिए ही उन सबकी मृत्यु हुई है॥५३॥

स्वजीवानाधिकप्रार्थ्यश्रीविष्णुजनसङ्गतेः ।
विच्छेदेन क्षणञ्चात्र न सुखांशं लभामहे॥५४॥

श्लोकानुवाद—वास्तवमें भगवान् श्रीविष्णुके भक्तोंका संग हमें अपने जीवनसे भी अधिक प्रार्थनीय है, परन्तु अब उन्हीं भक्तोंके विच्छेदसे हम लोग इस संसारमें एक क्षणके लिए तनिक भी सुख प्राप्त नहीं कर पा रहे हैं॥५४॥

दिग्दर्शिनी टीका—अतः स्वजीवनादपि अधिकं प्रार्थ्या, यद्वा, अधिका महत्तरा अतएव प्रार्थ्या या श्रीविष्णुजनैर्भगवद्भक्तैः सङ्गतिस्तस्या विच्छदेन हेतुना; अप्यर्थे चकारः। क्षणमपि सुखस्यांशं लेशमपि न लभामहे॥५४॥

भावानुवाद—अतएव महत् भक्तोंका संग हमें अपने जीवनसे भी अधिक अथवा प्राणोंसे भी अधिक प्रार्थनीय है। किन्तु उन्हीं श्रीविष्णुभक्तोंके संगके बिना हम इस राजपुरीमें एक क्षण भी लेशमात्र सुख प्राप्त नहीं कर पा रहे हैं॥५४॥

श्रीकृष्णवदनाम्भोजसन्दर्शनसुखञ्च तत्।
कदाचित् कार्ययोगेन केनचिज्जायते चिरात्॥५५॥

श्लोकानुवाद—श्रीकृष्णके अनिर्वचनीय मुखकमलका दर्शन करनेका सुख भी बहुत समयसे अन्तर्हित हो गया है। अब तो कभी-कभी अश्वमेध आदि यज्ञोंके समय ही हमें वह सुख प्राप्त होता है, अतएव अत्यधिक शोक ही होता है॥५५॥

दिग्दर्शिनी टीका—किञ्च श्रीकृष्णेति; तत् पुरानुभूतम्, अनिर्वचनीयमिति वा; कार्यस्य अश्वमेधादेर्योगेनैव, अतोऽधुना परमः शोको जात एवेति भावः॥५५॥

भावानुवाद—श्लोकानुवाद द्रष्टव्य है॥५५॥

यादवानेव सद्बन्धून् द्वारकायामसौ वसन्।
सदा परमसद्भाग्यवतो रमयति प्रियान्॥५६॥

श्लोकानुवाद—इस समय भगवान् श्रीकृष्ण द्वारकामें रहकर अपने परम बन्धुओं और परम सौभाग्यशाली प्रियतम यादवोंको निरन्तर सुख प्रदान कर रहे हैं॥५६॥

दिग्दर्शिनी टीका—ननु भवत्सदृशास्तस्यान्ये प्रियजना न हि सन्ति; तद्भवदर्थार्थमेव कुत्रापि गतस्तं निष्पाद्यागतप्राय इति चेन्न; अस्मत्तोऽपि यादवास्तस्य परमप्रियतमा इति वक्तुं तेषां सौभाग्यविशेषमाह—यादवानिति। सद्बन्धून् परमोत्कृष्ट-बान्धवान्, अतएव प्रियान्, कुतः? परमसत् परमोत्कृष्टं भाग्यं श्रीकृष्णभक्तिविशेषरूपं तद्वतः। अतएवासौ श्रीकृष्णः सदा रमयति। एवं तादृश भाग्याभावेन वयं तदुपेक्षिता निकृष्टा यादवाश्च परमधन्या इति भावः॥५६॥

भावानुवाद—यदि कहो कि आप लोगोंके समान भगवान् श्रीकृष्णका कोई भी प्रियतम नहीं है, अतएव वे आप लोगोंके किसी कार्यके लिए ही किसी अन्य स्थान पर गये होंगे, किन्तु कार्य पूरा करके पुनः लौट

आएँगे, ऐसा ही समझो। 'नहीं! हमारी तुलनामें यादव उनको परमप्रिय हैं' इसे कहनेके लिए श्रीयुधिष्ठिर यादवोंके सौभाग्यके विषयमें 'यादवा' इत्यादि पद कह रहे हैं। यादव श्रीकृष्णके सद्बन्धु अथवा सर्वश्रेष्ठ बान्धव हैं, अतएव उनके प्रियतम होनेके कारण यादव ही सर्वाधिक सौभाग्यशाली हैं। यहाँ 'भाग्य' कहनेसे श्रीकृष्णके प्रति विशेष भक्तिका बोध होता है और यादव श्रीकृष्णकी उसी विशेष भक्तिके कारण परम भाग्यवान हैं। इसलिए श्रीकृष्ण अभी द्वारकामें अवस्थान कर रहे हैं तथा उनको सदैव सुख प्रदान कर रहे हैं। परन्तु वैसी भक्तिके अभावमें हमलोग श्रीकृष्ण द्वारा उपेक्षित हैं, अतएव हम अत्यन्त निकृष्ट हैं तथा यादवगण परम धन्य हैं, यही भावार्थ है॥५६॥

अस्मासु यत्तस्य कदापि दौत्यं सारथ्यमन्यच्च भवद्भिरीक्ष्यते।
तद्भूरिभारक्षपणाय पापनाशेन धर्मस्य च रक्षणाय॥५७॥

श्लोकानुवाद—हे श्रीनारद! आप कभी-कभी श्रीकृष्णको हमारे दूत, सारथी या अन्य कार्योंको करते हुए देखते हैं, किन्तु उनके वह सब कार्य केवल भूभार-हरण और पापके नाश द्वारा धर्मके संरक्षणके लिए ही हैं॥५७॥

दिग्दर्शिनी टीका—एवञ्चेत् दौत्यादिकं कथं सम्भवति? तत्राह—अस्मास्विति अन्यत् उपदेष्टृत्वादिकञ्च, पापानामधर्माणां तद्धेतूनां वा नाशेन; अस्य पदस्य पूर्वेण परेणापि सम्बन्धः। तत्तदर्थमेव तत् सर्वं करोति, न त्वस्मत्स्नेहेनेति भावः॥५७॥

भावानुवाद—यदि आप लोग श्रीकृष्ण द्वारा उपेक्षित हैं तो फिर भगवान् श्रीकृष्णके द्वारा आपके दूत आदिके रूपमें कार्य करना कैसे सम्भव हुआ? इसीके समाधानके लिए 'अस्मासु' इत्यादि पद कह रहे हैं। आपने जब कभी-कभी उनको हमारे दूत, सारथी और उपदेष्टा आदिके रूपमें कार्य करते देखा है, उनके वह कार्य हमारे प्रति स्नेहके कारण नहीं बल्कि वह तो केवल भूभार-हरण तथा पापके नाश द्वारा धर्मके संरक्षणके लिए ही थे—ऐसा जानना चाहिए॥५७॥

श्रीपरीक्षिदुवाच—

अथ श्रीयादवेन्द्रस्य भीमो नर्मसुहृत्तमः।
विहस्योच्चैरुवाचेदं शृणु श्रीकृष्णशिष्य हे॥५८॥

श्लोकानुवाद—महाराज श्रीपरीक्षितने कहा—तब श्रीयादवेन्द्रके नर्म (विनोदी) सुहृत् भीमसेन बहुत जोरसे हँसते हुए कहने लगे, हे श्रीकृष्णके शिष्य! मेरी भी तो कुछ सुनिये॥५८॥

दिग्दर्शिनी टीका—नर्म परिहासकौतुकं, तत्सम्बन्धी सुहृत्तमः, अत उच्चैर्विहस्य इदं वक्ष्यमाणं वाक्यं हे कृष्णशिष्येति एतादृशं धूर्त्तवचनचातुर्यादिकं तेनैव त्वं शिक्षितोऽसि, न च तवात्र कोऽपि दोष इति भाव इत्यर्थः॥५८॥

भावानुवाद—श्रीकृष्णके नर्मसुहृत् अर्थात् उनके साथ परिहास-कौतुक (हँसी-मजाक) करनेवाले परममित्र भीमसेन बहुत जोरसे हँसते हुए कहने लगे—हे श्रीकृष्णके शिष्य देवर्षि नारद! क्या आपने ऐसी धूर्त्तता और चतुराई उन चतुरशिरोमणिसे सीखी है? अहो! समझ गया, इसमें आपका कोई भी दोष नहीं है॥५८॥

अमुष्य दुर्बोधचरित्रवारिधे,-र्मायादिहेतोश्चतुरावलीगुरोः।
प्रवर्त्तते वाग्व्यवहारकौशलं न कुत्र किं तन्न वयं प्रतीमः॥५९॥

श्लोकानुवाद—भगवान् श्रीकृष्णकी लीला सागरके समान गंभीर और दुर्बोध है। वे मायाके आदिकारण स्वरूप और चतुरोंके भी गुरु हैं, अतएव उनकी वाणीकी निपुणता और व्यवहारकी पटुता कहाँ पर अपना प्रभाव नहीं दिखलाती? हमलोग यह सब तत्त्व जानते हैं, इसीलिए इन सब बातों पर विश्वास नहीं करते हैं॥५९॥

दिग्दर्शिनी टीका—अमुष्य श्रीकृष्णस्य दूर्बोधं यच्चरित्रं लीला तस्य वारिधेः। मायाया आदिकारणस्य, अतएव चतुराणां धूर्त्तानामवली पंक्तिः, तस्या गुरोः परम-चतुरसिंहस्येत्यर्थः। अतः वाचां व्यवहाराणां कौशलं परिपाटी; यद्वा वाक्षु व्यवहारेषु च पाटवं किं कुत्र न प्रवर्त्तते? अपि तु कुत्रचिन्महालीलया, कुत्रापि महामाया, कुत्रचिच्च महाचातुर्येणेत्येवं सर्वत्र सर्वं तत् प्रवर्त्तत एवेत्यर्थः। अतो न तु सौहार्द्देन परमार्थतया वेति भावः। अतएव वयं तत्तत्त्वाभिज्ञास्तकौशलं न प्रतीमः, तत्र न विश्वसिम इत्यर्थः॥५९॥

भावानुवाद—श्रीकृष्णका चरित्र और लीलाएँ सागरके समान गंभीर हैं, इसलिए उनको कोई आसानीसे समझ नहीं सकता है। वे मायाके आदि कारण हैं तथा चतुर और धूर्त्त व्यक्तियोंके गुरु हैं। अतएव उनकी वाणीकी निपुणता और व्यवहारकी कुशलता कहाँ पर अपना प्रभाव नहीं दिखलाती? अर्थात् सर्वत्र ही दिखलाती है; अतः कहीं पर महालीला, कहीं पर महामाया, कहीं पर महाचतुरता द्वारा सर्वत्र ही प्रभावशाली होती है। अतएव उनके वचन और व्यवहारकी कुशलता हमारे प्रति सौहार्दवशतः अर्थात् परमार्थतः (यर्थाथतः) नहीं हैं। हम इन सभी तत्त्वोंसे अवगत हैं, इसलिए इन सब बातों पर विश्वास नहीं करते हैं॥५९॥

श्रीपरीक्षिदुवाच—

सशोकमवदन्मातस्ततो मम पितामहः।
कृष्णप्राणसखः श्रीमानर्जुनो निःश्वसन्मुहुः॥६०॥

श्लोकानुवाद—श्रीपरीक्षित महाराजने कहा—हे माता! फिर श्रीकृष्णके प्राणप्रिय सखा, मेरे पितामह श्रीअर्जुन शोकाकुल हृदयसे बारम्बार निःश्वास त्याग करते हुए कहने लगे॥६०॥

दिग्दर्शिनी टीका—कृष्ण एव प्राणसखो यस्य, कृष्णस्य प्राणतुल्यः परमः प्रियः सखेति वा; अतः श्रीमान् सर्वशोभासम्पन्नः, अतएव तन्नैष्ठुर्यस्मारणेन शोक-सहितं यथा स्यात्तथा मुहुर्निश्वसन्नवदत्॥६०॥

भावानुवाद—श्रीकृष्णके प्राणप्रिय सखा अथवा जिसके प्राणप्रिय सखा श्रीकृष्ण हैं, वे श्रीमान् अर्थात् समस्त शोभासे युक्त अर्जुन अपने सखाकी निष्ठुरताका स्मरण करके शोकाकुल हृदयसे बारम्बार दीर्घ-निःश्वास त्याग करते हुए कहने लगे॥६०॥

श्रीभगवानर्जुन उवाच—

भवत्प्रियतमेशेन भगवन्नमुना कृतः।
कृपाभरोऽपि दुःखाय किलास्माकं बभूव सः॥६१॥

श्लोकानुवाद—श्रीअर्जुनने कहा, हे भगवन्! आपके प्रियतम प्रभु श्रीकृष्णने हम पर जो कृपा की है, क्या वह हमारे दुःखका कारण नहीं है?॥६१॥

दिग्दर्शिनी टीका—भो भगवन् श्रीनारद! भवतः प्रियतमो य ईशः स्वामी तेनामुना श्रीकृष्णेन; स सारथ्यादिलक्षणः। पूर्वं भीमेन नर्मसुहृदा श्रीकृष्णकृत-कृपाभरस्य लीलादिकृतत्वादपरमार्थतोक्तया निरासः कृतः, अर्जुनेन च तत्प्रिय-सखत्वात् सर्वमङ्गीकृत्यान्यथा परिहरतीति विवेचनीयम्॥६१॥

भावानुवाद—हे भगवन् श्रीनारद! आपके प्रियतम प्रभु श्रीकृष्णने हमारे प्रति जो आचरण किया है अर्थात् सारथी आदि बनकर हम पर जो कृपा प्रदर्शित की है, क्या वह हमारे दुःखका कारण नहीं है? अर्थात् उनका समस्त आचरण ही हमारे दुःखका कारण है। पहले श्रीकृष्णके नर्मसुहृद् सखा भीमसेनने श्रीकृष्णकी जिस कृपाको उनकी लीलादि बतलाकर उसकी परमार्थता (यर्थाथतः)को अस्वीकार किया था, परन्तु अब अर्जुन उसको स्वीकार कर रहे हैं। इसका कारण है कि अर्जुन श्रीकृष्णके प्रियसखा हैं, अतः सब कुछ स्वीकार करके भी अन्य प्रकारसे अस्वीकार कर रहे हैं॥६१॥

स्वधर्मैकपरैः शुष्कज्ञानवद्भिः कृता रणे।
भीष्मादिभिः प्रहारा ये वर्ममर्मभिदो दृढ़ा॥६२॥
ते तस्यां मत्कृते स्वस्य श्रीमूर्त्तौ चक्रपाणिना।
वार्यमाणेन च मया सोढ़ाः स्वीकृत्य वारशः॥६३॥

श्लोकानुवाद—स्वधर्ममें रत शुष्क-ज्ञानी पितामह भीष्मने युद्धमें जिन सब अस्त्रों द्वारा मुझ पर प्रहार किया था, वे सभी अस्त्र सुदृढ़ कवचभेदी और हृदय-विदारक थे; परन्तु चक्रपाणि श्रीकृष्णने मेरे द्वारा रोके जाने पर भी मेरी रक्षाके लिए उन सबको अपने दिव्य श्रीअङ्गों पर ग्रहण किया था॥६२-६३॥

दिग्दर्शिनी टीका—तदेव सहेतुकं प्रपञ्च्य दर्शयति—स्वेति नवभिः। भीष्मादिभि-र्भारत युद्धे ये प्रहाराः कृतास्ते चक्रपाणिना श्रीकृष्णेन; मत्कृते मज्जयादिसिद्ध्यर्थम्; तस्यां परमसौकुमार्यादियुक्तायां मादृशजीवन-रूपायां स्वस्य श्रीमूर्त्तौ श्रीकृष्णेन वारशः स्वीकृत्य सोढ़ा इति द्वाभ्यामन्वयः। कीदृशैः? स्वधर्मः—*'पित्रादयोऽपि हन्तव्याः क्षत्रियेण रणाङ्गने'* इत्येवं लक्षणः, स एवैकः परः अवश्यकर्त्तव्यत्वेन श्रेष्ठो येषां तैः तदेकप्रवीणैः इत्यर्थः। तथापि सर्वसद्धर्मफलरूपे तस्मिन् प्रहाराः परमानुचितास्तत्राह—शुष्कं यज्ज्ञानं परब्रह्मरूपे श्रीकृष्णेऽस्त्रपीड़ादिकं कथञ्चिदपि न

सङ्गच्छतेत्यादिरूपं तद्युक्तैः; एवं भक्तिपरत्वाभावेन श्रीकृष्णचरणारविन्द–मकरन्दास्वाद–ज्ञानविशेषाभावात् प्रेमहान्या तथा तैर्व्यवहृतमिति भावः। वर्माणि कवचानि, मर्माणि च प्राणसन्धिस्थानानि अन्येषां भिन्दन्तीति तथा ते, अतएव दृढ़ाः; यद्वा, भक्तवात्सल्यरसेनाविर्भवन्त्याः प्रस्वेदधारायास्तेनैव रक्तपूरतया प्रदर्शनात्। तच्च लोके स्वभक्तवात्सल्यभरबोधनार्थमेवेति ज्ञेयम्। कीदृशेन तेन? मया वार्यमाणेनापि; भो भगवन! युद्धाकरणप्रतिज्ञां कृत्वापि भवान् भीष्मादीन् हन्तुं कथमग्रे सरति? कथं वा मयि वर्त्तमाने भगदत्तादीनां प्रहारानात्मनि स्वीकरोतीत्यादिवचनैः पादग्रहणादिना च निरुध्यमानेनापि। चक्रपाणिनेति यद्यपि चक्रमेव स्वयं सर्वांस्तान् हन्तुं सद्यः शक्नोति, सर्वान् प्रहारांश्च तान् विनिवारयितुं हेलया प्रभवति, तथापि केवलं मदीयकीर्त्त्यतिशयार्थमेव स्वयमयुध्यमानेन तेन ते सोढ़ा इति भावः। एवं स्वीकृत्येति च ज्ञेयम्। अन्यथा हेलया ते प्रहाराः सुखं वञ्चिताः स्युरिति दिक्॥६२–६३॥

भावानुवाद—'श्रीकृष्णकी कृपा हमारे दुःखका कारण बनी'—इसे ही कारण सहित 'स्वधर्म' इत्यादि नौ श्लोकोंमें बतला रहे हैं। भीष्म पितामह आदि महारथियोंने जिन अस्त्रोंके द्वारा मुझ पर प्रहार किया था, चक्रपाणि श्रीकृष्णने मुझे बचानेके लिए अर्थात् मेरी विजयके लिए अत्यधिक सुकोमल तथा मेरे जैसे भक्तोंके लिए जीवनस्वरूप अपने दिव्य श्रीविग्रह पर ही उन सब अस्त्रोंका प्रहार सहन किया था। वे भीष्म कैसे हैं? स्वधर्म पालन करनेवाले हैं। यद्यपि 'रणभूमिमें पिता आदि गुरुजनोंको मारना भी क्षत्रियका धर्म है' इत्यादि वर्णाश्रम धर्मके अन्तर्गत अवश्य पालनीय कर्त्तव्योंका पालन करनेवाले व्यक्तियोंमें वे प्रवीण थे, तथापि सभी धर्मोंके चरम फलस्वरूप श्रीकृष्णके सुकुमार अङ्गों पर प्रहार करना सर्वथा अनुचित था। (अर्जुन) और भी कुछ कह रहे हैं, 'वे शुष्कज्ञानी हैं'। अर्थात् परब्रह्म श्रीकृष्णके अङ्गमें अस्त्रपीड़ा आदिका होना लेशमात्र भी संभव नहीं है, वे इस प्रकारके शुष्क ज्ञानसे युक्त थे। परन्तु भक्तिके अभावमें कभी भी भगवान् श्रीकृष्णके चरणकमलोंके मकरन्दका आस्वादन नहीं किया जा सकता अथवा उनके माधुर्यज्ञानकी प्राप्ति नहीं हो सकती है। अतएव, यद्यपि श्रीभीष्मदेव शुष्कज्ञानी होनेके कारण श्रीकृष्णको परब्रह्म मानते थे, तथापि वे भक्तिपरायण नहीं थे। भक्तिपरायण नहीं होनेसे केवल शुष्कज्ञान द्वारा भगवान्‌के श्रीचरणकमलोंके मकरन्दका आस्वादन और

उनके माधुर्यकी उपलब्धि नहीं हो सकती। वे श्रीकृष्णके प्रेमसे रहित थे, इसलिए उन्होंने श्रीकृष्णके परम सुकुमार अङ्गोंमें कवच भेदी और मर्मभेदी सुदृढ़ अस्त्रोंके द्वारा प्रहार किया था तथा भगवान्ने भी उन प्रहारोंको स्वीकार किया था। अथवा जगतमें भक्तवात्सल्य रसको प्रकट करनेके लिए श्रीकृष्णने अपने श्रीअङ्गों पर उन अस्त्रोंके प्रहारको स्वीकार कर पसीनेकी धाराके छलसे रक्त धाराको प्रवाहित कराया था। वास्तवमें उसे जगतमें भक्तवात्सलताके प्रदर्शनका कारण ही समझना चाहिए।

यदि कहो कि श्रीभगवान्का वह भक्त-वात्सल्य किस प्रकारका था? इसके लिए कह रहे हैं—मेरे द्वारा रोकने पर भी अर्थात् मैंने कहा था, 'हे भगवन्! आपने प्रतिज्ञाकी है कि आप महाभारत युद्धमें अस्त्र धारण करके युद्ध नहीं करेंगें, अतः ऐसी प्रतिज्ञा करके भी आप भीष्म आदि योद्धाओंका विनाश करनेके लिए अग्रसर क्यों हो रहे हैं? विशेषकर मेरे रहते हुए क्यों आप भगदत्त आदिके अस्त्रोंके प्रहारको सहन कर रहे हैं?' इत्यादि वचनों द्वारा बारम्बार अनुनय विनयपूर्वक श्रीचरणोंको पकड़कर रोकने पर भी, केवल मेरे लिए ही उन चक्रपाणि श्रीकृष्णने अपने श्रीअङ्गों पर भीष्म आदि द्वारा किये गये प्रहारको अंगीकार किया था। यहाँ पर 'चक्रपाणि' कहनेका उद्देश्य यह है कि यद्यपि श्रीकृष्ण स्वयं सुदर्शनचक्र द्वारा सब प्रकारके प्रहारको रोकने और भीष्म आदि विपक्षके लोगोंको अनायास ही विनाश करनेमें समर्थ थे, तथापि केवल मेरे यशकी वृद्धिके लिए स्वयं युद्ध न करके भी उन सभी अस्त्रप्रहारोंको स्वीकार किया था। अन्यथा भीष्म आदि भी उनके श्रीअङ्गोंमें इस प्रकार अस्त्रप्रहारके सुखसे वञ्चित रह जाते॥६२-६३॥

तन्मे चिन्तयतोऽद्यापि हृदयान्नापसर्पति।
दुःखशल्यमतो ब्रह्मन् सुखं मे जायतां कथम्॥६४॥

श्लोकानुवाद—हे ब्रह्मन्! उन प्रहारोंका स्मरण करनेसे आज तक भी वह दुःखरूपी शूल मेरे हृदयसे नहीं निकला है। अतएव मेरे सुखकी सम्भावना ही कहाँ है?॥६४॥

दिग्दर्शिनी टीका—तत्प्रहारसहनं चिन्तयतः स्मरतो मम हृदयाद्दुःखमेव शल्यं मर्मपीड़ाहेतुत्वात् नापसर्पति नापैति, यथा हृदयलग्नशल्यस्य विषयभोगादिना न किञ्चित् सुखं स्यात्तथेति भावः॥६४॥

भावानुवाद—हे ब्रह्मन्! श्रीकृष्ण द्वारा उन प्रहारोंको सहन करनेकी पीड़ाके स्मरणसे आज तक भी वह दुःखरूपी शूल मेरे हृदयसे नहीं निकला है। वह स्मरण मर्मभेदी पीड़ाका कारण बन गया है। यदि हृदयसे शूल न निकले तो क्या विषयभोग आदिसे सुख प्राप्त हो सकता है? अतएव मेरे सुखकी सम्भावना ही कहाँ है?॥६४॥

कर्मणा येन दुःखं स्यान्निजप्रियजनस्य हि।
न तस्याचरणं प्रीतेः कारुण्यस्यापि लक्षणम्॥६५॥

श्लोकानुवाद—जिन कार्यों द्वारा अपने प्रिय व्यक्तियोंको दुःख होता हो, उनको करना कभी भी प्रीति या कृपाका लक्षण नहीं है॥६५॥

दिग्दर्शिनी टीका—नन्वेतदेव महतः सख्यस्य कारुण्यस्य च लक्षणं, तत्राह—कर्मणेति तस्य कर्मणः आचरणं विधानम्। अस्तु तावत् प्रीतेः प्रेम्णः, कारुण्यस्यापि कस्यचिदनुग्रहस्यापि न लक्षणं भवतीत्यर्थः॥६५॥

भावानुवाद—यदि कहो कि श्रीकृष्णका वैसा आचरण क्या सख्य-भावको प्रकट करनेवाली करुणाका लक्षण नहीं है? उसीके उत्तरमें कह रहे हैं कि जिस कार्यको करनेसे प्रिय व्यक्तियोंको दुःख होता है, वैसा आचरण करना कभी भी करुणा या कृपाका लक्षण नहीं है, प्रीतिके लक्षणकी बात तो फिर बहुत दूर है॥६५॥

भीष्मद्रोणादिहननान्निवृत्तं मां प्रवर्त्तयन्।
महाज्ञानिवरः कृष्णो यत्किञ्चिदुपदिष्टवान्॥६६॥

श्लोकानुवाद—जब मैं रणभूमिमें भीष्म-द्रोण आदि गुरुजनोंको मारनेसे पीछे हट गया था, उस समय महाज्ञानीवर श्रीकृष्णने मुझे उस कार्यमें प्रवृत्त (प्रेरित) करनेके लिए कुछ उपदेश दिया था॥६६॥

दिग्दर्शिनी टीका—नन्वेवं चेत्तर्हि सर्वोपनिषत्सारोऽनेन त्वयि कथं गीतः स्यात्तत्राह—भीष्मेति पञ्चभिः। प्रवर्त्तयन् तत्र प्रवर्त्तयितुम्, हेतौ शतृङ्॥६६॥

भावानुवाद—यदि प्रश्न हो कि आपके प्रति यदि श्रीकृष्णकी कृपा नहीं है, तो फिर उन्होंने आपको सभी उपनिषदोंके सारस्वरूप गीताका उपदेश क्यों दिया? इसीके उत्तरमें 'भीष्म' इत्यादि पाँच श्लोक कह रहे हैं। मुझे श्रीभीष्म-द्रोण आदिको मारनेमें प्रेरित करनेके लिए ही श्रीकृष्णने कुछ उपदेश दिया था॥६६॥

यथा श्रुतार्थश्रवणाच्छुष्कज्ञानिसुखप्रदम्।
महादुःखकृदस्माकं भक्तिमाहात्म्यजीविनाम्॥६७॥

श्लोकानुवाद—गीताके यथाश्रुत अर्थका श्रवण केवल शुष्कज्ञानियोंको ही सुख देनेवाला है; मेरे लिए तो वे उपदेश अत्यधिक दुःख दायक है, क्योंकि भक्तिकी महिमा श्रवणकर जीवित रहनेवाले भक्तोंको ऐसे उपदेशसे सुख नहीं होता है॥६७॥

दिग्दर्शिनी टीका—यथाश्रुतस्य साक्षाद्वृत्त्या प्रतिपाद्यमानस्य अर्थस्य श्रवणात्; तत् शुष्कज्ञानिनां आत्मानात्मविवेकपराणां मुमुक्षुणां वा सुखप्रदमप्यस्माकं महादुःखकरं भवति। कुतः? भक्तिमाहात्म्यमेव जीवो जीवनं तद्वताम्; यद्वा, तेनैव जीवितुं शीलमेषामिति तेषाम्॥६७॥

भावानुवाद—गीताके यथाश्रुत (ज्योंके त्यों) अर्थात् साक्षात् वृत्ति द्वारा प्रतिपादित अर्थके श्रवणके कारण वह उपदेश शुष्कज्ञानियोंको अर्थात् आत्म-अनात्मके विवेकमें रत मुमुक्षु व्यक्तियोंको सुख देनेवाला है, किन्तु मेरे जैसे भक्तिमें आसक्त व्यक्तिके लिए अत्यधिक दुःखदायक है। क्यों? क्योंकि भक्तिका माहात्म्य श्रवण करना ही हमारा जीवन है और वैसे भक्ति-माहात्म्यमें आसक्त भक्तोंको उस उपदेशको सुनकर सुख नहीं होता है॥६७॥

तात्पर्यस्य विचारेण कृतेनापि न तत्सुखम्।
किञ्चित् करोत्युतामुष्य वञ्चनां किल बोधनात्॥६८॥

श्लोकानुवाद—उन उपदेशोंका तात्पर्य विचार करने पर भी वे उपदेश हमें तनिक भी सुख प्रदान नहीं करते, बल्कि वे हमें श्रीकृष्णकी वञ्चनाका ही बोध कराते हैं॥६८॥

दिग्दर्शिनी टीका—ननु तात्पर्यार्थ एव श्रेयान्, स च भक्तिमाहात्म्यपर एवेति। भक्तानां भवादृशां सुखं कुर्यादेव, तत्राह—तात्पर्यस्येति। तत् प्रत्युत अमुष्य श्रीकृष्णस्य वञ्चनां तत्कर्त्तृकां मादृग्विषयकां प्रतारणाम्, किल निश्चितम्॥६८॥

भावानुवाद—यदि कहो कि इन उपदेशोंके तात्पर्यका अर्थ विचार करना ही श्रेयस्कर है, क्योंकि ये उपदेश भक्तिके माहात्म्यको स्थापन करते हैं, अतएव आपके जैसे भक्तोंके लिए सुखदायक हैं। इसका उत्तर देते हुए कह रहे हैं कि ये उपदेश हमें सुखी नहीं कर सकते, बल्कि वे श्रीकृष्णकी वञ्चनामें ही पर्यवसित होते हैं। अर्थात् गीताके तात्पर्यका अर्थ विचार करने पर भी वह उपदेश हमारे सुखका कारण नहीं होते, बल्कि श्रीकृष्णकी वञ्चनाका ही बोध कराते हैं॥६८॥

यत्सदा सर्वदा शुद्धनिरुपाधिकृपाकरे।
तस्मिन् सत्यप्रतिज्ञे सन्मित्रवर्ये महाप्रभौ॥६९॥
विश्वस्तस्य दृढ़ं साक्षात् प्राप्तात्तस्मान्मम प्रियम्।
महामनोहराकारान्न परब्रह्मणः परम्॥७०॥

श्लोकानुवाद—सर्वदा सब प्रकारसे शुद्ध निरुपाधिक कृपाके समुद्र, सत्यप्रतिज्ञ तथा परमहितकारी बन्धुओंमें श्रेष्ठबन्धु उन श्रीकृष्णमें ही हमारा दृढ़ विश्वास है। साक्षात्‌रूपमें प्राप्त उन परममनोहर नराकृति परब्रह्मके अलावा कोई भी वस्तु हमें प्रिय नहीं है॥६९–७०॥

दिग्दर्शिनी टीका—तत्र हेतुमाह—यदिति द्वाभ्याम्। तस्मात् श्रीकृष्णात् परमन्यन्मम प्रियं साध्यं फलं नास्तीति द्वयोरन्वयः। कथम्भूतस्य? तस्मिन् श्रीकृष्णे दृढ़ं विश्वस्तस्य; विश्वासहेतुत्वेन विशेषणचतुष्कं शुद्धेत्यादि; सदा सर्वदेति यथायथं सर्वत्रापि योजनीयम्। सत्या प्रतिज्ञा *'न मे भक्तः प्रणश्यति'* (श्रीगीता ९/३१) इत्यादिरूपा यस्य। सन्मित्रेषु परमोत्कृष्ट हितकारिषु वर्ये श्रेष्ठे महाप्रभौ सर्व-सामर्थ्यभवतीत्यर्थः। कथम्भूतात्? तस्मात् महामनोहर आकारः श्रीमूर्त्तिर्यस्य तथाभूतात् परब्रह्मणः श्रीदेवकीनन्दनस्वरूपादित्यर्थः। तत्रापि साक्षादपरोक्षतया प्रकर्षेण सख्यादिना प्राप्तान्न व्यवहितात्; अतस्तस्य तथात्वान्मम च तस्मिन्नेव परमविश्वासदन्यत् किमपि साध्यं तं विना न सम्भवतीति तादृशोपदेशो वैयर्थ्यापत्त्या प्रतारण एव पर्यवस्यति; तच्च भीष्मद्रोणादि-घातनार्थमिति साधूक्तं श्रीयुधिष्ठिरेण तद्भूमिभार-क्षपणायेति भावः॥६९–७०॥

भावानुवाद—'श्रीकृष्ण द्वारा प्रदत्त गीताके उपदेश हमारे सुखका कारण नहीं हैं'—'यत्' इत्यादि दो श्लोकोंमें उसका कारण बतला रहे हैं। उन श्रीकृष्णकी परम मनोहर श्रीमूर्त्तिके अलावा मेरी कोई भी दूसरी साध्यवस्तु नहीं है और उन महाप्रभु श्रीकृष्णमें मेरा सुदृढ़ विश्वास भी है। इस विश्वासके कारणको प्रदर्शित करनेके लिए 'शुद्ध' इत्यादि चार विशेषणोंका प्रयोग किया गया है। 'सदा-सर्वदा' इन दो शब्दोंका यथायथ सर्वत्र ही प्रयोग करना होगा। जैसे, वे सदा-सर्वदा सत्य प्रतिज्ञ हैं—'मेरे भक्तोंका कभी भी विनाश नहीं होता' इत्यादि जिनकी प्रतिज्ञा कभी भी असत्य नहीं होती। 'सन्मित्रवर्य' अर्थात् परमहितकारी बन्धुओंमें सर्वश्रेष्ठ बन्धु हैं, क्योंकि महाप्रभु (श्रीकृष्ण) सब कुछ करनेमें समर्थ हैं। वे महाप्रभु कैसे हैं? वे परममनोहर हैं—यद्यपि वे नराकार अर्थात् परममनोहर मूर्त्तिधारी परब्रह्म श्रीदेवकीनन्दन-स्वरूप हैं, तथापि मैंने उनको अपने प्रियसखाके रूपमें प्राप्त किया है। अर्थात् अपरोक्ष रूपमें नहीं अपितु प्रत्यक्षरूपमें प्रियसखाके रूपमें प्राप्त किया है, अतएव कोई भी व्यवधान नहीं है। उनके प्रति मेरा दृढ़ विश्वास स्वतः विद्यमान है तथा उनके अलावा मेरी कोई दूसरी साध्यवस्तु भी नहीं है। अतएव व्यतिरेकरूपमें अर्थात् मेरी वञ्चनाके अलावा वे मुझे अन्य किसी साध्यवस्तुका उपदेश नहीं कर सकते। अर्थात् मेरे प्रति उनका गीताका सार स्वरूप उपदेश (जो भगवद् विश्वास मूलक प्रपत्ति या शरणागतिका उपदेश है) व्यर्थ ही है। अतएव उसको वञ्चनाके अलावा और क्या कहा जा सकता है? परन्तु वह उपदेश केवल भीष्म-द्रोण आदिके वधके लिए ही प्रदान किया गया था। अतएव महाराज श्रीयुधिष्ठिरने जो कहा है—'पृथ्वीके भारका हरण करना तथा पाप नाशके द्वारा धर्म-संरक्षण करना ही उनके ऐसे आचरणका उद्देश्य है', इसे सत्य उक्ति ही समझेंगे॥६९-७०॥

श्रीनकुल-सहदेवावूचतुः—

यद्विपद्गणतो धैर्यं वैरिवर्गविनाशनम्।
अश्मेधादि चास्माकं श्रीकृष्णः समपादयत्॥७१॥

श्लोकानुवाद—श्रीनकुल-सहदेवने कहा—हे भगवन्! श्रीकृष्णने हमारी विपत्तियोंमें हमको जो धैर्य बँधाया, शत्रुओंका विनाश किया और अश्वमेध आदि यज्ञोंको सम्पूर्ण करवाया— ॥७१ ॥

दिग्दर्शिनी टीका—अश्वमेध आदिर्यस्य सत्कर्मणस्तच्च॥७१ ॥

भावानुवाद—श्लोकानुवाद द्रष्टव्य है॥७१ ॥

यच्च तेन यशोराज्यं पुण्याद्यप्यन्यदुर्लभम्।
व्यतनोद्भगवंस्तेन नास्य मन्यामहे कृपाम्॥७२॥

श्लोकानुवाद—अथवा हमारे यश, राज्य तथा दुर्लभ पुण्यादिको बढ़ाया, उसे हम उनकी कृपा नहीं मानते हैं॥७२ ॥

दिग्दर्शिनी टीका—तेन धैर्यादिसम्पादनेन अन्यैर्दुर्लभमपि क्रमेण यशादि व्यतनोत् श्रीकृष्णः। भगवन्! हे श्रीनारद! तेन यशादिविस्तारेण अस्य श्रीकृष्णस्य कृपां न मन्यामहे वयम्, परम-फलरूपस्य तदीय-सन्दर्शनस्य चिरमसद्भावात्॥७२ ॥

भावानुवाद—श्रीकृष्णने विपत्तियोंमें जो हमें धैर्य बँधाया है और अन्य व्यक्तियोंके लिए दुर्लभ पुण्य आदि सत्कर्मोंमें लगाकर हमारा यश बढ़ाया है, उसको हम श्रीकृष्णकी विशेष कृपा नहीं मानते हैं। परन्तु उनका दर्शन ही हमारे लिए परमफलस्वरूप है, किन्तु बहुत समयसे हम उनके दर्शनोंसे भी वञ्चित हो गये हैं॥७२ ॥

किन्त्वनेकमहायज्ञोत्सवं सम्पादयन्नसौ।
स्वीकारेणाग्रपूजाया हर्षयेन्नः कृपा हि सा॥७३॥

श्लोकानुवाद—किन्तु अनेक महायज्ञोत्सव पूर्ण कराकर उन्होंने जो हमारी अग्रपूजाकी प्रार्थनाको स्वीकार करके हमें आनन्दित किया है, उसे ही हम उनकी कृपा मानते हैं॥७३ ॥

दिग्दर्शिनी टीका—सम्पादयन्निति—सदा सन्दर्शनमभिप्रैति। हि यतः सैव कृपा तस्य॥७३ ॥

भावानुवाद—अनेक राजसूय आदि महायज्ञोत्सवोंको पूर्ण करानेके छलसे हमें सदा ही उनका दर्शन प्राप्त होता था। इसे ही हम उनकी कृपा मानते हैं॥७३ ॥

अधुना वञ्चितास्तेन वयं जीवाम तत् कथम्।
तद्दर्शनमपि ब्रह्मन् यन्नोऽभूदतिदुर्घटम्॥७४॥

श्लोकानुवाद—हे ब्रह्मन् (श्रीनारद)! अब हम उनके द्वारा वञ्चित होकर किस प्रकार अपना जीवन धारण करें? अब तो उनके दर्शन भी हमारे लिए अति दुर्लभ हो गये हैं॥७४॥

दिग्दर्शिनी टीका—तेन श्रीकृष्णेन वञ्चिता उपेक्षिताः सन्तः कथं जीवामः जीवितुं शक्नुम इत्यर्थः। यद्यस्मात्तस्य श्रीकृष्णस्य दर्शनमप्यस्तु तावदग्रपूजा-स्वीकारेण महोत्सव-सम्पादनं नोऽस्माकं परमदुर्घटमभूत्॥७४॥

भावानुवाद—श्रीकृष्ण द्वारा उपेक्षित होकर हम किस प्रकार जीवित रह सकेंगे? अब तो उनके दर्शन ही हमारे लिए अति दुर्लभ हो गए हैं, तो फिर उनके द्वारा अग्रपूजा अर्थात् सर्वप्रथम अपनी पूजा स्वीकार कर राजसूय यज्ञरूपी महोत्सवको पूर्ण करानेके विषयमें क्या कहें?॥७४॥

श्रीपरीक्षिदुवाच—

तच्छ्रुत्वा वचनं तेषां द्रौपदी शोकविह्वला।
संस्तभ्य यत्नादात्मानं क्रन्दन्त्याह सगद्गदम्॥७५॥

श्लोकानुवाद—महाराज श्रीपरीक्षितने कहा—हे माता! उन सबकी वार्त्तालापको सुनकर श्रीद्रौपदी शोकसे विह्वल होकर क्रन्दन करने लगीं, फिर यत्नपूर्वक कुछ धीरज धारणकर गदगद् वाणीसे कहने लगीं॥७५॥

दिग्दर्शिनी टीका—तेषां श्रीयुधिष्ठिरादीनां तत् पूर्वोक्तं वचनं श्रुत्वेति कथञ्चित् सम्वृतशोकादपि पुनस्तेषाः तादृशवचःश्रवणात् शोकेन विह्वला सती पश्चादात्मानं यत्नात् संस्तभ्य स्थिरीकृत्येत्यर्थः॥७५॥

भावानुवाद—यद्यपि श्रीद्रौपदीने अभी तक किसी प्रकारसे अपने शोकको छिपा रखा था, परन्तु महाराज श्रीयुधिष्ठिर आदि सबकी बातोंको सुनकर शोकसे अत्यन्त विह्वल हो उठीं और फिर यत्नपूर्वक धैर्य धारण करके रोते-रोते कहने लगीं॥७५॥

श्रीकृष्णोवाच—

श्रीकृष्णेन मम प्राणसखेन बहुधा त्रपा।
निवारणीया दुष्टाश्च मारणीयाः किलेदृशः॥७६॥

कर्त्तव्योऽनुग्रहस्तेन सदेत्यासीन्मतिर्मम।
अधुना पतितास्तातभ्रातृपुत्रादयोऽखिलाः ॥७७ ॥
तत्रापि विदधे शोकं न तदिच्छानुसारिणी।
किन्त्वैच्छं प्राप्नुमात्मेष्टं किञ्चित्तत्तच्छलात् फलम् ॥७८ ॥

श्लोकानुवाद—श्रीद्रौपदीने कहा—मैं यह आशा करती थी कि मेरे प्राणसखा श्रीकृष्णने जिस प्रकार पहले बहुत बार मेरी लज्जा बचायी है तथा महादोषी दुर्योधन-दुःशासन जैसे दुष्टोंका विनाश करके सदैव हमारे प्रति अनुग्रह किया है, अतः पहलेकी भाँति वे अब भी अनुग्रह करते रहेंगे तथा यही उनका कर्त्तव्य भी है। यद्यपि अब मेरे पिता द्रुपद, भाई धृष्टद्युम्नादि, पुत्र प्रतिविन्ध्यादि सब एक-एक करके युद्ध भूमिमें मारे गये हैं, तथापि मैंने 'सब कृष्णकी इच्छा है' तथा 'प्रियतमकी इच्छा पूर्ण होना ही परम सुखप्रद होता है' ऐसा जानकर तनिक भी शोक नहीं किया। किन्तु उस समस्त शोकके छलसे मैं अपने अभीष्ट किसी एक फलको प्राप्त करनेकी आशा पोषण कर रही थी॥७६-७८॥

दिग्दर्शिनी टीका—यतः ईदृशः अनिर्वचनीय-महादोषकारिण इत्यर्थः। यद्वा दुर्योधन-दुःशासनादयस्तत्सदृशाश्च तदनुगा इत्यर्थः; एवमनुग्रहस्तेन श्रीकृष्णेन सदा कर्त्तव्य इत्येषा मम मतिरासीत्। ईदृश इत्यस्यात्रैव वान्वयः। ततश्च लज्जानिवारणादि-सदृशोऽनुग्रह इत्यर्थः। तातो द्रुपदः; भ्रातरो धृष्टद्युम्नाद्याः; पुत्राः प्रतिविन्ध्यादयः। तच्चाहं न शोचामि, प्रत्युत निजाभीष्ट सिद्ध्याशया साधेववामंसीत्याशयेनाह—तत्रेति, तातादिघातनेऽपि; यतस्तस्य श्रीकृष्णस्य या इच्छा तामेवानुसर्तुं शीलमस्या इति तथाभूतास्मि। प्रियतमस्येष्टसिद्धिरेव परमसुखप्रदेति न्यायात्। तस्य तस्य तातादि-घातनस्य तदर्थशोकादेर्वा छलात् आत्मनो मम इष्टं प्रियं किञ्चिन्निरूपमं फलं प्राप्तुमैच्छम् ॥७६-७८॥

भावानुवाद—श्लोकानुवाद द्रष्टव्य है॥७६-७८॥

तेन सान्त्वयितव्याहं हतबन्धुजना स्वयम्।
श्रीकृष्णेनोपविश्यात्र मत्पार्श्वे युक्तिपाटवैः ॥७९ ॥

श्लोकानुवाद—मैंने आशा की थी कि श्रीकृष्ण हमारे साथ रहकर तथा स्वयं मेरे पासमें बैठकर अपने युक्तिपूर्ण सुमधुर वचनोंके द्वारा

मुझे सुखी करेंगे तथा मरे हुए बन्धु-बान्धवोंके वियोगके लिए मुझे सान्त्वना प्रदान करेंगे॥७९॥

दिग्दर्शिनी टीका—तदेवाह—तेनेति द्वाभ्याम्। स्वयमेव तेनाहं सान्त्वयितव्या, मधुरवचनेनाप्याययितव्या॥७९॥

भावानुवाद—श्लोकानुवाद द्रष्टव्य है॥७९॥

तानि तानि ततस्तस्य पातव्यानि मया सदा।
मधुराणि मनोज्ञानि स्मितवाक्यामृतानि हि॥८०॥

श्लोकानुवाद—अतः मेरी ऐसी आशा थी कि मैं सदैव उनके उन मधुर हास्ययुक्त वचनामृतका पान करूँगी॥८०॥

दिग्दर्शिनी टीका—ततस्तस्माद्धेतोः, तस्य श्रीकृष्णस्य; स्मितयुक्तानि वाक्यान्येवा-मृतानि॥८०॥

भावानुवाद—श्लोकानुवाद द्रष्टव्य है॥८०॥

तदस्तु दूरे दौर्भाग्यान्मम पूर्ववदप्यसौ।
नायात्यतो दया कास्य मन्तव्या मयका मुने॥८१॥

श्लोकानुवाद—हाय! उस आशाके पूर्ण होनेकी बात तो दूर रहे, मेरा दुर्भाग्य ही है कि अब तो वे पहलेकी भाँति हमारे पास आते भी नहीं हैं। अतएव देवर्षि श्रीनारद! मैं इसको कैसे श्रीकृष्णकी कृपा समझ सकती हूँ॥८१॥

दिग्दर्शिनी टीका—तत् स्मितवाक्यामृतपानम्; असौ श्रीकृष्णः; अतोऽस्माद्धेतोः; अस्य श्रीकृष्णस्य का दया मन्तव्या, अपि तु न कापि मन्यत इत्यर्थः॥८१॥

भावानुवाद—श्लोकानुवाद द्रष्टव्य है॥८१॥

श्रीपरीक्षिदुवाच—

शोकार्तेव ततः कुन्ती कृष्णदर्शनजीवना।
सास्त्रं सकरुणं प्राह स्मरन्ती तत्कृपाकृपे॥८२॥

श्लोकानुवाद—महाराज श्रीपरीक्षितने कहा—तब श्रीकृष्णके दर्शनसे ही जीवन धारण करनेवाली श्रीकुन्तीदेवी, श्रीकृष्णकी कृपा तथा

उपेक्षाको स्मरण कर शोकसे आतुर होकर अश्रु बहाती हुई करुण स्वरसे कहने लगीं॥८२॥

दिग्दर्शिनी टीका—इवेत्यनेन श्रीकृष्णकृपाभर–पात्रतया शोकासम्भवेऽपि शोकार्त्तान्या स्त्री यथा तथैवेत्यनेन शोकोद्रेक एव बोध्यते। कृष्णस्य दर्शनमेव जीवनं यस्याः; तस्य कृष्णस्य कृपामकृपाञ्च उपेक्षां स्मरन्ती चिन्तयन्ती॥८२॥

भावानुवाद—श्रीकृष्णका दर्शन ही जिनका जीवन है, वे श्रीकुन्तीदेवी शोकातुरकी भाँति रोते–रोते कहने लगीं। यहाँ पर 'इव'कार अर्थात् 'शोकातुरकी भाँति'का तात्पर्य यह है कि यद्यपि श्रीकृष्णके कृपापात्रोंके लिए शोक आदि दुःख असम्भव है, तथापि स्त्रियोंमें स्वभाव सुलभ शोकके उत्पन्न होनेके कारण श्रीकुन्तीदेवीका शोक भी शोकाकुल व्यक्तिके समान समझना चाहिए। उस शोकका कारण है—श्रीकृष्णकी कृपा तथा अकृपा अर्थात् उपेक्षाके स्मरणके कारण हुई चिन्ता॥८२॥

श्रीपृथोवाच—

अनाथायाः सपुत्राया ममापद्गणतोऽसकृत्।
त्वरया मोचनात् सम्यग्देवकीमातृतोऽपि यः
कृपाविशेषः कृष्णस्य स्वस्यामनुमितो मया॥८३॥

श्लोकानुवाद—श्रीकुन्तीदेवीने कहा—मैं अपने पुत्रोंके साथ अनाथिनीकी भाँति विपत्तियोंके सागरमें डूबी हुई थी, परन्तु श्रीकृष्णने मुझे बारम्बार उन सभी विपत्तियोंसे मुक्त किया था। इसलिए मेरा ऐसा अनुमान था कि श्रीकृष्णने अपनी माता श्रीदेवकीसे भी अधिक मुझ पर विशेष कृपा की है॥८३॥

दिग्दर्शिनी टीका—कृपामाह—अनाथाया इति सार्धेन। त्वरयासकृत् बारंबारं सम्यग् यथा स्यात्तथा मोचनाद्धेतोः। देवकीनाम्नी या माता तस्या अपि सकाशात् यः कृष्णस्य कृपाविशेषः स्वस्यां मयि अनुमितः ज्ञातः। यथोक्तमेतयैव प्रथमस्कन्धे (श्रीमद्भा॰ १/८/२३–२४)—*'यथा हृषीकेश! खलेन देवकी, कंसेन रुद्धातिचिरं शुचार्पिता। विमोचिताहञ्च सहात्मजा विभो, त्वयैव नाथेन मुहुर्विपद्गणात्॥ विषान्महाग्नेः पुरुषाददर्शनादसत्सभाया वनवासकृच्छ्रतः। मृधे मृधेऽनेकमहारथास्त्रतो, द्रौण्यस्त्रतश्चास्म हरेऽभिरक्षिताः॥'* इति। अनयोरर्थः—मातृतोऽपि मय्यधिका तव प्रीतिः। तथाहि हे हृषीकेश! यथा देवकी कंसेन रुद्धा त्वया विमोचिता, अहं किं

तथैवेति काक्वा महान् विशेष उक्तः। तं दर्शयति, सा अतिचिरं रुद्धा सती तस्मादेव सकृद् विमोचिता तथा शुचार्पिता च सती; न च तस्याः पुत्रा रक्षिताः। अस्ति चान्यो नाथस्तस्याः; अहन्तु विपद्गणात् तत्रापि मुहुः शीघ्रञ्च सात्मजा च त्वयैव नाथेन; विपद्गणमेव दर्शयति—विषात् भीमस्य विषमोदकदानात्, महाग्नेः जतुगृहदाहात्, पुरुषादा हिड़िम्बादयो राक्षसाः तेषां दर्शनात्, असत्सभाया द्युतस्थानादिति; एवं पूर्वोक्तस्य आपद्गणस्य विवरणञ्च ज्ञेयम्॥८३॥

भावानुवाद—अब 'अनाथाया' इत्यादि डेढ़ (एक और आधे) श्लोकमें श्रीकुन्तीदेवी अपने प्रति श्रीकृष्णकी कृपाका लक्षण बतला रही हैं। मैं अपने पुत्रोंके साथ अनाथिनी जैसी बारम्बार विपत्तियोंके सागरमें डूब रही थी और श्रीकृष्ण मुझे बार-बार उन सभी विपत्तियोंसे मुक्त किया करते थे। अतः मेरा ऐसा अनुमान था कि श्रीकृष्णने अपनी माता श्रीदेवकीसे भी अधिक मुझ पर विशेष कृपा की है। उनकी इस उक्तिके समर्थनमें प्रथम-स्कन्धमें कहे गये वचनोंको उद्धृत किया जा रहा है। श्रीकुन्तीदेवी कह रही हैं—"हे हृषीकेश! तुमने शोकसे सन्तप्त अपनी माता देवकीको दुष्टस्वभावसे युक्त कंसके कारागारसे मुक्त किया है और पुत्रों सहित मेरी बारम्बार अनेक प्रकारकी विपत्तियोंसे रक्षा की है। हे विभो! इस प्रकार तुमने अपनी माताकी तुलनामें मुझ पर अधिक कृपा की है। अनेक सहायक रहते हुए भी उनको दीर्घकाल तक कारागारकी यन्त्रणाका भोग करना पड़ा था, तुमने उनका उद्धार बहुत देरसे किया था। किन्तु मेरा कोई भी दूसरा आश्रय नहीं था, इसलिए मेरे बार-बार विपत्तियोंमें पड़ने पर तुमने शीघ्रतापूर्वक उन सब विपत्तियोंसे मेरे पुत्रोंके साथ मेरी रक्षा करके मुझ पर अपनी कृपाकी चरमसीमाका दर्शन कराया है। पुनः विष प्रयोग, लक्षागृह-दाह और राक्षसोंके चंगुलसे भी मेरे पुत्रोंकी रक्षा की है। इस प्रकार दुष्ट लोगोंकी सभामें जुआ खेलना, वनवासके कष्टों और युद्धभूमिमें अस्त्रोंके भयरूप विपत्तियोंसे भी रक्षा की है तथा अभी तुमने अश्वत्थामाके ब्रह्मास्त्रसे भी हमारी रक्षा की है।"

इस प्रकार श्रीकुन्तीदेवी, श्रीदेवकीकी तुलनामें अपने प्रति श्रीकृष्णकी विशेष कृपाके विषयमें बता रही हैं। अर्थात् श्रीदेवकी कंसके कारागारमें बहुत समय तक कैद रहीं तथा उनको श्रीकृष्णने केवल

एकबार ही विपत्तिसे मुक्त किया था, किन्तु मुझे बारम्बार विपत्तियोंसे मुक्त किया है। देवकीको बहुत शोक हुआ था, किन्तु मुझे उतना शोक नहीं हुआ था; अर्थात् श्रीदेवकीके पुत्रोंकी रक्षा नहीं हुई, किन्तु मेरे सभी पुत्र सुरक्षित हैं। श्रीदेवकी सनाथ होने पर भी बहुत देरसे मुक्त हुई थीं और मैं अनाथ होनेके कारण शीघ्रतासे अपने पुत्रों सहित मुक्त हुई हूँ। वे विपत्तियाँ कैसी हैं? भीमको विष मिश्रित लड्डू खिलाना, लक्षागृहमें जलना, हिडिम्बा जैसे राक्षसोंके चंगुलमें पड़ना, दुष्टोंकी सभामें जुआ खेलना आदि। इन समस्त विपत्तियोंमें हमारी रक्षा करनेके कारण मुझे ऐसी आशा थी कि श्रीकृष्णने मेरे प्रति अपनी पूर्ण कृपाका प्रकाश किया है और भविष्यमें भी ऐसा ही करेंगे॥८३॥

स चाधुनात्मनोऽन्येषामपि गेहेषु सर्वतः।
स्त्रीणां निहतबन्धूनां महारोदनसंश्रुतेः।
मनस्यपि पदं जातु न प्राप्नोति कियन्मम॥८४॥

श्लोकानुवाद—उनकी उस विशेष कृपाको पानेकी आशा तो दूर रहे, मेरे प्रति श्रीकृष्णकी किञ्चित् मात्र भी कृपा है—अब मैं ऐसा सोच भी नहीं सकती हूँ, क्योंकि इस समय बन्धु-बान्धवोंके मर जानेके कारण अपने और दूसरोंके घरोंसे केवल हाहाकारकी ध्वनि अर्थात् स्त्रियोंके रोनेकी आवाज ही सुनाई पड़ती है॥८४॥

दिग्दर्शिनी टीका—अकृपामाह—स चेति सार्द्धेन; स कृपाविशेषश्चाधुना मम मनस्यपि अस्तु, तावद्वाक्-स्वीकारादौ कियत् स्वल्पमपि पदं न प्राप्नोतीत्यन्वयः। तत्र हेतुः—आत्मन इत्यादि॥८४॥

भावानुवाद—अब 'स चेति' इत्यादि डेढ़ श्लोकमें श्रीकुन्तीदेवी श्रीकृष्णकी उपेक्षाका लक्षण बता रही हैं। श्रीकृष्णकी विशेष कृपाको पानेकी आशा तो दूर रहे, मेरे प्रति उनकी किञ्चित् मात्र भी कृपा है—इसको अब मैं न तो वाक्यों द्वारा स्वीकार कर सकती हूँ और न ही मनमें ऐसा सोच भी सकती हूँ। इसका कारण है कि अभी चारों ओर केवल हाहाकारकी ध्वनि अर्थात् युद्धमें बन्धु-बान्धवोंके मर जानेसे स्त्रियोंका महाविलाप और रोनेकी आवाज ही सुनाई दे रही है॥८४॥

अतस्तद्दर्शनत्यक्ताः सम्पदः परिहृत्य वै।
आपदः प्रार्थितास्तस्मिन्मया तद्दर्शनापिकाः॥८५॥

श्लोकानुवाद—अतएव मैं उनके दर्शनोंसे वञ्चित हो गयी हूँ, इसलिए उनके दर्शनसे रहित सम्पत्ति (सुखों)की कामनाको त्यागकर मैंने केवल उनके दर्शनोंको प्राप्त करानेवाली विपत्तियोंकी प्रार्थना की थी॥८५॥

दिग्दर्शिनी टीका—न चैवं राज्य-सम्पत्प्राप्त्यास्माकं किञ्चित् सुखं स्यादिति मन्तव्यम् तत्सन्दर्शनाभावादित्यभिप्रेत्याह—अत इति। यस्मात् सम्पत्सु दुःखम् अस्मादेव हेतोरित्यर्थः। वै स्मरणे प्रसिद्धौ वा; तस्मिन् श्रीकृष्णे, यतस्तस्य कृष्णस्य दर्शनमापयन्ति लम्भयन्तीति तथा ताः। तदुक्तं तथा तत्रैव, *'विपदः सन्तु ताः शश्वत्तत्र तत्र जगद्गुरो। भवतो दर्शनं यत् स्यादपुनर्भवदर्शनम्॥'* (श्रीमद्भा॰ १/८/२५) इति। अस्यार्थः—यत् यासु आपत्सु न पुनर्भवस्य संसारदुःखस्य दर्शनं यस्मात्तत्, यद्वा, अपुर्नभवं मोक्षं दर्शयति तुच्छतया ज्ञापयतीति तथा तत्। महतोऽपि सरसो महासमुद्र इव मोक्षसुखस्यापि भगवद्दर्शनानन्दस्तुच्छतां दर्शयतीति न्यायात्॥८५॥

भावानुवाद—मैं समझ गयी हूँ कि राज्य-सम्पत्तिकी प्राप्तिमें कुछ भी सुख नहीं है, क्योंकि इसी सम्पत्तिके कारण ही हम श्रीकृष्णके दर्शनोंसे वञ्चित हो गये हैं। इसी अभिप्रायसे 'अत' इत्यादि पद कहे गये हैं। अतएव मैंने उनके दर्शन रहित सम्पत्तिकी कामनाको परित्यागकर केवल उनके दर्शन प्राप्त करानेवाली विपत्तियोंकी प्रार्थना की थी। यथा, श्रीमद्भागवतमें श्रीकुन्तीदेवीके वचन हैं—"हे जगद्गुरो! मैं आपसे प्रार्थना करती हूँ कि हम लोगों पर नित्यप्रति ही विपत्तियाँ आएँ, क्योंकि विपत्तियाँ आने पर ही हमें आपके दर्शन होंगे। आपके दर्शन होने पर जीवको फिर जन्म-मृत्युरूपी यन्त्रणाको भोगना नहीं पड़ता।" तात्पर्य यह है कि आपका दर्शन होनेसे पुनः संसार-दुःख भोगना नहीं पड़ता, अथवा आपका दर्शन होनेसे अपुनर्भव अर्थात् मोक्ष भी अत्यधिक तुच्छ प्रतीत होता है। जैसे, महासागरके दर्शन होने पर सरोवर तुच्छ प्रतीत होता है, उसी प्रकार भगवान्‌के दर्शनसे उत्पन्न आनन्दकी तुलनामें मोक्षका सुख अति तुच्छ प्रतीत होता है॥८५॥

दत्त्वा निष्कण्टकं राज्यं पाण्डवाः सुखिता इति।
मत्वाधुना विहायास्मान् द्वारकायामवस्थितम्॥८६॥

श्लोकानुवाद—'मैंने पाण्डवोंको निष्कण्टक राज्य प्रदान किया है, अतएव वे अत्यन्त सुखपूर्वक वास कर रहे हैं!' यह सोचकर श्रीकृष्ण अब हमें त्यागकर द्वारकापुरीमें विराजमान हो रहे हैं॥८६॥

दिग्दर्शिनी टीका—ननु किमिति शोचसि पुनरसावत्रागतप्रायः, तत्राह—दत्त्वेति सार्धेन। अवस्थितं श्रीकृष्णेन नैश्चल्येन स्थितिः कृता, इदानीमस्मदापद-भावात्॥८६॥

भावानुवाद—यदि कहो कि शोक क्यों कर रही हो? श्रीकृष्णको पुनः यहाँ आया ही समझो। इसके लिए ही कह रहीं हैं कि श्रीकृष्ण हमें निष्कण्टक राज्य प्रदान करके अब निश्चिन्तभावसे द्वारकामें वास कर रहे हैं। इसका कारण है कि अब हम पर किसी प्रकारकी विपत्ति नहीं है॥८६॥

अतोऽत्र तस्यागमनेऽप्याशा मेऽपगता वत।
मन्येऽधुनात्मनः शीघ्रं मरणं तदनुग्रहम्॥८७॥

श्लोकानुवाद—इसलिए अब मैंने उनके यहाँ आनेकी आशा छोड़ दी है। परन्तु अब यदि मेरी शीघ्र ही मृत्यु हो जाए तो उनकी विशेष कृपा समझूँगी॥८७॥

दिग्दर्शिनी टीका—वत कष्टम्; आशाप्यपगता; कुतस्तद्दर्शन प्राप्तिः। अतः इतःपरं जीवनमत्यन्तानुचितमित्याह—मन्य इति। आत्मनो मम शीघ्रं यन्मरणम्, तदेव तस्य श्रीकृष्णस्यानुग्रहं मन्ये, न तु दर्शनादिकमपि, परमोपेक्षणादित्यर्थः॥८७॥

भावानुवाद—हाय! कैसे दुःखकी बात है! इसीलिए उनके दर्शनकी तो बात दूर रहे, मैंने उनके यहाँ आनेकी आशा तक भी छोड़ दी है। अब यदि मेरी शीघ्र ही मृत्यु हो जाए तो उनकी विशेष कृपा समझूँगी। उनकी इतनी उपेक्षा देखकर मैं अब उनके दर्शनकी आशा भी नहीं करती हूँ॥८७॥

बन्धुवत्सल इत्याशातन्तुर्यश्चावलम्ब्यते।
स त्रुट्येद्यदुभिस्तस्य गाढ़सम्बन्धमर्शनात्॥८८॥

श्लोकानुवाद—'श्रीकृष्ण बन्धु-वत्सल हैं', ऐसा सोचकर मैंने जिस आशाका सहारा लिया था, अब उनके यादवोंके साथ प्रगाढ़ सम्बन्धको देखकर वह आशा भी टूट गयी है॥८८॥

दिग्दर्शिनी टीका—आशापगमहेतुत्वेनैवात्मनः सकाशाद् यादवानां भगवत्कृपा-विशेषपात्रतां युधिष्ठिरवद् वदन्नुपसंहरति—बन्धिवति द्वाभ्याम्। बन्धुषु बान्धवेषु वत्सलः परमस्निग्ध इत्यनेन य आशातन्तुः सः त्रुट्येत छिद्येत। कुतः? तस्य कृष्णस्य यदुभिः सह दृढ़स्तत्कुलजातत्वादच्छेद्यो यः सम्बन्धः पुत्रत्वभातृत्वादि-रूपस्तस्य; यद्वा; दृढ़ः परस्परं प्रीतिविशेषेण दुर्भेद्यो यः सेव्यसेवकतादिलक्षणः सम्बन्धस्तस्य दर्शनाद् विचारणात्, गुरुतर-सम्बन्धिनामपेक्षया लघुतर-सम्बन्धिना-मुपेक्षा सम्भवेदेवेति भावः॥८८॥

दिग्दर्शिनी टीका—किं तदाह—अहो इति द्वाभ्याम्। एतानि भूषणादीन्येवाभीप्सन्ति प्राप्तमिच्छन्तीत्येवम्भूता वयं ज्ञाताः, एष तद्दानरूपो यः प्रसादोऽनुग्रहस्तस्यैव योग्याश्च ज्ञाताः; अन्यथैतत् प्रेषणानुपपत्तेः। सम्प्रतीत्यस्य पूर्वेण परेणापि यथेष्टमन्वयः। पूर्वमेवं नासीदधुनैव जातमहो दौर्भाग्यमित्यर्थः ॥८२॥

भावानुवाद—उस समय उन्होंने परस्पर क्या कहा था? इसे 'अहो' इत्यादि दो श्लोकों द्वारा बतला रहे हैं। अहो! कितने दुःखकी बात है! श्रीकृष्णने यही समझा है कि अब हम इन्हीं सब अलङ्कार आदि वस्तुओंको चाहते हैं तथा हम ऐसे ही प्रसाद (कृपा)के योग्य हैं, अन्यथा वे इन सब अलङ्कार आदि वस्तुओंको क्यों भेजते? किन्तु

इससे पहले श्रीकृष्ण हमें ऐसे प्रसाद (कृपा)के योग्य नहीं समझते थे, परन्तु अब हमें इसके ही योग्य समझ रहे हैं। अतएव अब ऐसा कहना होगा कि हमारा दुर्भाग्य उदित हो गया है॥८२॥

तदस्मज्जीवनं धिक् धिक् तिष्ठेत् कण्ठेऽधुनापि यत्।
नन्दगोपांश्च धिक् धिक् ये तं त्यक्त्वैतान्युपानयन्॥८३॥

श्लोकानुवाद—अतः हमारे जीवनको धिक्कार है! धिक्कार है! हमारे प्राण अभी तक निकले नहीं हैं, कण्ठमें ही अटक रहे हैं, उनको भी धिक्कार है! जो श्रीकृष्णको मथुरामें छोड़कर इन सब वस्त्र-भूषण आदिको उपहारमें लाये हैं, उन नन्द आदि गोपोंको भी धिक्कार है! धिक्कार है!॥८३॥

दिग्दर्शिनी टीका—तत्तस्मात् अस्माकं जीवनं धिग्धिक् परमनिन्द्यमित्यर्थः। यत् जीवनमधुनापि कण्ठे तिष्ठेत्; कण्ठ इत्यनेन केवलं कण्ठगत्-प्राणतयैव जीवन्तीत्यर्थः। ये गोपा इति कथञ्चिदपि नन्देन स्वपुत्रस्य तस्य त्यागासम्भवमनेन गौरवेण वा; यद्वा, ये नन्दादयः, तं कृष्णं, एतानि भूषणादीनि उपानयन् अस्माकमुपानयनरूपेणानीतवन्तः॥८३॥

भावानुवाद—अतएव हमारे जीवनको धिक्कार है, धिक्कार है अर्थात् हमारा जीवन परम निन्दनीय है। (श्रीकृष्णके बिना) हमारे जो प्राण अभी तक निकले नहीं, कण्ठमें ही अटक रहे हैं, उन्हीं कण्ठमें अटके प्राणोंसे ही हम अभी तक किसी प्रकारसे जीवित हैं। और जो श्रीकृष्णको मथुरामें ही त्यागकर इन सब अलङ्कार आदिको लाये हैं, उन नन्दादि गोपोंको भी धिक्कार है। किन्तु यहाँ पर सामान्यरूपसे श्रीनन्दको लक्ष्य किया गया है, क्योंकि श्रीनन्दमहाराज अपने पुत्रको त्यागकर इन अलङ्कारोंको लायेंगे, ऐसा असम्भव था। अतएव उक्त वचनमें श्रीनन्दमहाराजके प्रति गौरव वशतः 'वे नन्द आदि गोप' कहा गया है। अथवा जो गोप श्रीकृष्णको त्यागकर ये सब उपहार लाये हैं, उन गोपको धिक्कार है॥८३॥

ततस्त्वद्गमनाशाञ्च हित्वा सह यशोदया।
मृतप्राया भवन्मात्रारेभिरेऽनशनं महत्॥८४॥

श्लोकानुवाद—आपकी माता श्रीयशोदाके साथ सभी व्रजवासियोंने आपके व्रजमें लौटनेकी आशाका परित्यागकर मृततुल्य होकर महा–अनशन व्रत धारण कर लिया है॥८४॥

दिग्दर्शिनी टीका—ततस्तस्मादेवोक्ताद्धेतोस्तव व्रजगमनाशामपि त्यक्त्वा मृततुल्याः सन्तः भवन्मात्रा श्रीयशोदया सह महत् जल वर्जनादिना मरणपर्यवसायि अनशनमारेभिरे एवं त्वां विना त्वत् प्रसादद्रव्येष्वपि तेषामभीप्सा नास्तीति भावः॥८४॥

भावानुवाद—इसी कारण व्रजवासियोंने आपकी माता श्रीयशोदा सहित आपके व्रज आनेकी आशाको त्याग करके मृतप्राय होकर महा–अनशन व्रत अर्थात् मृत्यु तक जल त्यागादि रूप व्रत आरम्भ किया है। इस प्रकार वे व्रजवासी आपके अलावा आपकी किसी भी वस्तुकी अभिलाषा नहीं करते हैं॥८४॥

कृतापराधवन्नन्दो वक्तुं किञ्चिद्दिनत्रयम्।
अशक्तोऽत्यन्तशोकार्त्तो व्रजप्राणानवन् गतान्॥८५॥
भवतस्तत्र यानोक्तिं ग्राहयन् शपथोत्करैः।
दर्शयन् युक्तिचातुर्यममूनेवमसान्त्वयत्॥८६॥

श्लोकानुवाद—श्रीनन्द महाराज अपनेको अपराधी समझकर तीन दिन तक कुछ भी बोल नहीं पाये। फिर शोकके कारण विह्वल व्रजवासियोंके प्राणोंको निकलता देखकर उनकी रक्षाके लिए अनेक प्रकारकी सौगन्ध खाकर 'कृष्ण व्रजमें आयेंगे' उनको ऐसा विश्वास दिलाया है तथा अनेक प्रकारकी युक्ति–चातुरीके द्वारा उन्होंने किसी प्रकार उनको सान्त्वना दी है॥८५–८६॥

दिग्दर्शिनी टीका—तर्हि किञ्चिदनिष्टं तत्र न वृत्तमिति व्यग्रचित्तं भगवन्त–माश्वासयन् आह—कृतेति द्वाभ्याम्। कृतापराध इव दिनत्रयं यावत् किञ्चिद्वक्तुमशक्तो नन्दः पश्चाद्गतान् गतप्रायान् व्रजजनप्राणान् अवन् अवितुं भवतस्तत्र व्रजे यानं गमनं, तस्मिन् या उक्तिः *'ज्ञातीन वो द्रष्टुमेष्यामो विधाय सुहृदां सुखम्।'* (श्रीमद्भा॰ १०/४५/२३) इत्यादिरूपा तां शपथसमूहैरमून् व्रजवासिजनान् ग्राहयन्, एवं वक्ष्यमाण–प्रकारेणासान्त्वयदित्यन्वयः। अत्यन्तेन शोकेनार्त्तोऽपि भवद्विच्छेदेन भवत्प्रियजनानां दृढ़मुमूर्षादिना च, युक्तीनां चातुर्यं कौशलं दर्शयन् उत्तमा युक्तीर्बोधयन्नित्यर्थः; यद्वा, युक्तिषु यदात्मनश्चातुर्यं नैपुण्यं तत् प्रकाशयन्॥८५–८६॥

भावानुवाद—फिर भी कुछ अनिष्ट नहीं हुआ, ऐसा कहकर श्रीउद्धव व्यग्रचित्त भगवान् श्रीकृष्णको आश्वासन देनेके लिए 'कृत' इत्यादि दो श्लोक कह रहे हैं। गोपराज श्रीनन्द व्रजमें लौटकर अपनेको अपराधी समझकर तीन दिन तक कुछ भी बोल नहीं पाये। किन्तु मृत्युकी ओर अग्रसर और अत्यन्त शोकग्रस्त व्रजवासियोंके कण्ठ तक आये प्राणोंकी रक्षाके लिए आपके व्रजमें आनेकी आशाको प्रकाश करनेवाली उक्तियोंको उद्धृत कर कि 'हम यहाँके आत्मीय स्वजनोंका सुख विधानकर बहुत शीघ्र ही स्नेहसे दुःखी ज्ञातियोंके साथ आपसे मिलने व्रज आयेंगे' इत्यादि प्रकारसे अनेक सौगन्ध खाकर श्रीनन्द महाराजने आपके व्रज आनेके विषयमें उनको विश्वास दिलाया है। यद्यपि इस प्रकार आपके सभी प्रियजन आपके विच्छेदसे अत्यन्त शोकार्त्त हैं, तथापि आगे कही जानेवाली युक्ति-चातुरीसे गोपराज श्रीनन्दने उनको सान्त्वना प्रदान की है॥८५-८६॥

श्रीनन्द उवाच—

द्रव्याण्यादौ प्रेमचिह्नानि पुत्र एतान्यत्र प्राहिणोत् सत्यवाक्यः।
शीघ्रं पश्चादागमिष्यत्यवश्यं तत्रत्यं स्वप्रस्तुतार्थं समाप्य॥८७॥

श्लोकानुवाद—महाराज श्रीनन्दने कहा—मेरा पुत्र कृष्ण सत्यवादी है, व्रजमें आनेसे पहले ही उसने प्रेमके चिह्नके रूपमें इन वस्तुओंको भेजा है। वहाँका आवश्यक कार्य शीघ्र समाप्त करके वह अवश्य ही व्रजमें आयेगा॥८७॥

दिग्दर्शिनी टीका—प्रेम्णश्चिह्नानि बोधकानि, एतेन प्रेम्णैव प्राहिणोन्न तु युस्मदभीप्साज्ञानेन प्रसादरूपत्वादिनेति भावः। पुत्रः श्रीकृष्णः, एतच्च स्वहृदयाभ्यासेन वसुदेवादिसम्बन्धदाढ्य-निवारणाभिप्रायेण वा; पश्चादत्रावश्यं शीघ्रमागमिष्यति। कुतः? सत्यं वाक्यं यस्य सः। तर्हि कथमधुना नायातः? कदा वा सम्यग मिष्यतीत्य-पेक्षायामाह—स्वस्य स्वानां वा भक्तानां प्रस्तुतं सम्प्रतिप्राप्तमर्थं जरासन्धनिरसनादि-प्रयोजनं तत्रत्यं मथुरावास-सम्बन्धिनमेव न त्वन्यत्रत्यं समाप्य॥८७॥

भावानुवाद—प्रेमके चिह्न अर्थात् प्रेमके बोधक स्वरूप इन वस्तुओंके द्वारा मानो उसने अपने प्रेमको ही भेजा है, तुम्हारी वाञ्छनीय वस्तु समझकर नहीं भेजा है, अतएव इनको उसका प्रसाद स्वरूप समझो।

मेरे पुत्रने व्रजमें आनेसे पहले प्रेम-चिह्न स्वरूप इन सभी वस्तुओंको भेजा है तथा बादमें वह स्वयं शीघ्र ही व्रजमें अवश्य आयेगा, क्योंकि मेरा पुत्र सत्यवादी है। यहाँ पर श्रीनन्द महाराज द्वारा 'पुत्र' शब्दका प्रयोग श्रीकृष्णके प्रति अपने स्वाभाविक पुत्र भावके कारण अथवा श्रीवसुदेव आदिके पितृ-सम्बन्धका दृढ़तापूर्वक खण्डन करनेके अभिप्रायसे किया गया है। यदि कहो कि तो फिर अभी तक क्यों नहीं आया है, अथवा कब आयेगा? इस प्रश्नकी आशासे कह रहे हैं कि अभी मथुरामें सम्बन्धियों या भक्तोंका जो प्रयोजन है, अर्थात् जरासन्ध आदिको नाशकर वह शीघ्र ही आ जायेगा। परन्तु जरासन्ध आदिको दण्ड देना तो मथुराके सम्बन्धियोंका प्रयोजन है, व्रजवासियोंका प्रयोजन नहीं है॥८७॥

श्रुत्वा ते तत्र विश्वस्य सर्वे सरलमानसाः।
भवत्प्रीतिं समालोच्यालङ्करान् दधुरात्मसु॥८८॥

श्लोकानुवाद—श्रीउद्धवने कहा—सरलचित्तवाले व्रजवासियोंने श्रीनन्दकी बात पर विश्वास कर लिया तथा आपकी प्रीतिकी बातको विचार करके उन्होंने उन आभूषणोंको भी अपने अङ्गमें धारण कर लिया॥८८॥

दिग्दर्शिनी टीका—तत्र तस्मिन् श्रीनन्दवचने विश्वस्य प्रतीतिं कृत्वा; यतः सरलं कौटिल्यहीनं मानसं येषां ते; निजहृदयानुसारेण सर्वेष्वपि तेषां तथा प्रतीतेः। भगवत्प्रीतिं समालोच्येति—एतदलङ्कारधारणेन कृष्णस्य हर्षो भविष्यतीति पर्यालोच्येत्यर्थः। आत्मसु देहेषु दधुरेव, न त्वन्तर्हृदि सुखं प्रापुरित्यर्थः॥८८॥

भावानुवाद—उन व्रजवासियोंने महाराज श्रीनन्दके वचनों पर विश्वास कर लिया, क्योंकि वे कुटिल न होकर सरल स्वभावके हैं। अर्थात् सरल स्वभाववाले व्रजवासी अपने समान ही सभीको सरल समझते हैं। फिर श्रीकृष्णकी प्रीतिकी बातको विचार करके अर्थात् इन सब आभूषणोंको धारण करनेसे श्रीकृष्ण सुखी होंगे, इसलिए उन्होंने अलङ्कारोंको अपने अंगों पर धारण तो किया, किन्तु हृदयमें उनको सुख प्राप्त नहीं हुआ॥८८॥

श्रीकृष्णोऽत्र समागत्य प्रसादद्रव्यसंग्रहात्।
वीक्ष्याज्ञापालकानस्मान्नितरां कृपयिष्यति॥८९॥

श्लोकानुवाद—उनको यह विश्वास था कि जब श्रीकृष्ण व्रजमें आयेंगे, तब हमलोगोंको अपने द्वारा भेजे गये वस्त्र-भूषणादिको धारण किये हुए देखकर अपना आज्ञाकारी मानेंगे तथा हम पर अधिक कृपा करेंगे॥८९॥

दिग्दर्शिनी टीका—तदभिप्रायमेव विवृणोति—श्रीकृष्ण इति। तदीयप्रसादरूपाणां द्रव्याणामेतेषामलंकारादीनां संग्रहात् परिग्रहेण अस्मान् स्वस्याज्ञापालकान् वीक्ष्य आलोच्य नितरां पूर्वतोऽप्याधिक्येनानुग्रहिष्यति। महाशोकार्त्तिसमयेऽपि निजाज्ञापालनेन हृष्टव्यवहारात्॥८९॥

भावानुवाद—अब सरल व्रजवासियों द्वारा वस्त्र-भूषणादि धारण करनेका अभिप्राय वर्णन कर रहे हैं। व्रजवासियोंकी धारणा यह थी कि श्रीकृष्ण व्रजमें आकर उन लोगोंको अपने द्वारा भेजे गये अलङ्कार आदिको धारण किया हुआ देखकर उन्हें अपना आज्ञाकारी जानकर पहलेकी तुलनामें अधिक कृपा करेंगे। विशेषतः वैसे शोकके समयमें भी श्रीकृष्णकी आज्ञाके पालनसे वे हम व्रजवासियों पर अधिक कृपा करेंगे॥८९॥

भवान् स्वयमगत्वा तु यं सन्देशं समर्प्य माम्।
प्राहिणोत्तेन ते सर्वे बभूवुर्निहता इव॥९०॥

श्लोकानुवाद—किन्तु आपने स्वयं वहाँ न जाकर मेरे द्वारा संदेश भेजा, इसलिए वे सब व्रजवासी मृतप्राय हो गये हैं॥९०॥

दिग्दर्शिनी टीका—तेषामीदृशो व्यवहारः, भवतश्चान्यादृश एवेत्याह—भवानिति। सन्देशं अन्तर्यामीत्वेन सर्वत्रैवाहं वर्त्त इति ज्ञानदृष्टया तत्र तत्र मां पश्यतेत्यादिरूपं वाचिकम्। तथा च दशमस्कन्धे (श्रीमद्भा॰ १०/४७/२९) *'भवतीनां वियोगो मे न हि सर्वात्मना क्वचित्। यथा भूतानि भूतेषु खं वाय्वग्निजलं मही। तथा चाहं मनःप्राणबुद्धीन्द्रियगुणाश्रयः॥'* इत्यादि। अस्यार्थः—भवतीनां मे मया सह वियोगो नास्ति। कुतः? सर्वात्मना सर्वस्योपादानकारणेन; अतएव सर्वेषु मनादिषु कार्येषु अहमनुगतत्वेन स्थित इति सदृष्टान्तमाह—यथेति। भूतेषु चराचरेषु, भूतानि महाभूतानि; यथा वाय्वग्निः वायुश्चाग्निश्च तथाहञ्च मन-आदीनां कार्याणां गुणानां

च कारणानामाश्रयत्वेनानुगत इति। तेन सन्देशेन हता मारिता इव बभूवुः, पुनर्व्रजे भवद्गमनाशानिरसनात्। इवेत्यनेन प्राणावशेषमात्रता तेषां बोध्यते॥९०॥

भावानुवाद—उन व्रजवासियोंका ऐसा व्यवहार और दूसरी ओर आपका विपरीत व्यवहार—इसे कहनेके लिए 'भवान्' इत्यादि श्लोकको अवतारणा की गयी है। मेरे द्वारा भेजा गया आपका सन्देश, 'मैं अन्तर्यामी होनेके कारण सर्वत्र विराजमान हूँ, तुम सभी अपनी-अपनी ज्ञान दृष्टिके द्वारा सभी स्थानों पर मेरा दर्शन करो।'—इस प्रकारका वाचिक सम्वाद था। यथा, दशम-स्कन्धमें उक्त है—"तुमलोगोंके साथ मेरा कभी भी वियोग नहीं हो सकता, क्योंकि मैं सभीकी आत्मा हूँ। जिस प्रकार पृथ्वी, जल, अग्नि, वायु और आकाश, ये पञ्च महाभूत समस्त प्राणियोंमें अवस्थित हैं, वैसे ही मैं मन, प्राण, बुद्धि, इन्द्रिय और गुणोंका आश्रय हूँ।" तात्पर्य यह है कि तुम्हारे साथ मेरा कभी भी वियोग नहीं हो सकता। कैसे? मैं सभीकी आत्मा हूँ अर्थात् सभीका उपादान कारण हूँ, अतएव मन आदि सभी कार्योंमें अनुगत-रूपसे अवस्थित हूँ। इसके अनुरूप दृष्टान्त यह है कि जैसे चराचर सभी प्राणियोंके कारण स्वरूप पञ्च महाभूत हैं, उसी प्रकार मैं भी मन आदि सभी कार्यों और कारणोंके आश्रय रूपमें ग्रथित हूँ।

आपके इस सन्देशको पाकर सभी व्रजवासी मृतप्राय हो गये हैं अर्थात् इस सन्देशसे आपके व्रजमें आगमनकी रही-सही आशा भी टूट गयी, अतः वे मृतप्राय हो गये हैं। इससे यह सूचित होता है कि अब उनके केवल प्राणमात्र ही बाकी रह गये हैं॥९०॥

तथा दृष्ट्या मया तत्र भवतो गमनं ध्रुवम्।
प्रतिज्ञाय प्रयत्नात्तान् जीवयित्वा समागतम्॥९१॥

श्लोकानुवाद—उनकी वैसी अवस्था देखकर, 'मेरे प्रभु श्रीकृष्ण अवश्य ही व्रजमें आयेंगे'—उनसे यह प्रतिज्ञा करके तथा ऐसी प्रतिज्ञाके द्वारा उन लोगोंको यत्नपूर्वक सचेतन करके मैं यहाँ आया हूँ॥९१॥

दिग्दर्शिनी टीका—तथा तेषां तादृक्त्वं दृष्ट्या साक्षादनुभूय; तत्र व्रजे भवतो गमनं ध्रुवं निश्चितं प्रतिज्ञाय मयावश्यमेव भगवानत्रानेतव्य इति प्रतिज्ञां कृत्वा॥९१॥

भावानुवाद—वहाँ उनकी वैसी दशा देखकर अथवा साक्षात् अनुभवकर 'प्रभु श्रीकृष्ण निश्चितरूपसे व्रजमें आयेंगे' (अर्थात् मैं अवश्य ही उन्हें लेकर आऊँगा)—ऐसी प्रतिज्ञा करके मैं यहाँ आया हूँ॥९१॥

त्वत्प्राप्तयेऽथ संन्यस्तसमस्तविषयाश्रयाः।
प्रापुर्यादृगवस्थां ते तां पृच्छैतं निजाग्रजम्॥९२॥

श्लोकानुवाद—वे व्रजवासी आपको पानेके लिए समस्त भोग्य पदार्थोंका त्याग करके जिस दशामें हैं, उसको अपने ज्येष्ठ भ्राता श्रीबलदेवजीसे ही पूछिए॥९२॥

दिग्दर्शिनी टीका—तथापि भवता स्वयं तत्र न गतम्; निजाग्रजो बलदेव एव प्रेषितः। ततश्च यादृशी तेषामवस्था जाता सा मया वर्णयितुं न शक्यते, परमशोकदुःखभरापादकत्वादित्याशयेनाह—त्वदिति। अथ मदागमनानन्तरं सम्यक् न्यस्ताः परित्यक्ताः समस्तविषयाश्रया निखिलविषयभोगाः यद्वा, समस्ता विषया इन्द्रियभोग्यानि आश्रयाश्च गृहाः कृष्णक्रीड़ास्थानदर्शनादिना सदा वनान्तरवस्थानात् यैः। तथा च दशमस्कन्धे (श्रीमद्भा॰ १०/६५/६) श्रीबलरामगोकुल यात्रा प्रसङ्गे—*'कृष्णे कमलपत्राक्षे संन्यस्ताखिलराधसः'* इति। अस्यार्थः—कृष्णप्राप्यर्थं त्यक्त सर्वविषया इति। पूर्वं चोद्धवेन गत्वैतादृशावस्थाभाजः श्रीराधिकादयो न दृष्टाः; किन्तु भूषणभूषिताङ्गा हृष्टा इव दृष्टाः, श्रीनन्दकृताश्वासन विश्वासात्। अतएव दशमस्कन्धे (श्रीमद्भा॰ १०/४६/४५-४६) श्रीमदुद्धवयाने—*'ता दीपदीप्तैर्मणिभिर्विरेजू, रज्जूर्विकर्षद् भुजकङ्कणस्रजः। चलन्नितम्बस्तनहारकुण्डलत्विषत् कपोलारुणकुंकुमाननाः॥ उद्गायतीनामरविन्दलोचनं, व्रजाङ्गनानां दिवमस्पृशद्ध्वनिः। दध्नश्च निर्मन्थनशब्दमिश्रितो, निरस्यते येन दिशाममङ्गलम्॥'* इति, अन्यथा तादृशशोकसमये तासामेतादृक्त्वासम्भवात्। इदानीं चोद्धवसन्देशेनाशाच्छेदात् पूर्वतोऽप्यधिकदुखस्थायुक्तैवेति दिक्। निजाग्रजमेतं साक्षाद्वर्त्तमानं तामवस्थां पृच्छति, तेन तत्र गत्वा साक्षादनुभूतत्वात्। यद्वा, मद्वाक्ये तव प्रतीतिर्मा भवतु नाम, निजज्येष्ठवचने च सा युज्यत एवेति भावः॥९२॥

भावानुवाद—फिर भी आपने स्वयं व्रज न जाकर अपने बड़े भाई श्रीबलदेवजीको भेजा। उससे उन व्रजवासियोंकी जो दशा हुई थी, वह अत्यधिक शोकपूर्ण थी, अतः मैं उसका वर्णन करनेमें असमर्थ हूँ। उसके विषयमें आप अपने भाई श्रीबलदेवजीसे ही पूछिये। विशेषतः मेरे लौट आनेके पश्चात् वे व्रजवासी आपको पानेकी रही-सही

आशाको छोड़कर मृतप्राय हो गये हैं अर्थात् वे समस्त प्रकारके विषय भोगोंको त्याग करके किसी एक दयनीय अवस्थाको प्राप्त किये हैं। यहाँ पर 'समस्त विषय' कहनेसे इन्द्रियोंकी भोग्य वस्तुएँ और उनके आश्रय स्वरूप घर आदिको भी उन्होंने त्याग दिया है, केवल श्रीकृष्णकी लीला-स्थलियोंके दर्शन आदि द्वारा निरन्तर वनमें ही निवास कर रहे हैं। इसे दशम-स्कन्धमें श्रीबलदेवजीकी गोकुल यात्राके प्रसंगमें कहा गया है—"कमललोचन श्रीकृष्णमें ही उन्होंने समस्त विषयोंका सन्निवेश कर दिया है।" अर्थात् श्रीकृष्णकी प्राप्तिके लिए समस्त विषयोंको त्याग दिया है। किन्तु इससे पहले जब श्रीउद्धव गोकुलमें गये थे, उस समय श्रीराधिका आदि गोपियोंकी ऐसी अवस्था नहीं थी। वे भूषणोंसे विभूषित तथा हृष्ट जैसी ही दिखाई दी थी, क्योंकि श्रीनन्दमहाराज द्वारा दिये गये आश्वासन पर उनका दृढ़ विश्वास हो गया था। अतएव दशम-स्कन्धमें श्रीउद्धवके व्रज आगमनके प्रसंगमें कहा गया है, "निशान्त कालमें गोपियाँ उठकर प्रदीप जलाकर दधि-मन्थन कर रही थीं। उनका मुखमण्डल अरुण-वर्णके कुंकुमसे लिप्त था तथा उनके कपोल कुण्डलकी दीप्तिसे देदीप्यमान हो रहे थे। उनकी काञ्चि (करधनी) पर जड़ित मणियों पर दीपोंकी रोशनी प्रतिबिम्बित होकर उन्हें अत्यधिक दीप्त कर रही थी। वे गोपियाँ कंगन और वलयों द्वारा अलंकृत भुजाओंसे दधि-मन्थन कर रही थीं, जिससे उनके नितम्ब, स्तन, हार आदि हिलडुल रहे थे और उससे उनकी अत्यधिक शोभा हो रही थी। वे सब व्रजाङ्गनाएँ श्रीकृष्णको उद्देश्य करके गान कर रहीं थीं, उनके गीतकी ध्वनि दधि-मन्थनके शब्दसे मिलकर आकाशमें सर्वत्र व्याप्त हो रही थी तथा उस ध्वनिसे सभी दिशाओंका अमंगल नष्ट हो रहा था।" अन्यथा वैसे शोकके समयमें व्रजगोपियोंके सम्बन्धमें ऐसी उक्ति असम्भव है। किन्तु अब मेरे (श्रीउद्धवके) द्वारा भेजे गये संदेशसे उनकी आशाका रहा-सहा सूत्र भी टूट गया। इसलिए वे पहलेसे भी अधिक दुःखी हैं, यह सब आप अपने अग्रज श्रीबलदेवजीसे पूछ लीजिए। वे यहाँ पर साक्षात् विराजमान हैं तथा इन्होंने व्रजमें जाकर साक्षात्‌रूपसे उन व्रजवासियोंकी वैसी दशाको देखा और अनुभव

किया है। अर्थात् यदि आपको मेरी बातों पर विश्वास न हो, तो अपने ज्येष्ठ भ्राताके वचनोंसे तो विश्वास होगा ही—यही तात्पर्य है॥९२॥

श्रीपरीक्षिदुवाच—

तद्विच्छेदमहादुःखाशङ्कया म्लापितानि सः।
देवकीभीष्मजादीनां मुखान्यवनतान्यधः॥९३॥
क्षरदस्राणि सस्नेहं विलोक्य मृदुलाशयः।
मसीकर्परपत्राणि व्यग्रोऽयाचत संज्ञया॥९४॥

श्लोकानुवाद—महाराज श्रीपरीक्षितने कहा—श्रीकृष्णके विच्छेदसे उत्पन्न महादुःखकी आशंकासे श्रीदेवकी और श्रीरुक्मिणी आदिका मुख मलिन हो गया और वे नीचेकी ओर मस्तक झुकाकर अपने नेत्रोंसे अश्रु बहाने लगीं। यह देखकर कोमल हृदयवाले श्रीकृष्णने स्नेहसे व्याकुल होकर, संकेतपूर्वक कुछ लिखनेके लिए स्याही-कागज आदिको मँगवाया॥९३-९४॥

दिग्दर्शिनी टीका—ततः श्रीगोपगोपीजनैकप्रियो भगवान् किमकरोत्तदाह—तदिति चतुर्भिः। स भगवान् श्रीकृष्णो देवक्यादीनां मुखानि सस्नेहं विलोक्य संज्ञया लिखनमुद्रानुकरणसंकेतेनैव मसीकर्परपत्राण्ययाचत प्रार्थयामासेति द्वाभ्यामन्वयः। कथम्भूतानि मुखानि? तस्य भगवतो विच्छेदे यन्महादुःखं तस्याशङ्कया म्लापितानि म्लानिकृतानि, अतएवाधोऽवनतानि क्षरदस्राणि च; संज्ञयैवायाचतेत्यत्र हेतुः—व्यग्र सन्निति। तादृशोद्धवोक्ति-श्रवणात् परमवैयग्र्येण वाचा याचितुमशक्तः केवलं संज्ञयैवायाचतेत्यर्थः। तर्हि कथं सद्य एव व्रजे न गतस्तत्राह—मृदुलः परमकोमलः आशयश्चित्तं यस्येति परदुःखासहिष्णुतया साक्षाद्वर्त्तमानाः परमदीना देवक्याद्याः सद्यस्त्यक्तुमशक्तः इत्यर्थः॥९३-९४॥

भावानुवाद—तदुपरान्त गोप और गोपियोंके परमप्रिय भगवान्ने क्या कहा? इसे 'तद्विच्छेद' इत्यादि चार श्लोकोंके द्वारा बतला रहे हैं। भगवान् श्रीकृष्णने स्नेहपूर्वक श्रीदेवकी आदिके मलिन मुखको देखकर व्याकुलतापूर्वक संकेतसे (लिखनेकी मुद्राका अनुकरण करके) कागज, कलम-दवात आदि लानेके लिए प्रार्थना की। श्रीदेवकी आदिका मुख मलिन क्यों हो गया था? भगवान् श्रीकृष्णके भावी

विच्छेदमें दुःखकी आशंकासे उनका मुख मलिन हो गया था और उनके नेत्रोंसे निरन्तर अश्रुधारा प्रवाहित हो रही थी। संकेतसे कागज, कलम-दवात आदि लानेकी प्रार्थनाका कारण क्या था? व्याकुलता, अर्थात् भगवान् श्रीकृष्ण श्रीउद्धवकी बातोंको सुनकर अत्यधिक व्याकुल हो उठे और इसी कारण वे अपने मनके भावोंको वचनों द्वारा प्रकाश नहीं कर पाये, केवल संकेत द्वारा ही प्रार्थना करने लगे। यदि कहो कि तो फिर उन्होंने शीघ्रतापूर्वक व्रजकी ओर गमन क्यों नहीं किया? इसके लिए कह रहे है कि उनका हृदय कोमल है अर्थात् श्रीकृष्ण दूसरोंके दुःखको सहन नहीं कर पाते हैं, इसलिए साक्षात् उपस्थित दीन-हीन श्रीदेवकी और श्रीरुक्मिणी आदिको शीघ्र छोड़नेमें समर्थ नहीं हुए॥९३-९४॥

प्रस्तुतार्थं समाधायात्रत्यानाश्वास्य बान्धवान्।
एषोऽहमागतप्राय इति जानीत मत्प्रियाः॥९५॥
एवमाश्वासनं प्रेमपत्रं प्रेषयितुं व्रजे।
स्वहस्तेनैव लिखितं तच्च गाढ़प्रतीयते॥९६॥

श्लोकानुवाद—व्रजवासियोंके प्रति प्रगाढ़ प्रीति होनेके कारण श्रीकृष्णने स्वयं अपने करकमलसे ही आश्वासन देनेवाला प्रेम-पत्र व्रजमें भेजनेके लिए लिखा—"प्रिय व्रजवासियों! यहाँ पर आरम्भ किये गये कार्यको समाप्त करके और बन्धुओंको आश्वासन देकर आप मुझे व्रजमें आया ही समझें"॥९५-९६॥

दिग्दर्शिनी टीका—किमर्थं तान्ययाचत इत्याह—प्रस्तुतेति द्वाभ्याम्। व्रजे प्रेमपत्रं प्रेषयितुम्; तच्च पत्रं दृढ़विश्वासार्थं निजश्रीहस्तेनैव लिखितम्। कीदृशम्? हे मत्प्रियाः! व्रजवासिजनाः! एवं सम्बोधनेन प्रीतिभरं बोधयति। प्रस्तुतमुपस्थितं प्रयोजनां समाधाय कथञ्चित् समाधानमात्रं कृत्वा तेन अत्रत्यान् श्रीद्वारकावासिनो यादवादीन् आश्वास्य 'अहमेष आगत इव' इति जानीत प्रतीत। एवमेतत्प्रकारकमाश्वासनं यस्मिन् तत्; यद्वा, एवमुक्तप्रकारेणाश्वासयतीति तथा तत्॥९५-९६॥

भावानुवाद—श्रीकृष्णने किसलिए कागज, कलम, दवात लानेके लिए प्रार्थना की? इसे 'प्रस्तुतार्थं' इत्यादि दो श्लोकोंके द्वारा बतला रहे हैं। व्रजमें प्रेम-पत्र भेजनेके लिए ही उन्होंने कागज, कलम, दवात

लानेके लिए प्रार्थना की। व्रजवासियोंको दृढ़ प्रतीति दिलानेके लिए श्रीकृष्णने स्वयं अपने करकमलके द्वारा उस पत्रको लिखा। पत्रमें क्या लिखा? "हे मेरे प्राणप्रिय व्रजवासियों! (ऐसे सम्बोधन द्वारा उनके प्रति श्रीकृष्णकी अत्यधिक प्रीति सूचित हुई है) आरम्भ किये गये कार्यको संपूर्ण करके और द्वारकावासी यादवोंको आश्वासन देकर मुझे व्रजमें आया ही समझो।" इस प्रकार आश्वासन देनेवाला प्रेम-पत्र लिखा गया, अथवा जिसके द्वारा ऐसा विश्वास हो वैसा प्रेम-पत्र लिखा गया॥९५–९६॥

तस्येहितमभिप्रेत्य प्राप्तोऽत्यन्तार्त्तिमुद्धवः।
व्रजवासिमनोऽभिज्ञोऽब्रवीत् सशपथं रुदन्॥९७॥

श्लोकानुवाद—व्रजमें पत्र भेजनेमात्रको ही श्रीकृष्णका अभिप्राय समझकर श्रीउद्धव अत्यन्त दुःखपूर्वक रोने लगे। वे व्रजवासियोंके मनके भावोंको जानते थे, इसलिए शपथ खाकर इस प्रकार कहने लगे— ॥९७॥

दिग्दर्शिनी टीका—तस्य भगवत ईहितं पत्रप्रस्थापनमात्रम् अभिप्रायेण ज्ञात्वा अत्यन्तामार्त्तिं प्राप्तः सन्, अतएव रुदन् शपथैः सहितं यथा स्यात्तथाब्रवीत्। तादृशोक्तौ हेतुः—व्रजवासिनां मनोऽभिहतो जानातीति तथा सः॥९७॥

भावानुवाद—उस पत्रको भेजनामात्र ही श्रीकृष्णका अभिप्राय समझकर श्रीउद्धव अत्यन्त दुःखित होकर रोने लगे। वे व्रजवासियोंके मनोभावको जानते थे, इसलिए शपथपूर्वक कहने लगे॥९७॥

श्रीमदुद्धव उवाच—

प्रभो सुनिर्णीतमिदं प्रतीहि त्वदीयपादाब्जयुगस्य तत्र।
शुभप्रयाणं न विनास्य जीवेद् व्रजः कथञ्चिन्न च किञ्चिदिच्छेत्॥९८॥

श्लोकानुवाद—श्रीउद्धवने कहा—हे प्रभो! मैंने यह निश्चित किया है कि व्रजमें आपके श्रीचरणकमलोंके पधारे बिना वे व्रजवासी किसी भी प्रकारसे अपने प्राणोंको धारण नहीं कर सकते हैं, क्योंकि वे व्रजवासी आपके अलावा और किसी भी वस्तुकी इच्छा नहीं रखते हैं॥९८॥

दिग्दर्शिनी टीका—अस्य परममधुरमनोहरस्य त्वत्पादाब्जयुगलस्य तत्र व्रजे शुभं मङ्गलरूपं प्रयाणं विना कथञ्चिदन्येन केनापि प्रकारेण प्रेमपत्रादिना व्रजः व्रजवासिजनो न जीवेत्, न च किञ्चित् प्रेमसन्देशपत्रादिकमपीच्छेत्। इदं मया सुनिर्णीतं त्वं प्रतीहि। अस्येत्यनेन अन्तर्यामीरूपतान्यरूपतापि सर्वा निराकृता॥९८॥

भावानुवाद—हे प्रभो! व्रजमें आपके परम मधुर और मनोहर श्रीचरणकमलोंके शुभागमनके बिना अन्य किसी भी प्रकारसे व्रजवासियोंके जीवनकी रक्षा नहीं हो पायेगी। वे आपके प्रेम-सन्देश-पत्र आदि अन्य किसी भी वस्तुकी अभिलाषा नहीं करते हैं। मैंने ऐसा निश्चितरूपसे जान लिया है और आप भी ऐसा ही विश्वास कीजिए। इसके द्वारा श्रीकृष्णके अन्तर्यामी होने और सर्वज्ञ आदि होनेका भी खण्डन हुआ है॥९८॥

श्रीपरीक्षिदुवाच—

कुमतिः कंसमाताह सहासं धुन्वती शिरः।
हुँ हुँ देवकि निर्बुद्धे बुद्धं बुद्धं मयाऽधुना॥९९॥

श्लोकानुवाद—महाराज श्रीपरीक्षितने कहा—ऐसा सुनकर दुष्ट-बुद्धि युक्त कंसकी माता पद्मावती हँसकर सिर हिलाती हुई इस प्रकार कहने लगी, "अरे बुद्धिहीन देवकी! हुँ, हुँ, अब मैं समझ गयी, अच्छी तरहसे समझ गयी"॥९९॥

दिग्दर्शिनी टीका—हासश्चोद्धववाक्यस्य लाघवार्थः; तेन सहितं यथा स्यात्। हूँ हूँमिति निजज्ञानगाम्भीर्यस्य परमदुःखस्य वा बोधनार्थम्। हे निर्बुद्धे! विचारहीने वीप्साबोधदार्ढ्यसूचने॥९९॥

भावानुवाद—श्रीउद्धवकी बातोंको तुच्छ दिखलानेके लिए कंसकी माता पद्मावती सिर हिलाती हुई हँसकर इस प्रकार कहने लगी—हुँ हुँ, अब मैं सब समझ गयी। अपने गंभीर ज्ञान अथवा अत्यधिक दुःखको सूचित करनेके लिए उसने हुँ हुँ किया, अरे निर्बुद्धे! विचारहीन देवकी! दृढ़ता सूचित करनेके लिए यहाँ 'बुद्धं' दो बार प्रयोग हुआ है॥९९॥

चिरं गोरसदानेन यन्त्रितस्योद्धवस्य ते।
साहायात्त्वत्सुतं गोपा नाययित्वा पुनर्वने॥१००॥

भीषणे दुर्गमे दुष्टसत्त्वजुष्टे सकण्टके।
संरक्षयितुमिच्छन्ति धूर्त्ताः पशुगणान्निजान्॥१०१॥

श्लोकानुवाद—उद्धवने अनेक दिनों तक व्रजमें वास किया था और उन धूर्त्त व्रजवासियोंने गोरस दे-देकर इसको अपने वशीभूत कर लिया है। अब वे उद्धवकी सहायतासे तुम्हारे पुत्रको पुनः व्रजमें ले जाकर फिर उसी भयंकर, दुर्गम, हिंसक जीव-जन्तुओंवाले तथा काँटोंसे भरे वनमें उससे अपने पशुओंकी रक्षा करानेकी अभिलाषा कर रहे हैं॥१००-१०१॥

दिग्दर्शिनी टीका—किं तदाह—चिरमिति द्वाभ्याम्। ते श्रीनन्दाद्या गोपा उद्धवस्य साहायेन त्वत्सुतं श्रीकृष्णं पुर्नवने नाययित्वा निजान् पशुगणान् संरक्षयितुमिच्छन्तीति द्वयोरन्वयः। चिरमिति *'उवास कतिचिन्मासान् गोपीनां विनुदन् शुचः।'* (श्रीमद्भा॰ १०/४७/५४) इति दशमस्कन्धोक्तेर्बहुकालं गोकुले निवासात्। गोरसस्तक्रादिस्तस्य दानेन यन्त्रितस्य वशीकृतस्य; नण्विममेव किं नाययन्ति, स्वयं कथं न रक्षन्ति? व्याघ्रादिशङ्कयेत्याह—भीषण इति। दुष्टसत्त्वैर्व्याघ्र-सिंहादिभिः सेविते, यतो धूर्त्ताः तादृशवने परपुत्रेणैव निजपशुगणसंरक्षणकामात्॥१००-१०१॥

भावानुवाद—पद्मावतीने क्या समझा? इसे 'चिरं' इत्यादि दो श्लोकोंके द्वारा बतला रहे हैं। वे श्रीनन्दादि गोप उद्धवकी सहायतासे तुम्हारे पुत्र श्रीकृष्णको पुनः दुर्गम और काँटोंसे भरे वनमें ले जाकर उसके द्वारा अपने पशुओंकी रक्षाकी अभिलाषा कर रहे हैं। "उद्धव कुछ महीनों तक गोकुलमें रहे और श्रीकृष्णकी लीला-कथाओंका गान करके उन गोकुलवासियोंको आनन्दित करते रहे।" इत्यादि दशम-स्कन्धकी उक्तिसे उद्धवके बहुत दिनों तक व्रजमें वास करनेकी बात सुनी जाती है। अतएव व्रजवासियोंने इसको गोदुग्ध और छाछ आदि पान कराकर अपने वशीभूत कर लिया है। वे सिंह-बाघ आदि हिंसक प्राणियोंसे भरे हुए वनमें भयके कारण स्वयं न जाकर अपने पशुओंकी रक्षा नहीं कर पाते। वे अत्यन्त धूर्त्त हैं, अतएव उस दुर्गम वनमें दूसरेके पुत्रके द्वारा अपने पशुओंकी रक्षा करवाना चाहते हैं॥१००-१०१॥

श्रीपरीक्षिदुवाच—

तत् श्रुत्वा कुत्सितं वाक्यमशक्ता सोढुमञ्जसा।
यशोदायाः प्रियसखी राममाताह कोपिता॥१०२॥

श्लोकानुवाद—महाराज श्रीपरीक्षितने कहा—कंसकी माताके इन घृणित वचनोंको सहन न कर पानेके कारण श्रीयशोदाकी प्रियसखी तथा श्रीबलरामकी माता श्रीरोहिणीदेवी कुपित होकर इस प्रकार कहने लगीं— ॥१०२॥

दिग्दर्शिनी टीका—कुत्सितमिति तादृशप्रेमभरेऽपि तथोक्तेः। अतः कोपिता तद्वाक्येन तयैव वा कोपं कारिता सती॥१०२॥

भावानुवाद—पद्मावतीके ऐसे वचन घृणित हैं, क्योंकि उसकी वैसी (तथाकथित) प्रेमभरी उक्ति होने पर भी उसको सहन न कर पानेके कारण श्रीरोहिणीदेवी कुपित हो गयीं अथवा उसके प्रति क्रोधित होकर कहने लगीं॥१०२॥

श्रीरोहिण्युवाच—

आः कंसमातः किमयं गोरक्षायां नियुज्यते।
क्षणमात्रञ्च तत्रत्यैरदृष्टेऽस्मिन् न जीव्यते॥१०३॥

श्लोकानुवाद—श्रीरोहिणीदेवीने कहा—अरी कंसजननि! क्या व्रजवासी श्रीकृष्णको गौएँ चरानेके कार्यमें नियुक्त कर सकते हैं? वे तो क्षणभर भी इनको देखे बिना जीवन धारण नहीं कर सकते हैं॥१०३॥

दिग्दर्शिनी टीका—आ इति सक्रोधसम्बोधने, कंसमातरिति दुष्टबुद्धियोग्यत्वमुक्तम्; अयं श्रीकृष्णः, तत्रत्यैर्व्रजजनैः किं नियुज्यते? अपि तु नैव। कुतः क्षणमात्रमपि अस्मिन् श्रीकृष्णे अदृष्टे सति जीव्यते जीवितुं न शक्यत इत्यर्थः॥१०३॥

भावानुवाद—अरी! (क्रोधपूर्वक सम्बोधन) कंसजननि! (कंसजननि कहनेका उद्देश्य यह है कि कंस जिस प्रकार दुष्टबुद्धिवाला था, उसकी माता तुम भी उसी प्रकार दुष्टबुद्धिवाली हो) वे व्रजवासी क्या श्रीकृष्णको अपनी गौओंके चरानेमें नियुक्त कर सकते हैं? कदापि नहीं, क्योंकि श्रीकृष्णको एक क्षण भी न देखनेसे उनके प्राण ही नहीं रह सकते हैं॥१०३॥

वृक्षादिभिस्त्वन्तरिते कदाचिदस्मिन् सति स्यात् सहचारिणां भृशम्।
श्रीकृष्णकृष्णेति महाप्लुतस्वरै–राह्वान भङ्ग्याकुलता सरोदना॥१०४॥
व्रजस्थितानान्त्वहरेव काल–रात्रिर्भवेदेकलवो युगञ्च।
रविं रजोवर्त्म च पश्यतां मुहु–र्दशा च काचिन्मुरलीञ्च शृण्वताम्॥१०५॥

श्लोकानुवाद—हे सति! जब कभी श्रीकृष्ण वृक्षोंकी ओटमें चले जानेसे सखाओंके दृष्टिगोचर नहीं होते थे, तब इनके सखा इनको न देखकर, 'हे कृष्ण! हे कृष्ण! तुम कहाँ हो? शीघ्र ही आकर हमें दर्शन दो' इस प्रकार जोर-जोरसे पुकारते हुए बड़े व्याकुल होकर रोदन करते थे। श्रीकृष्णके दर्शनके बिना एक दिन भी व्रजवासियोंके लिए प्रलयकी रात्रिके समान होता और एक लवमात्रका समय भी उनके लिए चतुर्युगके समान प्रतीत होता। श्रीकृष्णके गोचारणसे लौट आनेके समयको जाननेके लिए वे क्षण-क्षणमें सूर्य, गोधूलि और उनके आनेवाले मार्गकी ओर निगाहें लगाये रहते और सन्ध्या कालमें उनकी मुरलीकी मधुर ध्वनि सुनकर प्रेमवशतः उन्माद दशाको प्राप्त हो जाते॥१०४-१०५॥

दिग्दर्शिनी टीका—तदेव प्रपञ्चयति—वृक्षेति द्वाभ्याम्। हे सतीति विपरीतलक्षणया क्रोधेन सम्बोधनम्, द्रुमिलदैत्येन सतीत्वभञ्जनात्। कदाचित् श्रीवृन्दावनादि-शोभा-दर्शनावसरे वृक्षादिभिरस्मिन् श्रीकृष्णेऽन्तरिते आच्छादिते सति सहचारिणां श्रीदामादि-गोपानां रोदनसहिता व्याकुलता स्यात्। कथं? श्रीकृष्णेत्येवं ये महान्तः प्लुतेन उच्चैरुच्चारणेन स्वरास्तैर्या अज्ञानस्य भङ्गी मुद्राविशेषपरम्परा तया; व्रजे स्थितानां जनानां श्रीराधिकादीनान्तु दिनमपि कालरात्रिः प्रलयकालीना रात्रिः। एकलवमात्रः कालो युगं चर्तुयुगं भवेदिति स्वल्पस्यापि बाहुल्यमुक्तम्; पूर्वञ्च सुखहेतोरपि दुःखहेतुत्वमिति विशेषः। तथा च दशमस्कन्धे (श्रीमद्भा॰ १०/३१/१५) गोपिकागीते—'*अटति यद्भवानह्नि काननं, त्रुटिर्युगायते त्वामपश्यताम्*' इति। ततश्च रविं कृष्णागमकालज्ञानार्थं पश्यतां मुहुर्वहिर्भूय निरीक्षमाणानाम्, रजः गोधूलिं कृष्णगमन-लक्षणम्, तथा तस्य वर्त्म च पश्यताम्; अथ विकाले कृष्णस्य मुरलीं तन्नादं शृण्वतां च तेषां काचिद्दशावस्था महाप्रेमसम्पत्त्योन्मत्ततादिमयी भवेत्। एवमयं वने गत्वा गा रक्षत्विवतीदृशीच्छापि तत्रत्येषु कस्यचिदपि न घटत इति भावः॥१०४-१०५॥

भावानुवाद—श्रीकृष्णको देखे बिना व्रजवासी कैसे अधीर हो जाते, उसीका श्रीरोहिणीदेवी 'वृक्ष' इत्यादि दो श्लोकोंमें वर्णन कर रही हैं।

हे सति! (क्रोधपूर्वक उपहास करते हुए सम्बोधन तथा विपरीत लक्षणावृत्तिसे सम्बोधन इसका अर्थ है, 'असती', क्योंकि द्रुमिल दैत्य द्वारा तुम्हारा सतीत्व भंग हुआ है) श्रीकृष्ण यदि कभी श्रीवृन्दावन आदिकी निराली शोभा दर्शन करनेके लिए वृक्षोंकी ओटमें चले जाते, अथवा किसी कारणवशतः दिखाई नहीं पड़ते, तो उनके सखा श्रीदाम आदि ग्वालबाल व्याकुलता सहित रोते–रोते 'हे कृष्ण! तुम कहाँ हो, शीघ्रतापूर्वक आओ,' कहकर भंगिमापूर्वक उच्च स्वरसे उन्हें पुकारते। श्रीकृष्णके अदर्शनमें व्रजकी श्रीमती राधिकाादि गोपरमणियोंके लिए एक दिन भी प्रलयकी रात्रिके समान और एक क्षणकाल भी चतुर्युगके समान बोध होता। अर्थात् श्रीकृष्णके विरहमें उन्हें क्षण भरका समय भी बहुत दीर्घ लगता। पहले जो मिलनमें सुखका कारण होता था, विरहमें वही दुःखका कारण हो जाता। जैसे वसंत ऋतु, कोयलकी कुहू–कुहू ध्वनि, यमुना पुलिन आदि उनके मिलनके समय सुखदायक होते और वही विरहके समय बड़े दुःखदायक हो जाते। अतएव क्षणकालके लिए श्रीकृष्णको न देखकर दुःख होता और उनको देखनेसे ही असीम सुखकी प्राप्ति होती, इसलिए गोपियाँ गृह–कार्यादि सब कुछ छोड़कर श्रीकृष्णके दर्शनके लिए उनके आगमनके पथकी ओर देखती रहती। यथा, दशम–स्कन्धके गोपीगीतमें वर्णन है—"जब तुम दिनके समय वनमें प्रवेश करते हो, तब तुम्हें न देख पानेके कारण व्रजवासियों अथवा गोपियोंको एक त्रुटि अर्थात् पलक झपकने मात्रका काल भी सुदीर्घ युगके समान लगता है और सायंकाल जब अत्यधिक उत्सुकतापूर्वक श्रीकृष्णका मुखकमल दर्शन करती हैं तो पलकोंके गिरने पर उसके निर्माता विधाताको अनभिज्ञ कहकर धिक्कार देती हैं।" पुनः श्रीकृष्णके वनसे लौटनेका समय जाननेके लिए पुनः–पुनः वे सूर्य, गोधूलि और उनके आनेके मार्गकी ओर देखती रहती। यहाँ पर 'गोधूलि' कहनेका अर्थ है, गौओंके खुरोंसे उठनेवाली रज, इसके द्वारा श्रीकृष्णके आनेके लक्षण सूचित होते हैं। सन्ध्या कालमें श्रीकृष्णकी मुरलीकी मधुर ध्वनि सुनकर गोपियाँ महाप्रेमके सारस्वरूप उन्माद दशाको प्राप्त हो जाती। ऐसी गोपियाँ क्या कभी श्रीकृष्णको गौओंकी रक्षा करनेमें नियुक्त करनेकी

अभिलाषा कर सकती हैं? क्या ऐसा सम्भव है? अर्थात् उनमें ऐसी अभिलाषा कभी भी संभव नहीं है॥१०४-१०५॥

अयं हि तत्तद्विपिनेषु कौतुकाद्-विहर्त्तुकामः पशुसङ्घसङ्गतः।
वयस्यवर्गैः सह सर्वतोऽटितुं प्रयाति नित्यं स्वयमग्रजान्वितः॥१०६॥

श्लोकानुवाद—वास्तवमें श्रीकृष्ण स्वयं ही परम रमणीय वृन्दावनमें सर्वत्र भ्रमण और विहार करनेके लिए गोचारणके छलसे अपने भैया बलराम और ग्वालबालोंके साथ नित्यप्रति वनमें जाते थे॥१०६॥

दिग्दर्शिनी टीका—ननु तर्हि कथमयं गास्तत्रारक्षत्तत्राह—अयमिति पञ्चभिः। अयं श्रीकृष्णः तेषु तेषु परमानिर्वचनीयेषु विपिनेषु श्रीवृन्दावनादिषु विहर्तुकामः; अतएव पशुसंघसङ्गतगवादिचारणेन दूरे परितः प्रसर्पनात्, सर्वत्र अटितुं भ्रमितुं वयस्यवर्गैः सह स्वयमेव नित्यं प्रयाति। कौतुकात् परमोत्सुकतया, परमाद्भुतदर्शनतो विस्मयेन वा अग्रजेन श्रीबलरामेण अन्वितः॥१०६॥

भावानुवाद—यदि आपत्ति हो कि श्रीकृष्ण वनमें गौओंकी रक्षा क्यों करते हैं? इसके उत्तरमें 'अयम्' इत्यादि पाँच श्लोक कहे जा रहे हैं। ये श्रीकृष्ण परम अनिर्वचनीय शोभासम्पन्न श्रीवृन्दावनमें विहारकी अभिलाषासे ही जाते हैं। अतएव गौओं आदि पशुओंके चरानेके छलसे वनमें सर्वत्र भ्रमण करनेके लिए वे अपने बड़े भैया श्रीबलदेव और गोपबालकोंके साथ स्वेच्छापूर्वक प्रतिदिन ही वनमें भ्रमण करते हैं तथा परम रमणीय वनोंकी परम अद्भुत शोभाका दर्शन करते हैं॥१०६॥

यत्रातिमत्ताम्बुविहङ्गमाला-कुलीकृताल्यावलीविभ्रमेण।
विचालितानां कमलोत्पलानां सरांसि गन्धैर्विलसज्जलानि॥१०७॥

श्लोकानुवाद—उस वृन्दावनमें अनेक सरोवर हैं तथा उन सरोवरोंका जल उत्पल, कमल आदि पुष्पोंकी सुगन्धसे सुवासित रहता है। वे पुष्प भ्रमरोंकी गुञ्जन तथा मदमत जल-पक्षियोंके विहारसे हिलते-डुलते रहते हैं॥१०७॥

दिग्दर्शिनी टीका—तद्धेतुत्वेन विपिनान्येव वर्णयति—यत्रेति चतुर्भिः। येषु विपिनेषु सरांसि सन्ति; कथम्भूतानि? कमलानामुत्पलानाञ्च गन्धैर्विलसन्ति जलानि

येषाम्। कथम्भूतानाम्? अत्यन्तमत्तानामम्बु विहङ्गानां सारस-चक्रवाकादिजल-पक्षिणां मालाभिः पंक्तिभिराकुलीकृतानामलीनामावल्याः श्रेण्या विभ्रमेण क्रीड़या विचालितानाम्॥१०७॥

भावानुवाद—श्रीवृन्दावनकी शोभा अत्यन्त निराली है, उसीका वर्णन 'यत्रेति' चार श्लोकोंमें किया जा रहा है। उस श्रीवृन्दावनमें सैकड़ों सरोवर हैं। वे कैसे हैं? उन सरोवरोंका जल, कमल और उत्पल आदि पुष्पोंके द्वारा सुशोभित है तथा उन सभी पुष्पोंके सौरभसे सुवासित है। किस प्रकार? अत्यन्त मदमत्त सारस, हंस और चक्रवाक आदि जलचर पक्षियोंके विहारसे तथा चञ्चल भ्रमरोंकी क्रीड़ावशतः हिलते-डुलते कमल आदि पुष्पोंके सुगन्धसे सुवासित है॥१०७॥

तथा महाश्चर्यविचित्रतामयी कलिन्दजा सा व्रजभूमिसङ्गिनी।
तथाविधा विन्ध्यनगादिसम्भवाः पराश्च नद्यो विलसन्ति यत्र च॥१०८॥

श्लोकानुवाद—उन श्रीवृन्दावनकी सखी श्रीयमुना भी चित्तको चमत्कृत कर देनेवाली अद्भुत शोभासे युक्त हैं। यही नहीं बल्कि विन्ध्याचल आदि पर्वतोंसे निकलनेवाली छोटी-छोटी नदियाँ भी इस वृन्दावनकी शोभाको और भी अधिक वर्द्धित करती हैं॥१०८॥

दिग्दर्शिनी टीका—तथेत्युक्तसमुच्चये, तादृशीति वा। वर्णितसरःसदृशी कलिन्दजा श्रीयमुना यत्र विपिनेषु वर्त्तते, विलसतीति वा। वक्ष्यमाणस्य विलसन्तीत्यस्य वचनविपरिणामात्। महाश्चर्याणां पुलिनतटादिविषयकानां चित्तचमत्कारहेतूनां विचित्रता विविधत्वं तन्मयी; सा अनिर्वचनीय-परमशोभावती, यतः व्रजभूमेस्तस्याः सङ्गिनी सम्बन्धवती। येषु च विपिनेषु पराश्च मानसगङ्गाद्या नद्यो विलसन्ति शोभन्ते क्रीड़न्ति वा। कीदृश्यः? तथाविधाः कलिन्दजासदृश्य एव॥१०८॥

भावानुवाद—पूर्वोक्त सरोवरोंके समान कलिन्दनन्दिनी श्रीयमुना भी श्रीवृन्दावनमें विलास करती हैं। श्रीयमुनाके पुलिन आदि चित्तको चमत्कृत कर देनेवाली विचित्रताओंसे युक्त हैं तथा अनिर्वचनीय शोभासम्पन्न हैं, क्योंकि श्रीयमुना व्रजभूमिकी सहेली हैं। उस व्रजभूमिकी शोभाकी वृद्धिके लिए अनेक छोटी-छोटी मानसी-गंगा जैसी नदियाँ भी सुशोभित हो रही हैं तथा वे भी श्रीयमुनाके समान ही शोभायमान हैं॥१०८॥

तत्तत्तटं कोमलबालुकाचितं रम्यं सदा नूतनशाद्वलावृतम्।
स्वाभाविकद्वेषविसर्जनोल्लसन्मनोज्ञनानामृगपक्षिसंकुलम् ॥१०९॥

श्लोकानुवाद—उन नदियोंके दोनों तट स्वच्छ कोमल बालु द्वारा परिपूर्ण हैं तथा नित्य नवीन घासोंसे मण्डित हैं। स्वाभाविक द्वेषसे रहित होनेके कारण सदैव उल्लसित तथा परम मनोहर नाना-प्रकारके मृग तथा पक्षी उन तटों पर विहार करते हैं॥१०९॥

दिग्दर्शिनी टीका—यत्र च तत्तत्परमानिर्वचनीयं तटं सरसां यमुनादिनदीनां च तीरभूमिर्वर्त्तते; यद्वा, तेषां सरसां तासाञ्च कलिन्दजादीनां तटं रम्यं भवति। कोमलाभिर्बालुकाभिराचितमिति दुगर्मत्वं परिहृतम्। रम्यमिति भयानकत्वं, सदेत्यस्य यथेष्टं सर्वत्राप्यनुषङ्गः। नूतनैः शद्वलैः हरित तृणैरावृतमिति गवां पालनदुःखम्, स्वाभाविकः सहजो यो द्वेषः अहिनकुल-मृगव्याघ्रादीनां वैरं तस्य विसर्जनेन त्यागेन उल्लसन्तः उच्चैरधिकं शोभमानाः; यद्वा, अन्योऽन्यं क्रीड़न्तो मनोज्ञा नानाविधा मृगा पक्षिणश्च तै संकूलं व्याप्तमिति। दुष्टसत्त्वजुष्टत्वं च परिहृतम्; एतैर्विहार-सुखकौतुकहेतुत्वञ्च दर्शितम्॥१०९॥

भावानुवाद—श्रीवृन्दावनमें वे सब सरोवर और यमुना आदि नदियाँ तथा परम अनिर्वचनीय उनकी तटभूमि विद्यमान हैं। अथवा उन सभी सरोवरों और कालिन्दीके परम रमणीय तट कोमल बालु द्वारा परिव्याप्त हैं। 'कोमल बालु' पद द्वारा तटभूमिकी दुर्गमता और 'रमणीय' पदसे उनकी भयानकताका खण्डन हुआ है। 'सदा' शब्द आवश्यकताके अनुसार व्यवहृत होगा। अतएव वह तटभूमि सदैव नवीन घासोंसे हरी-भरी रहती है। इस वाक्यके द्वारा गौओंके पालनकार्यमें दुःख भोग करनेका अभाव सूचित हुआ है। स्वाभाविक विद्वेषसे युक्त सर्प-नेवला, मृग-व्याघ्र आदि अपने-अपने स्वभावगत द्वेषको भूलकर उल्लसित होकर उन तटों पर विहार करते हैं, अतः वे तट अत्यधिक सुशोभित हो रहे हैं तथा परम मनोहर नाना-प्रकारके मृगों और पक्षियोंसे परिपूर्ण हैं। इसके द्वारा 'दुष्टसत्त्व-सेवित' वाक्य आदिका भी खण्डन हुआ है। अतः ये सब तटप्रदेश श्रीकृष्णके विहार-सुखके कारण रूपमें भी प्रदर्शित हुए हैं॥१०९॥

दिव्यपुष्प–फल–पल्लवावलीभारनम्रितलता–तरु–गुल्मैः ।
भूषितं मदकलापि–कोकिल–श्रेणिनादितमजस्तुतिपात्रम् ॥११० ॥

श्लोकानुवाद—उन तटों पर गुल्म, लताएँ तथा वृक्ष दिव्य पुष्पों, फलों तथा पल्लवोंके भारसे झुके होनेके कारण तटोंकी शोभा वर्द्धित कर रहे हैं। मदमत्त मयूरों तथा कोकिल आदि पक्षियोंके मधुर कलरवसे वृन्दावन मुखरित हो रहा है। इस प्रकार परम रमणीय होनेके कारण श्रीब्रह्मा आदि देवताओंने भी वृन्दावनकी स्तुति की है॥११०॥

दिग्दर्शिनी टीका—किञ्च दिव्यानां परमाद्भुतानां पुष्पफलपल्लवानामावल्याः श्रेण्या भारेण नमितानि नम्रीकृतानि यानि लतातरुगुल्मानि तैर्भूषितं तटम्, मदयुक्तानां कलापिनां मयूराणां कोकिलानाञ्च श्रेणिभिर्नादितम्, एवम् अजस्य ब्रह्मणोऽपि स्तुतेः पात्रं विषयः। यथोक्तं ब्रह्मणैव दशमस्कन्धे (श्रीमद्भा॰ १०/१४/३४) *'तद्भूरिभाग्यमिह जन्म किमप्यटव्याम्'* इत्यादि॥११०॥

भावानुवाद—श्रीरोहिणीदेवी और भी कह रही हैं—वह तटप्रदेश परम अद्भुत पुष्प–फल–नवपल्लवों आदिके भारसे झुके हुए विविध प्रकारके वृक्ष–लताओं तथा गुल्मों आदि द्वारा सुशोभित हैं। मदमत्त मयूर तथा कोकिल आदि पक्षियोंके कलरवसे मुखरित हैं, इसलिए वह तट–प्रदेश ब्रह्मा आदि देवताओंका भी वन्दनीय है। श्रीब्रह्माने स्वयं ही कहा है कि इस वृन्दावनमें वृक्ष, गुल्म, लता आदि किसी भी योनिमें जन्म ग्रहण करना बड़े सौभाग्यकी बात है॥११०॥

वृन्दारण्ये व्रजभुवि गवां तत्र गोवर्द्धने
वा नास्ते हिंसाहरणरहिते रक्षकस्याप्यपेक्षा।
गावो गत्वोषसि विपिनतस्ता महिष्यादियुक्ताः
स्वैरं भुक्त्वा सजलयवसं सायमायान्ति वासम् ॥१११ ॥

श्लोकानुवाद—श्रीव्रजमण्डलके वृन्दावन और गोवर्द्धनमें हिंसा तथा पशुओंके चोरी होनेकी कोई आशंका नहीं है, अतएव उन स्थानोंमें गौओंकी रक्षा करनेके लिए रक्षकोंकी कोई आवश्यकता ही नहीं है। गाय, भैंस आदि पशु अपने आप ही प्रातःकाल वनमें चले जाते हैं

तथा स्वछन्दरूपसे तृण और जल आदि भक्षण कर सायंकालको अपने-अपने स्थानों पर लौट आते हैं॥१११॥

दिग्दर्शिनी टीका—तथापि गवां रक्षणेन दुःख दुष्परिहरमेव, तत्राह—वृन्देति। व्रजभूवि नन्दीश्वरादौ; यद्वा, व्रजभूव एव विशेषणं वृन्दारण्य इति गोवर्द्धन इति च। तत्र तस्याम्, गवां रक्षकस्याप्यपेक्षा नास्ते। कुतः? हिंस्रव्याघ्रादिभिः हरणञ्च चौरादिभिः ताभ्यां रहिते। कथं तर्हि बुद्धिहीनाः पशवो जीवन्तु नाम? तत्राह—गाव इति। ताः श्रीनन्दव्रजसम्बन्धिन्यः अनिर्वचनीयमाहात्म्या वा गावः ऊषसि प्रातर्वने गत्वा तत्र स्वैरं स्वाच्छन्देन सजलं सरसमित्यर्थः। यद्वा, जलसहितं यवसं घासं भुक्त्वा सन्ध्यायां वनाद्वासं व्रजमायान्ति। आदिशब्देन अजाः; तथा च दशमस्कन्धे (श्रीमद्भा॰ १०/१९/२) *'अजा गावो महिष्यश्च निर्विशन्त्यो वनाद्वनम्'* इति। ततो गोरक्षणदुःखं तत्र नास्त्येवेति भावः॥१११॥

भावानुवाद—तथापि पशुओं आदिकी रक्षामें दुःख होता ही है। 'वृन्देति' श्लोक द्वारा उसका खण्डन करते हुए कह रहे हैं कि नन्दीश्वर आदि व्रजभूमिमें अथवा व्रजभूमिके वृन्दावन और गोवर्द्धनमें गौओं आदिके रक्षणकार्यके लिए रक्षकोंकी कोई आवश्यकता नहीं है। किसलिए? वहाँ व्याघ्र आदि हिंसक जीव-जन्तुओंसे गौओं आदिके प्रति हिंसाकी कोई आशंका अथवा चोरों द्वारा गोधनके अपहरणका कोई भय नहीं है।

यदि प्रश्न हो कि वहाँ पर बुद्धिहीन गौएँ और अन्य पशु किस प्रकार जीवित रहते हैं? इसके उत्तरमें कह रहे हैं कि श्रीनन्दव्रजका माहात्म्य अनिर्वचनीय है, अर्थात् गायें, भैंसें, बकरियाँ आदि पशु अपने आप ही प्रातःकाल वनको चले जाते हैं और स्वच्छन्दरूपमें घास चरकर तथा जल पानकर सायंकाल फिरसे अपने-अपने स्थान पर लौट आते हैं। यथा, दशम-स्कन्धमें कथित है—"बकरी, गायें और भैंसे एक वनसे दूसरे वनमें विचरण करते हुए इच्छानुसार तृण और जल आदि भक्षण कर रहे थे।" अतएव श्रीवृन्दावनमें गायोंकी रक्षा करनेमें कोई दुःख नहीं है॥१११॥

वृद्धोवाच—

अरे बालेऽतिवाचाले तत् कथं ते गवादयः।
अधुना रक्षकाभावान्नष्टा इति निशम्यते॥११२॥

श्लोकानुवाद—कंसकी वृद्धा माताने कहा—अरी वाचाले! तुम बालिका जैसी बातें कर रही हो। यदि वैसा ही होता तो फिर क्यों ऐसा सुना जा रहा है कि अब रक्षकके अभावमें वे सब गाय आदि पशु नष्टप्राय हो गये हैं॥११२॥

दिग्दर्शिनी टीका—तर्त्तहि कथं ते पशवः रक्षकस्यास्य श्रीकृष्णस्याभावाद् विच्छेदादधुना नष्टाः? न चैतन्मिथ्येत्याह—इत्येतत् सर्वत्रैव श्रूयते; अतो रक्षकापेक्षा नास्तीति त्वया यदुक्तं तदसिद्धम्, तत् त्वमज्ञा वाचाला च सत्यमेवासीति भावः॥११२॥

भावानुवाद—यदि व्रजके पशुओंकी रक्षा हो रही है, तब फिर सर्वत्र ऐसा क्यों सुना जा रहा है कि रक्षकके (श्रीकृष्णके) बिना वहाँकी गाय आदि पशु नष्ट हो रहे हैं। अतएव तुम जो कह रही हो कि व्रजवासियोंको अपने पशुओंकी रक्षाके लिए रक्षककी आवश्यकता नहीं है, यह असत्य है। सचमुच तुम वाचाल और बालिकाके समान अल्प बुद्धिवाली हो॥११२॥

श्रीपरीक्षिदुवाच—

श्रीमद्गोपालदेवस्तच्छ्रुत्वा सम्भ्रान्तियन्त्रितः।
जातान्तस्तापतः शुष्यन्मुखाब्जः शङ्कयाकुलः॥११३॥
प्रथमापरकालीनव्रजवृत्तान्तवेदिनः।
मुखमालोकयामास बलदेवस्य साश्रुकम्॥११४॥

श्लोकानुवाद—महाराज श्रीपरीक्षितने कहा—वृद्धाकी बातोंको सुनकर श्रीमद्गोपालदेव अत्यन्त चिन्तित और शंकासे व्याकुल हो गये, फल-स्वरूप उनको अत्यधिक सन्ताप हुआ जिससे उनका मुखकमल सूख गया। तब वे व्रजके पहलेके और वर्त्तमानके सारे वृत्तान्तोंको जाननेवाले श्रीबलरामके अश्रुपूर्ण मुखकमलकी ओर देखने लगे॥११३–११४॥

दिग्दर्शिनी टीका—तद्वृद्धावाक्यं श्रुत्वा संभ्रान्त्या संभ्रमेण यन्त्रितः पीड़ितः सन् बलदेवस्य मुखमालोकयामासेति द्वाभ्यामन्वयः। तत्र हेतुः—प्रथमः मधुपूर्यागमनात् प्राचीनः, अपरश्च ततोऽर्वाचीनो यः कालस्तत्सम्बन्धिनं व्रजस्य वृत्तान्तं वेदितुं शीलमस्येति तथा तस्य। कथम्भूतः? जातो योऽन्तस्तापस्तस्मात् शुष्यन्मुखाब्जं यस्य, शङ्कया प्रियजनापवार्त्ताभीत्या व्याकुलः, साश्रुकं मुखं क्रियाविशेषणं वा॥११३–११४॥

भावानुवाद—वृद्धाकी इन सब बातोंको सुनकर श्रीमद्गोपालदेव अत्यधिक घबड़ाकर श्रीबलदेवके मुखकमलका अवलोकन करने लगे। उसका कारण यह है कि श्रीबलदेवजी व्रजके पहले और अबके सभी वृत्तान्तोंको जानते थे, अर्थात् वे श्रीकृष्णके मथुरा आगमनके पहले और आगमनके बादके व्रजके सम्पूर्ण वृत्तान्तको जानते थे। इस प्रकार श्रीकृष्णके हृदयमें अत्यधिक सन्ताप उत्पन्न होनेसे उनका श्रीमुखमण्डल सूख गया, क्योंकि वे प्रियजनोंके दुःसंवादकी शंकासे व्याकुल हो गये थे। तब वे अश्रुपूर्ण नेत्रोंवाले श्रीबलदेवके मुखकमलका अवलोकन करने लगे॥११३-११४॥

रोहिणीनन्दनो भ्रातुर्भावं बुद्ध्वा स्मरन् व्रजम्।
स्वधैर्यरक्षणाशक्तः प्ररुदन्नब्रवीत् स्फुटम्॥११५॥

श्लोकानुवाद—ऐसा देखकर रोहिणीनन्दन श्रीबलदेव अपने भाईके अभिप्रायको समझ गये तथा व्रजभूमिके स्मरणसे स्वयं धैर्य धारण करनेमें असमर्थ होकर उच्च स्वरसे रोते हुए वहाँके समस्त वृत्तान्तको स्पष्ट वचनों द्वारा कहने लगे॥११५॥

दिग्दर्शिनी टीका—भावमभिप्रायं बुद्ध्वा, तेनैव व्रजं स्मरण् सन् स्वस्य धैर्यरक्षणेऽशक्तः सन् प्रकर्षेण सुस्वरमुच्चैः रुदन् स्फुटं व्यक्तं यथा स्यात्तथाब्रवीत्॥११५॥

भावानुवाद—श्लोकानुवाद द्रष्टव्य है॥११५॥

श्रीबलदेव उवाच—

गवां केव कथा कृष्ण ते तेऽपि भवतः प्रियाः।
मृगा विहङ्गा भाण्डीरकदम्बाद्याश्च पादपाः॥११६॥
लतानि कुञ्जपुञ्जानि शाद्वलान्यपि जीवनम्।
भवत्येवार्पयामासुः क्षीणाश्च सरितोऽद्रयः॥११७॥

श्लोकानुवाद—श्रीबलदेवने कहा—हे कृष्ण! गौओंका तो कहना ही क्या, तुम्हारे प्रिय मृग, विहंग, भाण्डीरवनके कदम्ब आदि वृक्ष, लताएँ, कुञ्ज, तृण-मण्डित हरे-भरे मैदान आदि सभीने तुम पर अपना जीवन न्योछावर कर दिया है। सरोवर शुष्क हो गये हैं तथा पर्वत आदि भी दिन-प्रतिदिन क्षीण होते जा रहे हैं॥११६-११७॥

दिग्दर्शिनी टीका—गवामित्यनेन महिष्यादयोऽप्युलक्ष्यन्ते, ग्राम्यपशुषु गवां प्राधान्यात्। इवेति लोकोक्तौ, का कथा, का वार्त्ता कथनीयेत्यर्थः। यदारण्यमृगादीनां मरणमभूत्, तदा त्वत्कृतपालनैकजीवनानां गवादीनां मरणं किं चित्रमित्येवं कैमुतिकन्यायावतारो वितर्क्यः। मृगाः कृष्णसारादयः, विहङ्गा मयूरादयः। सरितो यमुनाद्याः, अद्रयश्च गोवर्द्धनाद्याः, क्षीणाः कृशतां प्राप्ताः॥११६-११७॥

भावानुवाद—'गवां' शब्दके उपलक्षणसे भैंस आदि समस्त पशुओंको समझना चाहिए। गाँवके सभी पशुओंमें गाय प्रधान है, इसलिए मुख्य भावसे 'गवादि' शब्द प्रयोग हुआ है। हे कृष्ण! गायोंकी बात क्या कहूँ? जंगलमें विचरण करनेवाले हिरनोंने ही जब अपना जीवन न्योछावर कर दिया है, तब तुम्हारे द्वारा पालित अर्थात् तुम्हारे द्वारा किया गया पालन ही जिनका जीवन है, उन सब गौओं और भैसों आदिका मरना क्या कोई आश्चर्य है? अर्थात् कैमुतिक न्याय द्वारा ऐसा सिद्ध होता है। मृग अर्थात् कृष्णसार आदि मृगकुल, विहङ्ग अर्थात् मयूर आदि पक्षी, सरित अर्थात् यमुना आदि नदियाँ और सरोवर, अद्रि अर्थात् गोवर्द्धन आदि सभी पर्वत दिन-प्रतिदिन क्षीण होते जा रहे हैं॥११६-११७॥

मनुष्याः कतिचिद्भ्रातः परं ते सत्यवाक्यतः।
जाताशयैव जीवन्ति नेच्छ श्रोतुमतःपरम्॥११८॥

श्लोकानुवाद—हे भैया कृष्ण! वहाँके कुछ मनुष्य ही तुम्हारे सत्य वचनों पर विश्वास करके तुम्हारे दर्शनोंकी आशासे किसी प्रकार जीवन धारण कर रहे हैं। अतएव इससे अधिक और श्रवण करनेकी इच्छा मत करो॥११८॥

दिग्दर्शिनी टीका—तर्हि तासां वतः! का वार्त्तेत्यपेक्षयामाह—मनुष्या इति। कतिचिदित्यनेन बहवो मृता एवेति ध्वन्यते। ते तव यत् सत्यं वाक्यं गोकुलान्मधुपुर्यागमनसमये *'आयास्ये'* (श्रीमद्भा॰ १०/४१/१७) इति, रङ्गभूमौ च नन्दं प्रति *'ज्ञातीन् वो द्रष्टुमेष्यामः'* (श्रीमद्भा॰ १०/४५/२३) इति। तस्माद् या जाता आशा भवत्सन्दर्शनादि लाभविषयका, तयैव परं केवलं जीवन्ति। अतः परमन्यत् प्रत्येकं विशेषवृत्तान्तं श्रोतुं नेच्छ, तच्छ्रवणेच्छामपि न कुरु; प्रियजनदुर्वार्त्ता-श्रवणेन महानर्थापत्तेरित्यर्थः॥११८॥

भावानुवाद—अच्छा, तो फिर व्रजके मनुष्योंके विषयमें बतलाओ, उनके विषयमें और अधिक क्या कहूँ? इसी आशंकासे ही 'मनुष्याः' इत्यादि श्लोक कह रहे हैं। वहाँके कुछ मनुष्य तुम्हारे वचनोंकी सत्यता पर विश्वास करके किसी प्रकार जीवन धारण कर रहे हैं। यहाँ पर 'कुछ' कहनेका उद्देश्य यह है कि उनमेंसे अधिकांशने ही तुम पर अपना जीवन न्योछावर कर रखा है। 'सत्यवाक्य' कहनेका अर्थ है कि गोकुलसे मधुपुरी आते समय श्रीकृष्णने कहा था—'आयास्ये' अर्थात् 'मैं आ ही रहा हूँ' तथा रंगभूमिमें श्रीनन्द बाबाको कहा था—'हम शीघ्र ही आत्मीय स्वजनोंके साथ आपसे मिलने जायेंगे।' तुम्हारे इन वचनों पर विश्वास करके अर्थात् तुम्हारे दर्शन प्राप्तिकी आशासे ही व्रजके मनुष्य किसी प्रकार जीवन धारण कर रहे हैं। अतएव अन्य विशेष वृत्तान्तोंको श्रवण करनेकी इच्छा मत करो, क्योंकि प्रियजनोंके विषयमें दुःसंवाद सुनकर महान अनर्थकी उत्पत्ति हो सकती है॥११८॥

किन्त्विदानीमपि भवान् यदि तान्नानुकम्पते।
यम एव तदा सर्वान् वेगेनानुग्रहीष्यति॥११९॥

श्लोकानुवाद—किन्तु यदि तुम अभी भी उन बचे हुए मनुष्यों पर कृपा नहीं करोगे तो यमराज ही यथाशीघ्र उन पर कृपा करेंगे, क्योंकि यमकी कृपासे ही बन्धुओंके वियोगसे उत्पन्न उनके दुःख और शोक शान्त होंगे॥११९॥

दिग्दर्शिनी टीका—तान् अवशिष्टान् व्रजवासिनः, यम् एवानुग्रहीष्यतीति मरणेन बन्धुवियोगशोकदुःखापगमात्॥११९॥

भावानुवाद—श्लोकानुवाद द्रष्टव्य है॥११९॥

यत्तत्र च त्वयाकारि निर्विषः कालियो ह्रदः।
शोकोऽयं विपुलस्तेषां शोकेऽन्यत् कारणं शृणु॥१२०॥

श्लोकानुवाद—व्रजकी विषम दशाके विषयमें और अधिक क्या कहूँ? तुमने व्रजमें जिस कालिय ह्रदको विषसे रहित कर दिया है,

वही उनके अत्यधिक शोकका कारण बन गया है। उनके शोकके और भी कारण हैं, उनको भी श्रवण करो॥१२०॥

दिग्दर्शिनी टीका—तथापि शीघ्रस्वैरमरणोपायाप्राप्त्या तेषां शोको नितरां वर्द्धत एवेत्याह—यदिति सार्धद्वाभ्याम्। तत्र यमानुग्रहे मरणे चेत्यर्थः। निर्विषोऽकारि कृत इति यत्, अयं विपुलो महान् शोकः, विषाभावेन तत्र सद्यो मरणासम्भवात्; न च जल-प्रवेशादिना मरणं स्यादिति वक्तुमाह—शोक इति॥१२०॥

भावानुवाद—तथापि स्वेच्छापूर्वक और शीघ्र ही मरनेके उपायके अभाववशतः उनका शोक अत्यधिक रूपमें बढ़ गया है। जिस कालिय ह्रदका विषसे पूर्ण जल उनके मरनेका एकमात्र उपाय था, उस ह्रदको भी तुमने विष रहित कर दिया है, यही उनके महान शोकका कारण बन गया है, अर्थात् विषके अभावमें उनका क्षणमात्रमें मरना असम्भव हो गया है। और फिर जलमें प्रवेश करनेसे भी मृत्यु नहीं हो रही है, क्योंकि समस्त जलाश्योंमें जल भी थोड़ा ही रह गया है। इसके अलावा उनके शोकके और भी दूसरे कारण हैं, उनको श्रवण करो॥१२०॥

तत्रत्य यमुना स्वल्पजला शुष्केव साऽजनि।
गोवर्द्धनोऽभून्नीचोऽसौ स्वर्गाप्तो यो धृतस्त्वया॥१२१॥

श्लोकानुवाद—वहाँ श्रीयमुनामें भी बहुत कम जल रह गया है अर्थात् वे लगभग सूख गयी हैं। जो श्रीगोवर्द्धन तुम्हारे करकमल पर चढ़कर स्वर्ग तक पहुँच गये थे, अब वही गिरिराज नीचे भूतलमें चले गये हैं॥१२१॥

दिग्दर्शिनी टीका—पूर्वोक्तं क्षीणत्वं विवृण्वन् शोककारणतामेवाह—तत्रत्येति। व्रज-भूमि-सम्बन्धिनी, सा विपुलतरङ्गावली परमगाम्भीर्यादियुक्ता भवदीयतत्तत्क्रीड़ा-भूमिर्यमुना स्वल्पजला सती शुष्कप्रायाभूत्, भवद्वियोगात्तापात्; अतस्तस्यां प्रवेशेन मरणं न घटत इति भावः। भृगुपातेनापि मरणं न स्यादित्यभिप्रायेणाह—गोवर्द्धन इति। त्वया करे धृतः सन् यो गोवद्धनः स्वर्गं प्राप्त इति परमोच्चता दर्शिता। तथा च हरिवंशे—*'शिखरैर्घूर्णमानैश्च सीदमानैश्च पादपैः। विधृतश्चोद्धतैः श्रृङ्गैरगमः खगमोऽभवत्॥'* इति। तथा च तत्रैव—*'आप्ल्युतोऽयं गिरिः पक्षैरिति विद्याधरोरगाः। गन्धर्वाप्सरसश्चैव वाचो मुञ्चन्ति सर्वशः॥'* इत्यादि। असौ नीचोऽभूत, भवद्विरहदुःखेन भूम्यन्तःप्रवेशात्, श्रृङ्गावलीशिलाचयस्खलनाच्च॥१२१॥

भावानुवाद—पूर्वोक्त सभी नदियोंकी क्षीणताका वर्णन करते हुए व्रजके मनुष्योंके शोकका कारण 'तत्रत्य' इत्यादि पदों द्वारा बता रहे हैं। व्रजभूमिसे सम्बन्धित श्रीयमुना जो पहले विपुल तरङ्गोंसे हिलोरें लेती थीं, अत्यन्त गहरी थीं तथा तुम्हारे विभिन्न लीलाओंकी स्थली थीं, अब वही श्रीयमुना तुम्हारे विरहमें अति अल्प जलवाली तथा लगभग शुष्क हो गयी है। अतएव उसके जलमें प्रवेश करनेसे भी मृत्यु नहीं हो रही है। भृगुपात अर्थात् ऊँचे स्थानसे कूदकर मरना भी असम्भव हो गया है; इसी अभिप्रायसे कह रहे हैं कि जो गिरिराज गोवर्धन तुम्हारे द्वारा उठाये जाने पर स्वर्गको छू रहे थे, (इसके द्वारा श्रीगोवर्द्धनकी अत्यधिक ऊँचाईका प्रदर्शन हुआ है) वे गिरिराज भी इस समय तुम्हारे विरहके दुःखसे नीचे भूतलमें प्रवेश कर गये हैं तथा उनके शिखरसे शिलाएँ टूट-टूटकर गिर रही हैं। अतः उनकी चोटीसे कूदकर मरना भी असम्भव है। इस विषयका श्रीहरिवंशमें वर्णन किया गया है—"श्रीकृष्णने जब श्रीगोवर्द्धन धारण किया, उस समय उसकी चोटियाँ आगे और पीछे झुलने लगी, उसपर उगे वृक्ष काँपने लगे तथा उसके अत्यन्त ऊँचे शिखर बाह्य-आकाश (स्वर्ग)को छूने लगे।" तथा श्रीहरिवंशमें ही वर्णन है—"समस्त दिशाओंसे विद्याधर, उरगा, गन्धर्व और अप्सराएँ पीड़ित होकर जोरसे कहने लगे कि इस पर्वतकी चोटियाँ उनके पँखोंमें चुभ रही हैं"॥१२१॥

न यान्त्यनशनात् प्राणास्त्वन्नामामृतसेविनाम्।
परं शुष्कमहारण्यदावाग्निर्भविता गतिः॥१२२॥

श्लोकानुवाद—व्रजकी दशाके सम्बन्धमें और अधिक क्या कहूँ? जो जीवित रह गये हैं, उन्होंने भी स्नान, पान और भोजन आदिका त्याग कर दिया है। उनके प्राण केवल तुम्हारे नामामृतके सेवनके कारण ही बाहर नहीं निकल रहे हैं। अतएव अब सूखे हुए महावनकी दावाग्नि ही उनकी अन्तिम गति होगी॥१२२॥

दिग्दर्शिनी टीका—तन्नामैवामृतं मधुरमङ्गलत्वादिना, तत् हा कृष्ण! हा हा! कृष्णेत्यादिरूपेण सेविनां सदा पिबताम्; किन्तु मयेदमनुमीयत इत्याह—परमिति। शुष्कं भाण्डीरादीनां तद्वियोगेन मरणात् शुष्कतां प्राप्तं यन्महारण्यं तस्मिन् यो दावाग्निः स एव गतिराश्रयो भावी॥१२२॥

भावानुवाद—तुम्हारा नाम ही अमृत और मधुर मंगलस्वरूप है। वे निरन्तर हा कृष्ण! हा हा कृष्ण! इत्यादि कहते हुए निरन्तर तुम्हारे नामामृतका पान कर रहे हैं, अतएव अनशन द्वारा भी उनके प्राण बाहर नहीं निकल रहे हैं। किन्तु मेरा ऐसा अनुमान है कि तुम्हारे वियोगमें सूखे हुए महावनमें लगी दावाग्नि ही अब उनकी अन्तिम गति बनेगी॥१२२॥

श्रीपरीक्षिदुवाच—

शृण्वन्नसौ तत् परदुःखकातरः कण्ठे गृहीत्वा मृदुलस्वभावकः।
रामं महादीनवदश्रुधारया धौताङ्गरागोऽरुदुच्चसुस्वरम्॥१२३॥

श्लोकानुवाद—श्रीपरीक्षित महाराजने कहा—इन वेदनापूर्ण बातोंको सुनकर परदुःखकातर तथा कोमल स्वभाववाले श्रीकृष्णने, श्रीबलरामके कंठको पकड़कर अत्यधिक दीनकी भाँति उच्च स्वरसे क्रन्दन करनी आरम्भ कर दिया तथा उनकी अश्रुधारासे उनका अङ्गराग धुलने लगा॥१२३॥

दिग्दर्शिनी टीका—तत् श्रीबलदेवोक्तं शृण्वन्नेव, असौ भगवान्, परेषामन्येषाम्; यद्वा, पराणां शत्रुणामपि दुःखेन कातरो विवशः; यतो मृदुलः स्वभावः प्रकृतिर्यस्य, बहुब्रीहौ कः। राममग्रजं कण्ठे गृहीत्वा बलदेवस्य गलं धृत्वेत्यर्थः; उच्चः सुशोभनः स्वरो यथा स्यात्तथारुदत्। अश्रुणां धारया धौतः क्षालितः अङ्गरागोऽङ्गविलेपनं यस्येति रोदनबाहुल्यमुक्तम्॥१२३॥

भावानुवाद—श्रीबलदेवकी इन वेदनाभरी बातोंको सुनकर परदुःखकातर अर्थात् शत्रुके दुःखमें भी कातर होनेवाले तथा अति कोमल स्वभाववाले श्रीकृष्ण अपने बड़े भाईका कंठ पकड़कर अत्यधिक दीन व्यक्तिकी भाँति उच्च स्वरसे क्रन्दन करने लगे। अश्रु धाराओंसे उनका अंगराग धुल गया। इसके द्वारा उनका अत्यधिक क्रन्दन करना वर्णित हुआ है॥१२३॥

पश्चाद्भूमितले लुलोठ सबलो मातर्मुमोह क्षणा–
त्तादृग्रोदनदुःस्थतानुभवतश्चापूर्ववृत्तात्तयोः।
रोहिण्युद्धवदेवकी मदनसुश्रीसत्यभामादयः
सर्वेऽन्तःपुरवासिनो विकलतां भेजू रुदन्तो मुहुः॥१२४॥

श्लोकानुवाद—हे माता! तदुपरान्त श्रीकृष्ण श्रीबलरामके साथ भूमि पर लोटने लगे तथा क्षणभरमें ही मूर्छित हो गये। उनकी वैसी अवस्थाको देखकर और उनके दुःखको अनुभव करके माता रोहिणी, श्रीउद्धव, श्रीदेवकी, मदन-जननी श्रीरुक्मिणी, श्रीसत्यभामा और अन्तःपुरवासी, सभी इस अपूर्व घटनाको देखकर बारम्बार क्रन्दन करते-करते विकल हो गये॥१२४॥

दिग्दर्शिनी टीका—पश्चादुच्चसुस्वररोदनानन्तरम्, सबलः श्रीबलभद्रेण सहितः, तयोर्भ्रात्रोर्यत्तादृक् रोदनं दुःस्थता च भूलुठनादिरूपा, तयोरनुभवात् साक्षाद्दर्शनात्। कथम्भूतात्? अपूर्ववृत्तात् पूर्वं कदाचिदप्यजातादित्यर्थः। मदनं कामदेवं, सुत इति प्रद्युम्नमाता श्रीरुक्मिणी, एवमुक्तिश्च महिषीवर्गेषु तस्या मुख्यत्वेन परमगौरवात्; सर्वे जनाः॥१२४॥

भावानुवाद—उच्च स्वरसे क्रन्दन करते-करते श्रीकृष्ण, श्रीबलरामके साथ भूमि पर लोटपोट खाने लगे तथा क्षणभरमें ही मूर्छित हो गये। उनके वैसे क्रन्दन और भूमि पर लुंठन आदि दुःखको साक्षात्‌रूपमें देखकर रोहिणी माता, उद्धव आदि भी क्रन्दन करते हुए विकल हो गये। वह मोह किस प्रकारका था? अपूर्व अर्थात् पहले कभी भी अनुभव नहीं हुआ था। यहाँ पर 'मदनसु' कहनेका तात्पर्य है मदन (कामदेव) जिनके पुत्र हैं, अर्थात् प्रद्युम्नकी माता श्रीरुक्मिणीदेवी। ये महिषियोंमें मुख्य महिषी हैं, इसलिए गौरववशतः उनका नाम उल्लेख न करके 'मदन-जननी' कहा गया है॥१२४॥

श्रुत्वान्तःपुरतोऽपुराकलितमाक्रन्दं महार्त्तस्वरै-
र्धावन्तो यदवो जवेन वसुदेवेनोग्रसेनादयः।
तत्रागत्य तथाविधं प्रभुवरं दृष्ट्वारुदन् विह्वला
विप्रा गर्गमुखास्तथा पुरजनाश्चापूर्वदृष्टेक्षया॥१२५॥

इति श्रीबृहद्भागवतामृते भगवत्कृपासार निर्द्धारखण्डे
प्रियतमोनाम षष्ठोऽध्यायः।

श्लोकानुवाद—अन्तःपुरसे अपूर्व क्रन्दनकी ध्वनि सुनकर श्रीउग्रसेन आदि यादवगण श्रीवसुदेवके साथ अतिशीघ्र उस रोदन स्थल पर उपस्थित हुए तथा प्रभुवर श्रीकृष्णको वैसी अवस्थामें देखा। इस

प्रकार सभी पुरवासी और गर्ग आदि विप्र भी उपस्थित हो गये तथा जिस घटनाको आजसे पहले कभी भी देखा नहीं था, उसे देखकर सभी विह्वल होकर क्रन्दन करने लगे॥१२५॥

श्रीबृहद्भागवतामृतके प्रथमखण्डके छठे अध्यायका श्लोकानुवाद समाप्त।

दिग्दर्शिनी टीका—अन्तःपुरे अन्तःपुरात् सकाशाद्वा आक्रन्दमुच्चैः क्रन्दनशब्दं श्रुत्वा। कीदृशम्? अपुराकलितं पूर्वमननुभूतम्, वसुदेवेन सहेति पितृत्वेन तस्य धारणाद्याधिक्यात्। तत्र अन्तःपुरे तथाविधं महारोदनादिना प्राप्तमोहमित्यर्थः। अरुदन् रुरुदुः, गर्गः पुरोहितः, मुखशब्देन सान्दीपनिप्रभृतयो ब्राह्मणाः सान्त्वनार्थमागताश्चारुदन्, पुरजनाः द्वारकावासिलोकाश्च। तत्र हेतुः—न पूर्वं दृष्टं यद्भगवद्रोदनादि तस्येक्षया साक्षादनुभवेन॥१२५॥

इति श्रीभागवतामृतटीकायां दिग्दर्शिन्यां प्रथमखण्डे षष्ठोऽध्यायः।

भावानुवाद—अन्तःपुरसे आ रही उस उच्च क्रन्दनकी ध्वनिको सुनकर श्रीवसुदेव सहित सभी यादवगण अतिशीघ्र गतिसे दौड़कर उस महारोदन-स्थल पर उपस्थित हुए। वह क्रन्दन ध्वनि कैसी थी? जिस क्रन्दनको पहले कभी भी सुना नहीं गया अर्थात् जिसको पहले कभी भी अनुभव नहीं किया गया। यहाँ पर 'वसुदेव सहित' कहनेका तात्पर्य यह है कि श्रीवसुदेव श्रीकृष्णके पिता हैं, अतः उनकी प्रेम-विह्वलता सर्वाधिक समझनी चाहिए। इस प्रकार श्रीगर्ग आदि प्रमुख पुरोहित और श्रीसान्दीपनी जैसे ब्राह्मणगण सान्त्वना देनेके लिए वहाँ उपस्थित हुए, किन्तु श्रीकृष्ण-बलरामकी वैसी अवस्थाको देखकर वे स्वयं ही क्रन्दन करने लगे। समस्त द्वारकावासी भी प्रभुकी वैसी अवस्थाको देखकर क्रन्दन करने लगे। इसका कारण था कि ऐसी अवस्था उन्होंने पहले कभी भी नहीं देखी थी, अर्थात् श्रीकृष्णके ऐसे क्रन्दनका साक्षात् अनुभव करके सभी विह्वल होकर क्रन्दन करने लगे॥१२५॥

श्रीबृहद्भागवतामृतके प्रथमखण्डके छठे अध्यायकी दिग्दर्शिनी टीकाका भावानुवाद समाप्त।

सप्तमोऽध्यायः (पूर्णः)

श्रीपरीक्षिदुवाच—

इत्थं सपरिवारस्य मातस्तस्यार्त्तिरोदनैः।
ब्रहाण्डं व्याप्य सञ्जातो महोत्पातचयः क्षणात्॥१॥

श्लोकानुवाद—श्रीपरीक्षित महाराजने कहा—हे माता! इस प्रकार जब श्रीकृष्ण सपरिवार आर्त्तस्वरसे रोदन करने लगे, तब उनके इस क्रन्दनकी ध्वनि क्षणमात्रमें ही सम्पूर्ण ब्रह्माण्डमें व्याप्त हो गयी। उस समय नाना-प्रकारके भयानक उत्पात अर्थात् उल्कापात आदि आरम्भ हो गये॥१॥

दिग्दर्शिनी टीका

सप्तमे ब्रह्मणो युक्त्या मोहे शान्ते स्वयं प्रभुः।
गोपीनां परमोत्कर्षमाहाथाहर्षयन्मुनिम्॥

तस्य श्रीभगवतः, महोत्पाता निर्घातोल्कापातादयस्तेषां चयः समूहः॥१॥

टीकाका भावानुवाद

इस सप्तम अध्यायमें श्रीब्रह्माकी युक्तिसे भगवान्‌के मोहकी शान्ति, तदनन्तर गोपियोंके परमोत्कर्षकी चरमसीमा तक की महिमा जिसे भगवान्‌ने अपने श्रीमुखसे श्रीनारदको सुनाया था इत्यादि विषयोंका वर्णन किया गया है।

भगवान्‌का क्रन्दन क्षणभरमें ही सम्पूर्ण ब्रह्माण्डमें व्याप्त हो गया तथा नाना-प्रकारके उत्पात अर्थात् वज्र और उल्कापात इत्यादि आरम्भ हो गये॥१॥

तत्रान्यबोधकाभावात् स्वयमागाच्चतुर्मुखः।
वृतो वेदपुराणाद्यैः परिवारैः सुरैरपि॥२॥

श्लोकानुवाद—वहाँ पर सान्त्वना देनेवाला भी कोई नहीं था, सभी लोग स्वयं ही मोहित थे। अतएव चतुर्मुख ब्रह्मा स्वयं वेद-पुराणादि परिवार और देवगणोंसे परिवृत होकर उस स्थान पर उपस्थित हुए॥२॥

दिग्दर्शिनी टीका—अन्यस्य बोधकस्य प्रबोधकारकस्याभावात्, गुरु पुरोहितादीनामपि मोहप्राप्तेः; तत्र द्वारकान्तःपुरे स्वयमेवागादागतः। वेद-पुराणाद्या एव परिवाराः परिजनास्तैर्वृत इति तस्य ज्ञानाधिक्यमुक्तम्॥२॥

भावानुवाद—द्वारकाके अन्तःपुरमें गुरु-पुरोहित आदि सभी मोहित थे तथा सान्त्वना देनेवाला भी कोई नहीं था। अतएव उस समय श्रीब्रह्मा स्वयं ही वेद-पुराणादि अपने परिवारसे परिवृत होकर उस स्थान पर उपस्थित हुए। वेद-पुराणादि श्रीब्रह्माका परिवार है, अतः उनमें ज्ञानकी अधिकता लक्षित होती है॥२॥

तमपूर्वदशाभाजं प्रेष्ठप्रणयकातरम्।
निगूढनिजमाहात्म्यभर प्रकटनोद्धतम्॥३॥
महानारायणं ब्रह्मा पितरं गुरुमात्मनः।
सचमत्कारमालोक्य ध्वस्तधैर्योऽरुदत् क्षणम्॥४॥

श्लोकानुवाद—श्रीब्रह्माने विस्मयपूर्वक देखा कि उनके पिता और गुरुस्वरूप महानारायण श्रीकृष्ण अपूर्व मोहदशाको प्राप्त हुए हैं। तत्पश्चात् प्रभुको अपने प्रियतमजनोंके प्रणयमें अत्यन्त कातर तथा अपने निगूढ़ प्रेमकी मधुरिमाको प्रकाशित करनेमें उद्यत देखकर वे धैर्य धारण न कर सके और थोड़ी देर तक क्रन्दन करते रहें॥३-४॥

दिग्दर्शिनी टीका—तं श्रीभगवन्तं ब्रह्मा सचमत्कारं परमविस्मयसहितं यथा स्यात्तथा आलोक्य तेन ध्वस्तं नष्टं धैर्यं यस्य तथाभूतः सन् क्षणमरुददिति द्वाभ्यामन्वयः। कथम्भूतम्? अपूर्वापूर्वमजाता परमाद्भुता वा या दशा मोहादिरूपा तां भजतीति तथा तम्। कुतः? प्रेष्ठानां प्रेष्ठेषु वा यः प्रेमा तेन कातरं विवशम्; यतः निगूढ़ः परमरहस्यो यो निज माहात्म्यभरस्तस्य प्रकटनेऽभिव्यञ्जने उद्धतं निरर्गलम्, तदर्थमेव तथावतीर्णत्वात्। अतएव महानारायणं वैकुण्ठेऽपीदृशमाहात्म्य प्रकटनात्। तादृशज्ञानवतः सान्त्वनार्थमागतस्यापि ब्रह्मणो रोदने हेतुः—आत्मनो ब्रह्मणः पितरं जनकं गुरुञ्च वेदाद्युपदेशकम्, अतो भक्तिविशेषेण प्रेम-भरो-दयाद्धैर्यापगमेन रोदनं सम्भवेदेवेत्यर्थः॥३-४॥

भावानुवाद—श्रीभगवान्‌को देखकर ब्रह्माजी अत्यधिक विस्मित हो गये तथा अपना धैर्य खो बैठे और क्षणमात्रके लिए क्रन्दन करने लगे। उन्होंने भगवान्‌को किस दशामें देखा? भगवान् अपूर्व मोहदशासे ग्रस्त थे अर्थात् ऐसी परम अद्भुत दशाको वे पहले कभी भी प्राप्त नहीं हुए थे। भगवान् ऐसी मोहदशाको क्यों प्राप्त हुए? अपने प्रियजनोंके प्रेममें विवश होकर, क्योंकि वे अपने परम रहस्यमय माहात्म्यको प्रकट करनेके लिए सम्पूर्णरूपमें चेष्टा परायण थे। अर्थात् वे अपने परम रहस्यपूर्ण माहात्म्यको बिना किसी रोक-टोकसे प्रकट करनेके लिए आविर्भूत हुए थे, इसलिए ऐसी मोहदशाको प्राप्त हुए थे। अतएव ये श्रीमहानारायण हैं, क्योंकि श्रीनारायण स्वरूपमें उन्होंने वैकुण्ठमें भी ऐसे माहात्म्यको प्रकट नहीं किया है। यद्यपि श्रीब्रह्मा ऐसे असीम ज्ञानी महानारायणको सान्त्वना देनेके लिए उपस्थित हुए थे, तथापि उनके क्रन्दनका कारण यह था कि श्रीभगवान् उनके अपने पिता थे तथा वेद आदि शास्त्रोंके उपदेशक होनेके कारण गुरु भी थे। अतएव वे अत्यधिक भक्तिके उदय होनेके कारण प्रेमके वशीभूत होकर रोने लगे, ऐसा जानना चाहिए। श्रीब्रह्माके लिए धैर्यसे च्युत होकर उस प्रकार क्रन्दन करना असम्भव था॥३-४॥

संस्तभ्य यत्नादात्मानं स्वास्थ्यं जनयितुं प्रभोः।
उपायं चिन्तयामास प्राप चानन्तरं हृदि॥५॥

श्लोकानुवाद—तदनन्तर श्रीब्रह्मा यत्नपूर्वक स्वयं धैर्य धारणकर प्रभुको स्वस्थ करनेके लिए उपायकी चिन्ता करने लगे तथा क्षण भरमें मन-ही-मन उन्होंने उस उपायको निश्चित कर लिया॥५॥

दिग्दर्शिनी टीका—संस्तभ्य धैर्ययुक्तं कृत्वा चिन्तानन्तरमुपायं हृदि प्राप च॥५॥

भावानुवाद—श्लोकानुवाद द्रष्टव्य है॥५॥

तत्रैव भगवत्पार्श्वे रुदन्तं विनतासुतम्।
उच्चैः सम्बोध्य यत्नेन सबोधीकृत्य सोऽवदत्॥६॥

श्लोकानुवाद—उस स्थान पर भगवान्‌के निकट ही खड़े हुए विनतापुत्र श्रीगरुड़ भी रोदन कर रहे थे। श्रीब्रह्माने उनको उच्च स्वरसे सम्बोधन किया और यत्नपूर्वक उनको सचेत कराकर कहने लगे॥६॥

दिग्दर्शिनी टीका—सबोधीकृत्य भगवन्मोहेन मोहितमिव सन्तं संज्ञां प्रापयेत्यर्थः। स चतुर्मुखः॥६॥

भावानुवाद—भगवान्‌की मोहदशाको देखकर गरुड़जी भी मूर्च्छित हो गये थे। इसलिए श्रीब्रह्मा सर्वप्रथम उनको सचेत कराकर कहने लगे॥६॥

श्रीब्रह्मोवाच—

यच्छ्रीवृन्दावनं मध्ये रैवताद्रि–समुद्रयोः।
श्रीमन्नन्दयशोदादिप्रतिमालंकृतान्तरम् ॥७॥
गोयूथैस्तादृशैर्युक्तं रचितं विश्वकर्मणा।
राजते माथुरं साक्षाद्वृन्दावनमिवागतम्॥८॥
तत्रेमं साग्रजं यत्नाद्यथावस्थं शनैर्नय।
केवलं यातु तत्रैषा रोहिण्यन्यो न कश्चन॥९॥

श्लोकानुवाद—श्रीब्रह्माने कहा—लवणसमुद्र और रैवतक पर्वतके बीचमें विश्वकर्मा द्वारा निर्मित श्रीनन्द, श्रीयशोदा और गायोंके यूथोंकी प्रतिमाओंके द्वारा अलंकृत वृन्दावन नामक एक स्थान है। वह मथुरामण्डलके अन्तर्गत साक्षात् श्रीवृन्दावनकी भाँति ही विराजमान है। अतः तुम श्रीकृष्णको उनके ज्येष्ठ–भ्राताके साथ इसी अवस्थामें यत्नपूर्वक धीरे–धीरे उसी वृन्दावनमें ले जाओ। केवल श्रीरोहिणीदेवी ही उस स्थान पर जाएँ और कोई भी नहीं जाए॥७–९॥

दिग्दर्शिनी टीका—रैवतपर्वत–लवणसमुद्रयोर्मध्ये श्रीवृन्दावनं यद्राजते, तत्र इमं श्रीभगवन्तं साग्रजं बलरामसहितं यथावस्थं मोहावस्थामनतिक्रम्य अतएव यत्नात् छलैर्नयेति सार्धद्वयेनान्वयः। कीदृशं तत्? श्रीमतां श्रीमतीभिर्वा नन्दादीनां प्रतिमाभिः प्रतिकृतिभिरलङ्कृतमन्तरं मध्यं यस्य। आदिशब्देन श्रीराधिकादयो गोप्यः, श्रीदामादयो गोपाश्च; तादृशैः प्रतिमारूपैः; यद्वा, भगवत्पालित–माथुरव्रजवर्त्तिसदृशैः कथमेवं सम्भवतीत्यत्राह—विश्वकर्मणा रचितमिति। अनेन प्रतिमास्वपि साक्षाच्छ्रीनन्दादि–

बुद्धिः स्यादिति ध्वनितम्। अतएव माथुरं मथुरामण्डलसम्बन्धि वृन्दावनं साक्षादागतमिव। एवं तत्तन्मृगपक्षिवृक्षादयोऽपि तत्र रचिता वर्त्तन्त इति ज्ञेयम्। तत्र रचितवृन्दावने एषा परमसुबुद्धिमती केवलमेकाकिनी रोहिणी यातु, तस्याः पूर्वं व्रजेऽपि वासात्; अन्यश्च कश्चन कोऽपि जनो न यातु॥७-९॥

भावानुवाद—लवण समुद्र और रैवतक पर्वतके बीचके स्थलमें श्रीवृन्दावन नामक एक स्थान है। भगवान् श्रीकृष्णको उनके ज्येष्ठ-भ्राता श्रीबलराम सहित इसी प्रकार मूर्च्छित अवस्थामें ही यत्नपूर्वक वहीं ले जाओ। वह स्थान कैसा है? श्रीनन्द महाराज और श्रीमती यशोदादेवी आदिकी प्रतिमाओं द्वारा सुन्दर रूपसे अलंकृत है। 'आदि' शब्दसे श्रीराधिका आदि गोपियों और श्रीदाम आदि सखाओंकी प्रतिमाओं द्वारा भी सुन्दर रूपसे अलंकृत है, ऐसा भी सूचित होता है। अथवा भगवान् द्वारा पालित माथुर-मण्डलके अन्तर्गत श्रीवृन्दावन जैसा ही वह स्थान है। ऐसा किस प्रकार सम्भव हुआ? विश्वकर्माने इसका निर्माण किया है, इसलिए ऐसा सम्भव हुआ है। इसके द्वारा प्रतिमाएँ भी साक्षात् श्रीनन्द आदि जैसी ही दीख पड़ती हैं—यह भी सूचित हो रहा है। अतएव यह स्थान ठीक श्रीमथुरामण्डलके अन्तर्गत श्रीवृन्दावनके समान ही प्रतीत हो रहा है। इसी प्रकार गौओंके यूथ, मृगों, पक्षियों, और वृक्ष आदिकी प्रतिमाओंकी भी रचना की गयी है, अर्थात् वे भी ठीक-ठीक मृग, पक्षी आदि जैसे ही दिखलायी पड़ते हैं—ऐसा समझना चाहिए। उस नवनिर्मित वृन्दावनमें केवल परम सुबुद्धिमती श्रीमती रोहिणीदेवी ही गमन करें, क्योंकि उन्होंने पहले व्रजमें वास किया है और वे व्रजकी रीति-नीतिसे भलीभाँति अवगत हैं। दूसरा कोई भी व्यक्ति वहाँ न जाए॥७-९॥

श्रीपरीक्षिदुवाच—

प्रयत्नात् स्वस्थतां नीतो ब्रह्मणा स खगेश्वरः।
विशारदवरः पृष्ठे मन्दं मन्दं न्यधत्त तौ॥१०॥

श्लोकानुवाद—श्रीपरीक्षितने कहा—श्रीब्रह्मा द्वारा यत्नपूर्वक सचेत किये जाने पर पक्षिराज गरुड़ने श्रीकृष्ण और श्रीबलरामको धीरे-धीरे अपनी पीठ पर बैठाया॥१०॥

दिग्दर्शिनी टीका—विशारदवर इति एवं प्रकारेण भगवतो मोहापगमो भवेदित्यादिकं विचारयन्नित्यर्थः। अतएव पृष्ठे निजपक्षोपरि तौ रामकृष्णौ शनैः शनैरर्पयामास॥१०॥

भावानुवाद—भगवान्‌की मूर्च्छाको दूर करनेके लिए श्रीबह्माके अभिप्रायको भलीभाँति समझकर उसीके अनुरूप कार्य करनेमें निपुण होनेके कारण श्रीगरुड़को 'विशारदवर' कहा गया है। अतएव परम विशारद श्रीगरुड़ने श्रीकृष्ण और श्रीबलरामको धीरे-धीरे अपनी पीठ पर बैठाया॥१०॥

स्वस्थानं भेजिरे सर्वे चतुर्वक्त्रेण बोधिताः।
संज्ञामिवाप्तो रामस्तु नीयमानो गरुत्मता॥११॥

श्लोकानुवाद—श्रीवसुदेव आदि यादवगण श्रीब्रह्मा द्वारा सान्त्वना दिये जाने पर अपने-अपने स्थानों पर चले गये। जब श्रीगरुड़ दोनों भाइयोंको उस स्थान पर ले जाने लगे, उसी समय श्रीबलरामको कुछ होश आ गया॥११॥

दिग्दर्शिनी टीका—सर्वे वसुदेवादयश्च ब्रह्मणा प्रबोधिताः सन्तः निजनिजस्थानं गताः। इवेति तदानीमपि सम्यक् संज्ञाप्राप्तिं निरस्यति॥११॥

भावानुवाद—इसके बाद श्रीवसुदेव आदि सभी यादव श्रीब्रह्माके द्वारा सान्त्वना प्राप्त होने पर अपने-अपने भवनोंमें लौट गये। 'संज्ञामिव' पदमें 'इव'के प्रयोगसे श्रीबलरामके सम्पूर्ण सचेत होनेका खण्डन कर रहे हैं। अर्थात् वे किञ्चित् सचेत हुए, ऐसा समझना चाहिए॥११॥

श्रीनन्दनन्दनस्तत्र पर्यङ्के स्थापितः शनैः।
साक्षादिवावतिष्ठन्ते यत्र तद्गोपगोपिकाः॥१२॥

श्लोकानुवाद—उस नवनिर्मित वृन्दावनमें जिस स्थान पर गोप-गोपियोंकी प्रतिमाएँ साक्षात्‌की भाँति विराजमान थीं, वहीं पर श्रीगरुड़ने श्रीनन्दनन्दनको धीरे-धीरे अपनी पीठसे उतारकर पलङ्क पर लेटा दिया॥१२॥

दिग्दर्शिनी टीका—तत्र रचितवृन्दावने तत्र च पर्यङ्के धृतः। तत्रापि स्थानविशेषमाह—साक्षादिति। तेषु प्रसिद्धा गोपाः श्रीनन्दादयः ता गोप्यश्च श्रीयशोदादयो यत्र तत्रैव॥१२॥

भावानुवाद—उस निर्मित वृन्दावनमें पहुँचकर श्रीगरुड़ने श्रीकृष्णको पलङ्क पर सुला दिया। किस स्थान पर? वहीं जहाँ पर सुप्रसिद्ध श्रीनन्द आदि गोपों तथा श्रीयशोदा आदि गोपियोंकी प्रतिमाएँ साक्षात्‌की भाँति विराजमान थीं॥१२॥

उद्धवेन सहागत्य देवकी पुत्रवत्सला।
रुक्मिणीसत्यभामाद्या देव्यः पद्मावती च सा॥१३॥
तादृग्दशागतं कृष्णमशक्तास्त्यक्तुमञ्जसा।
दूराद्दृष्टिपथेऽतिष्ठन्निलीय ब्रह्मयाच्ञया॥१४॥

श्लोकानुवाद—पुत्रवत्सला श्रीदेवकी, श्रीरुक्मिणी-सत्यभामा आदि महिषियाँ तथा पद्मावती भी श्रीकृष्णकी ऐसी दशाको देखकर उन्हें सहसा त्याग न कर सकी और श्रीउद्धवके साथ उस नव-वृन्दावनमें आ गयीं। किन्तु श्रीब्रह्माकी प्रार्थनासे वे सभी कुछ दूरी पर छिपकर ही घटनाओंका दर्शन करने लगीं॥१३-१४॥

दिग्दर्शिनी टीका—उद्धवेन सह तत्रैवागत्य देवक्यादयो दूरादतिष्ठन्निति द्वाभ्यामन्वयः। सा भगवन्मातामही। दृष्टिपथ इति यत्र स्थित्वा कृष्णं द्रष्टुं शक्नुवन्ति तत्रेत्यर्थः। तत्रापि ब्रह्मणो याच्ञया प्रार्थनया निलीय नितरां लीना वृक्षादभ्यन्तरिता भूत्वेत्यर्थः॥१३-१४॥

भावानुवाद—श्रीउद्धव सहित श्रीदेवकी आदि उस नवनिर्मित वृन्दावनमें आयीं तथा भगवान्‌की मातामही पद्मावती भी उनके साथ आयीं। किन्तु श्रीब्रह्माकी प्रार्थनाके अनुसार वे सब श्रीकृष्णके निकट नहीं गये, परन्तु कुछ दूरी पर अर्थात् जिस स्थानसे श्रीकृष्णको देखा जा सके, ऐसे एक स्थान पर वृक्षोंके पीछे छिपकर देखने लगे॥१३-१४॥

नारदस्तु कृतागस्कमिवात्मानममन्यत।
देवानां यादवानाञ्च सङ्गेऽगान्न कुतूहलात्॥१५॥
वियत्यन्तर्हितो भूत्वा बद्धैकं योगपट्टकम्।
निविष्टो भगवच्चेष्टामाधुर्यानुभवाय सः॥१६॥

श्लोकानुवाद—श्रीनारद अपनेको मानो अपराधी समझकर न तो देवताओंके साथ वहाँ गये और न ही यादवोंके साथ, परन्तु कौतूहलवशतः भगवान्‌की लीला-चरित्रके माधुर्यका अनुभव करनेके लिए आकाशमें ही योगासन स्थापित कर अलक्षितकी भाँति विराजित हो गये॥१५-१६॥

दिग्दर्शिनी टीका—कृतमागोऽपराधो येन तं भगवन्मोहापादककारणविशेषोत्थापनात्। इवेति तत्त्वतोऽपराधाभावात्। स चाग्रे भगवदुक्त्या व्यक्तो भावी। तथा मननाच्च ब्रह्मादीनां वसुदेवादीनाञ्च सङ्गेन गतः कुतूहलादित्यस्य परेणान्वयः॥१५॥

कौतुकेन वियत्येव सः। नारदो निविष्टः उपविष्टः। किमर्थं? भगवतश्चेष्टायाश्‌-चरितस्य माधुर्यं तस्यानुभवाय साक्षात्काराय॥१६॥

भावानुवाद—श्रीनारद भगवान्‌के मूर्च्छित हो जानेके कारण अपने आपको अपराधी समझने लगे। किन्तु 'इव' कारके द्वारा तत्त्वतः अपराधका अभाव ही सूचित होता है। यद्यपि यह विषय बादमें भगवान्‌की उक्तिके द्वारा ही स्पष्ट होगा, तथापि श्रीनारद अपनेको अपराधी जैसा समझकर श्रीवसुदेव आदि यादवों अथवा श्रीब्रह्मा आदि देवताओंके साथ भी उस नव-वृन्दावनमें नहीं गये। 'कुतूहलात' (कौतूहलवशतः) इस शब्दका श्लोक संख्या १६के साथ अन्वय होगा॥१५॥

श्रीनारद कौतूहलवशतः आकाशमें योगासन स्थापित करके अलक्षितकी भाँति विराजित हो गये। किसलिए? श्रीभगवान्‌के माधुर्यमय चरित्रको अनुभव अथवा साक्षात् दर्शन करनेके लिए॥१६॥

गरुड़श्चोपरि व्योम्नः स्थित्वाऽप्रत्यक्षमात्मनः।
पक्षाभ्यामाचरंश्छायामन्ववर्त्तत तं प्रभुम्॥१७॥

श्लोकानुवाद—श्रीगरुड़ भी अलक्षितरूपसे आकाशमें रहकर अपने दोनों पंखोंके द्वारा छायाका विस्तार करते हुए प्रभुकी सेवा करने लगे॥१७॥

दिग्दर्शिनी टीका—अप्रत्यक्षं यथा स्यात्। केनापि यथा न लक्ष्यते तथाकाशोपरि स्थित्वा प्रभुं निजस्वामिनं तं भगवन्तम् अन्ववर्त्तत असेवत लक्षीकृत्य स्थित इति वा॥१७॥

भावानुवाद—इस प्रकार श्रीगरुड भी अप्रत्यक्षरूपसे आकाशमें रहकर अर्थात् जिस प्रकार रहनेसे कोई भी उनको देख न सके, परन्तु वे अपने प्रभुको देख सके, ऐसे स्थान पर अवस्थित होकर अपने प्रभुकी सेवा करने लगे॥१७॥

अथ कृष्णाग्रजः प्राप्तः क्षणेन स्वस्थतामिव।
तं सर्वार्थमभिप्रेत्य विचक्षण–शिरोमणिः॥१८॥
क्षिप्रं स्वस्यानुजस्यापि सम्मार्ज्य वदनाम्बुजम्।
वस्त्रोदरान्तरे वंशी शृङ्गवेत्रे च हस्तयोः॥१९॥
कण्ठे कदम्बमालाञ्च बर्हापीड़ञ्च मूर्द्धनि।
नवं गुञ्जावतंसञ्च कर्णयोर्निदधे शनैः॥२०॥

श्लोकानुवाद—तब बुद्धिमान–शिरोमणि श्रीबलराम क्षणभरमें ही सचेतन होकर श्रीब्रह्माके अभिप्रेत अर्थको समझ गये तथा शीघ्रतापूर्वक सर्वप्रथम अपने मुखकमलको और फिर अपने अनुज श्रीकृष्णके मुखकमलको भी धो दिया। इसके बाद उन्होंने धीरे–धीरे श्रीकृष्णकी कमरमें बँधे हुए वस्त्रमें वंशीको खोंस दिया, दाएँ और बाएँ हाथोंमें क्रमशः शृंग और वेत्र, कंठमें कदम्ब पुष्पोंकी माला, मस्तक पर मयूरपूच्छका चूड़ा तथा दोनों कानोंमें नवगुञ्जासे निर्मित कर्णभूषण अर्पण किये॥१८–२०॥

दिग्दर्शिनी टीका—इवेति अनुजस्यास्वास्थ्येन सम्यक्स्वास्थ्याभावात्। तं ब्रह्ममन्त्रणया प्राप्तं सर्वं अर्थं श्रीकृष्ण–स्वस्थताहेतुः प्रयोजनम् अभिप्रायेण ज्ञात्वा। स्वस्य आत्मनः अनुजस्यापि श्रीकृष्णस्य वदनाम्बुजं, सम्मार्ज्य क्षालनादिना रजआद्यपसार्य वस्त्रोदरयोरन्तरे मध्ये वंशीं शनैर्निदधे अर्पितवानित्युत्तरेणान्वयः। यतः विचक्षणानामभिज्ञानां शिरोमणिर्मूर्धन्यः। नवमित्यस्य पूर्वेणान्वयः॥१८–२०॥

भावानुवाद—'स्वस्थतामिव' पदके 'इव' कारका तात्पर्य यह है कि अपने अनुजकी अस्वस्थताके कारण श्रीबलराम पूर्णता स्वस्थ नहीं थे, तथापि श्रीब्रह्माके श्रीकृष्णको स्वस्थ करनेके अभिप्रायको समझकर सर्वप्रथम उन्होंने अपना मुखकमल धोया और फिर अपने अनुज श्रीकृष्णके मुखकमलको धोकर उनके मुख पर लगी हुई रज आदिको साफ कर दिया। तत्पश्चात् उन्होंने धीरे–धीरे श्रीकृष्णकी कमरमें बंधे

हुए वस्त्रमें वंशीको खोंस दिया, क्योंकि वे विचक्षण-शिरोमणि थे॥१८-२०॥

रचयित्वा वन्यवेशं त्वष्टृकल्पितवस्तुभिः।
बलादुत्थापयन् धृत्वाब्रवीदुच्चतरस्वरैः॥२१॥

श्लोकानुवाद—इस प्रकार श्रीबलरामने विश्वकर्मा द्वारा कल्पित (निर्मित) सामग्रियोंसे श्रीकृष्णको वन्यवेश धारण करा दिया तथा बलपूर्वक उनको शय्यासे उठाकर उच्च स्वरसे कहने लगे॥२१॥

दिग्दर्शिनी टीका—एवमात्मनः श्रीकृष्णस्यापि वन्यवेशं रचयित्वा इत्यनेनानुक्त-गुञ्जाहारादिकमपि परामृश्यते। नन्वत्र तादृशवन्यवेशरचना कथं सिध्यति तत्तद्द्रव्याभावात्? तत्राह—त्वष्ट्रा विश्वकर्मणा कल्पितैर्निर्मितैर्वस्तुभिर्वंश्यादिद्रव्यैः। यादृशानि वंश्यादिद्रव्याणि वृन्दावने पूर्वमासन्, अत्रापि तादृशान्येव देवशिल्पिशक्तिविशेषेण सन्तीत्यर्थः। बलादुत्थापयन्निति स्वकराभ्यां श्रीकृष्णं धृत्वा निजबलेन शयनादुत्थापयन्नित्यर्थः॥२१॥

भावानुवाद—इस प्रकार श्रीबलरामने अपनेको और श्रीकृष्णको वन्यवेश धारण कराया। यहाँ पर यद्यपि वन्यवेश धारणमें वस्त्रोंके अन्तर्गत गुञ्जाहारका उल्लेख नहीं किया गया है, तथापि गुञ्जाहार भी विद्यमान था, ऐसा समझना चाहिए। यदि कहो कि उस स्थान पर वन्यवेश धारण किस प्रकार हो सकता था, क्योंकि वहाँ पर तो वन्यवेशके उपयोगी वस्तुओंका अभाव था। इसके उत्तरमें कहते हैं कि विश्वकर्मा द्वारा निर्मित नव-वृन्दावनमें वंशी आदि समस्त वस्तुएँ विद्यमान थीं। अर्थात् जिस प्रकार श्रीवृन्दावनमें वन्यवेश-रचनाके उपयोगी द्रव्यादि समस्त वस्तुएँ सदा विद्यमान रहती थीं, उसी प्रकार यहाँ पर भी देवशिल्पी विश्वकर्मा द्वारा वैसे द्रव्योंकी रचना की गयी थी। देवशिल्पी होनेके कारण विश्वकर्मामें वैसे द्रव्यादिको निर्माण करनेकी शक्ति है, इसको अवश्य ही स्वीकार करना होगा। इसके उपरान्त श्रीबलरामने अपने हस्तकमलोंके द्वारा श्रीकृष्णको शय्यासे बलपूर्वक उठाया और उच्च स्वरसे कहने लगे॥२१॥

श्रीबलदेवोवाच—

श्रीकृष्ण कृष्ण भो भ्रातरुत्तिष्ठोत्तिष्ठ जागृहि।
पश्याद्य वेलातिक्रान्ता विशन्ति पशवो वनम्॥२२॥

श्लोकानुवाद—श्रीबलदेवने कहा—श्रीकृष्ण! कृष्ण! भैया! उठो, उठो, जागो, देखो! आज बहुत देर हो गयी है, इसलिए सभी गायें वनमें प्रवेश कर रहीं हैं॥२२॥

दिग्दर्शिनी टीका—वेला शयनादुत्थानस्य पशूत्थापनस्य वा कालः अद्य अतिक्रान्ता अत्यगात्। अतः स्वयमेव पशवः गवाद्या वनं प्रविशन्तीति पश्य॥२२॥

भावानुवाद—श्लोकानुवाद द्रष्टव्य है॥२२॥

श्रीदामाद्या वयस्याश्च स्थिता भवदपेक्षया।
स्नेहेन पितरौ किञ्चिन्न शक्तौ भाषितुं त्वयि॥२३॥

श्लोकानुवाद—श्रीदाम आदि सखागण तुम्हारी प्रतीक्षा कर रहे हैं, माता और पिता स्नेहवशतः तुम्हें कुछ भी कह नहीं पा रहे हैं॥२३॥

दिग्दर्शिनी टीका—न च तेषां सङ्गे अन्ये रक्षकाः केचिद्यान्ति, त्वदेकप्रेमाकृष्टत्वादित्याह—श्रीदामाद्या इति। ननु सत्यं, तथा सति माता पिता च मामुत्थाप्य तत्र न्ययोजयिष्यताम्। तत्राह—स्नेहेनेति। पितरौ यशोदा-नन्दौ त्वयि त्वां प्रति किञ्चिदपि शयनादुत्थानं पशुरक्षणं वा भाषितुं वक्तुं न शक्तौ न समर्थौ भवतः॥२३॥

भावानुवाद—गौओंके साथ श्रीदाम आदि उनका कोई भी रक्षक वनमें नहीं गया, क्योंकि श्रीदाम आदि सभी सखा तुम्हारे प्रेमके वशीभूत होकर यहीं पर तुम्हारी प्रतीक्षा कर रहे हैं। यदि कहो कि यह बात तो सत्य है, किन्तु माता-पिता भी तो मुझे जगाकर इस कार्यमें नियुक्त कर सकते थे? इसीलिए कह रहे हैं कि पिता नन्द और माता यशोदा स्नेहवशतः तुम्हें निद्रित अवस्थासे उठाकर पशुओंकी रक्षा हेतु वनमें जानेके लिए कुछ भी कह नहीं पा रहे हैं॥२३॥

पश्यन्तस्ते मुखाम्भोजमिमा गोप्यः परस्परम्।
कर्णाकर्णितया किञ्चिद्वदन्त्यस्त्वां हसन्ति हि॥२४॥

श्लोकानुवाद—और देखो, ये गोपियाँ भी तुम्हारे श्रीमुखकमलको देखकर परस्पर एक-दूसरेसे काना-फूसी करती हुईं न जाने क्या कह रही हैं, निश्चय ही तुम्हारा उपहास कर रही हैं॥२४॥

दिग्दर्शिनी टीका—इमाः साक्षाद् वर्त्तमानाः किञ्चिद्रात्रिजागरणेन कृष्णस्य निद्राधुनापि नापयातीत्येवं रूपं परस्परं कर्णाकर्णितया वदन्त्यः मुखाम्भोजे रतिचिह्न-दर्शनात्; हि निश्चितम्॥२४॥

भावानुवाद—और भी देखो, यहाँ पर सब गोपियाँ साक्षात्‌रूपसे उपस्थित हैं तथा वे निश्चय ही एक दूसरेके कानोंमें कुछ कह रही हैं। क्या कह रही हैं? रात्रिमें जागरणके कारण अभी तक भी श्रीकृष्णकी निद्रा भंग नहीं हुई है। वे तुम्हारे श्रीमुखकमलका दर्शन करके उपहास भी कर रही हैं, अर्थात् तुम्हारे श्रीमुखकमल पर रतिके चिह्न देखकर परस्पर हँस रही हैं॥२४॥

श्रीपरीक्षिदुवाच—

इत्थं प्रजल्पताभीक्ष्णं नामभिश्च सलालनम्।
आहूयमानो हस्ताभ्यां चाल्यमानो बलेन च॥२५॥
रामेणोत्थाप्यमानोऽसौ संज्ञामिव चिराद्गतः।
वदन् शिवशिवेति द्रागुदतिष्ठत् सविस्मयम्॥२६॥

श्लोकानुवाद—महाराज श्रीपरीक्षितने कहा—इस प्रकार श्रीबलदेव बार-बार प्रीतिपूर्वक श्रीकृष्णको नाम ले-लेकर उनको पुकारने लगे और फिर बलपूर्वक अपने करकमलोंके द्वारा उन्हें उठाकर बैठा दिया। इस प्रकार श्रीबलराम द्वारा उठाये जाने पर श्रीकृष्ण बहुत देरके पश्चात् चेतनता प्राप्त करके विस्मयपूर्वक 'शिव शिव' कहते हुए अपनी शय्यासे उठ खड़े हुए॥२५-२६॥

दिग्दर्शिनी टीका—लालनं मुखचुम्बनादिकम्; स्नेहकोमलमधुरोक्ति प्रशंसनादिकञ्च तेन सहितं यथा स्यात्तथा नामभिः कृष्ण-श्रीकृष्णगोपालगोविन्देत्यादिभिः कृत्वा रामेणाहूयमानः तथापि व्युन्थानाभावाद् बलेन स्वशक्तया हस्ताभ्यां चाल्यमानः उत्थाप्यमानश्च सन् आदौ भगवान् चिरात् संज्ञां गतः प्राप्तः सन् सविस्मयं द्राक् शीघ्रमुदतिष्ठदिति द्वाभ्यामन्वयः। इवेत्यनेन तदानीमपि समग्रतया मोहानपगमो बोध्यते। तच्चाग्रे व्यक्तं भावि। किं कुर्वन्? विस्मयात् शिवशिवेति वदन्॥२५-२६॥

भावानुवाद—इस प्रकार श्रीबलदेव लालन अर्थात् बार-बार श्रीकृष्णके मुखको चुम्बन आदि द्वारा प्रीतिपूर्वक स्नेह भरे मधुर स्वरसे प्रशंसा करते हुए उन्हें 'कृष्ण' 'श्रीकृष्णगोपाल' 'गोविन्द' इत्यादि नामों द्वारा

पुकारने लगे। तब भी श्रीकृष्ण जाग्रत नहीं हुए अथवा अपनी शय्यासे नहीं उठे। फिर श्रीबलदेवने बलपूर्वक अपने दोनों हाथोंसे उनको उठाकर बैठाया, तब भगवान् बहुत देरके बाद चेतनता प्राप्त करके विस्मयपूर्वक शय्यासे उठ खड़े हुए। मूल श्लोकमें 'संज्ञामिव' पदमें 'इव' शब्दका तात्पर्य यह है कि तब भी श्रीकृष्णकी मूर्च्छा सम्पूर्णरूपसे दूर नहीं हुई, ऐसा समझना चाहिए। इस विषय पर बादमें चर्चा होगी। फिर श्रीकृष्णने क्या किया? विस्मयपूर्वक 'शिव' 'शिव' कहने लगे॥२५-२६॥

उन्मील्य नेत्रकमले संपश्यन् परितो भृशम्।
स्मयमानः पुरो नन्दं दृष्ट्वा ह्रीणो ननाम तम्॥२७॥

श्लोकानुवाद—श्रीकृष्ण अपने नेत्रकमल खोलकर बार-बार चारों ओर देखने लगे तथा श्रीनन्दको अपने सम्मुख देखकर लज्जापूर्वक उनको प्रणाम किया॥२७॥

दिग्दर्शिनी टीका—स्मयमानः स्वकीयचिरनिद्रादिना ईषद्धसन्। पुर अभिमुखे दृष्ट्वा ह्रीणो लज्जितः सन् तं नन्दं ननामेत्यनेन पूर्वमपि नित्यं प्रातरुन्थाय पितुरभिवन्दनं क्रियत इति बोध्यते॥२७॥

भावानुवाद—बहुत देरके पश्चात् निद्रा भंग होने पर श्रीकृष्णने अपने सम्मुख जब श्रीनन्दको देखा तो मधुर हास्य करते हुए लज्जापूर्वक उनको प्रणाम किया। वे पहले भी व्रजमें प्रतिदिन प्रातः पिताको इसी प्रकार प्रणाम करते थे, यही समझना चाहिए॥२७॥

अब्रवीत् पार्श्वतो वीक्ष्य यशोदाञ्च हसन्मुदा।
स्नेहात्तदाननन्यस्तनिर्निमेषेक्षणामिव ॥२८॥

श्लोकानुवाद—निकट ही खड़ी हुई माता यशोदा स्नेहवशतः मानो श्रीकृष्णके मुखकमल पर बिना पलकें झपकाये दृष्टि डाल रही थीं, उनको देखकर श्रीकृष्ण आनन्दपूर्वक हँसते-हँसते कहने लगे॥२८॥

दिग्दर्शिनी टीका—तस्य भगवत आनने विषये न्यस्ते अर्पिते निर्निमेषे ईक्षणे यया ताम्। इवेत्युत्प्रेक्षायां वस्तुतः प्रतिमाया निर्निमेषदृष्टित्वात्। भगवतस्तु पूर्ववत् स्नेहादेवनिर्निमेष-दृष्टित्व भानम्। इत्यादिकञ्च सम्यङ्मोहानपगमलक्षणमेव ज्ञेयम्॥२८॥

भावानुवाद—माता यशोदा मानो श्रीकृष्णके मुखकमलको एकटक रूपसे देख रही थीं। यहाँ पर 'इव' शब्दका उत्प्रेक्षा (अनुमान) अर्थमें प्रयोग हुआ है, अर्थात् स्वाभाविक रूपसे प्रतिमाके नेत्र निर्निमेष अर्थात् एकटक थे। किन्तु श्रीकृष्णने उसीको पूर्ववत् स्नेहवशतः निर्निमेष दृष्टि समझा, परन्तु वह तो उनकी दृष्टिका भानमात्र था। अतएव इससे यह समझना चाहिए कि अभी भी भगवान्‌की मूर्च्छा सम्पूर्णरूपसे दूर नहीं हुई थी॥२८॥

श्रीभगवानुवाच—

अद्य प्रभाते भो मातरस्मिन्नेव क्षणे मया।
चित्राः कति कति स्वप्ना जाग्रतेव न वीक्षिताः॥२९॥

श्लोकानुवाद—श्रीकृष्णने कहा—माता! आज मैंने अभी प्रातःकालमें ही जाग्रत अवस्था जैसे न जाने कितने विचित्र स्वप्न देखे हैं॥२९॥

दिग्दर्शिनी टीका—एवं यथापूर्वमात्मनो व्रज एव वासं सत्यम्। मथुरागमनादिकञ्च मिथ्येति मन्यमानस्तत्सर्वं स्वप्नानुभूतत्वेन स्वमातरि स्नेहात् प्रतिपादयति—अद्येति त्रिभिः। स्वप्नाः स्वप्नदृश्यार्थाः कति कति न वीक्षिताः, अपि तु बहवो वीक्षिताः। जाग्रतेवेति जाग्रत्समये यथानुभूयन्ते तथैवेत्यर्थः॥२९॥

भावानुवाद—श्रीकृष्ण पहले जैसे व्रजमें थे, अभी भी वे व्रजमें ही हैं, इस प्रकार निश्चय करके वे व्रजवासको ही सत्य तथा मथुरा गमनादिको मिथ्या मानकर अर्थात् मथुरागमनादि सभीको स्वप्नवत् समझकर उस स्वप्नका अपनी माता यशोदाके निकट 'अद्येति' तीन श्लोकोंके द्वारा वर्णन कर रहे हैं। हे माता! आज मैंने प्रातःकालमें न जाने कितने ही आश्चर्यमय स्वप्न देखे हैं और फिर जाग्रत अवस्थामें जैसे विषयोंका अनुभव होता है, स्वप्नमें भी ठीक वैसा ही अनुभव हुआ है॥२९॥

मधुपुर्यामितो गत्वा दुष्टाः कंसादयो हताः।
जरासन्धादयो भूपा निर्जिताः सुखिताः सुराः॥३०॥

श्लोकानुवाद—मैंने यह स्वप्न देखा है कि यहाँसे मधुपुरी जाकर मैंने दुष्ट कंस आदिका वध किया, जरासन्ध आदि

राजाओंको पराजित किया तथा नरकासुरका वधकर देवताओंको सुखी किया॥३०॥

दिग्दर्शिनी टीका—तानेव संक्षेपेण कथयति—मध्विति सार्धेन। सुराः सुखीकृताः नरकवधादिना॥३०॥

भावानुवाद—श्लोकानुवाद द्रष्टव्य है॥३०॥

निर्मिताम्भोनिधेस्तीरे द्वारकाख्या महापुरी।
नान्यवृत्तानि शक्यन्तेऽधुना कथयितुं जवात्॥३१॥

श्लोकानुवाद—और फिर मैंने महासागरके तट पर द्वारका नामकी महापुरी (महानगर)का निर्माण किया है, इत्यादि बहुत कुछ स्वप्नमें देखा। किन्तु उन सबको मैं इस समय गोचारण जानेकी शीघ्रताके कारण बतला नहीं सकता॥३१॥

दिग्दर्शिनी टीका—अम्भोनिधेर्लवणसमुद्रस्य तीरे। तद्वृत्तानि सर्वाण्येव विवृत्य कथयेति चेत्तत्राह—नेति। अधुना गोसङ्गत्या वनगमनसमये। अतएव जवाद्वेगेन॥३१॥

भावानुवाद—श्लोकानुवाद द्रष्टव्य है॥३१॥

अनेन स्वप्नविघ्नेन दीर्घेण स्वान्तहारिणा।
अन्यवासरवत् काले शयनान्नोत्थितं मया॥३२॥

श्लोकानुवाद—इस प्रकार बहुत देर तक मनोहर स्वप्न द्वारा विघ्न उपस्थित होनेके कारण मैं आज अन्य दिनोंकी भाँति यथा-समय पर शय्यासे उठ नहीं पाया हूँ॥३२॥

दिग्दर्शिनी टीका—तथापि चिरमनिमेषावलोकां तां पश्यन् निजनिद्राबाहुल्येन किञ्चिदस्वास्थ्यशङ्कया मातुर्मनोदुःखं सम्भाव्य तां सान्त्वयति—अनेनेति स्वप्नरूपेण विघ्नेन। स्वान्तं मनोहर्तुं शीलमस्येति तथा तेन। काले ऊषसि; नोत्थितम् उत्थातुं न शक्तम्॥३२॥

भावानुवाद—यद्यपि श्रीकृष्णने स्वप्नके वृत्तान्तको कह सुनाया, तथापि माता यशोदा बहुत देर तक निर्निमेष नयनोंसे ही देख रही थीं। ऐसा देखकर श्रीकृष्णने अपने मनमें विचार किया कि मुझे अधिक देर तक सोते हुए देखकर माता मेरे अस्वस्थ होनेकी शंका

करके दुःखी हो सकती है, ऐसा विचारकर वे माताको सान्त्वना देते हुए बोले, माँ! बहुत देर तक इस मनोहर स्वप्नरूप विघ्नके उपस्थित होनेके कारण मैं उषाकालमें शय्यासे उठ नहीं पाया हूँ॥३२॥

भो आर्य तन्महाश्चर्यमसम्भाव्यं न मन्यते।
भवता चेत्तदारण्ये गत्वा वक्ष्यामि विस्तरात्॥३३॥

श्लोकानुवाद—हे आर्य! (हे श्रीबलराम!) आप यदि उस महाश्चर्य-जनक स्वप्नके वृत्तान्तको असम्भव न समझें तो मैं वनमें जाकर आपको उसे विस्तारपूर्वक सुनाऊँगा॥३३॥

दिग्दर्शिनी टीका—बहुकालाचरितान्येतानि विचित्राणि कर्माणि प्रातःकालीन-क्षणिकस्वप्नमध्ये कथमनुभूतान्येवमसम्भावयन्तमिव मत्वा श्रीबलदेवमाह—भो इति। तत् स्वप्नदृष्टम्॥३३॥

भावानुवाद—श्रीबलदेव उस स्वप्नको असम्भव समझ सकते हैं, क्योंकि बहुत समय पहले हुई जो कंस-वधादिकी घटनाएँ हैं, वे सहसा किस प्रकार प्रातःकालके क्षणिक स्वप्नमें अनुभूत हुईं? बल्कि उनका असम्भव प्रतीत होना ही स्वाभाविक है। इसलिए श्रीकृष्णने कहा, हे आर्य! आप यदि उसको असम्भव न समझें, तो मैं वनमें आपको विस्तारपूर्वक सुनाऊँगा॥३३॥

श्रीपरीक्षिदुवाच—

एवं सम्भाष्य जननीमभिवन्द्य स सादरम्।
वनभोग्येप्सुरालक्ष्य रोहिण्योक्तोऽत्यभिज्ञया॥३४॥

श्लोकानुवाद—महाराज श्रीपरीक्षितने कहा—इस प्रकार श्रीकृष्णने अपने भ्राता श्रीबलदेवके साथ आदरपूर्वक सम्भाषण और माताको अभिवादन किया। फिर श्रीकृष्ण द्वारा वन्य भोजनके उपयोगी खाद्य-सामग्रीकी अभिलाषासे हाथ फैलाने पर परम बुद्धिमती श्रीरोहिणीदेवी कहने लगीं॥३४॥

दिग्दर्शिनी टीका—वने यद्भोग्यं दध्योदनादि तत्प्राप्तुमिच्छुः स भगवान् आलक्ष्य श्रीहस्तप्रसारणमुद्रादिलक्षणेन ज्ञात्वोक्तः। अत्यभिज्ञया परमविचक्षणयेत्यस्यायमर्थः—एषा यशोदा प्रतिमा किञ्चिद्दातुं प्रतिवक्तुञ्च स्वत एवाशक्ता, तद्यदि अस्याः

सकाशात् भोगस्य प्रतिवचनस्य चाप्राप्तया कृष्णस्य प्रतिमेयमिति बुद्धिः स्यात्तदा पूर्ववत् पुनरपि महानर्थापत्तिः स्यादिति तत्सम्वरणाय चातुर्यमकरोदिति॥३४॥

भावानुवाद—वनमें जाकर भगवान् जो दही-भात भोजन करेंगे, उस भोजनके उपयोगी वस्तुओंकी अभिलाषासे ही उन्होंने श्रीयशोदाके सामने दोनों हाथोंको फैला दिया। इस प्रकार श्रीयशोदाके सामने हस्त प्रसारण आदि चिह्नको देखकर परमबुद्धिमती श्रीरोहिणीदेवीने विचार किया कि यह तो श्रीयशोदाकी प्रतिमा है, अतएव किसी वस्तुको देनेमें या उत्तर प्रदान करनेमें स्वभावतः अक्षम है। किन्तु यदि श्रीकृष्णको इनसे भोज्य वस्तुएँ और प्रत्युत्तर प्राप्त न होने पर इनमें प्रतिमा बुद्धि हो गई तो पूर्ववत् ही बड़ा अनर्थ हो जायेगा। अतएव उस अनर्थको रोकनेके लिए ही चतुरतापूर्वक श्रीरोहिणीदेवी कहने लगीं॥३४॥

श्रीरोहिण्युवाच—

भो वत्स तव माताद्य तन्निद्राधिक्यचिन्तया।
त्वदेकपुत्रा दुःस्थेव तदलं बहुवार्त्तया॥३५॥

श्लोकानुवाद—श्रीरोहिणीदेवीने कहा, हे पुत्र! तुम्हारी माता आज तुम्हारी अधिक निद्राके कारण चिन्तित होकर कुछ अस्वस्थ हो गयी हैं, क्योंकि तुम्हीं उसके एकमात्र पुत्र हो। अतएव और अधिक वार्त्तालापकी कोई आवश्यकता नहीं है॥३५॥

दिग्दर्शिनी टीका—अद्य यत्तदीयनिद्राया आधिक्यं बाहुल्यं तस्य चिन्तयाऽनुसन्धानेन शरीरास्वास्थ्यादिशङ्कयेत्यर्थः। दुःस्था दुःखिनी अस्वस्था वाभूत्। यतस्त्वमेवैकः पुत्रो यस्याः सा। इवेत्यनेन मातृवत्सलस्य तस्य मातृदौस्थ्यसम्भावनया मनोदुःखं वारयति। तत्तस्मात् बहव्या वार्त्तया गोष्ठ्या अलं प्रयोजनं नास्ति॥३५॥

भावानुवाद—पुत्र! तुम्हारी माता आज तुम्हारी अधिक निद्राके कारण चिन्तित होकर अस्वस्थ हो गयी हैं। अर्थात् तुम्हारे अस्वस्थ होनेकी आशंका करके वे स्वयं ही अस्वस्थ हो गयी हैं, क्योंकि तुम ही उनके एकमात्र पुत्र हो। यहाँ पर माताको दुःखी देखकर मातृवत्सल श्रीकृष्णके मनमें भी दुःख उत्पन्न हो सकता है, इसलिए मूल श्लोकके 'दुःस्थेव' पदमें 'इव' शब्द द्वारा उस दुःखको निषेध किया गया है। अतएव और अधिक वार्त्तालापकी आवश्यकता नहीं है॥३५॥

अग्रतो निःसृता गास्त्वं गोपांश्चानुसर द्रुतम्।
मयोपस्कृत्य सद्भोग्यं वनमध्ये प्रहेष्यते॥३६॥

श्लोकानुवाद—गौएँ और गोपबालक पहले ही बाहर निकल गये हैं, तुम भी शीघ्र ही उनके पीछे जाओ। मैं उत्तम खाद्य-सामग्री बनाकर वनमें भेज दूँगी॥३६॥

दिग्दर्शिनी टीका—तर्हि मयाप्यत्रैव स्थातव्यम्, वने गत्वा च किं भोक्तव्यमिति बाल्यलीलां प्रकाशयन्तमाह—अग्रत इति। सत् उत्कृष्टं द्रुतं प्रहेष्यते॥३६॥

भावानुवाद—श्रीयशोदा माता द्वारा कुछ उत्तर न दिए जाने पर यदि श्रीकृष्ण उन्हें कहें कि तो क्या मैं यहीं पर रहूँ? अर्थात् वन जानेकी कोई आवश्यकता नहीं है क्या और यदि वनमें गया भी तो वहाँ पर खाऊँगा क्या? इसकी आशंकासे श्रीरोहिणीदेवी उनकी बाल्यलीलाका वर्णन करने लगीं—सभी गौएँ और गोपबालकगण पहले ही वनको चले गये हैं, तुम शीघ्र ही उनका अनुगमन करो। मैं सुन्दर-सुन्दर खाद्य-सामग्री तैयारकर वनमें ही भेज दूँगी॥३६॥

श्रीपरीक्षिदुवाच—

तथा वदन्तीं सुस्निग्धां रोहिणीञ्चाभिवाद्य सः।
स्थितं करतले मातुर्नवनीतं शनैर्हसन्॥३७॥
चौर्येणैव समादाय निजज्येष्ठं समाह्वयन्।
अप्राप्याग्रे गवां सङ्गे गतं न बुभुजे घृणी॥३८॥

श्लोकानुवाद—महाराज श्रीपरीक्षितने कहा—स्नेहमयी श्रीरोहिणीदेवीकी इस बातको सुनकर श्रीकृष्णने उनका अभिवादन किया और फिर मृदु हास्य सहित (प्रतिमारूपा) माता यशोदाके हाथोंसे नवनीतको धीरेसे चोरी करके अपने ज्येष्ठ भ्राता श्रीबलदेवको पुकारने लगे। किन्तु वे पहले ही गौओंके साथ चले गये थे, उनको न देखकर कोमल हृदयवाले श्रीकृष्णने स्वयं भी उस नवनीतको नहीं खाया॥३७-३८॥

दिग्दर्शिनी टीका—सुस्निग्धामिति। यशोदातुल्यत्वेन तस्या वचने तस्य विश्वासं ध्वनयति। अभिवाद्य पादयोर्नमामीति वाचा नत्वा स भगवान् कृष्णः मातुः प्रतिमारूपाया यशोदाया करतले स्थितं नवनीतं चौर्येणैव यथा यशोदया न ज्ञायते

तथेत्यर्थः। शनैः समादाय गवां सङ्घे अग्रे गतं निजज्येष्ठं बलरामं सहभोजनार्थं समाह्वयन्नपि तमप्राप्य न बुभूजे तदिति द्वाभ्यामन्वयः। यतो घृणी दयालुः। तस्याः करतले नवनीतस्थितिश्च नवनीतप्रियस्य पुत्रस्य निमित्तं श्रीयशोदाया हस्ते सदा नवनीतावस्थित्या विश्वकर्मणापि तथैव तत्प्रतिमारचनात्। अग्रे गतमिति च निजानुजस्य स्वास्थ्यमिवालक्ष्य तस्य वन्यभोग्येप्सायाः पूर्वमेव रामोऽग्रतो गत इति ज्ञेयम्। तच्च कृष्णस्य गोपीभिः सह स्वैरसम्भाषणेऽसङ्कोचाय पूर्वमपि व्रजे तथैव वृत्तिरिति दिक्॥३७–३८॥

भावानुवाद—सुस्निग्धा श्रीरोहिणीदेवीकी बात सुनकर श्रीकृष्णने उस प्रतिमारूपा यशोदाको ही अपनी जननी समझा, अर्थात् वे श्रीयशोदादेवीके समान ही माता श्रीरोहिणीके वचनों पर विश्वास करते हैं, ऐसा ध्वनित होता है। तब श्रीकृष्णने श्रीरोहिणीदेवीका अभिवादन किया अर्थात् उनके चरणकमलोंमें प्रणाम किया और प्रतिमारूपा माता श्रीयशोदाके हाथोंसे नवनीतको धीरे-धीरे चोरी करके अर्थात् इस प्रकार हँसते-हँसते उस नवनीतको चोरी किया जिससे माँ यशोदा जान न पाये तथा फिर ज्येष्ठ भ्राता श्रीबलदेवके साथ भोजन करनेके लिए उनको पुकारने लगे। किन्तु श्रीबलदेव गौओंके साथ पहले ही चले गये थे, अतः उनको न पाकर दयालु श्रीकृष्णने स्वयं भी भोजन नहीं किया। नवनीत-प्रिय पुत्रके लिए माता श्रीयशोदाके हाथोंमें सदैव नवनीत रहता था, इसलिए विश्वकर्माने उस प्रतिमारूपा श्रीयशोदाके हाथोंमें भी नवनीत रख दिया था। अपने अनुज श्रीकृष्णको अस्वस्थ जानकर श्रीबलदेव भोजन करनेसे पहले ही वनको चले गये हैं, ऐसा समझना चाहिए। सारार्थ यह है कि गोपियोंके साथ श्रीकृष्ण बिना किसी संकोचके सम्भाषण आदि कर पाएँ, इसीलिए श्रीबलदेव पहले ही गौओंके साथ वनमें चले गये हैं; व्रजमें पहले भी यही रीति थी, यही इस विचारका दिग्दर्शन है॥३७–३८॥

भोग्यं माध्याह्निकं चाटुपाटवेन स्वमातरौ।
सम्प्रार्थ्य पुरतो गत्वा गोपीः सम्भाष्य नर्मभिः॥३९॥
रुन्धानो वेणुनादैर्गा वर्त्तमानां सहालिभिः।
राधिकामग्रतो लब्ध्वा सनर्मस्मितमब्रवीत्॥४०॥

श्लोकानुवाद—इस प्रकार विनयपूर्वक दोनों माताओंसे भोजन–सामग्रीकी प्रार्थना कर श्रीकृष्ण कुछ दूर अग्रसर होकर सर्वप्रथम गोपियोंके साथ परिहास करते हुए वार्त्तालाप करने लगे। फिर वेणुनाद द्वारा सभी गौओंको रोककर तथा कुछ आगेकी ओर सखियोंके साथ उपस्थित श्रीमती राधिकाका दर्शन करके मृदुहास्य और परिहासपूर्वक कहने लगे॥३९–४०॥

दिग्दर्शिनी टीका—स्वमातरौ यशोदा–रोहिण्यौ भोग्यं संप्रार्थ्य मातृ–सन्तोषार्थं सम्यक् काकुवादादिना याचित्वा ततः पुरतोऽग्रे गत्वा गोपीः चन्द्रावल्याद्या नर्मभिः सम्भाष्य ततोऽग्रतः आलिभिः सखीभिः सह वर्त्तमानां राधिकां लब्ध्वा सङ्गम्य नर्मणा स्मितेन च सहितं यथा स्यात्तथाब्रवीदिति द्वाभ्यामन्वयः। किं कुर्वन्? वेणुनादैः गोनिरोधनसङ्केतितवेणुवाद्यैः गाः रुन्धानः अग्रे निःसृता गा आवृण्वन् स्थगयन्नित्यर्थः। एवं पूर्वमपि वने गच्छतो भगवतो दर्शनाद्यर्थं श्रीगोपिकागृहेभ्यो निःसृत्य दूरं गताः स्थाने स्थाने संघशोऽतिष्ठन्नितिज्ञेयम्। यथोक्तं पुरस्त्रीभिर्दशमस्कन्धे (श्रीमद्भा॰ १०/४४/१६)—*'प्रातर्व्रजात् व्रजत आविशतश्च सायं, गोभिः समं क्वणयतोऽस्य निशम्य वेणुम्। निर्गत्य तूर्णमबलाः पथि भूरिपुण्याः, पश्यन्ति सस्मितमुखं सदयावलोकम्॥'* इति॥३९–४०॥

भावानुवाद—इस प्रकार अपनी माता श्रीयशोदा तथा श्रीरोहिणीके सन्तोषके लिए श्रीकृष्णने विनयपूर्वक नम्र वचनों द्वारा दोपहरके लिए भोजन–सामग्रीकी प्रार्थना की। तत्पश्चात कुछ दूर अग्रसर होने पर प्रथमतः चन्द्रावली आदि गोपियोंके साथ परिहास करते हुए सम्भाषण किया तथा फिर कुछ और दूर अग्रसर होने पर सखियों सहित खड़ी हुईं श्रीमती राधिकाको देखा तथा मृदु–हास्य सहित परिहासपूर्वक कहने लगे। किस प्रकार? गौओंको रोकनेके लिए संकेतिक वेणुवाद्य द्वारा आगे जानेवाली सभी गौओंको रोककर श्रीराधिका आदिसे स्वच्छन्दरूपमें सम्भाषण करने लगे। इस प्रकार पहले भी व्रजमें वन जाते समय श्रीकृष्णके दर्शनके लिए गोपियाँ अपने घरसे बाहर आकर मार्गमें स्थान–स्थान पर एकत्रित होकर खड़ी रहती थीं, ऐसा समझना चाहिए। इस विषयमें दशम–स्कन्धमें मथुरापुरीकी स्त्रियोंका कथन इस प्रकार है—"वेणुवादन करते–करते गौओंके सहित जब श्रीकृष्ण प्रातःकाल वनको गमन करते थे और सायंकाल व्रजमें लौटते थे, तब

इनके वेणुकी ध्वनि श्रवण करके प्रचुर पुण्यशाली सभी अबलाएँ (व्रजगोपियाँ) घरसे बाहर आकर मार्गके एक ओर खड़ी रहती थीं तथा सदय दृष्टिपूर्ण मृदु-मधुर हास्ययुक्त इनके मुखकमलको निहारती थीं"॥३९-४०॥

श्रीनन्दनन्दन उवाच—

प्राणेश्वरि रहःप्राप्तं भक्तमेकाकिनञ्च माम्।
सम्भाषसे कथं नाद्य तत् किं वृत्तासि मानिनी॥४१॥

श्लोकानुवाद—श्रीनन्दनन्दनने कहा, प्राणेश्वरि! मैं तुम्हारा एकान्तिक भक्त हूँ, मुझे निर्जन स्थान पर देखकर भी मुझसे बातचीत क्यों नहीं कर रही हो? क्या तुम मानिनी हो गई हो?॥४१॥

दिग्दर्शिनी टीका—अप्यर्थे चकारः। सर्वत्रैव यथेष्टं सम्बन्धनीयः। ततश्च रहः प्राप्तमपीत्यादि ज्ञेयम्॥४१॥

भावानुवाद—श्लोकानुवाद द्रष्टव्य है॥४१॥

अपराद्धं मया किन्ते नूनं ज्ञातमहो त्वया।
सर्वज्ञेऽद्यतनस्वप्नवृत्तं तत्तन्ममाखिलम्॥४२॥

श्लोकानुवाद—क्या मैंने तुम्हारे प्रति कोई अपराध किया है? हाँ-हाँ, मैं समझ गया, तुम सर्वज्ञ हो, इसीलिए मेरे द्वारा देखे गये स्वप्नको बिना बताये ही जान गयी हो॥४२॥

दिग्दर्शिनी टीका—तस्या माने च प्रकटं कारणान्तरमनाकलयन् निजं तत्स्वाप्निकमेव तन्निदानत्वेनोद्भावयति—अपेति। नूनं वितर्के; अहो आश्चर्यम्; हे सर्वज्ञे! मम योऽद्यतनः स्वप्नस्तस्य वृत्तं तत्तत् पूर्वोद्दिष्टं वक्ष्यमाणं चाखिलमेव त्वया ज्ञातम्। एवं मदीय-स्वाप्निकापराधादेव त्वया मानः कृतोऽस्ति, ततश्च परजनस्वप्नवृत्तज्ञानात् सत्यमेव त्वं सर्वज्ञासीति भावः। एतादृश्युक्तिपरिपाटी च मानभञ्जनार्था। न च मन्तव्यं प्रतिमासु भगवत एतादृशं वचनादिकं कथं घटेतेति यतः पूर्वमपि व्रजे श्रीभगवतीनामासं निरन्तरप्रेमवैवश्येन जड़तापत्तेः प्रतिमातुल्यत्वमेव। कदाचिद्वा कृष्णस्य वैदग्धीप्रभावेण नर्मक्रीड़ादिकं यद्वृत्तम्, तत्र चाधुना भावविशेषप्राप्त्या स्वस्मिन् मानानुमानेन मौनाद्यनुसन्धानात्तस्य तादृशवचनादिकं सर्वं सङ्गच्छत एवेति दिक्॥४२॥

भावानुवाद—श्रीमती राधिकाजीके मान करनेका कोई प्रकट कारण न देखकर श्रीकृष्ण अपने स्वप्नके वृत्तान्तको ही उनके मानका कारण स्थिर कर रहे हैं। इसलिए 'अपराद्ध' इत्यादि श्लोकमें कह रहे हैं कि क्या मैंने तुम्हारे प्रति कोई अपराध किया है? यहाँ पर 'नून' शब्द वितर्कके अर्थमें है। अहो! कैसा आश्चर्य है! हे सर्वज्ञे! लगता है कि तुम मेरे द्वारा देखे गये स्वप्नके वृत्तान्तको (जो पहले भी बताया गया है तथा यहाँ पर भी बतलाया जायेगा) सम्पूर्णरूपसे जान गयी हो। मेरे द्वारा ऐसे स्वप्न देखनेके अपराधके कारण ही क्या तुम मानिनी हो गयी हो? किन्तु उस स्वप्नके वृत्तान्तको दूसरा कोई भी नहीं जानता है। अतएव तुम सचमुच ही सर्वज्ञा हो। श्रीकृष्णकी ऐसी वचन-परिपाटी केवल मान भञ्जनके लिए ही समझनी चाहिए।

इस प्रकारका मन्तव्य नहीं किया जा सकता कि प्रतिमारूपा श्रीमती राधिकाके प्रति श्रीकृष्णने ऐसे वचन क्यों कहे? इसका कारण है कि पहले भी व्रजमें यह भगवती श्रीराधिका प्रेमकी विवशताके कारण निरन्तर जड़ अवस्थाको प्राप्त कर प्रतिमातुल्य हो जाया करती थीं, अथवा कभी-कभी श्रीकृष्णकी वैदग्धीके प्रभावसे नर्म-क्रीड़ा आदिमें भी उनका इसी प्रकारका जाड्यभाव देखा जाता था। विशेषतः इस समय श्रीकृष्ण कोई एक ऐसी भावावस्थाको प्राप्त हुए हैं तथा उसी अवस्थामें वह श्रीराधिकाके मौन होनेके कारणको जाननेके लिए अपने प्रति उनके मानके उदय होनेका अनुमान करके इस प्रकारके वचनोंका प्रयोगकर रहे हैं, इसलिए यह सब सुसंगत ही है। यही इस सिद्धान्तका दिग्दर्शन है॥४२॥

त्वां विहायान्यतो गत्वा विवाहा बहवः कृताः।
तासां क्षितिपपुत्रीणामुद्यतानां मृतिं प्रति।
पुत्रपौत्रादयस्तत्र जनिता दूरवर्त्तिना॥४३॥

श्लोकानुवाद—हे प्रियतमे! मैंने स्वप्नमें देखा है कि मानो मैं तुम्हें छोड़कर दूर द्वारकामें चला गया हूँ तथा वहाँ पर मैंने बहुतसे विवाह किये हैं। विवाहका कारण सुनो, मेरे लिए मरनेको भी जो तैयार थीं,

उन राजकन्याओंसे मैंने विवाह किया तथा उनके गर्भसे अनेक पुत्रोंको उत्पन्न किया और फिर उन पुत्रोंके भी बहुतसे पुत्र उत्पन्न हुए॥४३॥

दिग्दर्शिनी टीका—स्वप्नवृत्तमेवाह—त्वामिति। अन्यतो मथुरादौ दूरे द्वारकादौ वर्त्तिना मया॥४३॥

भावानुवाद—श्रीकृष्ण प्रतिमारूपा श्रीमती राधाको अपने स्वप्नका वृत्तान्त सुना रहे हैं। हे देवि! मैंने स्वप्नमें देखा है कि मैं तुम्हें छोड़कर मधुपुरी (मथुरा) तथा फिर मधुपुरीसे दूरस्थित द्वारकापुरीको चला गया हूँ॥४३॥

अस्तु तावदिदानीं तद्गम्यते त्वरया वने।
सन्तोषदे प्रदोषेऽद्य मया त्वं मोदयिष्यसे॥४४॥

श्लोकानुवाद—अभी इन सभी बातोंको यहीं रहने दो, अब मैं शीघ्र ही वनको जा रहा हूँ। हे सन्तोषदायिनी! मैं आज सायंकालमें तुम्हें आनन्दित करूँगा॥४४॥

दिग्दर्शिनी टीका—तत् स्वप्नवृत्तं तदीयमानिनीत्वं वा इदानीमस्तु। यत इदानीं त्वरया वने गम्यते मया॥४४॥

भावानुवाद—जो भी हो, अब इस समय उस स्वप्नकी बात तथा तुम्हारे मानको यहीं रहने दो, क्योंकि मैं अभी शीघ्रतासे वनको जा रहा हूँ। हे सन्तोषदायिनी! मैं आज सायंकाल तुम्हें आनन्द प्रदान करूँगा॥४४॥

श्रीपरीक्षिदुवाच—

इत्थं सपुष्पविक्षेपं वदन् दृष्ट्वा दिशोऽखिलाः।
तां सचुम्बनमालिङ्ग्य गोगोपैः सङ्गतोऽग्रतः॥४५॥

श्लोकानुवाद—श्रीपरीक्षित महाराजने कहा—इस प्रकार स्वप्नके वृत्तान्तको सुनाकर श्रीनन्दनन्दनने श्रीमती राधिकाके दिव्य अङ्गों पर पुष्प निक्षेप किये (फैंके) और फिर इधर-उधर दृष्टिपात कर उनको चुम्बन सहित आलिङ्गन करके आगे जा रही गौओं और गोपबालकोंके साथ जा मिले॥४५॥

दिग्दर्शिनी टीका—पुष्पाणां विक्षेपः श्रीराधायां प्रक्षेपस्तेन सहितं यथा स्यात्तथा इत्थमुक्तप्रकारकं वदन्। गोभिर्गोपैश्च सहाग्रतो गत्वा मिलित इत्यर्थः॥४५॥

भावानुवाद—श्लोकानुवाद द्रष्टव्य है॥४५॥

अदृष्टपूर्वं व्रजवेशमद्भुत महामनोज्ञं मुरलीरवान्वितम्।
यदान्वभूत् स्नेहभरेण देवकी, तदैव वृद्धाप्यजनि स्नुतस्तनी॥४६॥

श्लोकानुवाद—जब श्रीदेवकीने श्रीकृष्णके पहले कभी न देखे हुए अत्यधिक मनोहर मुरलीवादनमें रत उस अद्भुत व्रजवेशका दर्शन किया, तब वृद्धा होने पर भी स्नेहपूर्वक उनके स्तनोंसे दूध बहने लगा॥४५॥

दिग्दर्शिनी टीका—एवं व्रजजनेषु भगवतो भावविशेषमुक्त्वेदानीमेतत् प्राक्तनमन्येषामपि वृत्तं यथाप्रसङ्गं कथयन् तेषामेव माहात्म्यविशेषसिद्धये तदीयवन्यवेशाद्यनुभवेन देवक्यादीनां भावविशेषाविर्भावमाह—अदृष्टेति चतुर्भिः। वृद्धा गतवया इति स्तन्यप्रस्नवासम्भव उक्तः। तथापि स्नेहभरेण स्नुतौ प्रस्नुतक्षीरौ स्तनौ यस्यास्तथाभूता जाता॥४५॥

भावानुवाद—इस प्रकार व्रजवासियोंके प्रति श्रीकृष्णके विशेष भावको बतलाकर अब पूर्वकालमें हुए उनके विभिन्न वृत्तान्तोंको प्रसंगके साथ उत्थापन कर रहे हैं तथा व्रजवासियोंके विशेष माहात्म्यको स्थापित करनेके लिए श्रीकृष्णके वन्यवेश आदिके अनुभव द्वारा श्रीदेवकी आदिमें जिन विशेष-विशेष भावोंका आविर्भाव हुआ था, उसे 'अदृष्टपूर्व' इत्यादि चार श्लोकोंके माध्यमसे बतला रहे हैं। यद्यपि श्रीदेवकी वृद्धा थीं अर्थात् उनके स्तनोंमें से दूध आनेकी आयु बीत चुकी थी अथवा उनके स्तनोंसे दूध बहना असम्भव था, तथापि अत्यधिक स्नेहके कारण उनके स्तनोंसे दूध प्रवाहित होने लगा॥४६॥

रुक्मिणी–जाम्बवत्याद्याः पुरानुत्थेन कर्हिचित्।
महाप्रेम्णा गता मोहं धैर्यहान्यापतन् क्षितौ॥४७॥

श्लोकानुवाद—श्रीरुक्मिणी-जाम्बवती जैसी कुछ महिषियाँ पहले कभी न अनुभव किये गये उस महाप्रेमके उदय होनेसे धैर्यको खो बैठीं तथा मूर्च्छित होकर भूमि पर गिर पड़ीं॥४७॥

दिग्दर्शिनी टीका—सहजमहाधैर्यगाम्भीर्यादियुक्ता अपि श्रीरुक्मिण्यादयः कामविशेषोदयेनामुह्यन्नित्याह—रुक्मिणीति। आद्य-शब्देन मित्रविन्दा-सत्या-भद्रा-लक्ष्मणादयः। कर्हिचित् कदाचिदपि पुरानुत्थेन पूर्वमजातेन महाप्रेम्णा या धैर्यस्य हानिस्तया मोहं गताः सत्यः क्षितावपतन्॥४७॥

भावानुवाद—यद्यपि श्रीरुक्मिणी आदि महिषियाँ स्वभावसे ही महाधैर्यशील और महागम्भीर थीं, तथापि श्रीकृष्णके अद्भुत गोपवेशका दर्शन करके अत्यधिक कामवशतः अर्थात् महाप्रेमके उदित होनेके कारण वे मूर्च्छित होकर गिर पड़ीं। 'आदि' शब्द द्वारा मित्रविन्दा, सत्या, भद्रा, लक्ष्मणा आदि महिषियोंको समझना चाहिए। उनमें से कुछ महिषियाँ अभूतपूर्व महाप्रेमके प्रभावसे अधीरतावश मूर्च्छित होकर भूमि पर गिर पड़ीं॥४७॥

वृद्धा च मत्ता सह सत्यभामया, कामस्य वेगादनुकुर्वती मुहुः।
आलिङ्गनं चुम्बनमप्यधावद्धर्तुं हरिं बाहुयुगं प्रसार्य॥४८॥

श्लोकानुवाद—वृद्धा पद्मावती भी श्रीसत्यभामाके साथ कामवेगसे मत्त होकर बार-बार अपने हाथोंको फैलाकर आलिङ्गनका अभिनय तथा अधर-चालन आदिकी मुद्रा द्वारा चुम्बनका अनुकरण करते-करते श्रीहरिको पकड़नेके लिए दौड़ीं॥४८॥

दिग्दर्शिनी टीका—श्रीसत्यभामा-पद्मावत्योश्च महोन्मादो बभूवेत्याह—वृद्धा चेति। आलिङ्गनमनुकुर्वती बाहुप्रसारणादिनाभिनयन्ती कुर्वतीवेति वा। चुम्बनमप्यधरचालन-मुद्रादिनानुकुर्वती हरिं श्रीकृष्णं धर्तुमधावत्॥४८॥

भावानुवाद—श्रीसत्यभामाके साथ वृद्धा पद्मावती भी महा-उन्मादकी दशाको प्राप्त हुई, अर्थात् कामवेगके वशीभूत होकर पुनः-पुनः हाथोंको फैलाकर आलिङ्गनका अनुकरण और ओष्ठ-चालनकी मुद्रा द्वारा चुम्बनका अनुकरण करते-करते श्रीहरिको पकड़नेके लिए दौड़ीं॥४८॥

पुरा तदर्थानुभवादिवासौ, कथञ्चिदादित्यसुतावलम्ब्य।
शमं समं प्राज्ञवरोद्धवेन, बलाद्विकृष्यावरुरोध ते द्वे॥४९॥

श्लोकानुवाद—पहले व्रजभूमिमें श्रीकृष्णके वनवेश आदिके साक्षात् अनुभवके कारण बुद्धिमती सूर्यपुत्री श्रीकालिन्दीदेवीने अत्यधिक कष्टपूर्वक धैर्य धारण किया तथा श्रीउद्धवकी सहायतासे बलपूर्वक उन दोनोंको पकड़कर रास्तेमें ही रोक लिया॥४९॥

दिग्दर्शिनी टीका—पुरा पूर्वं व्रजभूमौ तस्यार्थस्य वन्यवेशादेरनुभवाद्धेतोः इवेत्यूत्प्रेक्षायां वस्तुतो भगवन्मोहापगमार्थं ब्रह्मकृतोपायरक्षार्थमेव परमयत्नेन शान्त्यवलम्बनात्। असौ तत्तद्व्रजक्रीड़ासम्बन्धसौभाग्यवती आदित्यसुता श्रीकालिन्दी कथञ्चिच्छममवलम्ब्य। यतः प्राज्ञवरा; एतच्च अत्यभिज्ञयेति पूर्वोक्तवदूह्यम्। उद्धवेन समं सहिता। ते सत्यभामा-पद्मावत्यौ द्वे इति द्वयोरावरणं द्वाभ्यामेव घटत इति बोधयति। तत्र च सत्यभामां कालिन्दीवृद्धां चोद्धव इति अभियुक्तिः॥४९॥

भावानुवाद—द्वारकापुरीमें आनेसे पहले व्रजभूमिमें ही श्रीकृष्णके वन्यवेश आदिके अनुभवके कारण सूर्यपुत्री श्रीकालिन्दीदेवीने कुछ धैर्य धारण किया। यद्यपि यह अनुमान है, तथापि श्रीकालिन्दीदेवीने श्रीकृष्णकी मूर्च्छा दूर करनेके लिए तथा श्रीब्रह्मा द्वारा किये गये उपायकी रक्षाके लिए यत्नपूर्वक कुछ शान्त भावका अवलम्बन किया, क्योंकि पहलेसे ही व्रजक्रीड़ासे सम्बन्धित होनेके कारण वे परम सौभाग्यवती और परम बुद्धिमती थीं। इसलिए श्रीउद्धवकी सहायतासे उन्होंने बलपूर्वक दोनोंको रोक दिया। अर्थात् उन्होंने श्रीसत्यभामाको तथा श्रीउद्धवने पद्मावतीको रोक दिया॥४९॥

गोविन्ददेवस्त्वनुचारयन् गा, गतः पुरस्तादुदधिं निरीक्ष्य।
तं मन्यमानो यमुनां प्रमोदात्, सखान् विहाराय समाजुहाव॥५०॥

श्लोकानुवाद—इधर श्रीगोविन्ददेव गोचारण करते-करते कुछ दूरी पर अपने सम्मुख समुद्रको देखकर यमुनाके भ्रमसे आनन्दित होकर जलविहारके लिए अपने सखाओंको पुकारने लगे॥५०॥

दिग्दर्शिनी टीका—एवं प्रासङ्गिकं समाप्य प्रस्तुतं श्रीभगवदाचरितमेवाह— गोविन्देति। पुरस्तादग्रे गतः सन्; उदधिं द्वारकापुरीं परिखारूपं लवणसमुद्रं; तमुदधिञ्च श्यामकान्त्यादिना यमुनासादृश्यात् यमुनामेव मन्यमानः; विहाराय तत्र विहर्तुकामः; सखान् श्रीदामादिगोपान् सम्यक् तत्तन्नामभिरुच्चमधुरस्वरेणाह्वयत्॥५०॥

भावानुवाद—इस प्रकार प्रासङ्गिक विषयको समाप्त करके प्रस्तुत विषयका अनुसरण कर रहे हैं अर्थात् नव-वृन्दावनमें श्रीकृष्णके द्वारा किये गये आचरणको 'गोविन्द' इत्यादि श्लोकके माध्यमसे बतला रहे हैं। श्रीगोविन्द गोचारण करते-करते कुछ दूर अग्रसर हुए तथा सामने द्वारकापुरीके समुद्रको देखकर श्रीयमुनाके भ्रमसे अर्थात् समुद्रकी श्याम कान्तिके साथ श्रीयमुनाकी सादृश्यताके कारण उसीको यमुना मानकर उसमें जलविहार करनेकी अभिलाषासे श्रीदाम आदि सखाओंका नाम ले-लेकर मधुर अथवा उच्च स्वरसे उनको पुकारने लगे॥५०॥

गताः कुत्र वयस्याः स्थ श्रीदामन् सुबलार्ज्जुन।
सर्वे भवन्तो धावन्तो वेगेनायान्तु हर्षतः॥५१॥
कृष्णायां पाययित्वा गा विहराम यथासुखम्।
मधुरामलशीताम्बुवाहिन्यामवगाह्य च॥५२॥
एवमग्रे सरन् गोभिरम्बुधेर्निकटं गतः।
महाकल्लोलमालाभिः कोलाहलवतोऽच्युतः॥५३॥

श्लोकानुवाद—"हे श्रीदाम, हे सुबल, हे अर्जुन, हे सखागण! तुम सब कहाँ गये हो? तुम सभी प्रसन्नतापूर्वक यहाँ पर आओ। यथाशीघ्र आओ, हम सभी गौओंको जलपान कराकर इस मधुर-स्वच्छ-शीतल-जलको वहन करनेवाली श्रीयमुनामें अवगाहन करके सुखपूर्वक विहार करें।" इस प्रकार श्रीअच्युत सभी गौओंके साथ अग्रसर होकर कोलाहलयुक्त महातरङ्गायमान समुद्रके निकट उपस्थित हुए॥५१-५३॥

दिग्दर्शिनी टीका—तत् प्रकारमेवाह—गता इति द्वाभ्याम् । भो वयस्याः! कुत्र गताःस्थ। किमर्थम्? तदाह—कृष्णायामिति। अवगाह्य निमज्ज्य॥५१-५२॥

एवमुक्तप्रकारेण गोभिः सहाग्रे सरन् गच्छन्। कथम्भूतस्य? महतां कल्लोलानां तरङ्गाणां मालाभिः श्रेणीभिः कृत्वा कलकलशब्दयुक्तस्य। अनेन यमुनावैलक्षण्यम-उक्तम्॥५३॥

भावानुवाद—'गता' इत्यादि दो श्लोकोंमें जल विहारका वर्णन कर रहे हैं। हे सखाओं! तुम कहाँ चले गये हो? सभी यहाँ पर आओ। किसलिए? यमुनामें अवगाहन करके सुखपूर्वक विहार करेंगे। इस

प्रकार सभी गौओंके साथ चलते-चलते श्रीकृष्ण उच्च तरंगोंसे सुशोभित तथा कोलाहलयुक्त समुद्रके निकट उपस्थित हुए। यहाँ पर श्रीयमुनाके साथ समुद्रका अंतर कथित हुआ है॥५१-५३॥

सर्वतो वीक्ष्य तत्तीरे प्रकटां स्वां महापुरीम्।
आलक्ष्य किमिदं क्वाहं कोऽहमित्याह विस्मितः॥५४॥

श्लोकानुवाद—तब श्रीकृष्ण चारों ओर निरीक्षण करते हुए उस महासागरके तीर पर सुशोभित अपनी द्वारकापुरीको देखकर बड़े ही विस्मित हुए तथा कहने लगे, "अहो! यह क्या है? मैं कहाँ पर हूँ? मैं कौन हूँ?"॥५४॥

दिग्दर्शिनी टीका—ततश्च सर्वतः इतस्ततो वीक्ष्य निरीक्षणं कृत्वा। तस्य अम्बुधेस्तीरे प्रकटां वनाद्बहिर्गमनेनावरणाभावाद् व्यक्तीभूतां स्वकीयां महतीं बृहत्तरां पुरीं द्वारकामालक्ष्य विस्मितः सन् स्वस्मिन्नेवाह—किमिदं समुद्रादिकं, किं व्रजभूमावस्यां, कथमेतदभूदित्यर्थः। तर्हि सा व्रजभूमिरेवेयं न भवेदित्याह—क्व कुत्राहं वर्त्तेऽस्मि? द्वारकायामिति चेत्तर्हि श्रीनन्दनन्दनस्य मम तद्व्रजभूमेरन्यत्र वृत्तिर्न सम्भवेदेव। अतोऽन्य एव कोऽपि स्यामित्याह—कोऽहमिति। यद्वा, तर्हि द्वारकायां परम राजराजेश्वरतायाः परमविलक्षणवेशादिकमिदं न सम्भवतीत्येव-मात्मानमेवानवधारयन्नाह—कोऽहमित्येषा दिक्। अलमतिविस्तरेण॥५४॥

भावानुवाद—तब श्रीकृष्ण चारों ओर निरीक्षण करते-करते उस समुद्रतट पर सुरम्य वन आदिके आवरणसे रहित प्रकाशमान अपनी विराट द्वारकापुरीको देखकर विस्मयपूर्वक कहने लगे, "अहो! यह क्या? इस व्रजभूमिमें समुद्र कहाँसे आया? तो क्या यह व्रजभूमि नहीं है? मैं कहाँ पर हूँ? क्या सचमुच यह द्वारकापुरी है? अच्छा, तो फिर मैं नन्दनन्दन कैसे हुआ? नन्दनन्दनका तो व्रजभूमिके अलावा अन्य किसी स्थान पर भी वास असम्भव है, तो क्या मैं नन्दनन्दन नहीं हूँ? मैं कौन हूँ? अथवा यदि मैं द्वारकामें हूँ तो फिर मेरे परम राजराजेश्वर स्वरूप और वेशसे अत्यन्त विलक्षण यह व्रजवेश किस प्रकार सम्भव हुआ? अतएव मैं कौन हूँ?"॥५४॥

इत्येवं सचमत्कारं मुहुर्जल्पन् महार्णवम्।
पुरीञ्चालोचयन् प्रोक्तः श्रीमत्सङ्कर्षणेन सः॥५५॥

श्लोकानुवाद—इस प्रकार आश्चर्यचकित होकर श्रीकृष्ण जब बार-बार जल्पना करने लगे तथा समुद्र और द्वारकापुरीको पुनः-पुनः देखने लगे, तब श्रीसंकर्षण (श्रीबलदेव)ने कहा— ॥५५॥

दिग्दर्शिनी टीका—मुहुरालोचयन् अवलोकयन्। यद्वा, सत्यं मिथ्या वेत्यादि-प्रकारेण विचारयन् सन्; स भगवान्॥५५॥

भावानुवाद—इस प्रकार विस्मित होकर भगवान् बार-बार जल्पना करने लगे तथा समुद्र और द्वारकापुरीको पुनः-पुनः उत्सुकतापूर्वक देखने लगे; अथवा जो दर्शन कर रहा हूँ, वह सत्य है अथवा मिथ्या—इस प्रकारसे बार-बार विचार करने लगे॥५५॥

श्रीबलदेव उवाच—

आत्मानमनुसन्धेहि वैकुण्ठेश्वर मत्प्रभो।
अवतीर्णोऽसि भूभारहाराय ज्ञापितोऽमरैः॥५६॥
दुष्टान् संहार तच्छिष्टान् प्रतिपालय सम्प्रति।
यज्ञं पैतृस्वसेयस्य धर्मराजस्य सन्तनु॥५७॥

श्लोकानुवाद—श्रीबलदेवने कहा—हे प्रभो वैकुण्ठेश्वर! अपने आपको समझिये, आप देवताओंके द्वारा प्रार्थना किये जाने पर भूभार हरणके लिए इस धराधाममें अवतीर्ण हुए हैं। अतएव अब दुष्टोंका संहार और शिष्टजनोंका परिपालन कीजिए तथा अपनी बुआके पुत्र धर्मराज युधिष्ठिरके यज्ञका विस्तार कीजिए॥५६-५७॥

दिग्दर्शिनी टीका—आत्मानं भगवन्तम् अनुसन्धेहि प्रत्यभिजानीहि। कथं तदाह—हे वैकुण्ठेश्वरेति। किञ्च मम शेषस्य प्रभो! स्वामिन्! तर्हि कथमत्रास्मि? तत्राह—अमरैर्ब्रह्मादिभिर्ज्ञापितः सन् भुवो भारस्य हाराय संहरणायावतीर्णोऽसि। वैकुण्ठेश्वरत्वादिना आत्मानमनुसन्धेहीत्यर्थः। यद्वा, अनुसन्धेहि अनुस्मर। ननु श्रीनन्दनन्दनमात्मानमनुस्मराम्येव? तत्राह—वैकुण्ठेश्वरत्वादि। अयमर्थः—सत्यमेव श्रीनन्दनन्दनस्त्वमसि; तथापि वैकुण्ठान्मया सह यदर्थमवतीर्णोऽसि, तत् सम्पादयेति। तदेवाह—दुष्टानिति। यद्यपि श्रीगोलोकादेवावतीर्णोऽसि, तथापि तस्य बहुधा वैकुण्ठेन सहाभेदात्। यद्वा, श्रीवैकुण्ठेश्वरादिभिः सर्वैरेव निजरूपैरेकीभूयावतरणेन वैकुण्ठादप्यव-अतीर्णताप्राप्तेस्तथोक्तमिति दिक्। तत्र च यद्यपि श्रीवृन्दावनविहारादिना निजचरणारविन्द-प्रेम विशेष-विस्तारणमेव मुख्यं प्रयोजनम्, तथापि तदत्र न प्रकाशयति। तेन पुनर्मोहापत्तिशङ्कया; अतएव श्रीगोलोकेश्वरेति च नोक्तमिति ज्ञेयम्। यद्वा,

दुष्टसंहरणशिष्ट–प्रतिपालनरूप–भूभारहरण प्रयोजने सम्पादिते सत्येव स्वयं क्रमशः तन्मुख्यप्रयोजनमपि निर्विघ्नं सुष्टु सेत्स्यत्येवेत्यभिप्रायेणेति दिक्। तत्तस्मात् अतएवोपसन्नं निजप्रियतम–जनार्थं सम्पादयेत्याह—सम्प्रतीति। धर्मराजस्य श्रीयुधिष्ठिरस्य यज्ञं सम्प्रति सन्तनु सम्यग्विस्तारय॥५६–५७॥

भावानुवाद—आत्मानुसन्धान कीजिए अर्थात् अपनेको श्रीभगवान्के रूपमें पहचानिए। इसीलिए श्रीबलदेवने 'हे वैकुण्ठेश्वर' कहकर उनको सम्बोधन किया और कहने लगे, हे प्रभु! मैं शेष (अनन्तदेव) हूँ और आप मेरे प्रभु हो। यदि श्रीकृष्ण कहें कि मैं यहाँ पर क्यों हूँ? इसके उत्तरमें कह रहे हैं कि आप ब्रह्मा आदि देवताओंके द्वारा प्रार्थना किये जाने पर भूभार हरण करनेके लिए इस धराधाममें अवतीर्ण हुए हैं। अतएव अपनेको वैकुण्ठेश्वर जानिये अर्थात् अपनेको वैकुण्ठेश्वरके रूपमें स्मरण कीजिए। यदि कहो कि मैं तो केवल श्रीनन्दनन्दनके स्वरूपमें ही अपनेको जानता हूँ। इसके लिए कह रहे हैं—हे प्रभो! यद्यपि आप सचमुच ही श्रीनन्दनन्दन हैं, तथापि आप वैकुण्ठसे मेरे साथ यहाँ पर आये हैं तथा जिस कार्यके लिए अवतीर्ण हुए हैं, उस कार्यको पूर्ण कीजिए—दुष्टोंका संहार और शिष्टोंका पालन करना ही आपका कर्त्तव्य है।

यद्यपि आप श्रीगोलोकसे अवतीर्ण हुए हैं, तथापि मैंने आपके वैकुण्ठसे अवतीर्ण होनेकी जो बात कही है, उसका अभिप्राय यह है कि श्रीगोलोकके साथ वैकुण्ठका बहुत प्रकारसे अभेद है। अथवा आपको 'वैकुण्ठेश्वर' आदि सम्बोधन करनेका और भी कारण है, उसको भी सुनिए। श्रीवैकुण्ठेश्वर आदि सभी भगवत्स्वरूप ही आपके इस श्रीनन्दनन्दन स्वरूपके साथ एकीभूत होकर वैकुण्ठसे अवतीर्ण होते हैं, अतएव आपके इस श्रीनन्दनन्दन स्वरूपके लिए वैकुण्ठेश्वर आदि नाम दिये जानेसे भी कुछ दोष नहीं होता। इस समय यद्यपि श्रीकृष्ण स्वयं श्रीनन्दनन्दन–स्वरूपसे श्रीवृन्दावनमें विहार कर अपने श्रीचरणकमलोंके विशेष प्रेमका विस्तार करनेके लिए अवतीर्ण हुए हैं तथा यही उनके अवतरणका मुख्य प्रयोजन है, तथापि व्रजसे सम्बन्धित लीलाकथाके श्रवणसे उन्हें पुनः मूर्च्छा हो सकती है, इसी आशंकासे श्रीबलदेवने उसको प्रकाशित नहीं किया। अर्थात् गोलोकेश्वर

इत्यादि सम्बोधन नहीं किया—ऐसा समझना चाहिए। अथवा दुष्ट–संहार और शिष्ट–पालन आदि भूभार–हरणरूप प्रयोजनके पूर्ण होने पर स्वयं भगवत्स्वरूपसे किये जानेवाला वह मुख्य प्रयोजन स्वतः ही निर्विघ्नरूपसे पूर्ण होगा। अतएव उसको यहाँ पर बतलानेकी कोई आवश्यकता नहीं है, इसीलिए उक्त प्रकारसे वाक्योंको व्यवस्थित किया गया है। अतएव अपने प्रियतम व्यक्तियोंका मंगल कीजिए अर्थात् इस समय धर्मराज युधिष्ठिरके यज्ञका सम्पूर्णरूपसे विस्तार कीजिए॥५६–५७॥

प्रतिष्ठितस्त्वयैवासौ चक्रवर्त्ती युधिष्ठिरः।
अनुशाल्वादिदुष्टानां विभेति वरविक्रमात्॥५८॥

श्लोकानुवाद—आपने ही धर्मराज युधिष्ठिरको चक्रवर्त्ती राजाके पद पर प्रतिष्ठित किया है। किन्तु इस समय वे अनुशाल्व आदि दुष्टोंके बल–विक्रमको देखकर भयभीत हैं॥५८॥

दिग्दर्शिनी टीका—तच्च तवावश्यकर्त्तव्यमेवेत्याह—प्रतीति। तथापि त्वां विना यज्ञेऽसौ न शक्त इत्याशयेनाह—अनुशाल्वः शाल्वस्य कनीयान् तदादीनां, यो वरो महान् विक्रमस्तस्माद्विभेति॥५८॥

भावानुवाद—दुष्टोंका संहार और शिष्टोंका पालन करना आपका आवश्यक कर्त्तव्य है, इसे 'प्रतिष्ठित' इत्यादि श्लोक द्वारा कह रहें हैं। यद्यपि आपने ही धर्मराज युधिष्ठिरको चक्रवर्त्ती राजाके पद पर प्रतिष्ठित किया है, तथापि आपके बिना वे यज्ञ करनेमें असमर्थ हैं, क्योंकि शाल्व राजाके छोटे भाई अनुशाल्वके महान विक्रमको देखकर वे अत्यन्त भयभीत हैं॥५८॥

तत्तत्र गत्वा तान् हन्तुं यतस्व यदुभिः सह।
तवैव वैरतस्ते हि तावकान् पीड़यन्ति तान्॥५९॥

श्लोकानुवाद—अतएव अब आप यादवोंके साथ श्रीयुधिष्ठिरके पास जाकर सभी दुष्टोंका संहार कीजिए। आपके साथ उन दुष्टोंका वैरभाव ही उनके द्वारा आपके प्रिय श्रीयुधिष्ठिरको पीड़ा देनेका विशेष कारण है॥५९॥

दिग्दर्शिनी टीका—एवं परममधुरकोमलप्रेम-महारसत्याजनाय तत्प्रतिकूल-रौद्रक्रोधरसमुत्थापयितुमाह—तदिति। यदुभिः सह यतस्वेति। एकाकिनानायासेन तद्धननमशक्यमिति भावः। एतच्च क्रोधजननार्थमेव; एवं तवेत्यादि च; वैरतः शल्वादिवधात्। तवैवेति, अजातशत्रोर्धर्मराजस्य तस्य स्वतो द्वेषाभावात्। ते अनुशाल्वादयः; तान् युधिष्ठिरादीन्॥५९॥

भावानुवाद—इस प्रकार श्रीकृष्णके परममधुर कोमल महाप्रेमरसके आवेशको शान्त करनेके लिए श्रीबलराम उसके प्रतिकूल रौद्र-रसको उत्थापित करके कहने लगे कि इस समय आप यादवोंके साथ इन्द्रप्रस्थ जाकर अनुशाल्व आदि दुष्टोंका संहार करनेके लिए प्रयत्न कीजिए। यहाँ पर श्रीबलदेव द्वारा 'यादवगणोंके साथ' कहनेका तात्पर्य यह है कि श्रीकृष्ण अकेले उनका संहार नहीं कर पायेंगे, यादवोंके साथ ही कर पायेंगे। किन्तु ऐसी उक्ति केवल श्रीकृष्णको क्रोधित करनेके लिए ही है—ऐसा समझना चाहिए। श्रीबलदेवने कुछ और भी कहा, अजातशत्रु धर्मराज युधिष्ठिर किसीके प्रति भी द्वेष अथवा वैरभाव नहीं रखते हैं, इसलिए स्वभावतः उनका कोई भी शत्रु नहीं है। किन्तु आपके साथ वैर होनेके कारण ही अनुशाल्व आदि दुष्ट आपके आश्रित श्रीयुधिष्ठिरको पीड़ा दे रहे हैं, क्योंकि आपने ही उसके बड़े भाई शाल्वका वध किया है॥५९॥

श्रीपरीक्षिदुवाच—

एवं रसान्तरं नीत्वानुजं स्वस्थयितुं वचः।
यदुक्तं बलरामेण श्रुत्वा भावान्तरं गतः॥६०॥

श्लोकानुवाद—महाराज श्रीपरीक्षितने कहा—श्रीबलरामने श्रीकृष्णको इस प्रकार रसान्तरमें ले जाकर स्वस्थ करनेके लिए जो कुछ भी कहा, उसे सुनकर श्रीकृष्ण एक अन्य भावावस्थाको प्राप्त हुए॥६०॥

दिग्दर्शिनी टीका—नीत्वा प्रापय, तत् श्रुत्वा; भावो मनोवृत्तिविशेषः। पूर्वमशेषरससारभूतः-प्रेमरससंप्लुत आसीत्, इदानीञ्च वीररसमभजदित्यर्थः। अत्र परश्लोकस्थं भगवानिति कर्त्तृपदं ज्ञेयम्; किम्वा द्वाभ्याम् श्लोकाभ्यामेवान्वयः॥६०॥

भावानुवाद—इससे पूर्व श्रीकृष्ण असीम रसोंके सारसे उत्पन्न-प्रेमरसमें निमग्न थे, किन्तु अब श्रीबलदेवने उनको उस प्रेमरससे वीररसमें

लाकर स्वस्थ करनेके लिए जो कुछ भी कहा, श्रीकृष्ण उसको सुनकर भावान्तर अर्थात् वीररसमें विभावित हो गये। अगले श्लोकके 'भगवान्' शब्दको इस श्लोकका भी कर्त्तृपद (कर्त्ता) जानना होगा। अथवा दोनों श्लोकोंका एक साथ ही अन्वय होगा॥६०॥

जगाद भगवान् क्रुद्धो भ्रातः शाल्वानुजादयः।
के ते वराका हन्तव्या गत्वैकेन मयाधुना॥६१॥

श्लोकानुवाद—भगवान्ने क्रोधित होकर कहा—भैया! उस शाल्वके अनुज आदि कौन हैं? वे तो अत्यन्त तुच्छ हैं, मैं अकेला ही उनका संहार कर दूँगा॥६१॥

दिग्दर्शिनी टीका—अतएव क्रुद्धःसन् जगाद। किं तदाह—भ्रातः इत्यादिपादैः पञ्चभिः। ते के कतमे भवन्ति, अपि तु न केऽपि। केष्वपि मध्ये न गण्यन्त इत्यर्थः। यतो वराकाः अतितुच्छाः। यद्वा, ते के वराका भवन्ति, अपितु वराकेष्वपि न गण्यन्त इत्यर्थः, परमाधमत्वात्। अतोऽधुनैव एकाकिना मया गत्वा ते हन्तव्याः॥६१॥

भावानुवाद—अतएव भगवान् क्रोधित होकर कहने लगे। क्या कहा? इसे 'भ्रातः' इत्यादि पदसे आरम्भ करके पाँच श्लोकोंमें कह रहे हैं। वे कौन हैं? मैं उनकी किसीमें भी गणना नहीं करता हूँ, क्योंकि वे अत्यन्त तुच्छ हैं। अथवा वे न केवल तुच्छ हैं, अपितु मैं उनकी तुच्छमें भी गणना नहीं करता हूँ, क्योंकि वे परम अधम हैं; अतएव अभी मैं अकेला ही जाकर उनका संहार करता हूँ॥६१॥

भवान् प्रत्येतु सत्यं मे सम्प्रतिज्ञमिदं वचः।
इत्थं प्रसङ्गसङ्गत्या मुग्धभावं जहौ प्रभुः॥६२॥

श्लोकानुवाद—आप मेरे इन प्रतिज्ञापूर्ण सत्य वचनों पर सम्पूर्णरूपसे विश्वास रखिये। इस प्रकार प्रभु श्रीकृष्णने प्रसङ्ग-क्रमसे अपने प्रेममें निमग्न मुग्धभावका परित्याग किया॥६२॥

दिग्दर्शिनी टीका—प्रत्येतु प्रतीतिं करोतु। मुग्धं सुन्दरं भावं प्रेमरसनिमग्नतामित्यर्थः। यद्वा, मुग्धस्य मोहं प्राप्तस्येव भावं चेष्टां जहौ सम्यक् संज्ञां प्राप्तः पूर्ववत् स्वस्थोऽभूदित्यर्थः॥६२॥

भावानुवाद—आप मेरे वचनोंमें विश्वास कीजिये। इस प्रकार श्रीकृष्णने अपने प्रेमरसमें निमग्न मुग्धभावका परित्याग किया। अथवा मुग्धभाव कहनेसे मोह जैसे भाव और चेष्टा आदिको परित्याग करके सम्पूर्णरूपसे पहलेकी भाँति स्वस्थ हो गये॥६२॥

परितो मुहुरालोक्य श्रीमद्द्वारवतीश्वरम्।
श्रीयादवेन्द्रमात्मानं प्रत्यभिज्ञातवांस्तदा॥६३॥

श्लोकानुवाद—इसके उपरान्त श्रीकृष्ण बार-बार चारों ओर देखकर अपनेको द्वारकाधीश श्रीयादवेन्द्रके रूपमें पहचानने लगे॥६३॥

दिग्दर्शिनी टीका—आलोक्य दृष्टिं प्रसार्य तदेत्यस्य परेणापि सम्बन्धः॥६३॥

भावानुवाद—श्लोकानुवाद द्रष्टव्य है॥६३॥

प्रासादाभ्यन्तरे सुप्तं सस्माराथ करे स्थिताम्।
वंशीं स्वस्याग्रजस्यापि वन्यवेशञ्च दृष्टवान्॥६४॥

श्लोकानुवाद—और उनको यह भी स्मरण हुआ कि वे अपने राजभवनके भीतरी भागमें (अन्तःपुरमें) सो रहे थे। किन्तु बादमें उन्होंने अपने हाथमें वंशी और श्रीबलरामके वन्यवेशको देखा॥६४॥

दिग्दर्शिनी टीका—प्रासादस्य अन्तःपुरवर्त्तिनिजालयवरस्याभ्यन्तरे सुप्तमप्यात्मानं सस्मार प्रत्यभिज्ञातवान्। अथ प्रत्यभिज्ञानानन्तरम्॥६४॥

भावानुवाद—श्लोकानुवाद द्रष्टव्य है॥६४॥

पुर्या बहिःप्रयाणेन गोपालनमवेक्ष्य च।
विस्मयं संशयञ्चाप्तो जहास हृदि भावयन्॥६५॥

श्लोकानुवाद—तथा उन्होंने यह भी देखा कि वे द्वारकापुरीके बाहरी भागमें समुद्रतीर पर गोचारण कर रहे हैं। इस प्रकार उस विषयकी चिन्ता करते-करते वे विस्मित और संशययुक्त होकर हँसने लगे॥६५॥

दिग्दर्शिनी टीका—पुर्याः द्वारकायाः बहिःसमुद्रतीरे प्रयाणेन कृत्वा यद् गोपालनं स्वयं क्रियमाणं गवां रक्षणञ्च आवेक्ष्य आलोक्य। कदा कुतो वा

ममैतद्वन्यभूषणादिकं वृत्तमिति विस्मयं प्राप्तः। एतन्नाम सत्यं स्वप्नवदसत्यं वेति संशयञ्च प्राप्तः सन् हृदि भावयन् तन्निदानादिकं विचारयन् सन् जहास, सद्यस्तदज्ञानात् चिरनिजवैचित्त्यानु-भवानुसन्धानाद्वा॥६५॥

भावानुवाद—फिर द्वारकापुरीके बाहरी भागमें समुद्रतट पर गमन करके गोचारण अर्थात् अपने द्वारा किये जानेवाला गोरक्षा कार्य कर रहे हैं—ऐसा देखकर श्रीकृष्ण उस विषयमें सोचने लगे, मैंने किस समय और कहाँ पर इस वन्यवेशकी रचना की है? क्या यह सत्य है या फिर स्वप्नकी भाँति केवल प्रतीतिमात्र है? इस प्रकार चिन्ता करते-करते वे विस्मित हुए और फिर उसके मूलकारणका विचार कर हँसने लगे। अर्थात् उसके कारणको न समझते हुए संशयग्रस्त हो गये तथा पहले जैसे दीर्घकाल तक उनका प्रेमवैचित्त्य भाव होता था, अब भी उसी भावको स्मरणकर संशयग्रस्त होकर हँसने लगे॥६५॥

ततो हलधरः स्मित्वा तदीयहृदयङ्गमः।
सर्वं ब्रह्मकृतं तस्याकथयत्तत् सहेतुकम्॥६६॥

श्लोकानुवाद—इस प्रकार श्रीकृष्णको हँसता देखकर उनके हृदयको जाननेवाले श्रीहलधरने मुस्कराते हुए श्रीब्रह्माके द्वारा रचित सारी घटना तथा उसके मूल वृत्तान्तको उन्हें समझा दिया॥६६॥

दिग्दर्शिनी टीका—ततो हासानन्तरं हासेन तस्य हृदयप्रसादं ज्ञात्वेत्यर्थः। तस्य तं कृष्णं प्रतीत्यर्थः। तद्बहिःप्रयाणादि सर्वं ब्रह्मणा कृतमुपायेन गरुड़ादिद्वारा निष्पादितमित्यकथयत्। हेतुः प्रेममोहादिस्तत्सहितम्॥६६॥

भावानुवाद—श्रीकृष्णको हँसता देखकर श्रीहलधर भी मुस्कराने लगे अर्थात् श्रीकृष्णकी हँसीको देखकर वे उनके हृदयकी प्रसन्नताको समझ गये तथा उनकी प्रतीतिके लिए उनकी प्रेममूर्च्छा और उस प्रेममूर्च्छाके कारण श्रीब्रह्माके द्वारा रचित उपायको कह सुनाया। अर्थात् श्रीब्रह्माके द्वारा किये गये उपायके अनुसार श्रीकृष्णको पुरीसे बाहर लाया गया तथा श्रीगरुड़ आदि द्वारा उक्त क्रिया सम्पूर्ण हुई—यह सारा विषय समझा दिया॥६६॥

ततो ह्रीण इव ज्येष्ठमुखं पश्यन् स्मितं श्रितः।
रामेणोद्वर्त्त्य तत्राब्धौ स्नापितो धूलिधूसरः॥६७॥

श्लोकानुवाद—यह सब सुनकर श्रीकृष्ण अपने ज्येष्ठ भ्राताके मुखकी ओर देखकर कुछ लज्जित जैसे हुए तथा मन्द-मन्द हँसने लगे। तब श्रीबलदेवने और कुछ भी नहीं कहा और श्रीकृष्णके धूलि-धूसरित अंगोंका मार्ज्जन करके उनको समुद्रमें स्नान कराया॥६७॥

दिग्दर्शिनी टीका—ह्रीणो लज्जितः सन् इवेति परमश्लाघ्ये सत्कर्मणि प्रवृत्तेस्तत्त्वतो लज्जाराहित्यात्। यतो भगवतैवोक्तमेकादशस्कन्धे (श्रीद्भा॰ ११/१९/४०)—'*जुगुप्साह्रीरकर्मसु*' इति। अस्यार्थः—अकर्मसु विकर्मसु जुगुप्सा निन्द्यतया हेयत्वालोचनं यत् सा ह्रीरुच्यते, न तु लज्जामात्रमिति। ज्येष्ठस्य श्रीबलरामस्य मुखं पश्यन् स्मितं श्रितः ईषद्धास्यमविच्छेदेन कुर्वन्नित्यर्थः। धूलिभिर्धूसरः पूर्वमन्तःपुरमध्ये प्रेमवैवश्येन भूमिलुठनात् रचितवृन्दावने गोसङ्गे गोपादधूलिव्याप्तत्वाद्वा। अतएव उद्वर्त्य धूल्याद्युद्वर्त्तनं कृत्वा स्नापितः॥६७॥

भावानुवाद—इन बातोंको सुनकर श्रीकृष्ण अपने ज्येष्ठ भ्राता श्रीबलदेवके मुखकी ओर देखकर कुछ लज्जितसे हुए तथा मन्द-मन्द हँसने लगे। यहाँ पर 'ह्रीण इव' (लज्जित जैसे) कहनेका गूढ़ तात्पर्य यह है कि श्रीकृष्ण परम प्रशंसनीय सत्कर्ममें ही प्रवृत्त हुए थे, इसलिए तत्त्वतः उनका लज्जारहित होना ही सूचित हुआ है, क्योंकि दशम-स्कन्धमें कहा गया है—"पाप कर्ममें हेय-दर्शन ही लज्जा है।" अर्थात् अकर्म और विकर्मसे घृणा होना या लोकनिन्दाके कारण उसे हेय समझकर उक्त कार्यमें प्रवृत्त न होना ही 'ह्री' है, वह केवल लज्जामात्र नहीं है। अतएव लज्जामात्रको ही 'ह्री' नहीं कहा जा सकता है। इसीलिए श्रीकृष्ण श्रीबलरामके मुखकी ओर दृष्टिपात कर मन्द-मन्द हँसने लगे, किन्तु श्रीबलरामने और कुछ भी नहीं कहा। फिर धूल-धूसरित श्रीकृष्णको समुद्रमें स्नान कराया। अर्थात् पहले अन्तःपुरमें प्रेमकी विवशताके कारण भूमि पर लोटनेसे अथवा विश्वकर्मा द्वारा रचित वृन्दावनमें गोचारणके समय गायोंके खुरोंसे उड़ती धूलसे धूसरित अङ्गोंवाले श्रीकृष्णको समुद्रमें स्नान कराया॥६७॥

तदानीमेव संप्राप्तं भगवद्भावकोविदम्।
आरुह्यालक्षितस्ताक्ष्र्यं निजप्रासादमागतः ॥६८ ॥

श्लोकानुवाद—उसी समय भगवान्‌के भावोंको (मनको) जाननेमें निपुण श्रीगरुड़ भी वहाँ पर उपस्थित हुए तथा श्रीकृष्ण उन पर चढ़कर अलक्षितरूपसे अपने राजभवनमें पधारे॥६८॥

दिग्दर्शिनी टीका—तदानीं स्नानकाले एवागतम्। यतो भगवतो भावः अन्तःपुरगमनादिरूपा मनोवृत्तिस्तस्मिन् कोविदम्। केनाप्यन्येनालक्षितः सन् ताक्ष्र्यं गरुड़म्॥६८॥

भावानुवाद—स्नानके समय ही श्रीगरुड़ उस स्थान पर आ गये, क्योंकि वे भगवान्‌के अन्तःपुर-गमनरूप मनोभावसे भलीभाँति अवगत थे। भगवान् उनकी पीठ पर चढ़कर अलक्षितरूपसे अपने राजभवनमें पधारे॥६८॥

सर्वज्ञेनोद्धवेनाथ देवकीरुक्मिणीमुखाः।
प्रबोध्यान्तःपुरे देव्यो भगवत्पार्श्वमापिताः ॥६९ ॥

श्लोकानुवाद—तदुपरान्त सर्वज्ञ श्रीउद्धवने माता श्रीदेवकी और श्रीरुक्मिणी आदि प्रमुख महिषियोंको सान्त्वना देकर अन्तःपुरमें भगवान् श्रीकृष्णके पास भेजा॥६९॥

दिग्दर्शिनी टीका—सर्वं भगवन्मौग्ध्यलीलापगमप्रासादागमनादिकं जानातीति तथा तेन। प्रबोध्य संज्ञां प्रापय भगवदागमनादिवृत्तं प्रकर्षेण ज्ञापयित्वा वा। आपिता नीताः। देव्य इति, वार्त्ताहारिणी सा वृद्धा तेनैव प्रेरिता कुत्रापि गतेति ज्ञेयम्। वक्ष्यमाणप्रसङ्गे तस्याः परमायोग्यत्वात्॥६९॥

भावानुवाद—तदुपरान्त सर्वज्ञ श्रीउद्धव जो श्रीकृष्णकी मुग्धताके दूर होने तथा अन्तःपुरमें उनके आगमन इत्यादि विषयसे अवगत थे, माता श्रीदेवकी और श्रीरुक्मिणी आदि महिषियोंको सचेतन करवाकर अथवा भगवान्‌के अन्तःपुरमें आगमन इत्यादिके वृत्तान्तको भलीभाँति सुनाकर उनको भगवान्‌के पास ले आये। किन्तु उस वृद्धा पद्मावतीको उन्होंने पहले ही किसी दूसरे स्थान पर भिजवा दिया, क्योंकि आगे कहे जानेवाले प्रसंगमें उस वृद्धाकी उपस्थिति पूर्णता अनुचित थी॥६९॥

माता च देवकी पुत्रमाशीर्भिरभिनन्द्य तम्।
भोगसम्पादनायास्य कालाभिज्ञा द्रुतं गता॥७०॥

श्लोकानुवाद—समयानुसार क्या करणीय है, इसे भलीभाँति जाननेवाली माता श्रीदेवकी अपने पुत्रको आशीर्वादपूर्ण वचनोंसे अभिनन्दित कर उनके लिए भोजन तैयार करनेके लिए शीघ्र ही वहाँसे चली गयीं॥७०॥

दिग्दर्शिनी टीका—इदानीमेतदुपाख्यानतात्पर्यभूतं श्रीगोपिकानां सर्वतोऽधिकोत्कर्ष-विशेषं श्रीभगवन्मुखेनैव श्रीमहिषीवर्गेष्वसङ्कोचं निरूपयितुं गौरवविशेषेण तच्छ्रवणानर्हाया इव श्रीदेवक्या निःसरणमाह—'मातेति'। तं तथाभूतं पुत्रं श्रीकृष्णम्। अस्य पुत्रस्य कालस्य भोजनावसरस्याभिज्ञा। यद्वा, तदानीं तत्र स्थातुं न युज्यत इत्यभिजानातीत्यर्थः॥७०॥

भावानुवाद—अब इस उपाख्यानके तात्पर्यरूपमें श्रीगोपियोंके सर्वाधिक उत्कर्षको स्वयं भगवान् अपने श्रीमुखसे महिषियोंके सम्मुख वर्णन करेंगे तथा उसके द्वारा गोपियोंका असंकोच प्रेम भी निरूपित होगा। अतएव यह उपाख्यान माता श्रीदेवकीके श्रवण करने योग्य नहीं है, इसलिए सम्मानपूर्वक उस स्थानसे बाहर जाने हेतु उनके लिए 'कालाभिज्ञा' शब्द द्वारा उक्त अभिप्रायको ही व्यक्त किया गया है। 'कालाभिज्ञा' अर्थात् समयके अनुसार कार्य करनेवाली माता श्रीदेवकी पुत्रको आशीर्वादयुक्त वचनोंसे अभिनन्दित कर उनके लिए भोजन तैयार करनेके लिए शीघ्र ही उस स्थानसे चली गयी, क्योंकि वे अपने पुत्रके भोजनके समयको तथा खान-पानके विषयमें विशेषरूपसे जानती थीं॥७०॥

स्तम्भाद्यन्तरिताः सत्यो देव्योऽतिष्ठन् प्रभुप्रियाः।
सत्यभामा न तत्रागात्तां कृष्णोऽपृच्छदुद्धवम्॥७१॥

श्लोकानुवाद—श्रीकृष्णकी प्रिया श्रीरुक्मिणी आदि सभी महिषियाँ पहलेसे ही स्तम्भ (खम्बें) आदिके पीछे छिपकर वहींपर उपस्थित थीं, केवल श्रीसत्यभामा ही उस स्थान पर नहीं आयी थीं, इसलिए श्रीकृष्णने श्रीउद्धवसे उनके विषयमें पूछा॥७१॥

दिग्दर्शिनी टीका—देव्यः श्रीरुक्मिण्याद्याः सर्वा महिष्यस्तु स्तम्भादिभिरन्तरिता आच्छादिताः सत्योऽतिष्ठन्। यतः प्रभुर्भगवानेव प्रियो यासां ताः प्रभोः प्रिया इति वा। तत्र भगवत्पार्श्वे नागात्। तां सत्यभामां अपृच्छत् 'क्व सा वर्त्तत' इति प्रश्नं चकार॥७१॥

भावानुवाद—श्रीरुक्मिणी आदि सभी महिषियाँ स्तम्भ आदिके पीछे छिपकर उसी स्थान पर खड़ी थीं, क्योंकि वे भगवान्‌की प्रिया हैं अथवा भगवान् उनके प्रिय हैं। किन्तु श्रीसत्यभामादेवीको वहाँ नहीं आया देखकर भगवान्‌ने श्रीउद्धवसे उनके विषयमें पूछा, "सत्यभामा कहाँ है?"॥७१॥

श्रीहरिदास उवाच—

वृन्दावने यदा जातो विजयो रैवतार्चिते।
प्रभोस्तदातनं भावमबुधभ्रामकं परम्॥७२॥
कमप्यालोक्य देवीभिः सह तत्रैव दूरतः।
स्थिता निलीय दुर्बुद्धिरूचे पद्मावती खला॥७३॥

श्लोकानुवाद—श्रीहरिदास उद्धवने कहा—हे प्रभो! रैवतक पर्वतके बीचमें स्थित नव-वृन्दावनमें जब आप पधारे थे, उसी समय अबोध व्यक्तियोंको भ्रमित करनेवाले आपके विचित्र भावको देखनेके लिए खल-स्वभाववाली कंस-माता पद्मावती भी महिषियोंके साथ उस स्थानसे कुछ ही दूरी पर अलक्षित भावसे खड़ी थी। वह दुर्बुद्धि पद्मा आपके उस अपूर्व भावका दर्शन कर महिषियोंसे कहने लगी—॥७२-७३॥

दिग्दर्शिनी टीका—श्रीहरिदासः श्रीमदुद्धवः। *'कृष्णं संस्मारयन् रेमे हरिदासो व्रजौकसाम्'* (श्रीमद्भा॰ १०/४७/५६) इति दशमस्कन्धोक्तेः। रैवतेन पर्वतेनार्चिते सेविते वृन्दावने यदा प्रभोर्भगवतो विजयः शुभगमनं जातो बभूव, तत्कालीनं कमप्यनिर्वचनीयं प्रभोर्भावं श्रीनन्दप्रतिमादिविषयकं प्रेमविशेषमालोक्य पद्मावती ऊचेः—उवाचेति द्वाभ्यामन्वयः। कीदृशं परं केवलमबुधानां प्रेमरसतत्त्वानभिज्ञानां भ्रामकं दुर्वितर्क्यमित्यर्थः। परमिति सर्वोत्कृष्टमिति वा देवीभिः श्रीदेवकी-रुक्मिण्यादिभिः सह तत्र वृन्दावन एव निलीय दूरतः स्थिता। दुष्टा बुद्धिर्यस्याः सा भेदोत्पादनात्। यतः खला पिशुना॥७२-७३॥

भावानुवाद—यहाँ श्रीहरिदास कहनेका अभिप्राय श्रीउद्धवसे है। "हरिदास श्रीउद्धव व्रजवासियोंको श्रीकृष्णका स्मरण कराते हुए आनन्दपूर्वक कालयापन करने लगे।" इत्यादि श्रीमद्भागवतकी उक्तियोंके अनुसार श्रीउद्धव ही हरिदास हैं। श्रीउद्धवने कहा—हे प्रभु! जब आपने रैवतक पर्वतके द्वारा सेवित उस नव-वृन्दावनमें शुभागमन किया था, तब आपके तत्कालीन किसी एक अनिर्वचनीय भाव अर्थात् श्रीनन्द आदिकी प्रतिमाके प्रति उदित प्रेमको दर्शन करनेके लिए पद्मावती भी उस स्थान पर गयी थी तथा श्रीदेवकी, श्रीरुक्मिणी आदि देवियोंके साथ उस स्थानसे कुछ दूरी पर अलक्षितभावसे खड़ी हुई थी। किस प्रकार? सर्वोत्कृष्ट प्रेमरस-तत्त्वके ज्ञानसे हीन होनेके कारण भ्रमित व्यक्तिकी भाँति वहाँ पर खड़ी थी। इसीलिए उस अपूर्व भावका दर्शन करके भी खल-स्वभाववाली पद्मावती कहने लगी। अर्थात् खल-स्वभाववाली होनेके कारण ही वह भेद उत्पन्न कर रही थी, क्योंकि खल-व्यक्तिमात्र ही चुगलखोर और नीच होता है॥७२-७३॥

देवक्यरे पुण्यहीने रे रे रुक्मिणि दुर्भगे।
सत्यभामेऽवरे हन्त जाम्बवत्यादयोऽवराः॥७४॥
पश्यतेदमितोऽर्वाक् स्वमभिमानं विमुञ्चत।
आभीरीणां हि दास्याय तपस्यां कुरुतोत्तमाम्॥७५॥

श्लोकानुवाद—अरी पुण्यहीन देवकी! अरी दुर्भागी रुक्मिणि! अरी नीच सत्यभामा! अरी हीन जाम्बवती इत्यादि रमणियों! हाय! क्या तुमलोग श्रीकृष्णकी इन चेष्टाओंको नहीं देख रही हो? अब अपने-अपने अभिमानको त्यागकर गोपियोंकी दासी बननेके लिए कठोर तपस्या करो॥७४-७५॥

दिग्दर्शिनी टीका—किं तदाह—देवकीति द्वाभ्याम्। हन्तेति खेदसम्बोधने; हे अवरा नीचाः; इदं श्रीकृष्णचेष्टादिकं पश्यत। इतः अस्मात् कालादर्वाक् पश्चात्। स्वं स्वकीयम् अभिमानं वयं सुभगा गृहीतपाण्यो वेत्यादिगर्वं विमुञ्चत परित्यजत, बल्लवीष्वेव तदीयपरमप्रेमदर्शनात्। अतः आभीरीणां श्रीयशोदाराधिकादीनां दास्याय दासीत्वप्राप्तये उत्तमां तपस्यां कुरुत। यद्यपि श्रीनन्दादयो गोवृत्तिकवैश्यजातयो द्विजान्तर्गताः परमोत्तमाः। आभीराश्चान्त्यजजातयः। तथा च द्वितीयस्कन्धे (श्रीमद्भा० २/४/१८)—*'किरातहूणान्ध्रपुलिन्द पुक्कशा, आभीरकङ्का यवनाः खशादयः। येऽन्ये*

च पापा यदपाश्रयाश्रयाः, शुध्यन्ति तस्मै प्रभविष्णवे नमः॥' इति। तथापि गोपालनेनाभीरसा-दृश्यात्तेऽप्याभीरा इति। किंवा दुर्बुद्धिवृद्धया पैशुन्येनाभीरीणामित्य-उक्तम्॥७४-७५॥

भावानुवाद—पद्मावती क्या कहने लगी? इसे 'देवक्यरे' इत्यादि दो श्लोकोंमें कह रहें हैं। यहाँ पर 'हन्त' शब्दसे खेदसूचक सम्बोधन समझना चाहिए। अरी नीच सत्यभामे! श्रीकृष्णकी इन चेष्टाओंका दर्शन करो। पहले तुम सब अपनेको सौभाग्यशाली होनेका अभिमान करती थी, अर्थात् 'हमलोग ही सौभाग्यवती हैं, क्योंकि श्रीकृष्णने हमारा पाणिग्रहण किया है', अपने इस गर्वका परित्याग करो। इन आभीर (अहीर) जातिकी स्त्रियोंके प्रति श्रीकृष्णके परम प्रेमका दर्शन करो। अतएव श्रीयशोदा और श्रीराधिका आदि आभीरियोंकी दासी बननेके लिए कठोर तपस्या करो। यद्यपि श्रीनन्द आदि गोप, गोपालन-वृत्तिमें रत वैश्य जातिके होनेसे द्विजवर्णके अन्तर्गत परम उत्तम जातिके हैं, तथापि आभीरियोंको अन्त्यज जाति माना गया है। यथा, द्वितीय-स्कन्धमें कहा गया है—"किरात, हूण, अन्ध्र, पुलिन्द, पुक्कश, आभीर, यवन, खश और अन्यान्य पाप जातियाँ भी भगवान्के भक्तोंके आश्रयमें शुद्ध होती हैं, अतएव मैं उन प्रभु श्रीविष्णुको नमस्कार करता हूँ।" तथापि श्रीनन्द आदि गोपोंकी गोपालन-वृत्तिको देखकर उनके आभीर (अहीर) सादृश्य होनेके कारण गोपरमणियोंको भी आभीरी कहा गया है। अथवा दुर्बुद्धि वृद्धाने अपने खल स्वभाववशतः उनको आभीरी कहा है॥७४-७५॥

तद्दुर्वचो निशम्यादौ देवक्योक्तमभिज्ञया।
समस्तजगदाधारभवदाधारभूतया　　॥७६॥

श्लोकानुवाद—पद्मावतीके ऐसे दुर्वचनोंको सुनकर समस्त जगतकी आधार तथा आपको भी धारण करनेवाली परम बुद्धिमती माता देवकीने कहा— ॥७६॥

दिग्दर्शिनी टीका—तस्या दुष्टं वचः। तस्याः परमधैर्येण तादृश्युक्तिरुचितैवेत्याशयेन तां विशिनष्टि। समस्तस्य जगतः प्रपञ्चस्य आधार आश्रयो यो भवान् तस्याधारभूतया अतएव अभिज्ञया परम पण्डितया॥७६॥

भावानुवाद—उस वृद्धाके इस प्रकारके दुर्वचनोंको सुनकर परम धैर्यपूर्वक श्रीदेवकीने जो कहा वह उचित ही है, क्योंकि वे जगतके आधार आपकी (भगवान्‌की) भी आधार-स्वरूपा हैं। अतएव परम बुद्धिमती हैं॥७६॥

आश्चर्यमत्र किं मूर्खे पूर्वजन्मनि यत्तपः।
समं श्रीवसुदेवेन मयाकारि सुताय तत्॥७७॥
अतोऽयमावयोः प्राप्तः पुत्रतां वरदेश्वरः।
अस्मिन्नन्दयशोदाभ्यां भक्तिः सम्प्रार्थिता विधिम्॥७८॥

श्लोकानुवाद—अरी मूर्खे! इसमें आश्चर्य क्या है? मैंने पूर्वजन्ममें श्रीवसुदेवजीके साथ श्रीकृष्णको पुत्र रूपमें पानेके लिए तपस्या की थी तथा उसी तपस्याके फलस्वरूप वर देनेवालोंमें सर्वश्रेष्ठ श्रीकृष्णने हमारा पुत्र होना अंगीकार किया है। परन्तु श्रीनन्द-यशोदाने केवल श्रीकृष्णकी भक्ति प्राप्त करनेके लिए ही श्रीब्रह्मासे प्रार्थना की थी॥७७-७८॥

दिग्दर्शिनी टीका—किं तदाह—आश्चर्यमिति चतुर्भिः। हे मूर्खे बुद्धिहीने! अत्र श्रीनन्दादिविषयक-श्रीकृष्णभावविशेषे किमाश्चर्यं विस्मयः? अपितु न किमपि, असम्भावनाद्यभावात्। तद्धेतुमेवाह—पूर्वेत्यादिना युक्त इत्यन्तेन। तत् तपस्तु सुताय भगवत्सदृशो नौ पुत्रो जायतामित्येतदर्थमेव। यथोक्तं तौ प्रति श्रीभगवतैव दशमस्कन्धे (श्रीमद्भा॰ १०/३/३८)—*'व्रियतां वर इत्युक्ते मादृशो वां वृतः सुतः।'* इति। वरदानामीश्वरः तेषु परमश्रेष्ठ इत्यर्थः। अनेन सकृद्वरदानेनापि पुनः पुनः पुत्रताप्राप्तिस्तथोत्तरोत्तरतत्फलाधिक्यञ्च सम्भावितम्॥७७॥

नन्दयशोदाभ्याञ्च अस्मिन् श्रीकृष्णे भक्तिः प्रेमलक्षणा विधिं ब्रह्माणं प्रार्थिता। तथा च दशमस्कन्धे (श्रीमद्भा॰ १०/८/४९) नन्दवाक्यं ब्रह्माणं प्रति—*'जातयोर्नौ महादेवे भुवि विश्वेश्वरे हरौ। भक्तिःस्यात् परमा लोको ययाञ्जो दुर्गतिं तरेत्॥'* इति। अस्यार्थः—ययामद्भक्त्या तच्छ्रवणादिनान्योऽपि लोकः सुखेन संसारं तरतीति॥७८॥

भावानुवाद—श्रीदेवकीने क्या कहा? इसे 'आश्चर्य' इत्यादि चार श्लोकोंके माध्यमसे बता रहे हैं। अरी बुद्धिहीने (पद्मावती)! श्रीनन्द आदि व्रजवासियोंके सम्बन्धसे श्रीकृष्णमें तुम जो विशेष भावको देख रही हो, उसमें आश्चर्य अथवा विस्मय होनेवाली कौन सी बात है?

अर्थात् उसमें किसी प्रकारकी भी असम्भावनाकी बात नहीं है, क्योंकि मैंने पूर्वजन्ममें आर्यपुत्र (श्रीवसुदेवजी) सहित भगवान्‌के समान पुत्र प्राप्तिकी अभिलाषासे कठोर तपस्या की थी और वर प्रदान करने-वाले श्रीकृष्णने हमारी उस तपस्यासे सन्तुष्ट होकर हमारा पुत्र होना स्वीकार किया है। इस विषयमें दशम-स्कन्धमें स्वयं भगवान्‌की उक्ति है—"वर प्रार्थना करो, मेरी इस वाणीको सुनकर तुमने मेरे समान पुत्रके लिए प्रार्थना की थी।" इसका कारण है कि भगवान् कृष्ण 'वरदेश्वर' हैं अर्थात् वर प्रदान करनेवालोंमें सर्वश्रेष्ठ हैं। इस सम्बोधनके द्वारा एक बार वरदानके बाद भी पुनः-पुनः पुत्ररूपमें उनकी प्राप्ति और उत्तरोत्तर उस फलकी अधिकरूपमें प्राप्तिकी ही सम्भावना होती है। परन्तु श्रीनन्द-यशोदाने तो पुत्र-प्राप्तिके लिए प्रार्थना नहीं की थी, उन्होंने श्रीकृष्णके प्रति प्रेम-भक्तिके लिए श्रीब्रह्मासे प्रार्थना की थी। यथा, दशम-स्कन्धमें श्रीब्रह्माके प्रति श्रीनन्द महाराजकी प्रार्थना है—"हमलोग पृथ्वी पर जन्म ग्रहण करनेके बाद सम्पूर्ण जगतके ईश्वर श्रीहरिके प्रति उस परमाभक्तिको प्राप्त करें, जिस भक्तिके द्वारा लोग दुर्गतिसे रक्षा पाते हैं।" परमाभक्ति अर्थात् जिस (वात्सल्यमयी) भक्तिमें श्रवण-कीर्त्तनके द्वारा भविष्यमें अन्य जीव भी अनायास ही सुखपूर्वक संसाररूपी समुद्रको पार कर सकें, हमारी वैसी भक्ति हो॥७७-७८॥

तस्यैतद्भक्तवर्यस्य तादृशेन वरेण तौ।
आवाभ्यामपि माहात्म्यं प्राप्तौ सपरिवारकौ॥७९॥

श्लोकानुवाद—अतएव श्रीब्रह्माके वरसे श्रीनन्द और श्रीयशोदाको भक्तिकी ही प्राप्ति हुई है, क्योंकि श्रीब्रह्मा श्रीकृष्णके श्रेष्ठ भक्त हैं। अतएव उस भक्तिके प्रभावसे श्रीनन्द-यशोदा अपने समस्त परिवार सहित हमसे अधिक महिमाशाली हुए हैं॥७९॥

दिग्दर्शिनी टीका—अतः तस्य विधेस्तादृशेन तत्प्रार्थनानुरूपेण वरेण आशीर्वादेन तौ यशोदानन्दौ नौ आवाभ्यां देवकीवसुदेवाभ्यामपि सकाशात् माहात्म्यं प्राप्तौ। तत्र च सपरिवारौ निखिलनिजव्रजजनसहितौ। कीदृशस्य? एतस्य कृष्णस्य भक्तेषु मध्ये वर्यस्य श्रेष्ठस्य। *'भजतां परो गुरुः'* इति (श्रीमद्भा॰ २/९/५) द्वितीयस्कन्धोक्तेः। एवं

भक्तिप्रार्थनात्तत्राप्यास्य परमभक्तं प्रति प्रार्थनेन स्वदत्तवरादपि निजभक्तवात्सल्यस्वभावेन स्वभक्तवरदत्तवरस्याधिक्येन सम्पादनादावाभ्यां सकाशादधिकस्तयोर्महिमा युज्यत एवेति भावः ॥७९॥

भावानुवाद—अतएव विधाता द्वारा श्रीनन्द और श्रीयशोदाको उनकी प्रार्थनाके अनुसार आशीर्वाद देनेसे उनको अपनी अभिलषित भक्तिकी प्राप्ति हुई है। उस भक्तिके प्रभावसे श्रीनन्द और श्रीयशोदाका हमसे अधिक माहात्म्य हुआ है, अर्थात् उन्होंने सपरिवार अर्थात् समस्त व्रजवासियों सहित उस प्रेमभक्तिको प्राप्त किया है। ये विधाता कैसे हैं? श्रीकृष्णके भक्तोंमें सर्वश्रेष्ठ हैं। विशेषरूपसे 'विधाता भक्तोंके परमगुरु हैं' ऐसा द्वितीय-स्कन्धमें भी कहा गया है। प्रथमतः श्रीनन्द-यशोदाकी प्रार्थना, और फिर वह प्रार्थना भी परमभक्तके निकट, अतएव श्रीकृष्णने अपने भक्त वात्सल्य स्वभावके कारण अपने द्वारा प्रदत्त वरकी तुलनामें अपने भक्त द्वारा प्रदान किये गये वरकी अधिक उत्कर्षता स्थापित की है। अतएव हमारी तुलनामें श्रीनन्द और श्रीयशोदाका अधिक माहात्म्य युक्ति-संगत ही है॥७९॥

ताभ्यां स्नेहभरेणास्य पालनं तत्तदीहितम्।
अतोऽस्यैतादृशो भावस्तयोर्युक्तो हि मे प्रियः॥८०॥

श्लोकानुवाद—श्रीनन्द और श्रीयशोदाने स्नेहपूर्वक जिस प्रकार श्रीकृष्णका लालन-पालन किया है, उससे श्रीकृष्णका उनलोगोंके प्रति वैसा भाव उपयुक्त ही है तथा वह भाव मुझे भी प्रिय लग रहा है॥८०॥

दिग्दर्शिनी टीका—तल्लक्षणञ्च सुव्यक्तमेवेत्याह—ताभ्यामिति, नन्दयशोदाभ्याम्। अस्य कृष्णस्य तत्तद्बहुविधं सुप्रसिद्धं वा अनिर्वाच्यमिति वा ईहितं कृतम्। अतोऽस्मादेवोक्ताद्धेतोः; अस्य कृष्णस्य; तयोर्नन्दयशोदयोर्विषये तादृशः प्रत्यक्षमनुभूतोऽयं भावो युक्त एव। स च मम प्रिय एव भवतीत्यर्थः। अन्यथा कृष्णस्याकृतज्ञतापत्तेः॥८०॥

भावानुवाद—श्रीनन्द और श्रीयशोदाके अधिक माहात्म्यके लक्षण को 'ताभ्यामिति' श्लोक द्वारा स्पष्टरूपमें व्यक्त कर रहे हैं। श्रीनन्द और श्रीयशोदाने स्नेहपूर्वक जिस प्रकार श्रीकृष्णका लालन-पालन किया है, उस अनिर्वचनीय लालन-पालनकी बात सर्वत्र प्रसिद्ध है।

अतएव श्रीकृष्णका श्रीनन्द-यशोदाके प्रति वैसा भाव उपयुक्त ही है। अर्थात् जो प्रत्यक्ष अनुभव हो रहा है, वह उपयुक्त ही है और यह भाव मुझे भी प्रिय लग रहा है। अन्यथा श्रीकृष्णको अकृतज्ञतारूपी दोष लगता॥८०॥

अथ श्रीरुक्मिणी देवी सहर्षमिदमब्रवीत्।
यद्वाक्यश्रवणात् सर्वभक्तानां प्रेम वर्द्धते ॥८१॥

श्लोकानुवाद—तब श्रीरुक्मिणीदेवीने हर्षपूर्वक जो वचन कहे, उनको श्रवण करके सभी भक्तोंका भगवान्‌के प्रति प्रेम वर्द्धित होगा॥८१॥

दिग्दर्शिनी टीका—इदं या भर्तृपुत्रादीत्यादि श्लोकत्रयात्मकं वाक्यम्। यस्य वाक्यस्य श्रवणात् सर्वेषां भगवद्भक्तानां भगवति प्रेम वर्द्धते। भगवत्प्रेमविशेषवतां जनानां सर्वतोऽधिकमाहात्म्यावकलनात्॥८१॥

भावानुवाद—तदुपरान्त श्रीरुक्मिणीदेवीने हर्षपूर्वक जो कुछ कहा, उसीका 'या भर्तृपुत्रादीत्यादि' तीन श्लोकोंमें (८२-८४में) अन्वय हुआ है। वास्तवमें उन बातोंको श्रवण करनेसे सभी भक्तोंका भगवान्‌के प्रति प्रेम वर्द्धित होगा, क्योंकि श्रीरुक्मिणिदेवीने ही उन भगवान्‌के प्रेमीजनोंका सर्वाधिक माहात्म्य कीर्त्तन किया है॥८१॥

या भर्त्तृपुत्रादि विहाय सर्वं, लोकद्वयार्थाननपेक्ष्यमाणाः।
रासादिभिस्तादृशविभ्रमै,-स्तद्रीत्याऽभजंस्तत्र तमेनमार्त्ताः ॥८२॥

श्लोकानुवाद—श्रीरुक्मिणीकी उक्ति इस प्रकार है—व्रजगोपियोंने लौकिक और पारलौकिक समस्त प्रकारके साध्य-साधनोंको जलाञ्जलि देकर तथा पति-पुत्र आदिका परित्याग करके श्रीवृन्दावनमें रासलीला आदि विलास-श्रेणी द्वारा किसी एक अत्यन्त निगूढ़ रीतिसे प्रेमातुर होकर श्रीकृष्णकी सेवा की है॥८२॥

दिग्दर्शिनी टीका—या गोप्यो भर्त्तृपुत्रादिकं रासक्रीड़ादिरूपैस्तादृशैर-अनिर्वचनीयैर्विभ्रमैर्विलासैः तया अनिर्वचनीय-माहात्म्यया। यद्वा, परमरहस्यत्वेनात्र प्रकाशयितुमयोग्यया रीत्या प्रकारेण औपपत्यकृतस्वैरिणीवन्मधुरभावविशेषपरिपाट्येत्यर्थः। तत्र वृन्दावने निकुञ्जादौ तं तादृशवेशादिविभूषितं एवं भगवन्तं आर्ताः परमव्यग्राः

परमतृष्णातुरा वा सत्योऽभजन् असेवन्त। तासु विषये तस्य भगवतो भाववरः परमप्रेमविशेषः अस्मत्तः सकाशादधिको युक्त एव भवेदित्युत्तरेणान्वयः। कथम्भूताः? लोकद्वयस्य अर्थान् साध्य-साधनानि अनपेक्ष्यमाणाः॥८२॥

भावानुवाद—जिन गोपियोंने पति-पुत्र आदिका परित्याग करके श्रीवृन्दावनमें रासलीला आदि विलास-श्रेणी अथवा वैसे अनिर्वचनीय विशेष विलास द्वारा किसी एक सुगोप्य रीतिसे प्रेमातुर होकर श्रीकृष्णकी सेवा की थी, उन गोपियोंका माहात्म्य अनिर्वचनीय है। अथवा परम रहस्यमय अर्थात् यहाँ पर प्रकाश करनेके अयोग्य किसी एक सुगोप्य रीतिसे प्रेमातुर होकर उन गोपियोंने श्रीकृष्णकी सेवा की थी। यहाँ पर 'सुगोप्य रीति'का तात्पर्य है कि व्यभिचारिणी स्त्रीके उपपतिभावके समान गोपियोंने मधुरभावकी विशेष रीति सहित अत्यधिक उत्कण्ठित होकर श्रीकृष्णकी सेवाकी है। भगवान्‌ने भी श्रीवृन्दावनके निकुञ्जोंमें वैसे वेश आदिसे विभूषित नायकरूपसे परम तृष्णातुर होकर उनकी सेवाको अङ्गीकार किया था। अतएव गोपियोंके प्रति भगवान्‌का विशेष-प्रेम उपयुक्त ही है, अर्थात् उनकी महिमा हमसे कहीं अधिक है। कैसे? उन्होंने लौकिक और पारलौकिक समस्त प्रकारके साध्य-साधनोंकी आशासे रहित होकर अनुरागपूर्वक श्रीकृष्णकी सेवा की है॥८२॥

अतो हि या नौ बहुसाधनोत्तमैः,साध्यस्य चिन्त्यस्य च भावयोगतः।
महाप्रभोः प्रेमविशेषपालिभिः, सत्साधनध्यानपदत्वमागताः॥८३॥

श्लोकानुवाद—अतएव जिन श्रीकृष्णको हम बहुत प्रकारके उत्तम-उत्तम साधनोंसे प्राप्त करनेकी चेष्टा करती हैं तथा अनेक प्रकारसे अपनी चित्तवृत्तियोंको रोककर जिनका ध्यान करती हैं, किन्तु गोपियोंने उन्हीं श्रीकृष्णको अपने विशेष प्रेम द्वारा प्राप्त किया है। इसलिए गोपियोंका उत्कृष्ट साधन हम सबके लिए परम ध्येय हुआ है॥८३॥

दिग्दर्शिनी टीका—अतः एतादृशभजनादेव हेतोः महाप्रभोः श्रीकृष्णस्य प्रेम-विशेषाणां असाधारणप्रेम्णां पालिभिः श्रेणीभिः कृत्वा स्वतोरुत्कृष्टयोः साधनध्यानयोः पदत्वं विषयतां परमसाध्यत्वं परमध्येयत्वञ्चेत्यर्थः। आगताः सम्यक्प्राप्ताः। तथा च प्रसिद्धमुद्धववाक्यं गोपीः प्रत्येव—*'वियोगिनीनामपि पद्धतिं वो, न योगिनो*

गन्तुमपि क्षमन्ते। यद्ध्येयरूपस्य परस्य पुंसो, यूयं गता ध्येयपदं दुरापम्॥' इति। कथम्भूतस्य? महाप्रभोः। नोऽस्माकं बहुभिः साधनोत्तमैरुत्कृष्ट साधनैः परिचर्यादिभिः साध्यस्य, न तु स्वाच्छन्द्येन प्राप्यस्य; किञ्च, भावयोगतः प्रेमसम्पत्त्या चित्तैकाग्रतया वा चिन्त्यस्य ध्येयस्यैव, न तु साक्षाल्लभ्यस्य॥८३॥

भावानुवाद—अतः ऐसे उत्कृष्ट भजनके कारण ही गोपियाँ महान प्रभु श्रीकृष्णके असाधारण प्रेमकी पात्री हुई हैं। अर्थात् स्वतः ही वे उत्कृष्ट साधन या ध्यानकी पदवीको प्राप्त हुई हैं, यही नहीं, बल्कि परम साध्य या परम ध्येयका भी विषय हुई हैं। इस विषयमें गोपियोंके प्रति श्रीउद्धवके प्रसिद्ध वचन इस प्रकार हैं—"इन वियोगिनी गोपियोंकी साधन पद्धतिको योगीगण अपने ध्यानमें भी अनुसरण करनेमें असमर्थ हैं, क्योंकि जो सभीके ध्यानके विषय हैं, वे परम पुरुष भगवान् भी उन गोपियोंका ही ध्यान करते हैं।" यह कैसे सम्भव हुआ? इसके उत्तरमें कहते हैं—गोपियाँ अपने विशेष प्रेमके द्वारा महान प्रभु श्रीकृष्णके लिए भी ध्येय विषय बन गयीं हैं। भावयोग अर्थात् गोपियोंने प्रेमरूपी सम्पत्ति द्वारा चित्तकी जैसी एकाग्रता प्राप्त की है, वैसी एकाग्रता हमें परिचर्या आदि बहुत प्रकारके उत्कृष्ट साधनों द्वारा भी प्राप्त नहीं है, अर्थात् हम गोपियोंकी भाँति श्रीकृष्णको स्वच्छन्दरूपसे प्राप्त नहीं कर पाती। इसलिए गोपियोंका श्रीकृष्णके प्रति वह प्रेम हम सबके लिए ध्यानका विषय बन गया है, किन्तु हम उसे साक्षात्‌रूपमें प्राप्त करनेके योग्य नहीं हैं॥८३॥

तास्वेतस्य हि धर्म-कर्म-सुत-पौत्रागार-कृत्यादिषु
व्यग्राभ्योऽस्मदथादरैः पतितया सेवाकरीभ्योऽधिकः।
युक्तो भाववरो न मत्सरपदं चोद्वाहभाग्भ्यो भवेत्
संश्लाघ्योऽथ च यत् प्रभोः प्रियजनाधीनत्वमाहात्म्यकृत्॥८४॥

श्लोकानुवाद—इसीलिए हमारी तुलनामें उन गोपियोंके प्रति श्रीकृष्ण द्वारा अधिक प्रेमका प्रकाश करना उपयुक्त ही है, क्योंकि हमलोग प्रभुकी विवाहित पत्नियाँ हैं और सदैव धर्म, कर्म, पुत्र-पौत्र, गृह आदि कार्योंमें ही व्यस्त रहती हैं तथा पतिभावके गौरवसे युक्त होकर प्रभुकी सेवा करती हैं। किन्तु गोपियाँ उक्त धर्म-कर्म आदि विषयोंमें आकांक्षा

रहित होकर शुद्ध भावसे प्रभुकी सेवा करती हैं। अतएव गोपियोंके प्रति श्रीकृष्णका भाव हमारी तुलनामें अधिक तथा उत्कृष्ट होना युक्तिसंगत ही है। परन्तु गोपियोंका यह भाव हमारे लिए मात्सर्यका विषय नहीं, बल्कि प्रशंसनीय है, क्योंकि वैसा भाव ही हमारे प्रभुको प्रिय है। अतएव इसके द्वारा प्रभुका अपने प्रिय-व्यक्तियोंकी अधीनता स्वीकाररूप माहात्म्य ही प्रकाशित हो रहा है॥८४॥

दिग्दर्शिनी टीका—कथम्भूताभ्योऽस्मद्धर्मकर्मादिषु व्यग्राभ्यः तत्तदासक्ताभ्य इत्यर्थः। अथ अतः; पतितया स्वामित्वेन हेतुना, आदरैर्गौरवैः, सेवाकरीभ्यः परिचर्याकर्त्रीभ्यः; यतः उद्वाहग्भागभ्यः कृतविवाहाभ्य इत्यर्थः। एवं गोपीभ्य आत्मनो वैपरीत्यमुक्तमित्यूह्यम्। तथाहि—तत्रैहिकामुष्मिकाशेषार्थापेक्षारहिता वयञ्च तेषु व्यग्राः। ताः रासक्रीड़ाद्यनिर्वचनीय-विभ्रमैर्भेजुः, वयन्तु सेवामात्रकारिण्यस्तत्रापि पतितया गौरवैः, न तु विशुद्धपरमप्रेमविशेषेण। ताः कदाचित् निशि गृहकोणे निभृतमागत्य लीनस्य अस्य विचित्रसङ्केतशब्दभङ्गिं निशम्य शयनादुत्थाय श्वश्र्वादिशङ्कया शनैः शनैर्द्वारार्गलमीषन्मोचयित्वा गृहान्निःसृत्याभिमुखे मिलितमेतमुपलभ्य गाढ़ालिङ्गन-चुम्बनादिना सुखयन्ति स्म, कदाचिद्दिवापि सङ्केतितयमुनानिकुञ्जादिगतं कोमलपल्लवपुष्पशय्यां रचयन्तं पत्रनिपातादिशब्देनापि प्रियतमा-समागममाशंक्यमानं तद्वर्त्मनिहितदृष्टिं कालिन्दीजलाहरणादिव्याजेन गत्वैनमरमयन्। कदाचित् प्रदोषे वेणुनादसङ्केतेनोन्मादिता मुहुर्भ्रश्यद्दुकूलकेशा विपर्यय धृतभूषणा वेगेन धावित्वा गत्या अवहित्थापरस्यास्य शाठ्यवचनपरिपाट्या महाशोकार्त्ताः; काकुभिर्निजेष्टं स्पष्टं याचमानाः पश्चादबहित्था-भङ्गान्नर्मत्व-ज्ञानेन परमदृष्टाः। पीतवस्त्राञ्चलादौ धृत्वा बलादेनं निकुञ्जकुहरे समाकृष्य समतर्पयन्नित्येवं विविधरीत्या स्वच्छन्दमौपपत्येनाभजन्; वयन्तु विधिवद्गृहीतपाणयो लोकधर्मादिपरतन्त्रा गार्हस्थ्यधर्मेणैव भजाम इत्यादि। अतएवास्माकं मत्सरपदं मात्सर्यविषयश्च न भवति; परमोत्कृष्टैर्जनैः सह निकृष्टानां सापत्न्ययोगात्; यथा स्वामिनीभिः सह दासीनाम्। अथच प्रत्युत संश्लाघ्यः सम्यक्श्लाघायोग्य एव। यद्यस्मात् प्रभोः स्वभर्त्तुः प्रियजनानामधीनत्वेन वश्यत्वेन तद्रूपं वा यन्माहात्म्यं कीर्त्तिविशेषस्तन् करोतीति तथा सः भाववरः। तथा सत्येवास्मादृशीनामपि तत्राशा भवेदिति गूढ़ोऽभिप्रायः। यद्यप्यासामपि धर्मकर्मादिष्वासक्तिर्नास्त्येव, सत्यामपि तेषां, सर्वेषामेव भगवदर्थकतया न कोऽपि च दोषो घटते, प्रत्युत भजनवैचित्रीहेतुत्वाद्गुण एव; तथापि निजसहजविनयभरेण गोपीसदृशभजनसौभाग्याभावेन वा तथोक्तं भगवत्येति बोद्धव्यम्, एवमन्यदप्यूह्यम्॥८४॥

भावानुवाद—अतएव गोपियोंके प्रति श्रीकृष्णका भाव हमारी तुलनामें अधिक उत्कृष्ट होना ही उचित है। इसका कारण है कि

श्रीकृष्णकी विवाहिता पत्नी होनेके कारण हम धर्म-कर्म आदिमें व्यस्त हैं और गौरव सहित पतिभावसे प्रभुकी सेवा या परिचर्या करती हैं, क्योंकि हमलोग विवाह-विधिके अनुसार ग्रहण की गयी हैं। इस प्रकार श्रीरुक्मिणीदेवीने अपनेमें और गोपियोंमें विपरीत भावका प्रदर्शन किया है। जैसे, गोपियाँ लौकिक और पारलौकिक समस्त प्रकारके साध्य-साधनोंकी आकांक्षासे रहित हैं, किन्तु हमलोग उसी साध्य-साधनोंमें व्यस्त हैं। गोपियाँ श्रीकृष्णकी रासलीला आदि अनिर्वचनीय विलास क्रीड़ाओंमें विशुद्ध परम प्रेमके साथ उनकी सेवा करती हैं, किन्तु हम पति भावके गौरवसे युक्त होकर उनकी सेवामात्र करती हैं और वह सेवा भी विशुद्ध परम प्रेमपूर्वक नहीं होती।

यहाँ पर गोपियोंके विशुद्ध प्रेमकी बात कही गयी है। कभी-कभी जब श्रीकृष्ण अर्धरात्रिमें गोपियोंके घरके समीप आकर एकान्तमें छिपकर संकेतिक शब्द करते हैं, तब गोपियाँ उन संकेतिक-शब्दोंको सुनकर शय्यासे उठ खड़ी होती हैं। अपनी सास आदिके भयवशतः बिना कोई शब्द किये धीरे-धीरे किवाड़ खोलकर वे घरसे बाहर आकर श्रीकृष्णसे मिलती हैं और प्रगाढ़ आलिङ्गन और चुम्बन आदि द्वारा उनको सुख प्रदान करती हैं। कभी दिनमें श्रीकृष्ण यमुना-पुलिनके संकेतिक निकुञ्जोंमें पहलेसे ही अभिसार कर कोमल पल्लव और पुष्पोंसे शय्या तैयार कर गोपियोंकी प्रतीक्षा करते हुए उनके आगमनके पथकी ओर देखते रहते हैं तथा वृक्षोंके सूखे पत्तोंके गिरनेके शब्द सुनकर प्रियतमाके आगमनकी आशंकासे चौंक उठते हैं। गोपियाँ भी यमुनासे जल भरने आदिकी छलनासे घरसे निकलकर संकेतिक कुञ्जोंमें श्रीकृष्णसे मिलती हैं। कभी प्रदोष कालमें श्रीकृष्णके वेणुनादका संकेत पाकर उन्मादिनी होकर अभिसारके लिए जाते समय बार-बार उनके वस्त्र स्खलित हो जाते हैं, वेणी बिखर जाती है और उलटे-पुलटे आभूषणोंको धारणकर वे वेगपूर्वक श्रीकृष्णके निकट उपस्थित होती हैं। किन्तु जब रसिकशेखर श्रीकृष्ण अवहित्था प्रकाश करके अर्थात् अपने भावको गोपन करके शठ व्यक्तिके समान वाक्-चातुरी प्रकाशित करते हैं, तब गोपियाँ महा शोकसे कातर होकर अत्यधिक विनयपूर्वक नम्र वचनोंसे अपनी मनोभीष्ट प्रार्थना

करती हैं, अर्थात् स्पष्टरूपसे सुरत-क्रीड़ाकी (काम-क्रीड़ाकी) याचना करती हैं। किन्तु बादमें श्रीकृष्ण द्वारा अवहित्था त्याग देने पर वे उसको नर्म परिहास मानकर परमानन्दित हो जाती हैं तथा उनके पीताम्बरको पकड़कर बलपूर्वक उन्हें निकुञ्जमें ले जाकर अनेक प्रकारसे आनन्दित करती हैं। इस प्रकार गोपियाँ अनेक प्रकारसे अर्थात् स्वच्छन्दरूपसे उपपति रीतिके द्वारा श्रीकृष्णकी सेवा करती हैं। किन्तु हम विधिपूर्वक पाणिग्रहण (विवाह) करके लोकधर्म आदिके परतन्त्र गृहस्थ-धर्मके अनुसार उनका भजन करती हैं। अतएव गोपियोंका उक्त भाव हमारे मात्सर्यका विषय नहीं है, बल्कि वैसा भाव विशेष प्रशंसनीय है अर्थात् उनके प्रति मत्सरता करना हमारे लिए उचित नहीं है, क्योंकि परम उत्कृष्ट व्यक्तिके साथ निकृष्ट व्यक्तिका सापत्न्य-भाव अर्थात् प्रतिद्वंदी भाव उसी प्रकार सर्वथा अनुचित है, जिस प्रकार स्वामिनीके साथ दासियोंका सौत भाव। अतएव यह श्रेष्ठ भाव हमारे प्रभुकी अपने प्रियजनोंके प्रति अधीनता स्वीकाररूप महिमाको ही प्रकाश कर रहा है। अथवा वे हमारे स्वामीकी प्रियाएँ हैं, इसलिए वे उनके प्रेमकी पराधीनतारूप माहात्म्यको ही बढ़ा रहे हैं। इस प्रकार स्वच्छन्दभावसे इस भावको प्रकाश करनेके कारण मुझ जैसी रमणियाँ भी उसको प्राप्त करनेकी आशा कर सकती हैं—श्रीरुक्मिणीदेवीके वाक्योंका यही गूढ़ अभिप्राय है।

यथार्थतः श्रीरुक्मिणीदेवी तथा अन्य महिषियोंकी धर्म-कर्म आदि विषयोंमें तनिक भी आसक्ति नहीं है। यद्यपि उन सब विषयोंमें उनकी किञ्चित् आसक्ति हो भी, तथापि वह सब विषय भगवान्‌की सेवाके सहायकरूपमें स्वीकृत होने पर उससे कोई दोष नहीं लगता, बल्कि वह भजनकी विचित्रताका कारण बनकर महागुणमें ही पर्यवसित होते हैं। किन्तु श्रीरुक्मिणीदेवी गोपियोंके समान भजनके सौभाग्यको प्राप्त न कर पानेसे अथवा अपनी स्वाभाविक नम्रतासे आक्षेपपूर्वक इस प्रकार कह रही हैं, ऐसा समझना चाहिए॥८४॥

ततोऽन्याभिश्च देवीभिरेतदेवानुमोदितम्।
सात्राजिती परं मानगेहं तदसहाविशत्॥८५॥

श्लोकानुवाद—तदुपरान्त अन्य महिषियोंने भी श्रीरुक्मिणीदेवीके विचारोंका अनुमोदन किया, किन्तु सत्राजितकी पुत्री श्रीसत्यभामादेवी उसको सहन न कर पायी और मान-गृहमें प्रवेश कर गयी॥८५॥

दिग्दर्शिनी टीका—अन्याभिः श्रीजाम्बवतीप्रभृतिभिः। एतत् श्रीरुक्मिण्युक्तमेव अनुमोदितं साधु साध्वित्यनुमोदनं कृतम्; परं केवलमेकेत्यर्थः। तं व्रजजनविषयक-भवदीयभावविशेषं न सहत इति तथाभूता सती; मानस्य गेहं माने सति यद्गृहं प्रविश्यते तत् प्रविवेश॥८५॥

भावानुवाद—श्रीजाम्बवती इत्यादि अन्य महिषियोंने श्रीरुक्मिणीदेवीके वचनोंका 'साधु साधु' कहकर अनुमोदन किया। केवल सत्राजितकी पुत्री श्रीसत्यभामादेवी व्रजवासियोंके प्रति श्रीरुक्मिणीके भावोंको सहन न कर पानेके कारण मान गृहमें चली गयी॥८५॥

श्रीपरीक्षिदुवाच—

श्रीमद्गोपीजन-प्राणनाथः सक्रोधमादिशत्।
सा समानीयतामत्र मूर्खराजसुता द्रुतम्॥८६॥

श्लोकानुवाद—श्रीपरीक्षित महाराजने कहा, श्रीउद्धवकी बात सुनकर श्रीमद्गोपियोंके प्राणनाथ श्रीकृष्णने क्रोधपूर्वक आदेश दिया कि उस महामूढ़ सत्राजितकी पुत्री सत्यभामाको शीघ्र ही यहाँ ले आओ॥८६॥

दिग्दर्शिनी टीका—श्रीमन्तः परमप्रेमसम्पत्तियुक्ता निखिलशोभावत्यो वा गोपीजनाः श्रीराधाद्याः प्राणनाथाश्च स्वामिन्यः, यद्वा, प्राणेश्वर्यो यस्य सः। अतएव तद्विषयक-मात्सर्यासहिष्णुतया तथादिशदिति भावः। मूर्खराजो महामूढ़ः सत्राजित् भगवति स्यमन्तकमणिहरणमिथ्यापवादजल्पनात्। तस्य सुतेति क्रोधेन तस्यामपि तादृक्त्वमावर्जयति सम्यक् त्यजति अर्पयतीत्यर्थः॥८६॥

भावानुवाद—श्रीमन्त अर्थात् परमप्रेम सम्पत्तिसे युक्त अथवा समस्त प्रकारसे शोभायमान। गोपियोंके प्राणनाथ अर्थात् श्रीराधा आदि गोपियोंके प्राणेश्वर अथवा श्रीराधा आदि गोपियाँ जिनकी प्राणेश्वरी हैं, वही श्रीकृष्ण। अतएव गोपियोंके प्रति मात्सर्यको सहन करनेमें असमर्थ होकर श्रीकृष्णने क्रोधपूर्वक आदेश दिया, "महामूढ़ सत्राजितकी पुत्रीको यहाँ ले आओ।" 'महामूढ़' कहनेका उद्देश्य यह है कि इसी मूर्ख राजा सत्राजितने स्यमन्तकमणि चोरी होने पर श्रीकृष्णपर मिथ्या आरोप

लगाया था। इसलिए श्रीकृष्णने क्रोधावेशमें कहा कि उस महामूढ़ सत्राजितकी कन्याको ले आओ, अर्थात् वैसे महामूढ़की कन्या होनेके कारण वह भी उसके (मूढ़ता) जैसे गुणोंसे युक्त है, ऐसा कहकर श्रीसत्यभामादेवीकी भर्त्सना की॥८६॥

श्रेष्ठा विदग्धा स्वभिमानसेवा–चातुर्यतो नन्दयितुं प्रवृत्ता।
गोपालनारी–रतिलम्पटं तं, भर्त्तारमत्यन्तविदग्धताढ्यम्॥८७॥
दासीभ्यस्तादृशीमाज्ञां तस्याकर्ण्य विचक्षणा।
उत्थाय मार्जयन्त्यङ्गं त्वरया तत्र सागता॥८८॥

श्लोकानुवाद—श्रीसत्यभामादेवी विदग्धा रमणियोंमें सर्वश्रेष्ठ थीं, इसलिए गोपियोंकी रतिके प्रति लम्पट विदग्धशिरोमणि अपने पतिको मान–सेवा–चातुर्य द्वारा सन्तुष्ट करनेकी चेष्टा करने लगीं। किन्तु जब उन्होंने दासियोंके मुखसे श्रीकृष्णके उस आदेशको सुना, तब भूमि–शय्याको परित्याग कर अंग–मार्जन करते–करते शीघ्र ही प्रभुके निकट आ गयीं॥८७–८८॥

दिग्दर्शिनी टीका—ननु सा श्रीकृष्णस्य परमप्रियतमा; कथं तस्य मनः–प्रतिकूलं व्यवजह्रे? सत्यम्; तस्यैव नागरशेखरस्य मानिनी–मानभञ्जनेन संरम्भात्, प्रियजन–परमोत्कर्षवर्णनेन वा सुखविशेषं सम्पादयितुमित्याह—श्रेष्ठेति। विदग्धासु मध्ये श्रेष्ठा; अतः अभिमानः सम्यङ्मानिनीत्वं तद्रूपं यत्सेवाचातुर्यं तेन कृत्वा; तृतीयायां तस्। तं भर्त्तारं श्रीकृष्णचन्द्रं नन्दयितुं हर्षयितुं प्रवृत्ता सा सत्यभामा च तस्य भर्त्तुस्तादृशीं क्रोधेन कृतामाज्ञां *'सा समानीयताम्'* इत्यादिरूपां दासीभ्य आकर्ण्य त्वरया तत्र पार्श्वे आगतेति द्वाभ्यामन्वयः। यद्वा, प्रवृत्तेत्येव क्रियापदम्; ततश्च तस्या माने प्रवृत्त्यभिप्रायकथनाय पूर्ववृत्तमाद्यश्लोकेनोक्तमिति ज्ञेयम्। ननु स्त्रीजनमानभञ्जनेन स्वगौरवादिहान्या कुतो हर्षः सम्भवेत्तत्राह—अत्यन्तया निःसीमकया विदग्धतया वैदग्ध्या आढयं युक्तम्; परमविदग्धचूड़ामणेः स एवानन्दविशेषहेतुरिति भावः। यतः गोपालनारीषु श्रीचन्द्रावल्यादिषु या रतिः, परमप्रेमनिष्ठापरिपाकविशेषलक्षणं सौरतं तस्यां लम्पटं रसिकम्। एवं परममहावैदग्ध्यं तथा परममहाविदग्धानां तासां मानभञ्जनेन सुखममुनानुभूतमस्तीति चोक्तम्। विचक्षणा मानसमयाद्यभिज्ञा; भूमि–शयनादुत्थाय अङ्गं स्वगात्रं मार्जयन्ती भूमिशयनादिना लग्नं रजआद्यपसारयन्ती॥८७–८८॥

भावानुवाद—यदि कहो कि श्रीमती सत्यभामादेवीने श्रीकृष्णकी परम प्रियतमा होने पर भी किसलिए श्रीकृष्णके मनके प्रतिकूल

व्यवहार किया? यह सत्य है कि श्रीसत्यभामादेवी श्रीकृष्णकी परम प्रियतमा हैं, किन्तु नागरशेखर श्रीकृष्णने प्रियजनोंके प्रेमोत्कर्षका वर्णन करके ही मानिनीका मान-भञ्जन किया। अथवा श्रीकृष्णके सुखके लिए ही श्रीसत्यभामादेवी पतिको मान-सेवासे सन्तुष्ट करनेमें तत्पर हुईं, इसलिए उनको विदग्धा रमणियोंमें सर्वश्रेष्ठ कहा गया है। अर्थात् सम्पूर्णरूपसे मानिनी होकर वे विदग्ध-शिरोमणि पतिको (श्रीकृष्णको) मान-सेवा-चातुर्य द्वारा प्रसन्न करनेका प्रयास करने लगीं। विशेषतः सत्यभामादेवी दासियोंके मुखसे अपने पति श्रीकृष्णके क्रोधपूर्वक वचन 'सत्यभामाको शीघ्र यहाँ ले आओ'को सुनते ही भूमि-शय्याका परित्याग करके अंग-मार्जन करते-करते शीघ्र ही अपने पतिके निकट उपस्थित हुई। उनके मानिनी होनेका अभिप्राय पूर्वश्लोकमें कहा गया है।

यदि कहो कि स्त्रियोंके मान-भञ्जन द्वारा अपने गौरवकी (मर्यादाकी) हानि होने पर प्रभुकी प्रसन्नता किस प्रकार सम्भव होगी? इसीलिए कह रहे हैं कि श्रीकृष्ण अत्यधिक विदग्धतासे युक्त या परम विदग्ध-चूड़ामणि होनेके कारण प्रेमनिष्ठासे युक्त मानिनियोंके मान-भञ्जनमें ही परमानन्दित होते हैं। इसका कारण है कि श्रीकृष्ण गोपललना श्रीचन्द्रावली इत्यादिकी रति अर्थात् परमप्रेम निष्ठाका परिपाक लक्षण जो सुरत है, उस सुरतके विषयमें अत्यन्त रसिक हैं। इस प्रकार श्रीकृष्णकी परम विदग्धता तथा परमविदग्ध व्यक्तिको स्त्रियोंके मानभञ्जन द्वारा जो सुख होता है, जिसका श्रीकृष्णको अनुभव है—इन विषयोंको कहा गया है। श्रीसत्यभामादेवी भी विचक्षणा हैं अर्थात् मानके काल आदि विषयको जाननेवाली हैं, इसीलिए श्रीकृष्णके आदेशको सुनते ही भूमि-शय्याका परित्याग करके अंग-मार्ज्जन करते-करते अर्थात् भूमि-शय्याके कारण शरीरसे लगी धूल आदिको झाड़ते हुए अपने पतिके निकट पहुँच गयीं॥८७-८८॥

स्तम्भेऽन्तर्धाप्य देहं स्वं स्थिता लज्जाभयान्विता।
संलक्ष्य प्रभुणा प्रोक्ता संरम्भावेशतः स्फुटम्॥८९॥

श्लोकानुवाद—असमयमें मान करनेके कारण लज्जित और भगवान्‌के क्रोधसे भयभीत होकर श्रीसत्याभामादेवी स्तम्भके पीछे ही अपनेको छुपाकर खड़ी रहीं, किन्तु प्रभु श्रीकृष्ण उनके अंग आदिकी सुगन्धसे उनके आनेके विषयमें जानकर क्रोधपूर्वक स्पष्टरूपसे कहने लगे॥८९॥

दिग्दर्शिनी टीका—सा च स्वं स्वकीयं देहं स्तम्भे अन्तर्धाप्य लीनं कृत्वा स्थिता सती प्रभुणा श्रीकृष्णेन संलक्ष्य सौरभ्यादिविशेषलक्षणेन ज्ञात्वा संरम्भस्य क्रोधस्यावेशतः प्रवेशतः स्फुटं यथा स्यात्तथा प्रोक्ता। कथम्भूता? लज्जा असमये माने प्रवृत्त्या विकर्मणा भयञ्च भगवत्क्रोधादेः ताभ्यामन्विता॥८९॥

भावानुवाद—यद्यपि श्रीसत्यभामा अपनेको स्तम्भके पीछे छुपाकर खड़ी थीं, तथापि श्रीकृष्ण उनके अंगकी सुगन्ध आदि लक्षणोंसे उनके आनेके विषयमें जानकर क्रोधपूर्वक स्पष्टरूपसे कहने लगे। श्रीसत्यभामा छिपकर क्यों खड़ी थीं? लज्जा अर्थात असमयमें मान करके भगवान्‌को असंतुष्ट करनेके कारण लज्जित होकर तथा भय अर्थात् भगवान्‌के क्रोधके भयसे—ऐसा समझना होगा॥८९॥

श्रीभगवानुवाच—

अरे सात्राजिति क्षीणचित्ते मानो यथा त्वया।
क्रियते रुक्मिणीप्राप्तपारिजातादिहेतुकः॥९०॥
तथा व्रजजनेष्वस्मन्निर्भरप्रणयादपि।
अवरे किं न जानासि मां तदिच्छानुसारिणम्॥९१॥

श्लोकानुवाद—श्रीभगवान्‌ने कहा—अरी संकीर्णचित्तवाली सात्राजिति (सत्राजितकी कन्या)! तुमने पहले रुक्मिणीके पारिजात प्राप्त करनेके समय जिस प्रकार मान किया था, आज भी व्रजवासियोंके प्रति मेरे चरम प्रेमको देखकर उसी प्रकार मान किया है? अरी बुद्धिहीने! मैं तो व्रजवासियोंकी इच्छाके वशीभूत हूँ, क्या तुम इसको नहीं जानती हो?॥९०–९१॥

दिग्दर्शिनी टीका—अरे सत्राजितस्य दुर्बुद्धेः कन्येति क्रोधसम्बोधनम्; तथा रे क्षीणचित्ते इति च। रुक्मिण्या प्राप्तं मत्तो लब्धं यत् पारिजातं नारदानीतं सुरतरुपुष्पमेकं तदादिर्हेतुर्यस्य स मानो यथा त्वया क्रियते, तथा व्रजजनेषु

श्रीराधिकादिषु योऽस्माकं निर्भरः सर्वातिशायी प्रणयः प्रेमा तस्मादपि हेतोः। तथा तादृशो मानः क्रियते त्वयेति सार्धश्लोकेनान्वयः॥९०॥

अस्मदिति बहुत्वं श्रीबलराम-रोहिण्याद्यपेक्षया व्रजजनविषयकनिजप्रेमभरादात्मनो बहुमानेन वा। अवर इत्यतिक्रोधसम्बोधने; तेषां व्रजजनानामिच्छानुसरणशीलम्॥९१॥

परमपुण्या श्रीयमुना ही इसका प्रमाण है। मैंने पहले भी कहा है कि अत्यधिक अद्भुत मनोहार विहार आदि द्वारा मैं आनन्दसागरमें ऐसा निमग्न था कि मुझे दिन-रातका भी ज्ञान नहीं रहता था। यह सब सत्य है या मिथ्या, इसे इन कालिन्दीसे ही पूछ लो, क्योंकि इन्होंने उन व्रजवासियोंके साथ हुई मेरे अनिर्वचनीय स्वच्छन्द विलासका प्रत्यक्ष दर्शन किया है। अथवा ये व्रजवासियोंके साथ हुए मेरे स्वच्छन्द विहारकी साक्षिणी हैं॥११३॥

अधुना तु स एवाहं स्वज्ञातीन् यादवानपि।
नेतुं नार्हामि तं भावं नर्मक्रीड़ाकुतूहलैः॥११४॥

श्लोकानुवाद—किन्तु इस समय वही मैं, अपने आत्मीय-स्वजन यादवोंको नर्मक्रीड़ा-कौतूहल द्वारा भी उस भावकी प्राप्ति करानेमें असमर्थ हूँ॥११४॥

दिग्दर्शिनी टीका—ननु तत्तन्निजाक्रीड़जनादिविच्छेदेन तव तादृशविहारादिसुखमत्र न सम्पद्यतां नाम। महिमा तु सदैव निर्विकारत्वात्तादृश एवात्रापि वर्त्तत इति चेन्न, तत्तदशक्तेरित्याह—अधुनेति सार्धेन। स अविकारोऽप्रच्युतस्वभाव एवाहं स्वस्य मम ज्ञातीरपीत्यनेन देहसम्बन्धविशेषः सूचितः। तं पूर्वोक्तं भावं प्रेम। यद्वा, तेषां व्रजवासिनामिव भावं नेतुं प्रापयितुं नार्हामि न शक्नोमीत्यर्थः। नर्माणि परिहासवाक्यानि, क्रीड़ाः समुद्रजलविहारादयः, कुतूहलानि विवाहाद्युत्सवाः, तैरपि कृत्वा॥११४॥

भावानुवाद—यदि कहो कि उन व्रजवासियोंके विच्छेदमें क्या यहाँ पर आपको वैसा विहार आदिका सुख प्राप्त नहीं हो सकता? आपकी महिमा तो सदैव नित्य निर्विकार (नित्य एकरूप) है और आपका स्वभाव भी च्युत होनेवाला नहीं है, अतएव यहाँ पर वैसी महिमा क्यों नहीं प्रकट करते? इसके उत्तरमें 'अधुना' इत्यादि श्लोक कह रहे हैं। यद्यपि मैं वही हूँ, किन्तु अब वैसी महिमाको प्रकट करनेमें असमर्थ हूँ। अर्थात् मैं वही अविकारी और अच्युत स्वभावयुक्त हूँ, परन्तु अब अपने ज्ञाति अर्थात् देह-सम्बन्धीय आत्मीय स्वजन यादवोंको वह व्रजभाव प्रदान करनेमें सक्षम नहीं हो पा रहा हूँ। नर्म अर्थात् परिहास वाक्यों द्वारा क्रीड़ा अर्थात् समुद्रमें जल-विहार आदि द्वारा तथा कुतूहल अर्थात् विवाह आदि

उत्सवों द्वारा भी उन्हें उस व्रजभावको प्रदान नहीं कर पा रहा हूँ॥११४॥

दुष्करं मे बभूवात्र त्वादृशां मानभञ्जनम्।
अतोऽत्र मुरली त्यक्ता लज्जयैव मया प्रिया॥११५॥

श्लोकानुवाद—हे सत्यभामे! इस समय तुम जैसी मानिनीका मान-भञ्जन करना भी मेरे लिए दुष्कर हो गया है। इसलिए लज्जावशतः मैंने अपनी प्रिय मुरलीको भी त्याग दिया है॥११५॥

दिग्दर्शिनी टीका—त्वादृशां तत्सदृशीनां महिषीणाम्; तत्त्वतस्तस्या भगवच्चित्त-प्रतिकूलमानाग्रहाभावात्तन्मानभञ्जनन्तु सुकरमेवेत्यर्थः। तर्हि जगन्मोहन-लीलां मुरलीमत्रापि गृहाणेति चेत्तत्राह—अत इति। अस्मादेवोक्ताद्धेतोः प्रिया मुरली मया त्यक्ता, इव उत्प्रेक्षायाम्; तच्च लज्जयेव राजराजेश्वरतादौ गोपाक्रीड़नकस्वीकारेण लोकलज्जा स्यात्तयेव; वस्तुतस्तु तादृशत्वद्वादनवैदग्धिमहिम्नोऽत्र सम्वरणेनैव। यद्वा, लोकोक्तौ, अत्र तादृशवादनाशक्त्या लज्जा स्यादित्यनेन हेतुना त्यक्तेत्यर्थः। यथास्थानमेव मम महिमाप्याविर्भवतीति भावः॥११५॥

भावानुवाद—यहाँ पर तुम जैसी महिषीका मान-भञ्जन करना भी मेरे लिए दुष्कर हो गया है। अच्छा, तो फिर जगतको मोहित करनेवाली अपनी मुरलीको यहाँ भी ग्रहण (प्रयोग) करो। इसलिए 'अतो' इत्यादि कह रहे हैं। मैं तुम जैसी मानिनीका मान-भञ्जन नहीं कर पाऊँगा, ऐसा देखकर लज्जापूर्वक मैंने अपनी प्रिय मुरलीको भी त्याग दिया है। मूल श्लोकके 'लज्जयैव' पदमें 'इव' कारका अर्थ उदासीनतासे है। इसका तात्पर्य यह है कि तुम जैसी महिषीका मानभंग करना दुष्कर नहीं है, अपितु अत्यन्त सुगम होनेके कारण मुरलीका कोई प्रयोजन नहीं है। भगवानकी प्रीतिके प्रतिकूल मानमें महिषियोंका आग्रह भी नहीं है, अतएव वैसे मानभञ्जनमें मुरलीकी कोई आवश्यकता ही नहीं है तथा यह मान भी उतना प्रगाढ़ नहीं है।

विशेषतः यहाँ पर श्रीकृष्ण राजराजेश्वर हैं और मुरली गोप-क्रीड़ाके लिए है, अतएव राजराजेश्वरके लिए मुरलीवादन द्वारा महिषियोंका मान-भञ्जन करना लोक लज्जाकर है, इसलिए मुरली त्याग करना ही उचित है। किन्तु वास्तवमें यहाँ पर श्रीकृष्णने व्रज जैसी

मुरलीवादन–वैदग्धी–महिमाको प्रकाश करना अनावश्यक समझकर उसे गुप्त रखा है। अथवा यहाँ पर वैसी मुरली बजानेमें असमर्थ होनेके कारण लज्जापूर्वक मुरलीको त्याग दिया है। भावार्थ यह है कि स्थानके अनुरूप ही श्रीकृष्णकी महिमा आविर्भूत होती है॥११५॥

अहो वत मया तत्र कृतं यादृक् स्थितं यथा।
तदस्तु किल दूरेऽत्र निर्वक्तुं च न शक्यते॥११६॥

श्लोकानुवाद—अहो! कैसे दुःखकी बात है! मैं व्रजमें जिस प्रकारकी लीलाएँ करता था और जिस प्रकार आनन्दसे वास करता था, यहाँ पर वैसी लीलाएँ करना तो दूर रहे, उनका वर्णन करनेमें भी असमर्थ हूँ॥११६॥

दिग्दर्शिनी टीका—ननु सदा सर्वशक्तिमान् भवान्, तथापि तथैव कर्त्तुं स्थातुं इच्छेति चेत्, तदा सर्वमत्रापि तादृशमेव सिध्यति? सत्यम्। तादृशीच्छा च मम स्थानविशेष एव जायते; अतो न किल तादृशमन्यत्र सम्पद्यत इत्याह—अहो वतेति परमखेदे। यादृक् बाल्यलीलाकौतुकादिकं कृतम्, यथा येन प्रकारेण गोपीरमणादिसुखेन स्थितञ्च, तत् तादृक्करणं तथावस्थानं चात्र दूरे अस्तु; निर्वक्तुं सम्यङ्निरूपयितुमपि तदत्र न शक्यते। तथा सति तच्छ्रवणात्तादृशीनामपि तादृक्प्रेममूर्च्छा जाता स्यादिति भावः॥११६॥

भावानुवाद—यदि कहो कि आप सदा सर्वशक्तिमान हैं, अतएव इच्छा करनेमात्रसे ही वैसी लीला और वैसा सुख आपको सर्वत्र ही प्राप्त हो सकता है? हाँ, यह सत्य है, किन्तु मेरी वैसी इच्छा किसी विशेष स्थानमें ही उदित होती है, सर्वत्र नहीं। अतएव वैसी लीला और सुख किसी अन्य स्थान पर प्राप्त नहीं होता इसे बतानेके लिए 'अहो' इत्यादि पद कह रहे हैं। अहो! कैसे दुःखकी बात है! मैंने व्रजमें जिस प्रकार बाल्यलीला कौतुक आदि किया था और जिस प्रकार सुखसे रहता था, यहाँ पर वैसा करना और रहना तो दूर रहे, उसको सम्पूर्णरूपसे वर्णन या निरूपण भी नहीं कर सकता हूँ। यदि ऐसा होता अर्थात् श्रीकृष्ण यदि उसको वर्णन कर पाते, तो उन लीलाकथाओंका श्रवण करके महिषियोंको भी वैसी ही प्रेममूर्च्छा उत्पन्न हो जाती॥११६॥

एकः स मे तद्व्रजलोकवत् प्रिय–, स्तादृग् महाप्रेमभरप्रभावतः।
वक्ष्यत्यदः किञ्चन बादरायणि–,र्मज्जीविते शिष्यवरे स्वसन्निभे॥११७॥

श्लोकानुवाद—एक श्रीशुकदेव ही मुझे उन व्रजवासियों जैसे प्रिय हैं, क्योंकि उनमें व्रजवासियों जैसा महाप्रेम है जिसके प्रभावसे वे मेरे द्वारा रक्षित अपने समान श्रेष्ठ तथा प्रिय शिष्य श्रीपरीक्षितको यह व्रजलीला किञ्चित्मात्र श्रवण करायेंगे॥११७॥

दिग्दर्शिनी टीका—ननु निर्वचनं विना तच्छ्रवणाद्यभावेन प्रेमरसविस्तारणरूपं त्वदवतारमुख्यप्रयोजनं कलौ कथं सम्पद्यताम्? तत्राह—एक इति। स सुप्रसिद्धः; ते उक्तमाहात्म्या ये व्रजलोका गोपगोपिकाद्यास्तद्वन्मे मम प्रियः। अतएव तादृक् तद्व्रजलोकसदृशो या महाप्रेमभरस्तस्य प्रभावतः शक्तेर्हेतोः अदः मद्बाल्यलीलादिकं किञ्चन स्वल्पं बादरायणिः श्रीव्यासनन्दनः शिष्यवरे श्रीपरीक्षिति वक्ष्यति। कथम्भूते? मज्जीविते मया जीविते, मातृगर्भेऽश्वत्थाम्नो ब्रह्मास्त्रतेजोनिवारणात्। यद्वा, भारतोक्तानुसारेण मृत एव जाते मया पुनर्जीवित इत्यर्थः; यद्वा, मयि जीवितं जीवनं यस्य; यस्य जीवनकालो मद्भक्तिं विना कोऽपि न गतः; यः क्षणमपि मां विना न जीवतीति वा तस्मिन्नित्यर्थः। एवं स्वेन बादरायणिना सन्निभे सदृशे, यद्वा, निरुपम इत्यर्थः। अतः परमगुह्यमपि तस्मिन् प्रकाशयिष्यति इति ज्ञेयम्। एवं तादृशवक्तृश्रोतृप्रभावतस्तद्रसः कुत्र कुत्रापि कलिकालेऽपि सञ्चरिष्यतीति भावः॥११७॥

भावानुवाद—यदि आपत्ति हो कि उस व्रजलीलाका वर्णन किये बिना उसके श्रवण आदिके अभावमें कलिकालके महान अवतारका प्रेमरस–विस्ताररूप मुख्य प्रयोजन किस प्रकार पूर्ण होगा? इसके उत्तरमें 'एकः' इत्यादि पद कह रहे हैं। यद्यपि व्रजलीलाका माहात्म्य सुप्रसिद्ध है, तथापि उन गोप–गोपियों जैसे व्रजवासियोंके समान मेरे प्रिय केवल एक श्रीबादरायणि (श्रीशुकदेव) हैं, अतएव वे ही व्रज–वासियोंके समान महाप्रेमके प्रभावसे मेरी बाल्यलीला आदिको अपने समान श्रेष्ठ शिष्य श्रीमान् परीक्षितको किञ्चित् श्रवण करायेंगे। वे परीक्षित कैसे हैं? मेरे द्वारा जीवित किये गये अथवा मेरे द्वारा रक्षित अर्थात् मातृगर्भमें अश्वथामाके ब्रह्मास्त्रके तेजको दूर करके मैंने जिनकी रक्षाकी थी। अथवा महाभारतकी उक्तिके अनुसार अश्वथामाके ब्रह्मास्त्रसे निहत होने पर भी जिसने मेरे द्वारा पुनर्जीवन प्राप्त किया था। अथवा मैं ही जिनका जीवन हूँ और अपने जीवनमें जो

क्षणकाल भी मेरी भक्तिके बिना जीवन धारण नहीं कर पाये, वही परीक्षित हैं; अथवा इस प्रकार श्रीशुकदेवके समान जो अनुपम शिष्य हैं। अतएव परमगुह्य होने पर भी श्रीशुकदेव यह व्रजलीला उनको किञ्चिन्मात्र श्रवण करायेंगे। वास्तवमें ऐसे व्रजरसके रसिक वक्ता और श्रोताके प्रभावसे ही व्रजलीलारस कलिकालमें भी कहीं–कहीं सञ्चारित होगा॥११७॥

श्रीपरीक्षिदुवाच—

एतादृशं तद्व्रजभाग्यवैभवं, संरम्भतः कीर्त्तयतो महाप्रभोः।
पुनस्तथाभावनिवेशशङ्कया, ताः प्रेरिता मन्त्रिवरेण संज्ञया॥११८॥
सर्वा महिष्यः सह सत्यभामया, भैष्म्यादयो द्रागभिसृत्य मूर्द्धभिः।
पादौ गृहीत्वा रुदितार्द्रकाकुभिः, संस्तुत्य भर्त्तारमशीशमच्छनैः॥११९॥

श्लोकानुवाद—श्रीपरीक्षित महाराजने कहा, श्रीकृष्ण द्वारा रोषपूर्वक ऐसे व्रजके वैभवका कीर्त्तन करने पर कहीं वे फिरसे भावाविष्ट न हो जायें, इस आशंकासे उनको उस प्रसङ्गसे निवृत्त करानेके लिए मन्त्रीवर श्रीउद्धवने महिषियोंको संकेत द्वारा प्रभुके सम्मुख भेज दिया॥११८–११९॥

दिग्दर्शिनी टीका—संरम्भतः क्रोधादावेशाद्वा। पुनस्तथाभावः तथात्वं पूर्वोक्तं महार्तरोदनादि तस्य निवेशः प्रवेशस्तस्य शङ्कया, मन्त्रिवरेणोद्धवेन ताः सर्वा महिष्यः संज्ञया सङ्केतेन प्रेरिताः सत्यः सत्यभामया सह द्राक् शीघ्रमभिसृत्य अग्रतो भूय भर्त्तारं श्रीकृष्णदेवमशीशमन् शमयामासुः, संरम्भोपशमं कारयामासुरित्यर्थः। शनैरिति शीघ्रं तत्संरम्भत्यजनाशक्यत्वात्। किं कृत्वा? पादौ स्वभर्त्तुश्चरणारविन्दद्वन्द्वं मूर्धभिर्गृहीत्वा रुदितैरार्द्राभिः सरसाभिः काकुभिः संस्तूय॥११८–११९॥

भावानुवाद—भगवान् श्रीकृष्णने क्रोधित होकर व्रजके वैभवका वर्णन करना आरम्भ किया। प्रभुको ऐसा करते देख श्रीउद्धवको आशंका हुई कि प्रभु फिरसे भावाविष्ट हो सकते हैं अर्थात् वे पहलेकी भाँति अत्यन्त आर्त्त होकर क्रन्दन आदि कर सकते हैं। अतः प्रभुको उस प्रसङ्गसे निवृत्त करनेके लिए मन्त्रीवर श्रीउद्धवने महिषियोंको संकेत किया। उसी संकेतके अनुसार श्रीरुक्मिणी आदि महिषियोंने श्रीसत्यभामा सहित प्रभुके सम्मुख जाकर अपने–अपने

मस्तकको उनके श्रीचरणकमलों पर रख दिया तथा क्रन्दन करते हुए विनयपूर्वक वचनोंके द्वारा उन्हें धीरे-धीरे शान्त किया। अर्थात् उनके क्रोधको शान्त करनेका प्रयत्न करने लगीं। किन्तु 'शनैः' शब्दके अर्थसे ऐसा बोध होता है कि श्रीकृष्ण शीघ्र ही उस क्रोधको त्याग करनेमें असमर्थ थे, अतः धीरे-धीरे त्याग किया॥११८-११९॥

भोजनार्थञ्च तेनैव देवकी रोहिणी तथा।
अन्नपानादिसहिते तत्र शीघ्रं प्रवेशिते॥१२०॥

श्लोकानुवाद—फिर श्रीकृष्णको भोजन करानेके लिए श्रीउद्धवने माता श्रीदेवकी और श्रीरोहिणीदेवीको अन्न-पान आदि सामग्रियोंके साथ वहाँ प्रवेश करवाया॥१२०॥

दिग्दर्शिनी टीका—तथापि तत्प्रसङ्गत्यागः कथं घटताम्? परमभक्तवरस्य तस्यैव चातुर्यादित्याह—भोजनार्थमिति द्वाभ्याम्। तेन मन्त्रिवरेणैव; एवमधुनैव रोहिण्याः प्रवेशाख्यानात्। सा चतुरवरा भगवत्पार्श्वमनागत्य पूर्वमेव भोग्यसाधनाय रसवतीं गतेत्यूह्यम्। एवं श्रीबलरामोऽप्यभिज्ञवरः स्नानव्याजेन स्वगृहं ययाविति ज्ञेयम्॥१२०॥

भावानुवाद—तथापि श्रीकृष्ण द्वारा व्रजके उस प्रसंगका त्याग किस प्रकार सम्भव हुआ? परमभक्तवर श्रीउद्धवकी चतुरतासे, इसीको 'भोजनार्थं' इत्यादि दो श्लोकोंमें बतला रहे हैं। तब मन्त्रीवर श्रीउद्धवने श्रीकृष्णको भोजन करानेके लिए श्रीदेवकी और श्रीरोहिणीदेवीको अन्न-पान आदि सामग्रियों सहित प्रवेश करवाया। यद्यपि अभी श्रीरोहिणीदेवीने सामग्रियों सहित आगमन तो किया, किन्तु इस व्याख्यामें यह अव्यक्त रह गया था कि सुचतुरा श्रीरोहिणीदेवी पहले ही श्रीकृष्णको वहीं छोड़कर पाकशालामें चली गयी थीं। उसी प्रकार चतुर शिरोमणि श्रीबलराम भी स्नानके छलसे पहले ही अपने भवनमें चले गए थे—ऐसा जानना होगा॥१२०॥

बलदेवं कृतस्नानं प्रवेश्य कृतिना तदा।
द्वारान्ते नारदस्तिष्ठेदिति विज्ञापितो विभुः॥१२१॥

श्लोकानुवाद—उसके बाद परमचतुर मन्त्री श्रीउद्धवने स्नान कर चुके श्रीबलदेवको वहाँ प्रवेश करवाया तथा उनके द्वारा श्रीकृष्णको द्वार पर आये हुए श्रीनारदके आगमनकी वार्ता सुनवायी॥१२१॥

दिग्दर्शिनी टीका—कृतिना परमचतुरेण तेनैव मन्त्रिवरेण; विभुः श्रीकृष्णदेवः॥१२१॥

भावानुवाद—श्लोकानुवाद द्रष्टव्य है॥१२१॥

सर्वान्तरात्मदृक् प्राह सस्मितं नन्दनन्दनः।
अद्य केन निरुद्धोऽसौ यन्नायात्यत्र पूर्ववत्॥१२२॥

श्लोकानुवाद—यह सुनकर सबके अन्तर्यामी श्रीनन्दनन्दन मुस्कराते हुए कहने लगे—आज श्रीनारद पहलेकी तरह क्यों नहीं आ रहे हैं? आज उनको किसने यहाँ आनेसे रोक दिया है?॥१२२॥

दिग्दर्शिनी टीका—सर्वेषामन्तरात्मानं चित्तं तद्वृत्तमन्तर्यामितया पश्यति जानातीति तथा सः, अतएव नारदव्यवहारज्ञानात् स्मितेन सहितं यथा स्यात्तथा प्राह। ननु परमानर्थोत्पादकनारदचेष्टितेन न कथं चुक्रोध? तत्राह—नन्दनन्दन इति। नन्दव्रजजनानां महिमातिशयप्रकटनार्थमेव तस्य तत्र प्रवृत्तिरिति भावः। यद्वा, सर्वचित्तदर्श्यप्यजानन्निवाह—अद्य केनेति। यतोऽयं नन्दनन्दनः रसिकवर्गशिरोमणिरित्यर्थः। असौ नारदः, यद्यस्मान्निरोधात्, अत्र मत्पार्श्वे; पूर्ववदिति—यथा सर्वकालं केनाप्यनिवार्यमाणः स स्वयमेवात्रायाति, तथा कुतोऽद्य नायातीत्यर्थः॥१२२॥

भावानुवाद—यदि कहो कि व्रजका स्मरण दिलाकर महान दुःख उत्पन्न करनेवाली वैसी चेष्टाके कारण प्रभुने श्रीनारद पर क्रोध क्यों नहीं किया? इसके उत्तरमें कह रहे हैं कि नन्दनन्दन श्रीकृष्ण सबके अन्तर्यामी हैं अर्थात् सबकी चित्तवृत्तिको जानते हैं, अतएव श्रीनारदकी चितवृत्तिको भी जानते हैं। व्रजवासियोंकी अत्यधिक महिमाको प्रकाशित करनेके लिए श्रीनारदकी इस कार्यमें प्रवृत्ति हुई है। अथवा श्रीनन्दनन्दनने रसिक-शिरोमणि होनेके कारण मुस्कराते हुए कहा कि आज श्रीनारद पहलेकी भाँति यहाँ पर क्यों नहीं आ रहे हैं? आज उनको किसने यहाँ आनेसे रोक दिया है? अर्थात् आजसे पहले किसीने उनको आनेसे नहीं रोका, वे स्वयं ही आ जाते हैं, आज उसी प्रकार क्यों नहीं आ रहे हैं?॥१२२॥

प्रत्युवाचोद्धवः स्मित्वा प्रभो भीत्यापि लज्जया।
ततो ब्रह्मण्यदेवेन स्वयमुक्तः प्रवेश्य सः॥१२३॥

श्लोकानुवाद—इसके उत्तरमें श्रीउद्धवने हास्यपूर्वक कहा, "प्रभो! उनकी अपनी लज्जा और भयने ही उनको रोक दिया है।" तब बह्मण्यदेव श्रीकृष्ण स्वयं उठकर श्रीनारदको घरमें लाकर कहने लगे॥१२३॥

दिग्दर्शिनी टीका—उद्धवोऽपि स्मित्वा नारदचेष्टास्मरणेन ईषद्धसित्वा प्रत्युवाच—किं भीत्या स्वकीयापराधभयेन निरुद्ध इति। मयि तस्य तद्भयं कदापि नास्त्येवेति चेत्तत्राह—लज्जयापीति; निजनिविड़प्रेमभराविर्भाव-विकारेण महतां स्वत एव लज्जोत्पत्तेः, जगदुपद्रवविशेषकारणोत्थापनाद्वा। ततस्तस्मादेवोक्ताद्धेतोः; ब्रह्मण्यदेवेन भगवता स्वयमेवोत्थायाग्रे अभिगम्य सादरं प्रणम्य हस्ते धृत्वा स नारदः स्वकीयप्रासादवरं प्रवेश्य पूजयित्वा तेनैवोक्त इत्यर्थो द्रष्टव्यः, ब्रह्मण्यदेवेनेत्युक्तेः॥१२३॥

भावानुवाद—श्रीनारदकी चेष्टाको स्मरण करके श्रीउद्धवने भी हास्यपूर्वक उत्तर दिया कि उनके भयने ही उनको यहाँ आनेसे रोक दिया है। जब श्रीकृष्णने पूछा कि उनको किसका भय है, श्रीउद्धवने कहा कि उनको अपने द्वारा किये गये अपराधका भय। भगवान्ने जब कहा कि श्रीनारदको मुझसे कभी कोई भय नहीं है, इसके उत्तरमें श्रीउद्धवने कहा कि तब तो लज्जा ही उनको आनेसे रोक रही होगी। वास्तवमें अपने प्रगाढ़ प्रेममें विकार उत्पन्न होनेके कारण महाजनगण स्वतः ही लज्जित हुआ करते हैं। अथवा जगतके लिए उपद्रव-जनक कारण उपस्थित करनेके लिए वे स्वयं ही लज्जित हो गये हैं। तब भगवान् ब्रह्मण्यदेव (श्रीकृष्ण) स्वयं ही उठकर श्रीनारदकी ओर अग्रसर हुए तथा उनको सादर प्रणाम कर उनका हाथ पकड़कर अपने राजभवनमें ले आये और उनकी पूजा की। यहाँ पर 'ब्रह्मण्यदेव' कहनेका तात्पर्य भगवान्के उक्त आचरणसे ही समझना चाहिए॥१२३॥

श्रीभगवानुवाच—

मत्प्रीत्युत्पादनव्यग्र श्रीनारद सुहृत्तम।
हितमेवाकृतात्यन्तं भवान्मे रसिकोत्तम॥१२४॥

श्लोकानुवाद—श्रीभगवान्ने कहा—हे सुहृद्वर श्रीनारद! आप मुझे प्रसन्न करनेके लिए ही सदा व्यग्र रहते हैं। अतएव हे रसिकजनोंमें उत्तम! आपने मेरा अत्यन्त हित ही किया है॥१२४॥

दिग्दर्शिनी टीका—हे मत्प्रीतेरुत्पादने व्यग्र! अतएव हे सुहृत्तम परमहितकारिन्! यद्वा, हे निरुपाध्युपकारिश्रेष्ठ! भवान्मे मम अत्यन्तं हितमुपकारमेवाकृत चकार, न त्वपराधं कमपीत्यर्थः। हे रसिकेषु मच्चरणारविन्दमकरन्दलम्पटेषु उत्तम श्रेष्ठेति मद्भक्तिरसिकानामयमेव स्वभाव इति लज्जा च कापि न कार्येति भावः॥१२४॥

भावानुवाद—श्रीभगवान्ने कहा—"हे सुहृद्वर श्रीनारद! आप मुझे प्रसन्न करनेके लिए सदैव व्यग्र रहते हैं, अतएव आप मेरे परम हितकारी हैं।" अथवा "हे निरुपाधिक उपकार करनेवालोंमें श्रेष्ठ! आपने मेरा अत्यधिक उपकार किया है, अपराध नहीं। हे रसिकोत्तम! आप मेरे चरणकमलोंकी मकरन्दके लोभी भक्तोंमें श्रेष्ठ हैं। मेरी भक्ति करनेवाले रसिक भक्तोंका स्वभाव ही ऐसा है, अतएव आपको लज्जा नहीं करनी चाहिए"॥१२४॥

प्राग्यद्यपि प्रेमकृतात् प्रियाणां, विच्छेददावानलवेगतोऽन्तः।
सन्तापजातेन दुरन्तशोकावेशेन, गाढ़ं भवतीव दुःखम्॥१२५॥

श्लोकानुवाद—यद्यपि प्रथमतः अपने प्रियजनोंके विरहरूपी दावानलके वेगसे अन्तःकरणमें तीव्र सन्ताप उत्पन्न होता है, उससे असीम शोक प्रकटित होता है तथा उस शोकके कारण हृदय अत्यन्त दुःखी होता है॥१२५॥

दिग्दर्शिनी टीका—ननु भवद्भक्तितरलितेन मया लज्जा न कर्त्तव्यास्तु नाम। मोहोत्पादनेन भवतोऽत्यन्तदुःखं कृतं, कुतो हितम्? तत्राह—प्रागिति द्वाभ्याम्। प्रियजनानां विच्छेदो विरह एव दावानलः अन्तर्बहिः परमसन्तापकत्वात्, तस्य वेगाद् योऽन्तःसन्तापस्तस्माज्जातेन दुरन्तस्य निःसीमस्य शोकस्यावेशेन प्रवेशेन तदभिभवेन वा यद्यपि प्राक् प्रथमं गाढ़ं दुःखं भवति। किम्भूतात्? प्रेम्णा कृतात्, एवं यादृशं प्रेम तादृशमेव विच्छेददुःखमपि स्यात् इति ज्ञेयम्। इवेति परिणामे सुखोत्पत्त्यपेक्षयाभवन् एव पर्यवसानात्। यद्वा, दुःखमित्यनेन सम्बन्धनीयम्। ततश्च तेनापि वस्तुतोऽन्तःसुखमेव। बहिर्दीनवद्वैकल्यादिदर्शनाच्च दुःखभानात्, दुःखमिव भवतीत्यर्थः। अथवा लोकोक्तिरीत्यानधिकार्थमेव॥१२५॥

भावानुवाद—यद्यपि भगवद्भक्तिके द्वारा चित्तके द्रवित होनेसे प्रकट हुए लक्षणोंके लिए मुझे लज्जा नहीं करनी चाहिए, तथापि मैंने मोह उत्पन्न करके आपको अत्यन्त दुःख ही प्रदान किया है, आपका हित किस प्रकार किया है? श्रीनारदके इस प्रश्नकी आशंका करके ही श्रीभगवान् 'प्राग्' इत्यादि दो श्लोक कह रहे हैं। प्रिय व्यक्तियोंका विरह ही दावानल है तथा वह भीतर और बाहर अत्यधिक सन्ताप देनेवाला है। अर्थात् प्रियजनोंके विरहानलके वेगसे भीतरमें जो अत्यधिक सन्ताप उत्पन्न होता है और उस असीम सन्ताप अथवा शोकके आवेशसे या उससे पीड़ित होने पर सर्वप्रथम हृदयमें प्रगाढ़ दुःख होता है। वह दुःख कैसा होता है? प्रेमकृत अर्थात् प्रेमसे उत्पन्न। इस प्रकार प्रिय व्यक्तियों द्वारा किया गया प्रेम जितना गम्भीर होता है, उनका वियोग दुःख भी उतना ही गम्भीर होता है, यही जानने योग्य तथ्य है। यहाँ पर 'इव' कारका तात्पर्य यह है कि वह दुःख परिणाममें सम्भोग-सुखसे (मिलन-सुखसे) भी अधिक प्रशंसनीय होता है। अर्थात् वह दुःख परिणाममें सुख उत्पन्न करनेके कारण दुःख न होकर सुखमें ही पर्यवसित हो जाता है। अथवा 'दुःख' नामक वस्तुके साथ कुछ भी सम्बन्ध न होनेके कारण वास्तवमें उस दुःख द्वारा अन्तरमें परमसुखकी ही अनुभूति होती है। तथापि बाहरसे दैन्य और व्याकुलता आदिको देखकर दुःखका भानमात्र होता है, किन्तु वास्तवमें वह दुःख नहीं है, इसलिए 'दुःखमिव' कहा गया है। अथवा यह लौकिक उक्ति या रीतिके अनुसार कहा गया है॥१२५॥

तथापि सम्भोगसुखादपि स्तुतः, स कोऽप्यनिर्वाच्यतमो मनोरमः।
प्रमोदराशिः परिणामतो ध्रुवं, तत्र स्फुरेत्तद्रसिकैकवेद्यः॥१२६॥

श्लोकानुवाद—तथापि, उस दुःखका परिणाम सम्भोग-सुखसे भी अधिक प्रशंसनीय है, क्योंकि वह निश्चय ही किसी एक अनिर्वचनीय और मनोरम आनन्दकी स्फूर्ति करवा देता है, जो केवल रसिकों द्वारा ही अनुभव होती है॥१२६॥

दिग्दर्शिनी टीका—तथापि तादृशदुःखे सत्यपि तत्र तस्मिन् दुःखे परिणामतः पश्चात् तत्परिपाकाद्वा प्रमोदराशिर्ध्रुवं निश्चितं स्फुरेत्। कथम्भूतम्? सम्भोगे

योगसमये यत् सुखं, तस्मादपि स्तुतः श्लाघ्यः इत्यर्थः, ततोऽप्यधिकत्वात्। कीदृश इत्यपेक्षायामाह—स कोऽपीति। ब्रह्मानन्दोऽनिर्वाच्यस्तस्मादप्याधिक्येन भजनानन्दोऽनिर्वाच्यतरः, तत्र च प्रेमानन्दोऽनिर्वाच्यतमः, तत्रापि विरहार्त्तिद्वारा जातः सन् परमान्त्यकाष्ठाविशेष-प्राप्त्या परममहानिर्वाच्यतम इत्यर्थः। न च दुःखहेतुकत्वादहृद्य इत्याह—मनो रमयतीति मनोरम इति। ननु दुःखे कथं सुखानुभवः सम्भवेत्तत्राह—तद्रसिकेन तादृशप्रेमलम्पटेनैवैकेन वेद्यः ज्ञातुं शक्यः॥१२६॥

भावानुवाद—तथापि वैसा विरह-दुःख होने पर भी उस दुःखके परिणाममें अथवा उसकी परिपक्व अवस्थामें निश्चय ही प्रचुर आनन्दकी स्फूर्ति होती है। वह कैसे? क्योंकि उस दुखका परिणाम सम्भोग-सुखसे भी अधिक प्रशंसनीय होता है। अर्थात् सम्भोगमें जो सुख होता है, उस सुखसे भी अधिक सुख उस दुःखके परिणाममें होता है। यदि प्रश्न हो कि वह सुख सम्भोगसुखसे किस प्रकार अधिक है? इस प्रश्नकी आशंकासे 'स कोऽपि' पद कह रहें हैं, वह सुख अनिर्वचनीयतम है। अर्थात् ब्रह्मानन्द अनिर्वचनीय है, उससे अधिक होनेके कारण भजनानन्द अनिर्वचनीयतर है और प्रेमानन्द उससे भी अधिक होनेके कारण अनिर्वचनीयतम है। तथापि, उस प्रेमसे उत्पन्न प्रियजनके विरहानलका वेग और उस विरहानलके वेगसे उदित जो दुःख-शोक है, वह परम सीमाको प्राप्त होनेसे परम अनिर्वचनीयतम है। अर्थात् उस विरह-दुःखकी परिपक्व अवस्थामें जिस परम महान सुखका उदय होता है, वह परम अनिर्वचनीयतम है और वह महान सुख विरह-दुःखसे उत्पन्न होने पर भी असहनीय नहीं है, बल्कि मनोरम है। यदि प्रश्न हो कि विरह-दुःखमें सुखका अनुभव कैसे सम्भव है? इसके उत्तरमें कह रहे हैं कि उस विरह-दुःखमें केवल रसिकोंको ही महा आनन्दकी स्फूर्ति होती है। अर्थात् उस आनन्दको केवल प्रेमरसके लोभी महाजन ही अनुभव करनेमें समर्थ हैं, अन्य कोई भी उसको जान नहीं सकता है॥१२६॥

तच्छोकदुःखोपरमस्य पश्चाच्-,चित्तं यतः पूर्णतया प्रसन्नम्।
सम्प्राप्तसम्भोगमहासुखेन, सम्पन्नवत्तिष्ठति सर्वदैव॥१२७॥

श्लोकानुवाद—इसका कारण है कि विरहसे उत्पन्न शोक-दुःखके

शान्त होने पर चित्त सदैव सम्पूर्णरूपसे प्रसन्न होकर सम्भोग-सुख प्राप्त होनेकी भाँति महासुखी हो जाता है॥१२७॥

दिग्दर्शिनी टीका—ननु गाढ़दुःखपरिपाकतः परमदुःखविशेषमयो मोहो मृत्युर्वा सम्भवेत्, कथं तस्मात् प्रमोदराशिः स्फुरतीति। तत्रापि तदनुरूपकारणादेव *'सुखानन्तरं दुःखं, दुःखानन्तरं सुखम्'* इति न्यायेनैवास्तु। कथं दुःखपरिणामतः एव स्फुरतीति च प्रत्येतव्यम्? सत्यम्, स्वानुभवप्रामाण्यात् तथा तदानींसुखस्फुर्त्तेः। कारण-आन्तराभावाच्चेत्याह—तच्छोकेति। तयोर्विरहजशोकदुःखयोः; यद्वा, शोकेन दुःखं शोकदुःखं तस्य शोकदुःखस्य उपरमः प्रशान्तिस्तस्य पश्चादनन्तरम्; यतः कारणाच्चित्तं तेषामेव विरहशोकदुःखवतां मनः सर्वदैव प्रसन्नं सत् पूर्णतया न्यूनतावैपरीत्येन विशिष्टं तिष्ठति। कीदृशम्? सम्यक् प्राप्तं यत् सम्भोगमहासुखं, तेन सम्पन्नवत्। वतिप्रयोगश्च वस्तुतो विरहदुःखजत्वेन सम्भोगजत्वाभावात्। अतः कारणात्तत्र प्रमोदराशि-स्फूर्त्तिः प्रत्येतव्येत्यर्थः। अयं भावः—प्रियतमजनेन सह क्रीड़ाविशेषे वृत्ते सति, यथा महासुखेन सम्पन्नं मनः स्यात्तथैव विरहशोकार्त्युपरमेऽपीति चित्तप्रसन्नतादिना कार्येण कारणानुमानात् प्रमोदराशिस्फूर्त्तिरवश्यमन्तव्यैव, सुखविशेषोदयं विना चित्तप्रसन्नताद्यसम्भवात्। तत्स्फुर्त्तेश्च तदानीं कारणान्तरदर्शनात् विरहदुःखादेवासावस्फुरदिति च मन्तव्यमेवेति॥१२७॥

भावानुवाद—यदि कहो कि प्रगाढ़ दुःख (अत्यधिक दुःख)के परिपक्व होने पर परम दुःखमय मोह या मृत्युकी ही सम्भावना है, अतः ऐसी दशामें आनन्दकी स्फूर्ति कैसे संभव है? विशेषतः 'सुखके बाद दुःख और दुःखके बाद सुख' इस न्यायके अनुसार वियोगके कारण हुए शोक-दुःखकी निवृत्ति होने पर मिलन सुखका उदय होना सम्भव है, किन्तु दुःखके परिणाममें अथवा उसकी परिपक्व अवस्थामें आनन्दकी स्फूर्ति किस प्रकार विश्वास करने योग्य है? यह सत्य है, किन्तु इस विषयमें अपना अनुभव ही प्रमाण है, अर्थात् प्रिय व्यक्तिके विरहमें भी चित्तमें सुखकी स्फूर्ति होना तथा उस सुखकी स्फूर्तिका कारण ज्ञात न होने पर भी अपनी अनुभूति ही इस विषयमें प्रमाण है। यहाँ पर अपने अनुभव द्वारा प्राप्त प्रमाणका प्रदर्शन करनेके लिए 'तच्छोक' इत्यादि श्लोक कह रहे हैं। विरहसे उत्पन्न शोकके द्वारा जो दुःख होता है, उस दुःखके निवृत्त होने पर विरही मन सर्वदा प्रसन्न होकर पूर्णरूपसे न्यूनताके विपरीतभावसे युक्त अर्थात् अभाव रहित हो जाता है। वह सुख कैसा होता है? अपनी अभीष्ट वस्तुको सम्पूर्ण

रूपमें प्राप्त करनेवाले सम्भोग-सुखके समान महासुखमय होता है। अर्थात् विरह द्वारा चित्तमें जो एक न्यूनता या अपूर्णताका भाव उदित होता है, वह अब नहीं रहता, बल्कि चित्त और भी अधिक प्रसन्न हो जाता है। 'सम्पन्नवत्तिष्ठति' पदमें 'वत्'के प्रयोग द्वारा यह सूचित किया गया है कि वास्तवमें वह पूर्णता विरहरूपी दुःखसे उत्पन्न होती है सम्भोग-सुखसे नहीं, इसीलिए उस अवस्थामें आनन्दकी स्फूर्ति होती है, अतएव यह विश्वासके योग्य है।

भावार्थ यह है कि प्रियतम व्यक्तिके साथ मिलन आदि होने पर जिस सुखकी प्राप्ति होती है, उसी प्रकार विरहसे उत्पन्न शोक आदिके शान्त होने पर चित्तकी प्रसन्नता आदि लक्षणोंके द्वारा उस प्रसन्नताके कारणका अनुमान करना चाहिए, अर्थात् चित्तकी प्रसन्नतारूप लक्षणों द्वारा ही आनन्दकी स्फूर्तिका होना अवश्य ही स्वीकार करना होगा। इसका कारण है कि अत्यधिक सुखकी प्राप्ति नहीं होनेसे चित्तका प्रसन्न होना असम्भव है और विरहकी अवस्थामें वैसे सुखकी स्फूर्तिका अन्य कोई कारण भी विद्यमान नहीं है। अतएव उस सुखकी स्फूर्ति विरह-दुःखसे हुई है, इसको अवश्य ही स्वीकार करना होगा॥१२७॥

इच्छेत् पुनस्तादृशमेव भावं, क्लिष्टं कथञ्चित् तदभावतः स्यात्।
येषां न भातीति मतेऽपि तेषां, गाढ़ोपकारी स्मृतिदः प्रियाणाम्॥१२८॥

श्लोकानुवाद—इसलिए अपने प्रियतमके विरहसे संतप्त चित्त पुनः उसी भावकी ही अभिलाषा करता है और उस विरहका किसी प्रकारसे अभाव होने पर अत्यन्त दुःखी भी होता है। जिनके मतानुसार विरहका यह विषय रुचिकर नहीं है, वे भी प्रिय व्यक्तिको स्मरण करानेवाला जानकर इसे परम उपकारक मानते हैं॥१२८॥

दिग्दर्शिनी टीका—ननु *'सुखानन्तरं दुःखं, दुःखानन्तरं च सुखम्'* इति न्यायात् स्फुरतु नाम पश्चात् प्रमोदराशिः, शोककाले च तद्दुःखं तदवस्थमेव तच्चातीवायुक्तं। ब्रह्मानन्दाधिकभजनानन्दादप्यधिकस्य प्रेमानन्दस्य विरहशोकार्त्तिकालेऽन्यथा-त्वापत्तेः। न तद्दुःखस्यापि विचारेण सुखरूपत्वादित्याह—इच्छेदिति। विरहिणां चित्तमेव कर्त्तृ, तादृशमेव महाशोकार्त्तिरोदनादिरूपं भावं सत्तां स्थितिमिति यावत्

पुनरपीच्छेत्। कथञ्चिदिति प्रियतमविरहवतां कदाचिदपि तादृग्भावाभावो न स्यादेव। केनापि प्रकारेण यदि भवेत्तदा क्लिष्टं परमदुःखितं स्यादित्यर्थः। दुःखस्य वाञ्छनीयत्वाभावादभावे च क्लेशापत्त्या तद्दुःखं सुखमेव मन्तव्यमिति भावः। दुःखवत् प्रतीयमानस्यैव सुखस्य चरमकाष्ठाविशेषाप्तपरममहत्ताया अभिप्रेतत्वात्। यथाग्नि-प्रतियोगीघनहिमादिस्पर्शेन पादाद्यङ्गेषु जायमान-परम-महाजाड्यस्य ज्वलदङ्गारस्पर्शवदभिज्ञा स्यात्। तत्र हि यथाङ्गारस्पर्श-प्रतीतिर्मिथ्या परममहाजाड्यमेव सत्यम्, तथात्रापि दुःखस्य प्रतीतेर्मिथ्यात्वमेव सुखस्यैव सत्यत्वं विज्ञेयम्। किन्तु भगवतो भगवत्प्रियतमजनानाञ्च केषाञ्चित् विरहसम्बन्धिदुःख मेवैतादृशं भवति, न तु सार्वत्रिकमिति सर्वमनवद्यम्। यद्यप्यात्मानमधिकृत्यैव श्रीभगवतैवमुक्तं तथापि तदीयविरहार्त्तभक्तजनविषयकमेव ज्ञेयम्; तेष्वेव सर्वथा तदुपपत्तेः। तत्र च श्रीगोपीव्यतिरिक्त-भक्तजनविषयकमेव मन्तव्यम्। यतस्तासां कदाचिदपि विरहार्त्तेः शान्तिर्न भवेदेव, सङ्गमेऽपि विरहशङ्कया दुःखस्यैवापत्तेः। एतच्च प्रागुक्तमेव। न च तासां भगवद्विरहतापे कदापीच्छा स्यात्, कोटिदावानलाधिकदाहकत्वेन तस्यानुभूयमानत्वात्। यथोक्तं श्रीदशमस्कन्धे (श्रीमद्भा॰ १०/४७/४९-५०) ताभिरेवोद्धवं प्रति—*'सरिच्छैलवनोद्देशा गावो वेणुरवा इमे। सङ्कर्षणसहायेन कृष्णेनाचरिता प्रभो॥ पुनःपुनः स्मारयन्ति नन्दगोपसुतं वत। श्रीनिकेतैस्तत्पदकैर्विस्मर्त्तुं नैव शक्नुमः॥'* इति। अनयोरर्थः—आचरिताः सेविताः; कृष्णविस्मृतौ न तावद्दुःखं स्यात्, सापि नास्माकं भवतीति भाव इति। एवं कृष्णस्मरणेन विरहार्त्तिविवर्धनात् तद्विस्मरणमपीच्छन्ति, कुतस्तु तास्तद-विरहाग्निमिच्छन्तु नाम। अतएव तासां सर्वदैव महावेगेन विरहदुःखविशेषोदयात् सर्वाधिकतरसुखविशेषानुभवः स्यादिति सिध्यति। तादृशसुखस्य हि तेनैव प्रकारेण सम्पद्यमानत्वात् तादृशरूपत्वाच्च। एवमेवाशेषेभ्यो भक्तवृन्देभ्यः प्रियतमजनेभ्यश्च तासां माहात्म्यं सिध्यतीति दिक्। इति एतन्मयोक्तं, येषां न भाति न प्रकाशते तेषां मतेऽपि प्रियजनानां स्मृतेर्दाता परमोपकारी भवत्येव। एवं हि तैरवश्यमेव मन्तव्यमित्यर्थः॥१२८॥

भावानुवाद—यदि प्रश्न हो कि 'सुखके बाद दुःख और दुःखके बाद सुख' इस न्यायके अनुसार विरहसे उत्पन्न शोक-दुःखके शान्त होनेपर प्रचुर आनन्दकी स्फूर्ति होती है तो हो, किन्तु शोकके समय तो केवल दुःख ही होता है, अतएव उस अवस्थामें आनन्दकी स्फूर्ति होना युक्तिपूर्ण नहीं है। ब्रह्मानन्दसे भजनानन्द अधिक है तथा भजनानन्दकी तुलनामें प्रेमानन्द अधिक है, किन्तु विरहसे उदित शोक-आर्त्तिके समय वह प्रेमानन्द मिथ्या प्रतीत होता है। इसके उत्तरमें कह रहे हैं कि नहीं, वह मिथ्या नहीं होता, क्योंकि विचार

करने पर ऐसा ज्ञात होता है कि वह दुःख भी सुख है, इसके समाधानके लिए 'इच्छेत्' इत्यादि पद कह रहे हैं।

'इच्छेत्'—इस क्रियामें कर्त्ता विरहीका चित्त है। अतएव प्रियतमके विरहमें व्याकुल चित्त उस प्रकारके महाशोक, आर्त्ति-रोदन आदि भावोंके स्थायी होनेकी फिरसे इच्छा करता है तथा उन भावोंका अभाव होने पर अत्यन्त दुःखी भी हो जाता है। व्यवहारिकरूपमें भी देखा जाता है कि प्रियतमके विरहसे व्याकुल चित्तमें कभी भी वैसे भावोंका अभाव नहीं होता। अतएव वह दुःख नहीं है, अपितु सुख-स्वरूप है, ऐसा मेरा मन्तव्य है, क्योंकि कोई भी दुःखकी इच्छा नहीं करता। अतएव वह भाव दुःखके समान प्रतीत होने पर भी सुखकी चरम अवस्थाको प्राप्त होनेके कारण अत्यधिक महिमायुक्त है, यही अभिप्राय है। इसके लिए दृष्टान्त है—यद्यपि अग्निका ताप हिमकी ठण्डकके विपरीत है, तथापि पैर आदि अंगों द्वारा उस हिम खण्डके स्पर्शसे अत्यधिक ठंडा लगने पर वह जलते हुए अंगारेके स्पर्श जैसा प्रतीत होता है, किन्तु यहाँ पर जलते हुए अंगारेके स्पर्शकी प्रतीति मिथ्या है, अत्यधिक ठंडा ही सत्य है। उसी प्रकार विरहमें भी दुःखकी प्रतीति मिथ्या है, सुखको ही सत्य जानना चाहिए। किन्तु भगवान्‌के प्रियतम किन्हीं विरहीजनोंके विरह सम्बन्धीय दुःखमें ही ऐसा सुख अनुभव होता है, सर्वत्र नहीं। इस प्रकारसे उक्त प्रश्नका समाधान हुआ।

यद्यपि भगवान् अपने अधिकार अनुसार अथवा अपनी अनुभूतिसे विरह-दुखके सम्बन्धमें कह रहें हैं, तथापि उनके द्वारा विरह-आर्त्तिका वर्णन भक्तोंसे सम्बन्धित ही समझना चाहिए, क्योंकि भक्तोंमें ही सदैव विरह आदि उदित होता है। तथापि यह मन्तव्य गोपियोंके अलावा अन्य भक्तोंसे सम्बन्धित ही जानना चाहिए, क्योंकि गोपियोंकी विरह-आर्त्ति तो कभी भी शान्त नहीं होती, यहाँ तक कि संग होने पर भी भावी विरहकी आशंकासे उनमें दुःख उपस्थित होता है। यदि प्रश्न हो कि गोपियाँ तो कभी भी भगवान्‌के विरह-तापकी इच्छा नहीं करतीं, क्योंकि विरह-तापकी दशामें वे करोड़ों दावानलोंकी तुलनामें अधिक तापका अनुभव करती हैं। यथा, दशम-स्कन्धमें श्रीउद्धवके प्रति गोपियोंकी उक्ति है—"हे प्रभो! इन सब नदियों, पर्वतों, वन प्रदेशों

तथा गायों और वेणुध्वनिने श्रीबलदेव सहित श्रीकृष्णकी सेवाकी है। अहो! श्रीनन्दनन्दनके श्रीनिकेतन-पदचिह्नों द्वारा यह सब नदियाँ, पर्वत और वन आदि बार-बार हमें उनका स्मरण करा देते हैं, इसलिए हम उनको भूलनेमें समर्थ नहीं हो पा रही हैं।" तात्पर्य यह है कि श्रीकृष्णके स्मरणसे ही गोपियोंकी विरह-आर्त्ति वर्द्धित होती है, इसलिए वे श्रीकृष्णको भूलनेकी इच्छा करतीं हैं। यद्यपि श्रीकृष्णकी विस्मृतिसे उन्हें दुःख नहीं होता, परन्तु वे कदापि श्रीकृष्णको विस्मरण भी नहीं कर पाती हैं।

पुनः यदि कहो कि वे विरह-तापकी इच्छा ही क्यों करती हैं? इसके उत्तरमें कह रहें हैं कि उनमें सदैव अत्यधिक वेगसे विरह-दुःख उदित होता है, जिसके कारण उन्हें सर्वाधिक सुखकी अनुभूति होती है—ऐसा सिद्ध है। अतएव विरहानल भी उनके लिए उक्त व्याख्याके अनुसार सुख स्वरूप है। इस प्रकार अनन्त भक्तों अथवा श्रीकृष्णके प्रियतमजनोंमें गोपियोंका ही अधिक माहात्म्य प्रमाणित होता है। हमने पहले यह भी कहा है कि जिनके मतसे यह विरह-दुःख रुचिकर नहीं होता, वे भी प्रिय व्यक्तिका स्मरण करानेके कारण इस विषयको परम उपकारी ही समझते हैं। अतएव उनके सम्बन्धमें भी ऐसा ही मन्तव्य करना होगा॥१२८॥

कथञ्चन स्मारणमेव तेषा,-मवेहि तज्जीवनदानमेव।
तेषां यतो विस्मरणं कदाचित्, प्राणाधिकानां मरणाच्च निन्द्यम्॥१२९॥

श्लोकानुवाद—किसी भी प्रकारसे प्रियतमके स्मरणको प्रेमी भक्तोंके लिए जीवन-दान समझना चाहिए, क्योंकि प्राणसे भी अधिक प्रिय व्यक्तिका यदि कभी विस्मरण हो जाये, तो वह मरनेसे भी अधिक निन्दनीय है॥१२९॥

दिग्दर्शिनी टीका—तदेवान्वयव्यतिरेकाभ्यां बोधयति—कथमिति। तेषां प्रियजनानां केनापि प्रकारेण स्मारणमेव यत्, तज्जीवनस्य दानमेवेत्यवेहि जानीहि। यतो यस्माद्धेतोः प्राणेभोऽप्यधिकानां तेषां प्रियजनानां कदाचिदपि विस्मरणं मरणादपि निन्द्यं धिक्कारास्पदम्, मरणाधिकतरदुःखदोषावहत्वात्। यद्वा, मरणमेव वरं, न तु तेषां विस्मरणं परमनिन्दा-स्पदत्वादित्यर्थः॥१२९॥

भावानुवाद—प्रियजनोंका स्मरण परम उपकारक है, इसे अन्वय और व्यतिरेकरूपसे समझानेके लिए 'कथम्' इत्यादि श्लोक कह रहे हैं। किसी भी प्रकारसे प्रिय व्यक्तिके स्मरणको जीवन-दान समझना चाहिए, क्योंकि प्राणोंसे भी अधिक प्रिय व्यक्तिका कभी भी विस्मरण होना मरनेसे भी अधिक निन्दनीय और धिक्कार योग्य है। अतएव प्रिय व्यक्तिका विस्मरण मरनेसे भी अधिक दोषपूर्ण है। अथवा प्रिय व्यक्तिका विस्मरण होनेसे तो मर जाना ही अच्छा है, क्योंकि प्रिय व्यक्तियोंका विस्मरण अत्यधिक निन्दनीय है॥१२९॥

न सम्भवेदस्मरणं कदापि, स्वजीवनानां यदपि प्रियाणाम्।
तथापि केनापि विशेषणेन, स्मृतिः प्रहर्षाय यथा सुजीवितम्॥१३०॥

श्लोकानुवाद—यद्यपि अपने प्राणोंके समान प्रिय व्यक्तिका कभी भी विस्मरण सम्भव नहीं होता, तथापि किसी प्रकारसे यदि उनका विशेष स्मरण हो, तो वह जीवनदानके समान अत्यधिक आनन्दप्रद होता है॥१३०॥

दिग्दर्शिनी टीका—ननु एवं तेषां क्षणमात्रमपि विस्मरणासम्भवात् सदैव स्मर्यमाणानां तेषां स्मरणेन क इवोपकारः स्यात्? सत्यम्, परममनोहरप्रकारविशेषेण-स्मारणात् तादृगेवोपकारः स्यादित्याह—नेति। स्वजीवनानां स्वकीयजीवनरूपाणामिति; यथा निजजीवनस्य कदापि विस्मृतिर्न घटते, तथा प्रियजनानामपीत्यर्थः। अतो यदपि यद्यपि कदाचिदपि अस्मरणं स्मरणाभावो न सम्भवेत्। विशेषेण वैशिष्ट्येन कृत्वा स्मृतिः प्रकृष्टहर्षाय परमसुखाय भवति। तत्र दृष्टान्तः—सुजीवितं नित्यविचित्रमहोत्सवेन जीवनं यथा प्रहर्षाय भवति, तथेति। तत्र यथा महोत्सवादिसुखरहितं केवलं जीवनमात्रं प्रहर्षाय न भवति, प्रत्युत दारिद्र्यादिदुःखेन परमशोकायैव, तथा प्रेम्णा विना प्रियजनस्मरणमपीति दृष्टान्तेनानेन ध्वनितम्॥१३०॥

भावानुवाद—यदि आपत्ति हो कि इस प्रकार यदि प्रिय व्यक्तिका क्षणमात्रके लिए भी विस्मरण असम्भव होता है, तो फिर जो स्वयं ही सदैव स्मरणीय है, उनके स्मरण द्वारा और अधिक क्या उपकार होगा? यह सत्य है कि केवल स्मरणमात्रसे उपकार नहीं होता, किन्तु परम मनोहर रूपमें जो स्मरण होता है, उससे ही वैसा उपकार होता है, इसे 'न सम्भवेत' इत्यादि श्लोकमें बतला रहे हैं। अपने

जीवनस्वरूप प्रिय व्यक्तिका विस्मरण कदापि सम्भव नहीं है, अर्थात् अपने प्राणोंका विस्मरण जैसे कभी सम्भव नहीं है, उसी प्रकार प्रिय व्यक्तिका भी विस्मरण सम्भव नहीं है। यद्यपि प्रिय व्यक्तिके स्मरणका अभाव कभी भी नहीं होता, स्मृति सदैव वर्त्तमान रहती है, तथापि उनकी विशेष स्मृति ही उत्कृष्ट जीवनके समान परमसुख प्रदान करती है। इस विषयमें दृष्टान्त इस प्रकार है—संजीवित अर्थात् नित्यप्रति विचित्र महोत्सवमय जीवन ही वास्तवमें आनन्दका कारण होता है, किन्तु महोत्सवरूपी सुखोंसे रहित केवल जीवनधारण करने मात्रसे ही सम्पूर्णरूपमें आनन्द प्राप्त नहीं होता, बल्कि दरिद्रता आदि दुःखों द्वारा जीवन परम शोकका कारण ही बन जाता है। उसी प्रकार प्रेमके बिना प्रिय व्यक्तिके स्मरणसे भी सुख प्राप्त नहीं होता। अर्थात् प्रेमकी विचित्र परिपक्व अवस्थामें जो स्मरण होता है, वही उत्कृष्ट जीवनके समान आनन्द प्रदान करता है॥१३०॥

इत्येवमुपकारोऽद्य भवताकारि मे महान्।
तत्तेऽस्मि परमप्रीतो निजाभीष्टान् वरान् शृणु॥१३१॥

श्लोकानुवाद—हे देवर्षि! इस प्रकार आपने मेरा बहुत उपकार किया है, मैं आपके प्रति अत्यधिक प्रसन्न हूँ, अतः आप अपने अभीष्ट वरको मांग लीजिए॥१३१॥

दिग्दर्शिनी टीका—भवता चाद्य परमोत्तमप्रकारेण श्रीगोपिकानां स्मरणं मे कारितमिति परमहितमेव कृतमित्युपसंहरन्नाह—इतीति। अनेनोक्तप्रकारेण; तत् तस्मात्ते त्वां प्रति अहं परमप्रीतोऽस्मि॥१३१॥

भावानुवाद—हे श्रीनारद! आपने अति उत्तम रूपसे गोपियोंका स्मरण कराकर मेरा परम उपकार किया है। इस प्रकार प्रतिपाद्य विषयका उपसंहार करते हुए भगवान् कह रहे हैं कि मैं आपके प्रति अत्यधिक प्रसन्न हूँ, आप अपना अभीष्ट वर माँगें॥१३१॥

श्रीपरीक्षिदुवाच—

मुनिर्जय जयोद्घोषैः सवीणागीतमैड़त।
व्रजक्रीड़ोत्थनामाढ्यैः कीर्त्तनैश्च वरप्रदम्॥१३२॥

श्लोकानुवाद—श्रीपरीक्षित महाराजने कहा, ऐसा सुनकर श्रीनारदमुनि 'जय जय' ध्वनि करने लगे तथा वीणा वादन करते हुए वर प्रदान करनेवाले श्रीकृष्णके व्रजलीलासे प्रकटित नामोंका कीर्त्तन करते हुए उनकी स्तुति करने लगे॥१३२॥

दिग्दर्शिनी टीका—ततश्च दुर्लभतराणामात्महृद्यानां परमवराणां संप्राप्तये प्रथममस्तौदित्याह—मुनिरिति। जय जयेतिरूपैरुद्घोषैरुच्चतरशब्दैः कृत्वा; वीणागीतेन सहितं यथा स्यात्, कीर्त्तनैश्च कृत्वा ऐड़त अस्तौत्। कथम्भूतैः? व्रजे या भगवतः क्रीड़ास्ताभ्य उत्थानि प्रादुर्भूतानि यानि नामानि श्रीगोकुलमहोत्सव-श्रीयशोदानन्दन-श्रीनन्दकुमारगोप गोपीजनप्रिय-श्रीगोपीगणमनोहर-पूतनामोचनेत्यादीनि तैराढ्यैः समृद्धैः, वरान् प्रकर्षेण ददातीति तथा तं श्रीभगवन्तम्॥१३२॥

भावानुवाद—तब श्रीनारद परम दुर्लभ और अपने अभिलषित श्रेष्ठ वरोंकी प्राप्तिके लिए सर्वप्रथम भगवान्का स्तव करने लगे। किस प्रकार स्तव किया? उच्च स्वरसे 'जय जय' ध्वनिपूर्वक वीणा बजाते हुए भगवान्की व्रज-सम्बन्धी लीलाओंसे प्रकटित नामोंका पुनः-पुनः कीर्त्तन करने लगे। जैसे, हे गोकुलके महोत्सव! हे श्रीयशोदानन्दन! हे श्रीनन्दनन्दन! हे गोप-गोपीजन प्रिय! हे श्रीगोपीजन-मनोहर! हे पूतनामोचन! इत्यादि नामोंके कीर्त्तन द्वारा वर प्रदाता श्रीभगवान्का स्तव करने लगे॥१३२॥

स्वयं प्रयागस्य दशाश्वमेध, तीर्थादिके द्वारवतीपरान्ते।
सम्भाषितानां विषये भ्रमित्वा, पूर्णार्थतां श्रीमदनुग्रहेण॥१३३॥
विप्रादीनां श्रोतुकामो मुनीन्द्रो, हर्षात् कृष्णस्याननादेव साक्षात्।
एवं मातः प्रार्थयामास हृद्यं, तस्मिन् रम्योदारसिंहे वरं प्राक्॥१३४॥

श्लोकानुवाद—हे माता! मुनिश्रेष्ठने प्रयागके दशाश्वमेध तीर्थसे द्वारकापुरी तक स्वयं भ्रमण करके विप्र आदि जिन-जिन भक्तोंसे वार्त्तालाप किया था, उन सभीने भगवान्की कृपासे अपने-अपने अभीष्टको प्राप्त किया है। ऐसा जानते हुए भी श्रीनारद हर्षपूर्वक साक्षात् श्रीकृष्णके मुखसे श्रवण करनेके लिए उदारोंमें सर्वश्रेष्ठ उन भगवान्से अपने प्रथम अभीष्ट वरकी प्रार्थना करने लगे॥१३३-१३४॥

दिग्दर्शिनी टीका—तत्राग्रे भगवदनुग्रहादौ तृप्त्यभावस्य प्रार्थ्यत्वे प्रथममेव हेतुमाह—स्वयमिति द्वाभ्याम्। प्रयागस्य दशाश्वमेधनाम तीर्थं तदादिर्यस्य। द्वारावती च परान्तः पर्यन्तो यस्य तस्मिन् विषये स्थाने स्वयं नारदेन भ्रमित्वा सम्भाषितानां विप्रादीनां दशाश्वमेधे विप्रभोजनार्थमागतस्तद्देशाधिकारी भगवत्पूजारतो यो विप्रः प्रथमं नारदेन दृष्ट्वा सम्भाषितस्तदादीनाम्; आदिशब्देन दाक्षिणात्यमहाराजमारभ्य श्रीमदुद्धवान्तास्तेन सम्भाषिताः सर्वे ग्राह्याः। श्रीमतो भगवतः, यद्वा, श्रीकृष्णस्येत्यग्रे वर्त्तत एव प्रकरणबलादपि प्राप्तं स्यादेव। ततश्च श्रीमान् परमोज्ज्वलो योऽनुग्रहस्तेन हेतुना या पूर्णार्थता पूर्णा समस्ता अर्था धर्मार्थकाममोक्षभजनादयो येषां तद्भावस्तत्ता तां, यद्यपि स्वयं जानात्येव तथापि हर्षाद्धेतोः श्रीकृष्णस्य श्रीमुखादेव साक्षाच्छ्रोतुकामः प्राक् आदौ एवं वक्ष्यमाणं वरं, हे मातस्तस्मिन् श्रीकृष्णे प्रार्थयामासेत्यन्वयः। हृद्यं प्रियं चिरं हृदि वर्त्तमानमिति वा; रम्येषु परमोत्तमेषु उदारेषु वदान्येषु मध्ये सिंहे श्रेष्ठतमे; अतएव तथा प्रार्थनं तत्फलसुसिद्धिश्चेति भावः॥१३३–१३४॥

भावानुवाद—'भगवान्‌की कृपासे कभी भी किसीकी तृप्ति न हो', श्रीनारद द्वारा यह प्रथम वर माँगनेके कारणको 'स्वयं' इत्यादि दो श्लोकोंमें बतलाया जा रहा है। प्रयागमें दशाश्वमेध नामक तीर्थसे द्वारकापुरी तक श्रीनारदने स्वयं भ्रमण करके विप्र आदि जिन-जिन भक्तोंके साथ वार्त्तालाप किया था, वास्तवमें उन सभीने श्रीकृष्णकी परमोज्ज्वल कृपासे अपने अभीष्टको परिपूर्णरूपसे प्राप्त किया था। अथवा धर्म, अर्थ, काम, मोक्ष और भजनानन्द आदि समस्त अर्थोंको प्राप्त किया था, अर्थात् उनको किसी प्रकारका अभाव नहीं था। यहाँपर जिन-जिन भक्तों कहनेसे दशाश्वमेध तीर्थमें ब्राह्मणोंको भोजन करानेके लिए उपस्थित हुए उस देशके अधिकारी तथा भगवान्‌की पूजामें रत जिस विप्रका श्रीनारदने सर्वप्रथम दर्शन किया था, उन्हीं विप्र आदि भक्तोंको समझना होगा। यहाँ पर 'आदि' शब्दसे दक्षिणके महाराजसे प्रारम्भ करके द्वारकामें श्रीउद्धव तक सभी भक्तोंको ही ग्रहण करना होगा, क्योंकि वे सभी श्रीमद्भगवान्‌के भक्त हैं। अथवा 'श्रीमद्' पद द्वारा प्रसङ्गवशतः भगवान् श्रीकृष्णको ही समझना चाहिए।

यद्यपि श्रीनारद स्वयं उन सब भक्तों पर हुई भगवानकी कृपाके विषयमें जानते थे, तथापि हर्षपूर्वक साक्षात् श्रीकृष्णके मुखसे श्रवण करनेके लिए उन्होंने श्रीकृष्णसे सर्वप्रथम अपने प्रिय वरकी प्रार्थना

की। हे माता! इस प्रकार श्रीनारदने महावदान्य (उदारोंमें श्रेष्ठ) श्रीभगवान्से आगे कहे जानेवाले तथा चिरकालसे हृदयमें वर्त्तमान अपने अभीष्ट उस परमोत्कृष्ट वरकी प्रार्थना की। भगवान् महावदान्य हैं, उनसेकी गयी प्रार्थना कभी भी विफल नहीं होती अर्थात् प्रार्थनाका फल निश्चय ही प्राप्त होता है॥१३३-१३४॥

श्रीकृष्णचन्द्र कस्यापि तृप्तिरस्तु कदापि न।
भवतोऽनुग्रहे भक्तौ प्रेम्णि चानन्दभाजने॥१३५॥

श्लोकानुवाद—हे श्रीकृष्णचन्द्र! मैं यह वर माँगता हूँ कि आनन्दस्वरूप आपके अनुग्रह (कृपा), भक्ति और प्रेमसे कभी भी किसीकी तृप्ति न हो॥१३५॥

दिग्दर्शिनी टीका—भवदनुग्रहादौ कस्यापि जनस्य कदाचिदपि तृप्तिरलंबुद्धिर्मास्तु मा भवत्विति प्रार्थनम्। यावान् तावान् परमकाष्ठाप्राप्तोऽपि भवदनुग्रहादिर्भवतु, तथाप्येतावतैव परिपूर्त्तिर्जातेति मतिर्माभूदित्यर्थः। तत्र च यद्यप्यनुग्रहाद् भक्तिः, ततः प्रेमा स्यादित्यतः समुच्चयो न घटते, तथापि कञ्चित् प्रति कश्चिदनुग्रहः स्यात्; कस्यापि च काचिद्भक्तिर्जायत इत्यभिप्रायेण तथोक्तम्। कुतः? आनन्दस्य भाजने आस्पदे; एतच्चानुग्रहादीनां त्रयाणामेव विशेषणं ज्ञेयम्। अतः केवलज्ञाननिष्ठानाम्–आत्मारामाणां स्वरूपानुभवतुच्छसुखे तृप्तिरिव भवदनुग्रहादावपि भक्तानां कथञ्चिदपि तृप्तिर्नैव युक्तेति भावः; अन्यथा तत्तदानन्दविशेषानुभवस्यैवासिद्धेरिति दिक्॥१३५॥

भावानुवाद—आपके अनुग्रहसे, आपकी भक्तिसे और आपके प्रति प्रेमसे कभी भी किसीकी तृप्ति न हो, यही मेरा प्रार्थित वर है। अर्थात् आपका अनुग्रह आदि जहाँ तक अपनी चरमसीमाको प्राप्तकर सके, वहाँ तक उन्हें प्राप्त करने पर भी, 'मैंने सम्पूर्णरूपसे भगवान्की कृपा, भक्ति आदिको प्राप्तकर लिया है' ऐसी बुद्धि कभी भी किसीकी न हो। यद्यपि भगवान्के अनुग्रहसे भक्ति और भक्तिसे ही प्रेमका उदय होता है तथा यही क्रम है; तीनों एक साथ उदित नहीं होते हैं, तथापि कभी किसी भक्तके प्रति कुछ अनुग्रहका और कभी किसी भक्तके प्रति कुछ भक्तिका विकास देखा जाता है। इसी अभिप्रायसे अनुग्रह, भक्ति और प्रेमको पृथक्-पृथक् कहा गया है। यदि प्रश्न हो कि इन तीनोंका आधार या स्वरूप क्या है? इसके उत्तरमें कह रहे

हैं कि आनन्दरूप आधार होनेके कारण अनुग्रह, भक्ति और प्रेम ये तीनों आनन्दस्वरूप भगवान्‌के ही विशेषण हैं। अतएव केवल ज्ञान-निष्ठ आत्माराम व्यक्तियोंकी स्वरूपानुभूतिके तुच्छ सुखकी तृप्ति तो हो सकती है, परन्तु भगवान्‌के अनुग्रह आदिको प्राप्त करनेवाले भक्तोंको उन अनुग्रह आदिसे तनिक भी तृप्ति नहीं होती। अन्यथा भगवान्‌के अनुग्रह, भक्ति और प्रेमानन्दके अनुभवका वैशिष्ट्य स्थापित नहीं होता॥१३५॥

श्रीभगवानुवाच—

विदग्धनिकराचार्य को नामायं वरो मतः।
स्वभावो मत्कृपाभक्तिप्रेम्णां व्यक्तौऽयमेव यत्॥१३६॥

श्लोकानुवाद—श्रीभगवान्‌ने कहा—हे विदग्धचूड़ामणि श्रीनारद! आपने यह क्या वर माँगा? मेरी कृपा, भक्ति और प्रेमका तो ऐसा स्वभाव ही है और इसे सभी जानते हैं॥१३६॥

दिग्दर्शिनी टीका—हे विदग्धनिकराणामाचार्य गुरो! इत्युपहासः, स्वभावसिद्धत्वेन वरस्य वैयर्थ्यापत्तेः। यद्वा, सर्वं स्वयं जानतापि, तथा साक्षात् सम्प्रत्येव तत्तत्त्वमनुभवतापि तादृशवरप्रार्थनं केवलं वैदग्धीविशेषात् केनाप्यभिप्रायेणेति तत्त्वत एव तथा सम्बोधनम्। स च पूर्वमेवोद्दिष्टः साक्षात् श्रीकृष्णाननादेव श्रोतुकाम इत्यनेन। यद्‌यस्मात् तत् कृपादीनामयमेव व्यक्तः स्फुटः प्रसिद्धो वा स्वभावः प्रकृतिः॥१३६॥

भावानुवाद—हे विदग्धजनोंके आचार्य! (यह सम्बोधन उपहासपूर्वक किया गया है) भक्तिमें कभी भी किसीको तृप्ति नहीं होती, यह भक्तिका स्वाभाविक धर्म है, अतः आपके द्वारा उक्त वरकी प्रार्थना व्यर्थ है। अथवा श्रीनारद स्वयं सब कुछ जानने पर भी तथा अब साक्षात्‌रूपसे उसका तत्त्व अनुभव करके भी ऐसे वरकी प्रार्थना केवल विदग्धताके कारण किसी निगूढ़ अभिप्रायकी सिद्धिके लिए कर रहे हैं, इसलिए यथार्थतः श्रीकृष्णने उन्हें इस प्रकारसे सम्बोधन किया है। वह अभिप्राय पहलेसे ही उद्दिष्ट होने पर भी अर्थात् भगवान्‌की कृपा आदिका ऐसा स्वभाव पहलेसे ही प्रसिद्ध होने पर भी, अब साक्षात् श्रीकृष्णके मुखसे श्रवण करनेके लिए ही श्रीनारदने ऐसी चतुरता की है॥१३६॥

प्रयागतीर्थमारभ्य भ्रामं भ्राममितस्ततः।
अत्रागत्य च ये दृष्टाः श्रुताश्च भवता मुने॥१३७॥
सर्वे समस्तसर्वार्था जगन्निस्तारकाश्च ते।
मत्कृपाविषयाः किञ्चित् तारतम्यं श्रिताः परम्॥१३८॥

श्लोकानुवाद—हे मुनिवर! आपने प्रयागतीर्थसे लेकर यहाँ तक भ्रमण करते-करते जिन-जिन भक्तोंके विषयमें श्रवण किया और जिनका दर्शन किया, वे सभी मेरे कृपापात्र होनेके कारण कृत-कृतार्थ हैं तथा वे जगतका निस्तार करनेवाले बन गये हैं। फिर भी उन सबमें कुछ तारतम्य (न्यूनाधिकता) है॥१३७-१३८॥

दिग्दर्शिनी टीका—एतच्च सम्प्रति त्वयैवानुभूतमस्तीत्याह—प्रयागेति सार्धद्वयेन। इतस्ततः ब्रह्माण्डमध्ये तद्बहिश्च। अत्र द्वारकायाम्; ये च श्रुताः श्रीवैकुण्ठवासिनः श्रीनन्दव्रजजनाश्च॥१३७॥

ते सर्वे जगन्निस्तारकाश्चेति परानपि परिपूर्णसर्वार्थान् कर्त्तुं समर्था इत्यर्थः। यतो मम कृपाया विषया आश्रयाः। नन्वेवं चेत्तर्हि तेषां सर्वेषामप्येकरूपता अभविष्यत्। यया च बहुधा भेदो दृष्टः। सत्यं भक्तिस्वभावादित्याह—परं केवलं किञ्चित् स्वल्पं तारतम्यं न्यूनाधिकभावं श्रिताः प्राप्ताः; पूर्वपूर्वेभ्य उत्तरोत्तराः श्रेष्ठा इत्यर्थः। एवं सर्वतः श्रैष्ठ्यं परमभगवतीषु श्रीराधादिषु पर्यवसितं ज्ञेयम्। तारतम्ये सत्यपि स्वस्वरसजातीयसुखपरमकाष्ठासम्पत्त्या सर्वेषामेव तेषां परिपूर्णार्थता सिध्यत्येवेत्यग्रे श्रीगोलोकमाहात्म्ये विस्तारेण व्यक्तं भावि॥१३८॥

भावानुवाद—अभी आपने स्वयं ही मेरी कृपा, भक्ति और प्रेमके स्वभावका साक्षात् अनुभव किया है, इसे 'प्रयाग' इत्यादि ढाई श्लोकोंमें कह रहे हैं। आपने प्रयाग तीर्थसे लेकर ब्रह्माण्डके भीतर और बाहर अनेक स्थानों पर भ्रमण करते-करते तथा अन्तमें इस द्वारकामें आकर जिन-जिन भक्तोंका दर्शन किया है तथा जिन वैकुण्ठवासी और व्रजवासियोंकी कथा श्रवण की है, उन सबको परिपूर्णमात्रामें अपने-अपने अभीष्टकी प्राप्ति हुई है, इसलिए वे जगतका उद्धार करनेमें समर्थ हैं। इसका कारण है कि वे सभी मेरी कृपाके पात्र हैं।

यदि प्रश्न हो कि तब तो वे सभी एक समान होने चाहिए, किन्तु मैंने तो उनमें अनेक प्रकारके भेद देखें हैं। इसके उत्तरमें भगवान्‌ने

कहा कि, यह सत्य है, किन्तु भक्तिके स्वभावमें भेदके कारण उनमें भी केवल किञ्चित् तारतम्य है। अर्थात् वे सभी मेरे कृपापात्र हैं, तथापि उनमें किञ्चित् न्यूनाधिक भाव दिखाई देता है और यह भाव भी पूर्व-पूर्वके क्रमसे उत्तरोत्तर श्रेष्ठ है। अर्थात् आपने प्रयाग तीर्थसे आरम्भ करके द्वारका तक भ्रमण करके जिन-जिन भक्तोंसे वार्त्तालाप किया है, उनमें क्रमानुसार पहले भक्तकी तुलनामें बादवाला भक्त अधिक श्रेष्ठ है। अतएव इस विचारके अनुसार परम भगवती श्रीराधिका आदि गोपियाँ भक्ति-तत्त्वकी दृष्टिसे सर्वश्रेष्ठ हैं, ऐसा समझना चाहिए। इस प्रकारका तारतम्य होने पर भी अपने-अपने रससे उत्पन्न सुखकी चरमसीमारूप सम्पत्तिमें उन सभीकी परिपूर्ण अभीष्ट प्राप्ति प्रमाणित हो रही है। इस विषयकी विस्तारपूर्वक व्याख्या श्रीगोलोक-माहात्म्यमें होगी॥१३७-१३८॥

तथापि तेषामेकोऽपि न तृप्यति कथञ्चन।
तद्गृहाण वरानन्यान्मत्तोऽभीष्टतरान् वरान्॥१३९॥

श्लोकानुवाद—तथापि उनमेंसे कोई एक भक्त भी किसी भी प्रकारसे तृप्त नहीं हुआ, अतएव आप मुझसे अन्य कोई अभीष्ट वर माँग लीजिए॥१३९॥

दिग्दर्शिनी टीका—एकोऽपि कश्चिदपि कथञ्चनेति सपरिकरमदीय-परमानुग्रहादिप्राप्त्यापीत्यर्थः। न तृप्यतीति सर्वैरेव तैरात्मनोऽसौभाग्यादिवर्णनेन न्यूनतास्थापनात्। तत्तस्मात् वरान् श्रेष्ठान् वरान् वरणीयार्थान् तत्राप्यभीष्टतरान् निजप्रियतमान् मत्तो गृहाण॥१३९॥

भावानुवाद—इस प्रकारका तारतम्य होने पर भी उनमेंसे कोई एक भक्त भी किसी प्रकारसे तृप्त नहीं हुआ। अर्थात् परिकररूपमें मेरे परम अनुग्रह आदिको प्राप्त करने पर भी कोई किसी प्रकारसे तृप्त नहीं हुआ। इसलिए उन सबने अपने-अपने दुर्भाग्य आदिके वर्णन द्वारा अपनी न्यूनताको स्थापित किया है तथा अपनेसे श्रेष्ठ भक्तोंके सौभाग्यका वर्णन किया है। अतएव आप मुझसे अपने किसी अभीष्टतर वरकी प्रार्थना करें॥१३९॥

श्रीपरीक्षिदुवाच—

नर्तित्वा नारदो हर्षाद्भैक्ष्यवत् सद्वरद्वयम्।
याचमानो जगादेदं तं वदान्यशिरोमणिम्॥१४०॥

श्लोकानुवाद—महाराज श्रीपरीक्षितने कहा—तब श्रीनारदने प्रसन्नता-पूर्वक नृत्य करते-करते महावदान्य (अर्थात् उदार दाताओंमें सर्वश्रेष्ठ) श्रीकृष्णसे भिक्षाकी भाँति दो उत्कृष्ट वरोंके लिए प्रार्थना की॥१४०॥

दिग्दर्शिनी टीका—हर्षश्च विप्रादीनां तेषां सर्वेषामपि परिपूर्णार्थतायाः भगवदनुग्रहादिषु स्वभावतो भक्तानामतृप्तेर्वा साक्षाच्छ्रीभगवन्मुखेन श्रवणात्। तस्माद्धेतोर्नर्तित्वा क्षणं नृत्यं कृत्वा। भैक्ष्यवदिति यथा वस्त्रादिकं प्रसार्याञ्जलिं बद्ध्वा वा भिक्षान्नादिकं प्रार्थ्यते तथैत्यर्थः। यद्वा, यथा निजजीवनरक्षार्थं भिक्षुभिः परमाग्रहेण तद्याच्यते तद्वदिति। सत् उत्कृष्टं वरद्वयं याचमानः याचिष्यमाणः इदं वक्ष्यमाणं स्वदानातृप्तेत्यादि सार्धपद्यं तं भगवन्तं प्रति प्राग् जगादेत्यर्थः। तच्च तादृशवरद्वयप्राप्तये भगवतः परमस्तुत्यर्थमिति ज्ञेयम्॥१४०॥

भावानुवाद—देवर्षि श्रीनारद साक्षात् श्रीकृष्णके मुखसे विप्र आदि भक्तोंके समस्त अभीष्टोंकी परिपूर्णता और उनके (भगवान्के) अनुग्रहसे स्वाभाविकरूपमें कभी किसीकी तृप्ति नहीं होती, ऐसा श्रवणकर आनन्दसे नृत्य करने लगे। जिस प्रकार भिक्षुक वस्त्र आदि पसारकर भिक्षाकी प्रार्थना करता है, अथवा अपने जीवनकी रक्षाके लिए परम आग्रह सहित अन्न आदिकी प्रार्थना करता है, उसी प्रकार श्रीनारदने भी श्रीकृष्णसे दो उत्कृष्ट वरोंकी प्रार्थना करनेसे पहले आगे कहे जानेवाले 'स्वदानातृप्त' इत्यादि आधे श्लोकको कहा है। अतएव इसे उन दो वरोंकी प्राप्तिके लिए भगवान्की स्तुति समझना चाहिए॥१४०॥

श्रीनारद उवाच—

स्वदानातृप्त वृत्तोऽहमिदानीं सफलश्रमः।
त्वन्महाकरुणापात्रजनविज्ञानमाप्तवान्॥१४१॥

श्लोकानुवाद—श्रीनारदने कहा, हे अपने-आपको दान देकर भी अतृप्त रहनेवाले भगवान्! आज मेरा सारा परिश्रम सफल हो गया

है, क्योंकि मैंने आपकी असीम करुणाके पात्रोंको विशेषरूपसे जान लिया है॥१४१॥

दिग्दर्शिनी टीका—हे स्वस्य दानेऽप्यतृप्त! सफलः साफल्यं प्राप्तः श्रमः अध्ययनादिप्रयासः प्रयागादितस्ततो भ्रमणायासो वा यस्य तथाभूतोऽहमिदानीमेव वृत्तः। यतः त्वदीयमहाकरुणायाः पात्राणां जनानां विज्ञानमहं प्राप्तवान्। ता भगवत्यो गोप्य एव त्वत्करुणासारचरमकाष्ठापात्रमिति सम्प्रत्येव साक्षाद-हमन्वभवमित्यर्थः॥१४१॥

